प्रौढमनोरमा

अव्ययीभावपर्यन्ता

महामहोपाध्यायपण्डितप्रवरश्रीभट्टोजिदीक्षितकृता
वैयाकरणसिद्धान्तकौमुदीव्याख्या ।

तत्पौत्रेण म.महोपाध्यायश्रीहरिदीक्षितेन निर्मितया
लघुशब्दरत्नाख्यया व्याख्यया समलंकृता ।

महामहोपाध्यायसी-आई-ई-गुरुवर–श्रीदश्रीगङ्गाधरशास्त्रिभ्यो-
ऽधिगतविद्येन रत्नगोपालभट्टेन
संशोधिता ।

चौखम्भासंस्कृतस्तकालयाऽध्यक्ष–हरिदासात्मज–
हरिकृष्णदासेन स्वकीये विद्याविलास-
यन्त्रे संमुद्रिता ।

PRAUDHAMANORAMÂ

AVYAYÎBHÂVÂNTA.

BHATTOJÎ DÎKSHITA'S COMMENTARY ON HIS
SIDDHÂNTA KAUMUDÎ

with its gloss called Laghu Śabdaratna by the
author's grand son Hari Dîkshita.

Edited by Pandit Ratnagopâla Bhatta.

Printed at the Vidya Vilasa Press
by Harikrishna Dasa Gupta.
BENARES

1910.

भूमिका ।

—:o:—

अखिलकार्यकारणसत्ताप्रदः परमात्मा सर्वज्ञः सर्वशक्तिः परमकारुणिकः सच्चिदानन्दघनः सर्वकल्याणगुणाधारो भक्तानुग्रहपरवशः सर्वहिताय वेदादिसर्वशास्त्राणि महर्षिद्वारा प्रकाशितवान् । तेषु सर्वोपकारकारकत्वेन प्रधानमङ्गं व्याकरणमेव । तत्रापि बहूनि व्याकरणानि महर्षिभिः प्रकाशितानि सूत्रभाष्यवार्त्तिकरूपाणि । तत्प्रयोजनानि तु रक्षोहागमलघ्वसन्देहाः । शब्दनिष्पत्तिर्विषयः । शब्दसाधुत्वाऽसाधुत्वज्ञानं व्याकरणादेव भवति । तज्जिज्ञासुरधिकारी । प्रतिपाद्यप्रतिपादकादिभावः सम्बन्धः ।

तत्र च वैदिकलौकिकसर्वशब्दसाधुत्वादिप्रकाशकं पाणिनीयव्याकरणमेवोपयुक्तमधिकारिणां, सर्वेषु प्रधानभूतं च । तद्भाष्यकारो महर्षिः पतञ्जलिर्वार्त्तिककारस्तु महर्षिः कात्यायनः । सूत्रकारस्तु परमकारुणिकः सर्वज्ञः परमदयालुर्ब्रह्मनिष्ठो दाक्षीपुत्रो महर्षिः पाणिनिः, परमाचार्यवर्यः, सकलशास्त्रमर्मज्ञः, पदवाक्यप्रमाणपारावारीणः ।

तदेतत्सर्वं, परममर्मज्ञो, महाभाष्ये कृतभूरिपरिश्रमश्च, झटिति सर्वेषां व्याकरणबोधो भवेदिति कृत्वा परमकारुणिकत्वेन सर्वशास्त्रविशारदो भट्टोजिदीक्षितः सर्वजनोपकाराय सिद्धान्तकौमुदीं विरचितवान् । तद्व्याख्या च प्रौढमनोरमा रमेव विद्वच्छिखामणिप्रियतमा तेनैव विरचिता । तत्पौत्रेण च पदवाक्यप्रमाणज्ञेन श्रीहरिदीक्षितेन निर्मितया लघुशब्दरत्नाख्यया व्याख्यया समलङ्कृता । सेयं सर्वजनोपकाराय सौलभ्याय च वैश्यवर्यहरिदासाऽऽत्मजहरिकृष्णाख्येन श्रेष्ठिना निजविद्याविलासनाम्नि सीरीजयन्त्रे मुद्रापयित्वा प्रकाशं नीता एतादृशपुस्तकरत्नलाभाय त्वरयन्तु रसिका ग्राहका इति शम् ॥

सर्वमुमुक्षुपरमहितैषी
प्रज्ञानानन्दसरस्वतीस्वामी
कैवल्यधाममठनिवासी
ब्रह्मघाट

विषयसूची।

—:०:—

		पृ०
१	मङ्गलाचरणम्	२
२	प्रौढमनोरमानिरुक्तिः	२
३	संज्ञाप्रकरणम्	२
४	परिभाषाप्रकरणम्	१७
५	अच्सन्धिः	२१
६	हल्सन्धिः	४९
७	विसर्गसन्धिः	५९
८	स्वादिसन्धिः	६४
९	अजन्तपुँल्लिङ्गम्	७०
१०	अजन्तस्त्रीलिङ्गम्	१२८
११	अजन्तनपुंसकलिङ्गम्	१३४
१२	हलन्तपुंल्लिङ्गम्	१४०
१३	हलन्तस्त्रीलिङ्गम्	१७४
१४	हलन्तनपुंसकलिङ्गम्	१७५
१५	अव्ययानि	१७८
१६	स्त्रीप्रत्ययाः	१८२
१७	कारकप्रकरणम्	२०३
१८	समासेऽव्ययीभावः	२४७

श्रीगणेशाय नमः ।

प्रौढमनोरमा

शब्दरत्नाख्यव्याख्यासहिता ।

ध्यायंध्यायं परं ब्रह्म स्मारंस्मारं गुरोर्गिरः ॥
सिद्धान्तकौमुदीव्याख्यां कुर्मः प्रौढमनोरमाम् ॥ १ ॥

हयवरट् ॥ हकारोपदेशः, अट्अश्हश्इण्ग्रहणेषु हकारग्रहणाऽर्थः । अर्हेण । अड्व्यवायेऽपीति णत्वम् । देवा हसन्ति । भोभगो इति रोर्यत्वम् । देवो हसति । हशि चेत्युत्वम् । लिलिहिद्वे । लिलिहिध्वे । विभाषेट इति वा ढः॥

शेषविभूषणमीडे शेषाशेषार्थलाभाय ॥
दातुं सकलमभीष्टं फलमीष्टे यत्कृपादृष्टिः ॥ १ ॥

ध्यायमिति ॥ ध्यात्वाध्यात्वेत्यर्थः । णमुलन्तमेतत् । परं सर्वजगदुपादानम् । कार्यब्रह्मविरण्यगर्भव्यावृत्तय इदम् । ध्यानं चिन्तापरपर्यायं स्मृत्यनुकूलव्यापाररूपम् । स्मरणं तु तज्जन्यमिति विशेषः । गुरोरित्येकवचनेन सर्वविद्यालाभ एकस्मादेव गुरोरिति सूचितम् । प्रौढानां मनो रमयतीत्यर्थिकां मनोरमाम् । प्रौढत्वं च सकलदर्शनार्थज्ञानपूर्वकमहाभाष्यगूढार्थज्ञानवत्त्वम् ॥ इण्ग्रहणेष्विति॥ नन्विदं न्यूनमम्ग्रहणेऽपि ग्रहणात् । फलं तु बहुपुम्क्हित्यादौ, पुमः खय्यमिति रुत्वम् । गवित्ययमाहेत्यादिवदपदान्तत्वात् ककारादेर्न जश्त्वमितिचेन्न । सुट्तिथोरित्यादाविकारादुच्चारणेन शास्त्राबोधिताजव्यवहितहल्समुदायस्यासाधुत्वबोधनात् । अत एवोच्चैरुदात्त इति सूत्रे भाष्यम् । न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणमपि भवतीति । स्कोरित्यादिस्तु सौत्रः प्रयोगः । अत एवाटि हकारप्रयोजनकथनावसरे भाष्ये शश्छोटीत्युपन्यस्य तदुदाहरणं नोपन्यस्तम् । हकारपरशकारासम्भवेन शश्छोटीति प्रसङ्गोच्चारितमिति च कैयटेन व्याख्यातम् । अमि हकारप्रयोजनमिति च भाष्ये नोक्तमिति दिक् ॥

हल् ॥ इदं सूत्रं वल्रल्झल्शल्षु हकारग्रहणार्थम् । रुदिहि स्वपिहि । रुदादिभ्यः सार्वधातुक इति वलादिलक्षण इट् । स्निहित्वा । स्नेहित्वा । रलो व्युपधादिति वा कित्त्वम् । अदाग्धाम् । झलो झलीति सकारलोपः । अलिक्षत् । शल इगुपधादिति क्सः ॥

हलन्त्यम् ॥ सूत्रेऽन्त्यमिति ॥ हलि अन्त्यमिति विग्रहे, सप्तमीति योगविभागात् सुप्सुपेति वा समास इति भावः । यद्वा । षष्ठीतत्पुरुषोऽयम् । स्यादेतत् । हलित्येकदेशस्यैव [illegible]ममस्तु । हस्य ल् इति च व्याख्यास्यते । सामीप्यं षष्ठ्यर्थः । यद्वा मास्तु तन्त्रादि । अस्तु समाहारद्वन्द्वो हल् च ल् चेति । लकारस्य संयोगान्तलोप इति चेन्मैवम् ॥ आद्ये समासस्य क्लिष्टत्वात् । न हि ब्राह्मणस्य कम्बल इत्यादौ ब्राह्मणसमीप-

---

इदं सूत्रमिति ॥ वलादिप्रत्याहाराश्च रेफेणैव सन्तु । हरन्त्यमित्यत्रान्योन्याश्रयपरिहारस्तु, रन्त्यं हरितिन्यासेनावृत्त्या हर्प्रत्याहारबोधकसूत्रसमुदायान्त्यमिदित्यर्थेन वा सुकर इति भावः॥ ग्रहणार्थमिति॥ शषसहरित्येव तु नोक्तम् । खरि हकारग्रहणापत्तौ हरिर्हरतीत्यादौ विसर्गापत्तेः ॥ सप्तमीति ॥ अधिकरणकारकस्य कर्त्राद्यन्वयद्वारा क्रियान्वयादस्ति सामर्थ्यमिति भावः । अस्य योगविभागस्य भाष्येऽदर्शनादाह ॥ सुप्सुपेतीति ॥ अनेनापि साधनस्यागतिकगतित्वादाह ॥ यद्वेति ॥ हलो – हलिति सूत्रस्यान्त्यमिति विग्रह इति भावः। षष्ठीस्थाने इत्यस्य चोदुपधाया गोह इत्यादाविव गुणानां च परार्थत्वादिति न्यायेन वाऽप्रवृत्तिरिति बोध्यम् ॥ तन्त्रावृत्त्येकशेषान्यतममस्त्विति ॥ यद्यपीदृशे विषये उच्चारयितुस्तन्त्रैकशेषान्यतरोच्चारणं, बोद्धुस्त्वावृत्त्या बोध इत्येवानुभवसिद्धं, तथापि व्यवस्थितैवान्यतमसत्तानेन बोध्यत इति न दोषः । एकशेषश्च प्रत्याख्यातोऽसहविवक्षायामपि शास्त्रमात्रप्रक्रियोपयोगीत्याशयेन पृथगुक्तः ॥ सामीप्यं षष्ठ्यर्थ इति ॥ षष्ठीस्थान इत्यस्य, गुणानां च परार्थत्वादिति न्यायेनाप्रवृत्तिः । न चेको गुणवृद्धी इति सूत्रे तच्छेषशब्देन परिभाषयोरपि गुणगुणिभाव उक्त इति वाच्यम् । सार्वधातुकार्धधातुकयोरलोन्त्यस्येको गुणवृद्धी इति सूत्रत्रयस्य लक्ष्यसंस्कारकमहावाक्ये विशेष्यविशेषणभावमादायैव तच्छेषव्यवहारो, न तु गुणगुणिभावेन परस्परापेक्षत्वेन वेति कैयटेन स्पष्टमुक्तेरेतन्मूलकतयैव तत्पक्षासम्भवस्य तेनोक्तेश्चेति भावः ॥

क्लिष्टत्वादिति ॥ ब्राह्मणस्य कम्बल इत्यादावसत्यपि प्रकरणादौ स्वस्वामिभावादिप्रतीतिबदनन्तरसमीपादिशब्दप्रयोगमन्तरेण सामीप्याद्यप्रतीतेस्तस्य षष्ठ्यर्थत्वाभावात् तत्प्रयोगे त्वसामर्थ्यात् षष्ठीसमासाप्राप्तिरिति मध्यमपदलोपि-

वर्ती अन्यदीयः कम्बलः प्रतीयते । न वा चित्रगुशब्दाच्चित्रगवीणां समीपवर्त्ती वृक्षादिः प्रतीयते । अत एवानन्तरादिषु न समासोऽनभिधानादिति स्पष्टमाकरे । किं बहुना, ब्राह्मणस्य कम्बलश्चित्रा गावोऽस्येति व्यस्तप्रयोगोऽपि तत्रानिष्टः ॥ द्वितीयेऽपि संयोगान्तलोपो दुर्लभो यणः प्रतिषेधारम्भात् । तत्प्रत्याख्यानपक्षेऽपि झलो, झलीत्यतो झल्ग्रहणमपकृष्य संयोगान्तस्य झलो लोपविधानाच्च । किञ्च, पदार्थबोधं विना वाक्यार्थबोधासम्भवेन हल्प्रत्याहारसिद्धेः प्रागेतत्सूत्रार्थाबोधे प्रसक्ते तदुद्धारार्थोऽयं यत्नः । अस्यां चावस्थायां हल्शब्दार्थाप्रसिद्धौ द्वन्द्व एव दुर्लभः । सहविवक्षाया असंभवात् । तस्माद्यथोक्तमेव न्याय्यम् ॥

समासे सौत्रे वा तत्र समासस्य क्लिष्टत्वमिति भावः । तदेतदाह॥ न हीत्यादिना, तत्रानिष्ट इत्यन्तेन ॥ चित्रगवीणामिति ॥ कुमति चेति णत्वम् । दन्त्यपाठस्तु लेखकप्रमादात् । एवं स्त्रीगवीणामित्येकशेषप्रकरणान्तस्थकैयटप्रयोगेऽपि बोध्यम् । अस्तेरनन्तरे समीपे वेत्यादि भाष्यं त्वनन्तरादिपदाध्याहारेण तन्निरूपितसंबन्धार्थिका, स्थानपदाध्याहारेण तन्निरूपितसंबन्धार्थिका वा षष्ठीत्यभिप्रायकम् । अत एव मतुप्सूत्रे कैयटेन, गावोऽस्य सन्त्यनन्तरा इत्यर्थे मतुप्शङ्कापरभाष्यव्याख्यावसरे आनन्तर्यमस्त्यर्थवत् प्रकृत्यर्थोपाधिरित्युक्तम् । न तु तस्य षष्ठ्यर्थत्वेन प्रत्ययार्थत्वमुक्तम् । भाष्यकृता चासामर्थ्यात्तत्र वृत्त्यभाव उक्तः । षष्ठ्यर्थत्वे तु प्रत्ययार्थत्वात् कासामर्थ्यम् । तस्माद्यत्र षष्ठ्यन्तमात्रप्रयोगे आनन्तर्यादिप्रतीतिस्तत्रानन्तरादिपदाध्याहार एव बोध्यः । तत्रास्तिग्रहणाभावे तस्यान्यफलकत्वे वा सूत्रानुपात्तास्त्यर्थान्तर्भावेण मत्वर्थीयवद् बहुव्रीहिवच्च तथाभूतानन्तर्यार्थान्तर्भावेण चित्रा गावोऽस्य सन्त्यनन्तरा इत्याद्यर्थे बहुव्रीहिमत्वर्थीयौ न भवतोऽनभिधानादिति मतुप्सूत्रे भाष्ये स्पष्टम् । अनन्तरादेरिदमर्थत्वे तस्येदमिति शैषिकोप्यनभिधानान्नेति तस्येदमित्यत्र भाष्ये । तदुक्तम्, अनन्तरादिषु न समासोऽनभिधानादिति स्पष्टमाकर इति ॥ तत्र समासग्रहणं तद्धितवृत्तेरप्युपलक्षणम् । अनन्तरादिशब्दैः षष्ठीतत्पुरुषादिस्तु भवत्येव । ग्रामकूपो गङ्गातीरमित्यादौ समीप एवावयवत्वारोपेण समासः । स्पष्टा चेयं रीतिर्मपर्यन्तस्येति सूत्रे कैयटे । किञ्च, हस्य लित्यर्थे, हल विलेखन इति धातोर्लस्येत्वापत्तिः । न च फलाभावः । देवदत्तहलित्यादौ डित्वसामर्थ्यादभस्यापि टेर्लोपबलित्वसामर्थ्यात् प्रत्ययात् पूर्वत्वाभावेऽपि लित्स्वरस्यैव फलत्वं वक्तुं शक्यमित्यपि बोध्यम् । यद्यपि हलसीरादिति निर्देशेन तस्य नेत्त्वमिति कल्पयितुं शक्यम् । तथापि ज्ञापकस्वीकारापेक्षया सूत्रावृत्तिरेव लघीयसीति दिक् ॥ झलो लोपेति ॥ सौत्रलोपाश्रयणे तु मूलोक्तमेव लघु ॥

असम्भवादिति । न चाद्यन्तौ टकितावित्यादौ य[illegible]ऽपि प्रथम-

मध्यगानामिति ॥ आद्यन्ताभ्यामवयवाभ्यामवयवी समुदाय आक्षिप्यते । तस्य च युगपल्लक्ष्ये प्रयोगाभावात्तदवयवेष्ववतरन्ती सञ्ज्ञा मध्यगेषु विश्राम्यति, न त्वाद्यन्तयोः । सञ्ज्ञास्वरूपान्तर्भावेण तयोः पारार्थ्यनिर्णयादिति भावः ॥ स्वस्य चेति ॥ स्वं रूपमित्यनुवृत्तेः स्वं रूपं चादेरेव गृह्य-

---

तः साहित्यावच्छिन्ने साहित्यावच्छिन्नान्वयमात्रेण सहविवक्षामाश्रित्य यथा द्वन्द्वसाधुत्वं तथेहापि प्रथमतो लकारो हल्पदवाच्यश्च इदिति सामान्यतो बोधं कल्पितमादाय द्वन्द्वसाधुत्वं, ततो विशेषबोधादिरन्त्येनेत्येकवाक्यतया विशेषतो वाक्यार्थो लक्ष्यसंस्कारकः । किञ्च, सहविवक्षा सह वक्तुं वक्तुरिच्छा, सा च सूत्रप्रणयनानुपपत्त्या पाणिनेस्ततः पूर्वमपि हल्पदार्थज्ञानादक्षतैव, बोद्धृबोधस्तु क्रमेणैवेति वाच्यम् । आद्यन्तावित्यादौ यथासङ्ख्यसूत्रारम्भसामर्थ्येन तथा साधुत्वाङ्गीकारेऽप्यन्यप्रकारेण तस्य साधुत्वकल्पने मानाभावात् । किञ्च, श्रोतॄणां सह बोधो भवत्वितीच्छया सहवक्तुमिच्छाया एव सहविवक्षात्वेन श्रोतॄणामपि सहबोध एवोचितः । तादृशेच्छया तेषां तादृशबोधाजनकशब्दप्रयोगे तु पाणिनेर्भ्रान्तत्वापत्तिः । मुखमवनं पश्येत्यादौ तु न दोषः । उभयज्ञत्वेन ज्ञातं प्रत्येव तादृशशब्दप्रयोगात् । तेन रूपेण ज्ञानं भ्रमः प्रमा वेत्यन्यदेतत् । किञ्च, पाणिनेः पूर्वं हल्पदार्थज्ञानेऽपि तदभिप्रायेण न प्रयोगः । अन्यथा व्याख्यातृपरम्परावगतवक्तृतात्पर्यानुपपत्त्या,लट् स्म इति सूत्रस्थकैयटोक्तरीत्या लक्षणया तन्त्रान्तरीयप्रथमादिव्यवहारेण प्रथमादिपदानामिव शक्त्यनुमानाद्वा ततः श्रोतॄणां बोधसंभवेनेतरेतराश्रयस्यैवाभावेन तदाशङ्का–लश्चेतिवक्तव्यमित्यादिसमाधानपरभाष्यासङ्गत्यापत्तेः । न चैवमजादिव्यवहारस्यापि लक्षणाऽऽदिनैवोपपत्तावादिरन्त्येनेति सूत्रवैयर्थ्यम् । क्वचिल्लक्षणादिना बोध इति सर्वत्र लक्षणाद्याश्रयणमेवेति नियमाभावात् । नासूया कर्त्तव्या यत्रानुगमः क्रियत इति पङ्क्तिर्विंशतीति सूत्रे भाष्योक्तेः । तस्मात् करिष्यमाणशक्तिग्रहोपायकपदस्य तदभिप्रायेणाचार्यस्य पूर्वमप्रयोग इत्येव कल्पना ज्यायसी । ध्वनितश्चायमर्थो, नाऽऽज्झलाविति सूत्रेऽष्टादशानां ग्रहणाभावाय, वर्णानामुपदेशस्तावत् उपदेशोत्तरकालेत्सञ्ज्ञा, इत्सञ्ज्ञोत्तरकालः प्रत्याहारः, प्रत्याहारोत्तरकाला सवर्णसञ्ज्ञा, तदुत्तरमणुदिदिति सवर्णग्राहकमित्येतेन समुदितेनान्यत्र सवर्णानां ग्रहणं भवति, न स्वस्मिन्नापि स्वाङ्ग इत्येषं वाक्यापरिसमाप्तिप्रतिपादकभाष्येणाऽपि । अन्यथा तत्तच्छास्त्रप्रणयनानुपपत्त्या पाणिनेस्तथाज्ञानस्य पूर्वमपि सत्त्वेन आचार्येण तथा प्रयोगे बोद्धृणामपि क्रमेण तथा बोधे उपपन्ने, किं तेन कृतं स्यात्, कथं वा नाज्झलावित्यत्राष्टादशादीनां ग्रहणवारणं भाष्योक्तं सङ्गतं स्यादिति विभाव्यताम् । तदाह ॥ तस्मादिति ॥

आद्यन्ताभ्यामिति ॥ अवयवत्वेन बोधकाद्यन्तशब्दाभ्यामित्यर्थः ॥ तस्य= समुदायस्य ॥ तयोः पारार्थ्येति ॥ सञ्ज्ञास्वरूपबोधकतया शक्तिग्रहकाल एव त-

ते, नान्त्यस्य । अन्त्येनेत्यप्रधानतृतीयानिर्देशात् । सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शित्वात् ॥ आद्योच्चारणमिति॥ यद्यप्युपदिश्यतेऽनेनेति करण-व्युत्पत्त्या शास्त्रमुपदेश इति भाष्यवृत्त्यादिषु व्याख्यातं, तथापि तत्प्रौढि-वादमात्रम् । करणे घञो दुर्लभत्वात् । ल्युटा बाधात् । न च घः । असंज्ञा-त्वात् । प्रायेण संज्ञाग्रहणेति व्याख्यानस्य क्लिष्टत्वात् । न ह्युपाधेरुपाधि-र्भवतीत्यादिना भाष्यकृताऽवहेलनाच्च । अत एव घापवादो हलश्चेति घञपीह न । बाहुलकं त्वगतिकगतिः । अत एव प्रक्रियन्ते शब्दा याभिरिति

योः पारार्थ्यनिर्णयादित्यर्थः ॥ परामर्शित्वादिति ॥ वस्तुतो ज्ञापकादिनाऽस्या-ऽपि न सञ्ज्ञाकार्यम् । आद्यन्तशब्दाभ्यामाद्यन्तघटितसमुदायस्याक्षेपेणान्येष-मिव तयोः प्राप्तायाः सञ्ज्ञायाः प्रकारान्तरेणाशक्यवारणत्वात् । स्वशब्दानुवृ-त्तेश्च न फलम् । भाष्येऽपि एतत्फलितार्थकथनमेव, स्वस्य च रूपस्येति । सञ्ज्ञा-स्वरूपत्वं विशिष्टस्यास्तु; प्रत्येकं स्वबोद्धत्वं चास्तु, को विरोधः । यथाऽद्य धेरित्यादौ गुणदर्शनेन धिशब्दस्यापि धिसञ्ज्ञाबोद्धत्वं तद्वत् । एवमजादिसंज्ञा स्वसञ्ज्ञिघटकेकारादिष्विवाकारचकारयोरपि प्राप्नोत्येव । किञ्च, स्वशब्देन केवलान्त्यपरामर्शासंभवेऽपि विशिष्टपरामर्शे न बाधकम् । तत्र समुदाये फलाभावादवयवयोर्विश्रान्तिं प्राप्स्यति । तस्माज्ज्ञापकादिनैवान्त्यस्य तत्कार्यं वारणीयमित्यलम् ॥भाष्येति॥ तत्र हि,उपदेश इति किम् ? अभ्रआँ अपः । प्रत्यक्ष-माख्यानमुपदेशो गुणैः प्रापणमुद्देश इति नासावुपदेश इत्युक्त्वोपदेशोद्देशयोर्लोक-व्यवहारेण संकीर्णत्वमाशङ्क्योपदेशनेऽजनुनासिक इति वार्त्तिककृद्दर्शितन्यास-स्य खण्डनायोपदेश इति करणे घञुपदिश्यतेऽनेनेत्युक्तम् । तच्च शास्त्रं शासन-करणं प्रत्यासत्त्यैतच्छास्त्रीयधात्वागमप्रातिपदिकप्रत्याहारसूत्रप्रत्ययादेशरूपम् ॥ प्रौढिवादमात्रमिति ॥ वार्त्तिककृदुक्तन्यासीयार्थस्य कथञ्चित् सूत्रतोऽपि लाभ-सम्भवाद् न्यासान्तरप्रवृत्तिस्ते वृथैवेति प्रौढ्या बोधयितुमेवं वाद इति भावः ॥ घञ इति ॥ अकर्त्तरि चेत्यत्र सञ्ज्ञायामित्यस्य प्रायिकत्वात् तत्प्राप्तिरिति भावः॥ बाधादिति ॥ वासरूपविधिस्तु, क्त्वल्युट्तुमुन्खलर्थेषु प्रतिषिद्धः । न च तत्र साहचर्येण भावल्युट एव ग्रहणमिति वाच्यम् । ईषत्पानः सोमो भवतेत्यत्र कर्मणि खल् नेति भाष्यादिप्रामाण्येनात्र साहचर्यानाश्रयणादिति भावः ॥ क्लिष्टत्वा-दिति ॥ गुणप्रधानसन्निधौ प्रधानस्य विशेषणे साकाङ्क्षत्वे इतरान्वयस्तस्यायुक्त इति क्लेश इति भावः । तदाह ॥ न ह्रीत्यादिना ॥ भाष्यकृतेति॥ अस्यार्थस्येति शेषः । एवञ्च, उभयप्राप्तौ कर्मणीति नियमान्न कर्त्तरि षष्ठीति बोद्धम् ॥ अवहेलना-च्चेति ॥ चो हेतौ ॥ यतोऽवहेलनमतः क्लिष्टत्वमित्यर्थः ॥ घापवाद इति ॥ ल्युड-पवादश्चेत्यपि बोद्धम् । तत्रापि सञ्ज्ञायामित्यनुवृत्तेरिति भावः ॥ अगतिकगति-रिति ॥ न च खनो घ चेति घविधानमन्यतोऽपीत्यर्थमित्याकरे स्पष्टम् । तेनात्र घे सिद्ध्यतीति वाच्यम् । तस्यापि अगतिकगतित्वात् । भगः पदमित्यादौ यत्र

न्यव्युत्पत्तिरपि परास्ता । तथा च वार्त्तिकम्, अजब्भ्यां स्त्रीखलनाः स्त्रियाः खलनौ विप्रतिषेधेनेति।अतो भाव एव प्रत्ययो न्याय्य इति भावः॥

यत्तु धातुसूत्रेत्यादि पठन्ति । यच्च व्याचक्षते । करणव्युत्पत्त्या पूर्वार्द्धोपात्तानामुपदेशत्वम् । कर्मव्युत्पत्त्या त्वागमादीनाम् । उणादिलिङ्गानुशासनयोरपि सूत्रत्वात् सिद्धे पृथगुपादानं गोबलीवर्दन्यायेन।एवं गणत्वादेव सिद्धे धातोरपीत्यादि । अत्रेदं वक्तव्यम् । किमेषामुपदेशसञ्ज्ञा, उत योगमात्रम् । नाद्यः । संज्ञायाः शास्त्रकारैरनुक्तेः । असञ्ज्ञात्वाद् घप्रत्ययो नेति भाष्योक्तेश्च । अस्मदादिकृतसञ्ज्ञायाः शास्त्रव्यवस्थापकत्वेऽतिप्रसङ्गाच्च । आमोऽमित्त्वमदन्तत्वादिति स्वपरग्रन्थविरोधाच्च । न ह्युत्सृष्टानुबन्धस्यामो न प्रत्ययत्वं येन मित्त्वं न भवेत् । किञ्चैवं प्रत्ययविधौ पञ्चम्याः षष्ठीप्रकल्पकत्वे सनः सनेवादेशोऽस्त्वित्याशङ्क्योपदेशाभावादित्सञ्ज्ञा न स्यादिति भाष्यकैयटोक्तं व्याकुप्येत । किञ्च, न धातुलोप इति सूत्रे धातुग्रहणं किम् ? लूञ् लविता पूञ् पवितेतिभाष्यम्, उपदेश एवानुबन्धलोपे कृते ततो धातुसञ्ज्ञेत्येवम्परः कैयटग्रन्थश्च विरुद्ध्येत । अपि च,

---

त्वफलं तत्रैव तत्प्रवृत्तेश्च । पदस्य घञर्थे केन सिद्धेनैतदुदाहरणं, किन्तु क्वाचित्कं वाक्यं तत् । किञ्च उच्चार्य वर्णानाहोपदिष्टा इमे वर्णा इत्यादिभाष्यादुपदेशशब्दस्योच्चारणार्थत्वस्य निर्णयेन सङ्कीर्णलोकव्यवहारस्य लक्षणयाऽप्युपपत्त्या भावघञि बाधकाभावः । किञ्चोपदेशशब्दस्य प्रत्ययादिपरत्वे तस्यैव हलन्त्यमित्यत्रान्वयेन यत्किञ्चित्समुदायान्त्यस्य वारणसम्भवे तदर्थमन्त्यग्रहणसामर्थ्यादिवर्णनक्लेशो भाष्यकृतो व्यर्थः स्यादिति बोद्धव्यम् । उद्देशश्च प्रातिपदिकानां नोपदेश इत्यादेच उपदेशे, इति सूत्रे च भाष्ये भावघञन्त एव तस्याऽङ्गीकाराच्चेति दिक् ॥

धातुसूत्रेत्यादीति॥ धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम्*आगमप्रत्ययाऽऽदेशा उपदेशाः प्रकीर्तिता इतीत्यर्थः ॥ उपदेशत्वमिति ॥ उपदेशशब्दव्यवहार इत्यर्थः ॥ धातोरपीति॥प्रत्ययेभ्य उणादेरपीत्यपिशब्दार्थः । वाक्यशब्देन वार्तिकम् । शीङ्, लण् चोरद्, उण्, आचारेऽवगल्भ, धुड्, अण् अनङित्युदाहरणानि ॥ उपदेशसञ्ज्ञेति ॥ उपदेशपदं योगरूढमेष्विति भावः । ननु सञ्ज्ञाशब्देन व्यवहार एवाभिमतोऽत आह ॥ आम इत्यादि ॥ न चाकारोच्चारणं व्यर्थम् । तेनास्मत्पक्षज्ञापनस्यैवौचित्यादिति भावः । आदिना यकारादी चुञ्चुप्चणपावित्यादिसंग्रहः ॥ उपदेशाभावादिति ॥ आदेशस्योपदेशाभावादित्यर्थः ॥ ततो

ध्वसोरेद्धाविति सूत्रे लोपश्श्रेति द्विशकारको निर्देशः । द्वितीयः शकार इदिति अलोऽन्त्यसूत्रस्थभाष्यकैयटादिकमपि विरुद्ध्येत । न द्वितीयः । योगस्यैव पुरस्कारे परिगणनस्य व्यर्थत्वात् । धात्वादिषु करणव्युत्पत्ति-रागमादिषु नेति वैषम्यस्य दुरुपपादत्वाच्च । उपदेशताप्रयोजकधातुत्वादि-रूपोपाध्यवच्छिन्नसमुदायान्त्यं हलिदित्यर्थ इति स्वग्रन्थविरोधाच्च । पक्ष-द्वयेऽपि लिङ्गानुशासनस्य प्रकृतानुपयोगात् । लोपश्चेति शकारस्यासंग्रहाच्च । आदेच उपदेशे, उपदेशेऽत्वत इत्यादावाद्योच्चारणस्यैवोपदेशपदार्थतायाः सर्वसंमतत्वाच्चेति दिक् ॥

उपदेशेऽजनुनासिक इत् ॥ यद्यप्यत्रोपजीव्यत्वादनुनासिकसञ्ज्ञा प्रथमं वक्तुमुचिता तथापि नासिकामनुगत इति योगाश्रयणेनैव गतार्थत्वा-

---

धातुसञ्ज्ञेति ॥ लूशब्द एव धातुसञ्ज्ञः केवलमसौ ञित्कार्यं लभत इति भावः । नन्वत्र सूत्रसाहचर्याद्धात्वागमप्रत्ययादिशब्देन तद्बोधकपाणिन्यादिपठितानु-पूर्वीकाणां ग्रहणम् । तेषां धात्वादिव्यवहारस्तु [illegible]षयघटितत्वेन धातु-पाठ इत्यादिव्यवहारवदिति चेन्न । आद्योच्चारणविषयाणामित्येव सिद्धे एत-स्यानुपयोगात् । अत एव वारुचेराह ॥ अपि चेति ॥ अलोऽन्त्यसूत्रेति ॥ उपधा-सञ्ज्ञासूत्रेत्यर्थः ॥ विरुद्ध्येतेति ॥ तत्र हि लोपशिति भिन्नं पदं, शिति च । पूर्वस्य श्चुत्वेन शः । असंदेहाय झल्परसंयोगादित्वेऽपि, स्कोरित्यस्य न प्रवृत्तिः । झलां जशित्यादौ जश्त्वस्येव । शकारस्य धात्वाद्यन्तत्वाभावः स्पष्ट एवेति भावः । किञ्च, नमोवरिवश्चित्रङ इत्यस्यासंग्रहोऽत्र पक्षे इत्यपि बोद्ध्यम् । एष्वेत-स्य रूढिरित्युक्तेः परिगणनताया एव लाभात् ॥ योगस्यैवेति ॥ न तु रूढेरित्य-र्थः ॥ परिगणनस्येति ॥ धात्वादिगणनस्येत्यर्थः ॥ वैषम्येति ॥ भाष्यरीत्या करणव्युत्पत्त्यैव सर्वसंग्रहादिति भावः॥उपदेशताप्रयोजकेति ॥ योगमात्रस्वीकारे उपदेशता उपदेशकरणता । न हि तत्प्रयोजकं धातुत्वादि भवतीति तद्विरोधः । सञ्ज्ञात्वे तु उपदेशता उपदेशशब्दत्वम् । उपदेशशब्दस्य शब्दपरत्वात् । तदवच्छिन्नस्य प्रयोजकं तु रूढधर्मतावच्छेदकतया धातुत्वादि वक्तुं शक्यमिति भावः ॥ शकारस्येति ॥ न ह्यनेन किञ्चिदुपदिश्यत इति भावः । ननूपदिश्यते ज्ञाप्यतेऽनेनेति तदर्थः । धात्वादिभिर्हि प्रयोगो ज्ञाप्यते । तद्वदनेनाऽपि शकारेण सर्वादेशत्वं ज्ञाप्यते इत्यरुचेराह ॥ आदेच इति ॥ सर्वेति ॥ भाष्यकारादीत्यर्थः । यत्र तु करणव्युत्पत्त्यैवार्थसंगतिस्तत्रागत्याऽस्तु कृत्यल्युट इति बाहुलकाल्ल्युड-भावः । यथा, यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्ताविति यादाविति दिक् ॥

नासिकामनुगत इति ॥ नासिकामभिहत्य वायुनाऽभिव्यञ्जित इत्यर्थः । प्राति-शाख्यशिक्षादौ लोके च तद्व्यवहारस्य तथैवोपपादनमावश्यकमितितात्पर्यम् ॥ अत एव मुखग्रहणप्रत्याख्यानभाष्यध्वनितो यमानुस्वारयोरनुनासिकव्यवहारः

दन्नासिकसञ्ज्ञासूत्रं [illegible] योजनमिति ध्वनयितुं नेहोपन्यस्तम् । उपदेशे किम् । अभ्रआँ अपः । यद्यपीह, उञ ऊँ इत्यत्रेव विधानसामर्थ्यान्नेत्त्वमिति सुवचम् । तथाप्युत्तरार्थमवश्यं कर्त्तव्यमुपदेशग्रहणं स्पष्टप्रतिपत्तय इहैव कृतम् । अच् किम् । मनिनो मकारस्य मा भूत् । प्रतिज्ञायत इति प्रतिज्ञा । आतश्चोपसर्ग इति कर्मण्यङ् । प्रतिज्ञा आनुनासिक्यं येषामिति विग्रहः । एवञ्च प्रतिज्ञासमधिगम्ये प्रतिज्ञाशब्दस्य लक्षणेति क्लिष्टं व्याख्यानं नाश्रयणीयम् । पाणिन्युपज्ञं व्याकरणमित्यादिष्विव लक्षणां विनैव निर्वाहात् । यद्यपि सूत्रकारकृतोऽनुनासिकपाठ इदानीं परिभ्रष्टस्तथापि ञिकारादिव्यवहारबलेन यथाकार्यं प्राक्स्थित इत्यनुमीयतइति भावः । ननु रलयोरिति न्यूनम् । टकारस्यापि मध्यगत्वादित्यत आह ॥ प्रत्याहारेष्विति ॥ प्रत्याहियन्ते इति ॥ प्रत्याहियन्ते सङ्क्षिप्यन्ते वर्णा यत्रेति बाहुलकादधिकरणे घञ् । यद्यपि योगमात्रमकारादिसञ्ज्ञास्वतिप्रसक्तं तथापि योगरूढिरिति भावः । प्रत्याहाराश्चैकचत्वारिंशदिति प्राञ्चः । चतुर्दशसूत्रीस्थै-

---

सूत्रमते संगच्छते । यरोऽनुनासिक इत्यादौ स्वरूपग्रहणाभावस्तु पशुरपत्यमित्यादिवदिति ध्येयम् ॥ मन्दप्रयोजनमिति ॥ मन्देषुं प्रयोजनमस्येति बहुव्रीहिः । एवंविधयोग-लोक-प्रातिशाख्याद्यनभिज्ञं प्रति सप्रयोजनमित्यर्थः ॥ अभ्रआँ अप इति ॥ अत्रेत्सञ्ज्ञायां लोपः स्यादिति भावः ॥ विधानेति ॥ इदिति वक्तव्ये अनुनासिकविधानसामर्थ्यादित्यर्थः ॥ नेत्त्वमिति ॥ तत्फललोपस्य सामर्थ्यादभावे इत्त्वमपि फलाभावान्नेत्यर्थः । नन्वभ्रआँ अटित इत्यत्रानेकान्ता अनुबन्धा इति पक्षे आदितश्चेदितीत्प्रतिषेधः फलम् । न च लोपाभावे इदिति महासञ्ज्ञाकरणात् सञ्ज्ञाऽपि नेति वाच्यम् । महासञ्ज्ञयैव लोपसिद्धा, तस्य लोप इत्यस्य वैयर्थ्यापत्तेः । इक इत्यादौ ककारादिश्रवणानापत्तेश्चेति चेन्न । अनुबन्धानामेकान्तत्वमेवेति मुख्यपक्षे दोषाभाव इत्याशयात् । तदा हि मुख्येऽवयविन्यन्यपदार्थे बहुव्रीहिः । न चायमाकारोऽदूधातोरवयव इत्यदोषात् ॥ प्रतिज्ञेति ॥ प्रतिज्ञानविषय इत्यर्थः ॥ प्रतिज्ञाशब्दस्येति ॥ भावाङन्तस्येत्यर्थः ॥ क्लिष्टेति ॥ शक्तिग्राहकव्याकरणसत्त्वाच्छक्त्यैव तदर्थबोधसंभवे लक्षणाश्रयणं क्लेश इति भावः ॥ लक्षणां विनैवेति ॥ अत्र लक्षणया व्याख्यानं कुर्वताऽपि तत्र लक्षणां विना मुख्यैव व्याख्यातम्, एवञ्च पूर्वापरविरोधस्तस्येतिभावः । न चोभयोर्विधानेऽपि लाघवाद्भावे शक्तिः कर्मणि लक्षणा । अनुशासनमपि लाक्षणिकार्थानुशासनमेवेति वाच्यम् । लः कर्मणीत्यादीनामपि तथात्वापत्तौ तिङां कर्त्रादौ शक्तिरिति सिद्धान्तासङ्गत्यापत्तेः । व्याकरणस्याभियुक्तोक्तशक्तिग्राहकत्वस्य भङ्गापत्तेश्च ॥ टकारस्यापीति ॥ अत्र यद्वक्तव्यं तदन्यत्रोक्तम् ॥ बाहुलकादिति ॥ भावघञन्तादृशीआद्यजि-

र्हल्भिरिद्भिः कृता अष्टाध्याय्यां व्यवहृता एकचत्वारिंशदिति तस्यार्थः । तेन सुप्तिङादीनां रप्रत्याहारस्य चयो द्वितीया इति वार्तिकस्थचय्प्रत्याहारस्य चाधिक्येऽप्यदोषः । यत्तु ञमन्ताङ इति, यमिर्ञमन्तेष्वनिडेक इष्यत इति, च ञम् वार्तिककृता व्यवहृत इत्याहुः । तद्रभसाभिधानम् । आद्यस्योणादिसूत्रत्वाद् द्वितीयस्य व्याघ्रभूतिकारिकास्थत्वादित्यास्तां तावत् । एष च संख्यानियमो नातीवोपयुज्यत इत्युपेक्षितः ॥

उकालोऽच् ॥ ह्रस्वदीर्घप्लुत इति समाहारद्वन्द्वः । सौत्रं पुंस्त्वम् ॥ वां काल इवेति ॥ फलितार्थकथनमिदम् । विग्रहस्तु वः कालो यस्येति बोध्यः । ऊशब्देन स्वोच्चारणकालो लक्ष्यते ॥ आ य इति ॥ निपाता आद्युदात्ता इति आकार उदात्तः ॥ यच्छब्दस्तु फिट्सूत्रेण । अर्वाङ् । अकारोऽनुदात्तः ॥

तस्यादितः ॥ अतन्त्रमिति ॥ उपेयिवानित्यत्रोपसर्ग इवाविवक्षितमित्यर्थः । ननु तत्र ईयिवांसमतिस्त्रिध इत्यादिप्रयोगदर्शनादविवक्षाऽस्तु । इह त्वविवक्षायां प्रमाणं किमिति चेल्लक्ष्यदर्शनं प्रातिशाख्यादिकं चेति गृहाण । तथा हि येऽरा इत्यत्र एकारः । तनूनपाच्छचीपतिमित्यत्र पदपाठे ऊदीतौ चार्धोदात्तौ इति सकलबह्वृचप्रसिद्धम् । तनूनपाच्छचीपतिशब्दयोरुभे वनस्पत्यादिषु युगपदिति पू[illegible]राद्युदात्तत्वे कृते, अनुदात्तं

स्यपि बाहुलकादविशिष्टमिति भावः ॥ एकचत्वारिंशदिति ॥ एकस्मान् ङ अ ण व टा द्वाभ्यां षड्भ्यः षड्भ्य एव क ण माः स्युः । ज्ञेयौ च यौ चतुर्भ्यो रः पञ्चभ्यः श लौ षड्भ्य इति तदुक्तेरिति भावः ॥

सौत्रं पुंस्त्वमिति ॥ यद्यपि इतरेतरस्य गेऽपि सौत्रमेकवद्भावं वक्तुं शक्यं, तथापि, लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति तत्र तत्र वार्त्तिकोक्तेर्लिङ्गस्य लौकिकत्वात्तद्व्यत्ययकल्पनमेवोचितं, न तु शास्त्रीयवचनव्यत्ययकल्पनमिति भावः ॥ फलितार्थेति ॥ ऊपदेन स्वोच्चारणकालसदृशलक्षणया कालशब्देन समानाधिकरणबहुव्रीहौ तत्फलतीति भावः । वां काल इति तु न विग्रहो व्यधिकरणत्वादत आह ॥ विग्रहस्त्विति ॥ काल इति जात्याख्यायामेकवचनम् ॥ स्वोच्चारणका[illegible] इति ॥ स्वोच्चारणकालसदृश इत्यर्थः । सादृश्यमूलके कालयोरभेदाऽध्यवसाये तु यथाश्रुतमेव साधु ॥ फिट्सूत्रेणेति ॥ अन्तोदात्त इत्यर्थः । जसः सुप्त्वादनुदात्तत्वम् । एकादेश उदात्तेनेत्येकार उदात्त इति भावः ॥ अनुदात्त इति ॥ फिट्स्वरेणान्तस्योदात्तत्वे शेषनिघातेनेति भावः । अभिमुखवाच्यऽऽद्युत्पन्नं प्रातिपदिकमर्वाङिति ॥ अविवक्षितमित्यर्थ इति ॥ इदं च वक्ष्यमाणं प्रातिशाख्यं यच्छाखायां तच्छाखास्थवैदिकोदाहरणविषयं ॥ तनूनपाच्छचीपति-

दमेकवर्जमिति शेषनिघातः । पूर्वपदभूतयोस्तनूशची एतयोरन्त्यस्य पाक्षिकं स्वरितत्वं प्रातिशाख्ये उक्तम् । जात्यवद्वा तथा वान्तौ तनूशचीति पूर्वयोरिति । तथा स्वरितार्द्धस्योदात्तत्वे प्रातिशाख्यमपि,

एकाक्षरसमावेशे पूर्वयोः स्वरितः स्वरः ।
तस्योदात्ततरोदात्तादर्द्धमात्रार्द्धमेव वा ॥
अनुदात्तः परः शेषः स उदात्तश्रुतिर्न चेत् ।
उदात्तं वोच्यते किञ्चित् स्वरितं वाक्षरं परमिति ॥

अस्यार्थः । पूर्वयोरुदात्तानुदात्तत्वयोरेकत्र समावेशे सति स्वरितो बोद्धव्यः । तस्य स्वरितस्य स्वतन्त्रोदात्तापेक्षयोदात्ततरार्द्धमात्रा बोद्धव्येति । क्व वोश्वा इत्यादि ह्रस्वाभिप्रायम् । अर्द्धं वेति दीर्घाभिप्रायम् । अनेनैव ह्रस्वस्यापि संग्रहाद् ऽ ।पकत्वादिदमेवादर्तव्यमिति सूचयितुमेवकारः । अनुदात्त इत्यादि परिशेषादर्थकथनम् । स शेष उदात्तश्रुतिः स्यात् । किमविशेषेण ? नेत्याह ॥ न ोदित्यादि ॥ उदात्तस्वरितपरं विहायेत्यर्थः। शाकल्योऽप्याह,

अप्राकृतस्तु यः स्वारः स्वरितोदात्तपूर्वगः ।
उदादायार्द्धमस्याथ शिष्टं निघ्नन्ति कम्पितमिति ॥

उदादाय उदात्तं कृत्वा । अर्द्धह्रस्वशब्देन अर्द्धमात्रा लक्ष्यत इति

शब्दयोरिति ॥ अस्य यद्यपीत्यादिः ॥ शेषनिघात इति ॥ अस्य तथापीत्यादिः ॥ शेषनिघात इति ॥ अस्य तथापीति शेषः । तेनोदीतौ अनुदात्तौ प्राप्नुत इति भावः ॥ जात्यवद्वेति ॥ पूर्वपदभूतयोस्तनूशचीशब्दयोरन्तौ जात्यवदिति ॥ अतोऽन्यत् स्वरितं स्वारं जात्यमाचक्षते पदे * इति लक्षितो जात्यः । उदात्तस्वरितपूर्वस्वरितादन्य एकपदे स्थितः स्वरितो जात्य इति तदर्थः । तेन तुल्यं तद्वत् । अस्यान्त उदात्तश्रुतिक इत्यर्थः । तथा वा, असंहितवद्वा, संहितवद्वेत्यर्थः। पद्यादींस्तु ह्रस्वदीर्घादिसंहितद्रुत्तरानित्युत्तरमस्य पाठात् । असंहितवदित्यनेन केवलमनुदात्तत्वम् । संहितवदित्यनेनार्द्धानुदात्तस्वरितत्वमिति तद्भाष्ये स्पष्टम् ॥ तथेति ॥ लक्ष्यदर्शनवत् प्रातिशाख्यमपि प्रमाणमस्तीत्यर्थः ॥ स्वतन्त्रोदात्तापेक्षयेति । श्लोके उदात्तादिति स्वतन्त्रोदात्तादित्यर्थकमिति भावः ॥ एवकार इति ॥ तच्छाखायां दीर्घादिष्वपि समांशोदात्तकस्वरित एव पाठादिति भावः । एतेनैतौ पक्षौ वैकल्पिकावित्यपास्तं, वाशब्दस्तु पादपूरणायेति बोद्धम् ॥ अप्राकृत इति ॥ स्वरितविशेष इत्यर्थः ॥ स्वार इति ॥ स्वर एव स्वारः । स्वार्थेऽण् । स्वरितोदात्ताभ्यां पूर्ववर्णग इत्यर्थः ॥ लक्ष्यते इति ॥ तदुक्तं भाष्ये । अर्द्धह्रस्वशब्दोऽर्द्धमात्रायां रूढ इति । हरिरप्याह । प्रमाणमेव ह्रस्वादावनु-

हरदत्तादिग्रन्थास्तु मतान्तरपरतया कथञ्चिन्नेयाः ॥ केति ॥ किमोऽत्, तित्स्वरितम् ॥ व इति ॥ अनुदात्तं सर्वमपादादावित्यधिकारादनुदात्तम् ॥ अश्वा इति ॥ अशेः क्वनि नित्स्वरेणाद्युदात्तम् । संहितायां त्वेकादेश उदात्तेनोदात्त इत्योकार उदात्तः ॥ ये अरा इति ॥ द्वयमपि फिट्सूत्रेणाऽन्तोदात्तम् । एकादेशस्तु पक्षे स्वरितः । स्वरितो वाऽनुदात्ते पदादावित्युक्तेः ॥

मुखं च नासिका चेति विग्रहे प्राण्यङ्गत्वादेकवद्भावे मुखनासिकमिति स्यादत आह ॥ मुखसहितेति ॥

तुल्यास्य ॥ आस्ये भवमास्यम् । शरीरावयवाद्यत्, इत्यभिप्रेत्याह ॥ तालवादीति ॥ आभ्यन्तरेति ॥ एतच्च प्रशब्दबलाल्लभ्यते । तुल्यास्यं किम् । तर्ण । अत्र पकारस्य तकारे परे, झरो झरीति लोपो मा भूत् । प्रयत्नग्रहणं किम् । वाक् श्रोतति । शस्य लोपो न ॥ अमङ्णनानामिति ॥ नासिका चेति चकारेण स्वस्ववर्गानुकूलं तालवादि समुच्चीयते । अनुस्वारोत्तमा अनुनासिका इति तैत्तिरीयाणां प्रातिशाख्यम् । यमानुस्वारनासिक्यानां नासिका, अनुनासिकाश्चोत्तमा इति कात्यायनप्रातिशाख्यम् । वर्गोत्तमा अमङ्णना अनुनासिका भवन्ति, चशब्दात् स्वस्थानाद्यपरित्यागेन, नासिका स्थानं द्वितीयमेषामित्यर्थ इति तद्भाष्यं च । एदैतोरित्यादौ तपरत्वमसंदेहार्थं, न तु तत्कालग्रहणार्थम् । तेन प्लुतस्यापि संग्रहः ॥

पूर्वत्रासिद्धम् ॥ यद्ययं स्वतन्त्रो विधिः स्यात् तर्हि त्रिपादी पूर्वं प्रत्यसिद्धा इत्येव लभ्येत, त्रैपादिकं तु पूर्वं प्रति परं नासिद्धं स्यादत

पात्तं प्रतीयत इति । अनुपात्तमपि अर्द्धमात्रारूपं प्रमाणमेवोपलक्ष्यत इत्यर्थं तस्य हेलाराज आह । एवञ्च लोकेऽन्यशास्त्रासु च दीर्घादिष्वप्यर्धमात्रैवोदात्तेति भावः ॥ मतान्तरेति ॥ प्रातिशाख्योक्तमतापेक्षयेतरवेदलोकसाधारणमतान्तरेत्यर्थः ॥ कथञ्चिदिति ॥ लक्ष्यते इत्यंशपरमिदम् । भाष्यतो रूढिशक्तेरेव प्रतीतेरिति भावः ॥ इत्युक्तेरिति ॥ नोदात्तस्वरितोदयमिति निषेधस्तु उदात्तादनुदात्तस्येत्यस्यैवानन्तरस्येति न्यायादिति भावः ॥

आस्यशब्देन कथं तदवयवतालवादिग्रहणमत आह ॥ आस्ये भवमिति ॥ प्रशब्दबलादिति ॥ प्रकृष्टो यत्नः प्रयत्नः । प्रकर्षश्च वर्णोत्पत्त्यव्यवहितप्राक्कालिकत्वरूप इति भावः ॥ चकारेणेति ॥ अत्र यथा नासिकायाः न स्थानत्वं तथाऽन्यत्र निरूपितम् ॥ न तु तत्कालेति ॥ एषा शिक्षाद्युक्तार्थानुवादत्वेनात्र शास्त्रप्रवृत्त्यभावादिति भावः ॥

नासिद्धं स्यादिति ॥ ततश्च गोधुङ्मानित्यादौ घत्वजश्त्वानुनासिकेषु

आह ॥ अधिकारोऽयमिति ॥ यद्यत्र कार्यासिद्धत्वमिष्येत तर्हि पूर्वत्रासिद्धमिति मनोरथ इत्यादावुत्वं न स्यात् । परत्वाद्, रोरीत्यस्य प्रसङ्गात् । तथा च पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति सिद्धान्तो व्याकुप्येत । अमू, अमी, इत्यादि च न सिद्ध्येदत आह ॥ त्रिपादीति ॥ परं शास्त्रमिति च ॥ एतेन त्रिपाद्यां विहितं कार्यमसिद्धमित्यादि प्राचां ग्रन्थः परास्तः ॥ विवृण्वते कण्ठमिति ॥ विवार एषां प्रयत्न इति भावः ॥

भषूभावो न स्यात् । न चातिदेशान्तरवदस्यापि त्रिपाद्यां प्रवृत्तौ न दोषः । सपादसप्ताध्याय्यामपि पूर्वं प्रति परासिद्धत्वापत्तेः । मध्ये पाठस्य विप्रतिषेधसूत्रस्य च सामर्थ्याश्रयणे तु विनिगमनाविरहात् त्रिपाद्यामपि अप्रवृत्त्यापत्तिरिति भावः ॥ रो रीत्यस्य प्रसङ्गादिति ॥ सिद्धेऽसिद्धत्वारोपात् सूत्रोदाहरणसंपत्त्या परत्वाल्लक्ष्ये कार्यप्रवृत्तेरावश्यकतया परत्वात् त्रैपादिके कार्ये जाते तत्राभावप्रतियोगित्वारोपेऽपि देवदत्तहन्तृहतन्यायेन स्थानिभूतरोरभावाद्धशि चेत्यस्याप्राप्तिरिति भावः ॥ स्पष्टं चेदं प्रकृतसूत्रे, अचः परस्मिन्नित्यत्र षत्वतुकोरित्यत्र च भाष्ये ॥ तथा चेति ॥ शास्त्रस्य तद्बोध्यकार्यस्य च शास्त्रजज्ञानवेलायामसिद्धत्वाभावे, रो रीत्यादेः प्रसङ्ग इत्यर्थः ॥ व्याकुप्येतेति ॥ त्वया विप्रतिषेधशास्त्रप्रवृत्तौ निमित्तस्य त्रैपादिकस्य शास्त्रजबोधविषयकार्यस्य शास्त्रस्य वाऽसिद्धता वक्तुमशक्या, किन्तु लक्ष्ये जातस्य तस्य प्रवर्तमानसपादसप्ताध्यायीस्थकार्यदृष्ट्याऽसिद्धत्वं वाच्यम् । एवञ्च विप्रतिषेधाभावोपपादकहेतोरसिद्धिरिति भावः । न च ममापि पूर्वपरपदयोः पूर्वपरशास्त्रजन्यबोधविषयकार्यलक्षणया शास्त्र एव कार्यासिद्धत्वमिति वाच्यम् । लक्षणायां मानाभावात् फलाभावाद्गौरवाच्च । ननु मनोरथे दर्शनाभावरूपे लोपेऽभावारोपस्य दर्शनारोपरूपत्वेन न दोषोऽभावाभावस्य प्रतियोगिरूपत्वादित्यत आह ॥ अमू इत्यादि ॥ अद् अ औ, अद् अ अस्, इत्यवस्थायां जातस्योत्वस्य सपादसप्ताध्यायीस्थकार्यदृष्ट्याऽसिद्धत्वेऽपि पूर्वैरित्याऽकाराभावेन पररूपाद्यनापत्तिः । मुत्वस्यासिद्धत्वनिषेधसामर्थ्यादेतद्विषये उक्तन्यायाप्रवृत्तिरितिचेत्, तेन शास्त्रासिद्धत्वमेव ज्ञापयितुं युक्तम् । एवं शीभावात् पूर्वमदसोसेरिति मुत्वे दात्परैकाराभावेनैत ईदिति सूत्रमपि व्यर्थं सदत्रैव ज्ञापकमस्तु । न च तौ सदित्यादिनिर्देशैर्देवदत्तहन्तृहतन्यायोऽनित्य इति वाच्यम् । हते देवदत्ते तद्धन्तरि हतेऽपि नोन्मज्जनम्, हतत्वारोपे तु सुतराम् । हन्तुमुद्यतस्य हनने तूज्जीवनमस्त्येवेति न्यायस्यार्थः । तावित्यादौ वृद्धिहन्तुः पूर्वसवर्णदीर्घस्य हननोद्यमसजातीयं प्रसङ्गमात्रं, न तु हननस्थानीया लक्ष्ये प्रवृत्तिरिति न तत्रास्य न्यायस्य विषय इति तेनास्यानित्यत्वबोधनासम्भवात् । स्पष्टं चेदं स्वादिष्वसर्वेति सूत्रे कैयटे । प्रकृते तु निरधिष्ठानारोपासम्भवेन हननसजातीयप्रयोज्यकार्यप्रवर्तनमावश्यकमेवेत्यन्यत्र विस्तरः ॥ परास्त इति ॥ विहितं कार्यमित्यनुद्धारे गौरवाच्च । किञ्च, त्रिपादी शास्त्रम् । तद्धि विधाने करणं, न त्वधि-

वर्गयमगा इति ॥ वर्गगा यमगाश्चेत्यर्थः ॥ कादय इति ॥ लोकप्रसिद्ध्यपाठाऽपेक्षामिदम् । चतुर्दशसूत्र्यां मावसानत्वायोगात् ॥ अर्द्धविसर्गेति ॥ सादृश्यमुच्चारणे लेखने च बोद्धव्यम् ॥ ऋलृवर्णयोरिति ॥ आ च आ च रलौ तौ च तौ वर्णौ चेति विग्रहः । उश्च उल् च ऋलोः । तयोर्वर्णयोरिति वा । प्रथमान्तेन परिनिष्ठितविभक्त्या वा विग्रह इति सिद्धान्तात् । ऋत्यक इति प्रकृतिभावः ॥

नाञ्झलौ ॥ आकारसहित इति ॥ अत्र च कालसमयवेलास्वित्यादिनिर्देशाः प्रश्लेषे लिङ्गम् । न चैवमपि, यियासो इत्यादौ, गुरोरनृत इति प्लुतादाकारात् परस्य सनः सस्य षत्वं स्यादेवेति वाच्यम् । आश्च आश्चेति द्वन्द्वे सवर्णदीर्घेण दीर्घात् परत्र प्लुतोऽपि प्रश्लिष्यत इति व्याख्यानात् ॥ यणादिकामिति ॥ शीतलशब्दे सवर्णदीर्घ आदिशब्दार्थः ॥

करणम् । त्रिपाद्यां विद्यमानेन शास्त्रेण विहितं कार्यमिति व्याख्याने त्वत्यन्तं क्लिष्टतेत्यपि बोद्धव्यम् ॥ लोकप्रसिद्धेति ॥ त्रिभिश्च मद्ध्यमैर्वैगैरिति भाष्यपर्यालोचनया क ख ग घ ङेत्यादीनामप्यनादित्वामिति भावः ॥ उच्चारणे इति ॥ पादमात्रिकाविमाविति भावः ॥ लेखने चेति ॥ अर्द्धवृत्तद्वयात्मकलिपित्वादिति भावः ॥ रलाविति ॥ ऋ लृ औ इति स्थिते ऋत्यक इति प्रकृतिभावेन दीर्घाभावे गुणे यणि च रलावित्यस्य सिद्धिः । उश्च उल् च ऋलोरिति पाठः । रलोरिति पाठे आगन्तुनाऽकारेण निर्देश इति बोद्धव्यम् ॥ तयोर्वर्णयोरिति ॥ पूरणगुणेति निषेधस्तु षष्ठीसमासस्य, न तु कर्मधारयस्य । बहुलग्रहणेन तदभावो भाष्योदाहृतविषय एव, नान्यत्रेति भावः॥ प्रथमान्तेनेति॥ प्रथमोपस्थितत्वादिति भावः । अयं पक्षोऽनेकमन्यपदार्थे इति सूत्रे भाष्ये ॥ परिनिष्ठितेति ॥ अत्र चैकविभक्ति चापूर्वनिपात इति ज्ञापकम् । अन्यथा मालामतिक्रान्त इति विग्रहेऽतिपदस्यापि नियतविभक्त्यन्तत्वेनैकविभक्तीत्यस्य व्यावर्त्यालाभः । एकस्यानियतविभक्तित्वे हि तद्व्यावर्णायैकविभक्तीति सार्थकम् । परिनिष्ठितविभक्त्या समासे त्वतिक्रान्तमतिक्रान्तेनेत्यादिक्रमेण तस्यानियतविभक्तिकत्वं स्पष्टमेव । अत एव, तत्पुरुषे तुल्यार्थेति सूत्रे भाष्ये परमे कारके परमेण कारकेणेत्यादावतिप्रसङ्गमाशङ्क्य प्रतिपदोक्तपरिभाषया समाहितमिति भावः ॥

व्याख्यानादिति ॥ एवं व्याख्याने मानं तु प्रयत्नभेदेन नाञ्झलावित्येतत्प्रत्याख्यानपरं भाष्यम् । तद् ध्वनयन् वक्ष्यति, सूत्रं मास्त्विति भाष्ये स्थितमिति ॥ शीतलशब्दे इति ॥ शस्य ईकारे परे दधीतीकारस्य शकारे परे चेत्यर्थः । न च शीङः शकारोच्चारणेन तच्छकारस्येकारे न दीर्घ इति वाच्यम् । शीतलशब्दे शीङो भावात् । किन्तु श्यैङ्गतौ, द्रवमूर्तिस्पर्शयोः श्य इत्यनेन संप्रसारणे, श्योऽस्पर्श इत्युकेर्नेत्वाभावे च निष्पन्नाच्छीतशब्दात्, सिध्मादित्वाल्लचि शीतलशब्द इत्यदोषः । शीतलशब्दो हि सिध्मादिषु गणरत्ने वृत्तौ

अत्रेति ॥ अत्रैवेत्यर्थः ॥ यद्यपीति ॥ ग्रहणकशास्त्रस्याद्याप्यनिष्पत्तेरिति भावः ॥ हो ढ इत्युपलक्षणम् । रमास्वित्यत्र षत्वं, वागाशीरित्यत्र ज्ञयो ह इत्याकारस्य धकारः, नदीघेत्यतः दादेरिति घत्वं च नेति बोद्धव्यम् । यदि तु, विवृतमूष्मणामित्यत्र ईषदित्यनुवर्त्य स्वराणां चेत्यत्र निवर्त्य प्रयत्नभेदो व्याख्यायते तदा नाज्झलाविति सूत्रं मास्त्विति भाष्ये स्थितम् ॥

वृद्धिरादैच् ॥ ऐजिह द्विमात्र एव,तात्परत्वात् । तेन कृष्णैकत्वमित्यत्र त्रिमात्रो न । एवमुत्तरसूत्रेऽपि । तेन गङ्गोदकमित्यादौ त्रिमात्रो न ॥

भूवादयो धातवः ॥ भूश्च वाश्चेति द्वन्द्वः । आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः । भूवौ आदी येषामिति बहुव्रीहिः । भूप्रभृतयो वा-

---

च पठ्यते । किञ्च तेनापूर्ववचनकल्पनापेक्षया सूत्रोदाहरणत्वमेव तस्य युक्तमिति भावः ॥

अत्रैवेति ॥ ग्राहकसूत्र एवेत्यर्थः । अत्र च उर्ऋदिति सूत्रे तपरत्वं मानम् । तच्हि चुरादिण्यन्तात् कृतधातोर्लुङ्यचीकृतदित्यत्र दीर्घऋकारस्य स्थाने ह्रस्व एव यथा स्यादित्यर्थम् । पूर्वेणात्राण्ग्रहणे तूद्देश्येन विधेयेन च ऋकारेणानण्त्वाद्भिन्नकालाग्रहणेन तस्य स्थानित्वं, न वा आदेशत्वं प्रसक्तमिति व्यर्थं तत् स्यात् । न च तपरसूत्रेण लृकारग्रहणार्थं तत् । स्थानेऽन्तरतमपरिभाषयाऋकारस्थाने तस्य वारणेन तद्ग्रहणे फलाभावात् । न चैवञ्ज्ञापितेऽपि भाव्यमानत्वात् सवर्णग्रहणाप्रसक्तेस्तद्व्यर्थ्यम् । तपरत्वाभावे आदेशान्तरनिवृत्त्यर्थत्वेन स्वरूपाभ्यनुज्ञानार्थतयाऽपूर्वबोद्धव्यत्वाभावेनाविधेयत्वात् । कृते तु तपरत्वे भाव्यमानताऽपीत्यन्यदेतत् ॥ अनिष्पत्तेरिति ॥ वर्णानामुपदेशस्तावत्तदुत्तरकालामित्सञ्ज्ञा तदुत्तरमादिरन्त्येनेति प्रत्याहारस्तदुत्तरकाला सवर्णसञ्ज्ञा, तदुत्तरकालमणुदिदिति, एतेन समुदितेनान्यत्र सवर्णानां ग्रहणमिति वाक्यापरिसमाप्तिन्यायादित्यर्थः । अयं भावः । आदिरन्त्येनेति प्रत्याहारसिद्धौ नाज्झलाविति्येतद्वाक्यार्थबोधे सति निर्णीतैतद्विषयपरिहारेण सवर्णपदबोद्धव्यत्वनिश्चयेऽणुदिदित्यनेन तावतां ग्रहणं बोधनीयम् । अन्यथा बाधकसम्भावनया तुल्यास्यसूत्रजशक्तिग्रहेऽप्रामाण्यसन्देहेन तच्छास्त्रजबोधानापत्तिः । न चैतद्वाक्यार्थबोधतः प्राक् तन्निश्चय इति । यत्तु निषेधवाक्यार्थबोधात् पूर्वं विधेर्वाक्यार्थबोध एव नेति । तन्न । पदार्थोपस्थितौ वाक्यार्थबोधे बाधकाभावात् । निषेधस्य प्रतियोगिज्ञानोपपादकतया विध्यपेक्षत्वेऽपि विधेस्तदपेक्षत्वे मानाभावाच्च ॥ रमास्वित्यत्र षत्वमिति ॥ सर्वस्याप्येकया युक्तया वारणेनापाद्यमानेऽर्थे न्यायानादरादेवमुक्तम् ॥ भाष्ये स्थितमिति ॥ अनेनाकारप्रश्लेषे मानं दर्शितम् ॥

सदृशाः । सादृश्यं च क्रियावाचकत्वेनेत्यभिप्रेत्याह ॥ क्रियावाचिन इति ॥ क्रियावाचिनः किम् । याः पश्यसीत्यादौ धातुत्वं मा भूत् । सति हि तस्मिन् आतो धातोरिति स्यात् । भ्वादयः किम् । हिरुक्, पृथगित्याख्ययानां, शिश्ये इति भावार्थतिङन्तस्य च मा भूत् । स्तम्भ्वादीनामुदित्करणेन सौत्राणां धातुत्वं ज्ञाप्यते।चुलुम्पादीनां तु बहुलमेतन्निदर्शनमितिगणसूत्रेण संग्रहः॥ चादयः ॥ अद्रव्यार्थाः किम् । पशुः । लिङ्गसंख्यान्वितं द्रव्यम् । इह

सादृश्यं चेति ॥ वा–धातौ वासादृश्यं च प्रयोगभेदेन बोद्धव्यम् ॥ आतो धातोरिति ॥ न च स्वार्थनिमित्तत्वेन बहिरङ्गासिद्धत्वम् । नाजानन्तर्य इति निषेधात् । ततोऽपि बहिर्भूतसंख्यानिमित्तकविभक्तिनिमित्तकभसञ्ज्ञानिमित्तकत्वेन लोपस्य बहिरङ्गत्वाच्च, अर्थनिमित्तकबहिरङ्गत्वस्याभावाच्च । नाप्ययं लाक्षणिकः । नकारजावनुस्वारपञ्चमौ झलि धातुषु । सकारजः शकारश्चेर्षाट्टवर्गस्तवर्गज इत्यभियुक्तोक्तेर्भ्वादिषु लाक्षणिकानामपि दर्शनेन तद्विषये तत्परिभाषाया अप्रवृत्तेः । आतो धातोरित्यत्र प्रतिपदोक्त आकारो गृह्यत इति तु वक्तुमप्यशक्यम् । पशुष इत्यत्रातिप्रसङ्गात्तेः । पशुं सनोतीति विट्, विड्वनोरित्यात्वम् । आतोऽनाप इति वार्त्तिकमते तु विकल्पार्थकनिपातवाशब्दस्य धातुत्वे प्रातिपदिकत्वाभावात् सुबभावे पदत्वानापत्तिर्दोषः । क्रियात्वं साध्यत्वेन प्रतीयमानत्वम् । साध्यत्वं चोत्पाद्यमानत्वमेवेत्यन्यत्र विस्तरः॥ हिरुगित्यादि ॥ एषां क्रियासमानाधिकरणत्वाल्लिङ्गाद्यनन्वयित्वाच्च तदर्थस्य क्रियात्वमित्यभिमानः । एषामव्ययेषु पाठस्तु अप्रातिपदिकत्वेऽप्यकजर्थः स्यात् । एतेन तेषु पाठसामर्थ्याद्धातुत्वाभाव इत्यपास्तम् । नन्वेषां क्रियाकाङ्क्षादर्शनेन न क्रियावाचकत्वमत आह ॥ शिश्ये इति ॥ कालोऽपि धात्वर्थ एवेति न क्रियावाचकत्वहानिः । तस्य च धातुत्वे, आदेच उपदेशे इत्यात्वं स्यात् । तद्धि अनैमित्तिकं, धातुत्वनिमित्तकं चेति स्पष्टमेव । अत्र [illegible]त्वेव धातुत्वापत्तिर्बोद्धव्या । तिङन्तस्य तूपदेशाभावान्नात्वप्रसक्तिरित्याहुः । ननु षष्ठे प्रकृतसूत्रे धातुग्रहणसंबन्ध उक्तो भाष्ये इति न तद्धातुत्वनिमित्तकम् । किञ्च शितीति प्रसज्य प्रतिषेधेऽपि शित्परत्वरूपस्यैवात्वविधान्नात्वप्रसक्तिः अपि च वासादृश्यमन्यानभिहिताक्रियावाचकत्वेनेति न दोषोऽत आह ॥ चेति ॥ सूत्रशेषभाष्योक्तेष्वाणबयति, वट्टयतीत्यादिषु च धातुत्वे शास्त्रविषयतया साधुत्वापत्तिरिति तद्व्यावृत्तये तदिति भावः ॥ उदित्त्वप्रयोजनेति ॥ इदमुपलक्षणम् । तत्प्रकृतिकच्ल्यनुवादेनाङ्विधानेन सार्वधातुके परे विकरणविधानेन च धातुत्वम् । जुचङ्क्रम्येत्यत्र पाठितजोः,जपजभेत्यत्र पठित–पसः,ऋतिप्रभृतानां च केषाञ्चिद्धात्वधिकारविहितकार्योद्देश्यत्वाद्बोद्धव्यम् । एतैश्च स्थितस्य तेषां पाठस्य भ्रंशोऽनुमीयते इति भावः । मैत्रेयाद्यन्यसंमतं समाधिमाह ॥ बहुलमिति ॥

तु स्यादेव। लोधं नयन्ति पशु मन्यमानाः। पशु इति सम्यगर्थे ॥

उपसर्गाः ॥ निस्, दुस्, इति सान्तौ ॥ निसस्तपताविति निर्देशात्। अयोगवाहानामविशेषेणेति प्रकरणे निष्कृतं दुष्कृतमित्युदाहृत्य, इदुदुपधस्य चाप्रत्ययस्य यो विसर्जनीय इति भाष्यकारोक्तेश्च। उपसर्गस्यायतावितिसूत्रे वामनोऽप्येवम्। निरः कुषः, मुदुरोरधिकरणे, इति निर्देशाद्रेफान्तावपीति तत्रैव सूत्रे हरदत्तः ॥ इति संज्ञाप्रकरणम् ॥

सम्यगर्थे इति ॥ न च लुब्धमृषिं नयन्ति पशुं मन्यमाना इति निरुक्ते पशुमिति सानुस्वारपाठात् तत्र पश्विति लुप्तविभक्तिकं सत्त्ववाचीति वाच्यम्। लोधमित्यनवगतमिति तद्भाष्योक्त्या तन्मात्रनिर्णायके निरुक्ते पशुशब्दांशेऽन्यथा पाठे मानाभावात्। स्पष्टं चेदं प्रकृतसूत्रे हरदत्तग्रन्थे दृशधातौ माधवग्रन्थे चेति दिक् ॥

वामनोऽप्येवमिति ॥ तत्र हि दुः सान्त इति तेनोक्तम् ॥

इति सञ्ज्ञाप्रकरणम् ॥

इको गुणवृद्धी ॥ गुणवृद्धिशब्दाभ्यामिति । एतच्च पूर्वसूत्राभ्यां गुण-वृद्धिपदे अनुवर्त्य गुणो वृद्धिरिति ये गुणवृद्धी इति योजनया लभ्यते । तेनेह न । दिव औत् । द्यौः । [illegible] । स इमम् ॥ षष्ठ्यन्तमिति ॥ सूत्रे षष्ठ्यन्तस्या- करणाच्छब्दस्वरूपपरतया नपुंसका- सोर्लुगिति भावः ॥ पदमिति ॥ तच्च संभवति सामानाधिकरण्ये इगन्तस्याङ्गस्येत्यादिक्रमेण संबध्यते । मिदेर्गुणः, मृजेर्वृद्धिरित्यादौ तु सामानाधिकरण्यासंभवान्मिदि-मृज्योरवयवस्येक इति संबध्यते । यत्तु इक एव स्थाने स्त इति प्राचा व्याख्यातं, यच्च तट्टी[illegible]प्रसङ्गे नियमार्थमिदमित्यादि । तत्सर्वं भाष्यविरोधादुपेक्ष्यम् । तच्छेषपक्षं दूषयित्वा पदोपस्थितिपक्षस्यैव भाष्ये समर्थितत्वादित्याहुः । तच्छेषपक्षेऽपि दूषणोद्धारस्तु शब्दकौस्तुभे स्पष्टी-कृतोऽस्माभिः ॥

योजनयेति ॥ यद्यपि तदनुवृत्त्यैव सिद्धं सामर्थ्य[illegible]णेन लभ्य-ते मूलोक्तार्थस्तथापि मन्दबुद्धिसाधारण्येन स्फुटत्वायैवमेवोक्तम् ॥ स इति ॥ अत्र नैव स्यादिति भावः ॥ इममिति ॥ अत्रेकारस्यैव स्याच्च त्वन्त्यस्येति भावः ॥ सोर्लुगिति ॥ अत एव दीर्घो नेति भावः ॥ तच्चेति ॥ इक इति पदं चेत्यर्थः । अनेनाऽत्र सूत्रे पदोपस्थितिपक्ष इति सूचयति । अचो ञ्णिति, ओर्गुण, इत्यादौ तु लिङ्गस्य श्रुत्यपेक्षया दुर्बलत्वेन प्रथमतः श्रौताच्पदार्थादिघटितवाक्यार्थ-बोधे वृत्ते निर्दिष्टस्थानिकत्वेनोपस्थितस्यापीकपदस्य वाक्यार्थेऽनन्वयः । सार्व-धातुकेत्यादौ तु तदुपस्थितिं विना स्थान्याकाङ्क्षाशान्त्यभावेन बोध एव नेति विशेषः । एवञ्च पदश्रुतिनिमित्तैषा पदैकवाक्यतयाऽन्वयवत्यन्तरङ्गा । स्थान-षष्ठीत्वनिर्णये उपस्थितालोन्त्यपरिभाषया अनन्त्यस्य गुणव्यावृत्तये वाक्यैक-वाक्यतयाऽन्वय इति बहिरङ्गा सा । तदाह ॥ इगन्ताङ्गस्येत्यादि ॥ मिदिमृज्यो-रवयवस्येति ॥ एवञ्च स्थानषष्ठीत्वाभावनिर्णयेनालोऽन्त्यस्येत्यस्य प्रवृत्तिरेव नेति भावः ॥ नियमार्थमिदमिति ॥ तत्तद्विधायकैर्विहितयोर्[illegible]लोऽन्त्यस्येति-वदिदमपि स्थानिनियमार्थमिति तदाशयः ॥ तत् सर्वं भाष्येति ॥ द्वयोर्नियमयोः सार्वधातुकेत्यादावविरोधेनेगूरूपस्यान्त्यस्येत्यर्थो वाच्यः । अन्त्यस्येक इति वा । उभयथाऽपि द्वयोर्विशेष्यविशेषणभावसत्त्वात्तच्छेषपक्षे पर्यवसानम् । सः— अलोऽन्त्यस्येति नियमः शेषो विशेषणमस्येति तदर्थः । तस्यालोन्त्यस्येत्यस्य विशेषणमिति वा । एवञ्च मिदेर्गुण इत्यादौ परस्परविरोधादनयोस्त्यागे सर्वा-देश[illegible]पत्या तद्विरोध इति भावस्तदाह । तच्छेषपक्षमिति ॥

दूषणोद्धारस्त्विति ॥ मिदेरित्यत्र मिद इर्मिदिस्तस्येति व्याख्यानान्न दोषः । पुगन्तेत्यत्र पुक्यन्तो लघ्वी उपधेति व्याख्येयमित्यादिभाष्योक्तदूषणोद्धारस्त्वि-त्यर्थः । न च यापयति, क्षमापयतीत्यादौ दोषः । गुणे कृते वृद्ध्या रूपसिद्धेः । अत

अचां मध्य इति ॥ यत्तु प्राचोक्तम्, अन्त्यादचः पर इति । तन्न । शे मुचादीनामित्यादावन्त्यस्याचोऽसंभवात् ॥ तस्यैवान्तावयव इति ॥ तेन त्रपूणीत्यादौ अङ्गस्य नान्तत्वेन दीर्घः सिद्धः । परादित्वे स न सिद्ध्येत् । अभक्तत्वे तु वहंलिह इत्यत्र, वहाभ्रे लिह इति खशि, अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इति श्नुप्रत्ययावयवस्य उवङादेशः स्यात् । अथ दान्तत्वात् । यत्त्वभक्तत्वे त्रपूणीति दीर्घो न स्यादिति । तत्तदादिप्रत्ययावयवं स्यादिनुमर्थमित्यङ्गसंज्ञासूत्रस्थवार्तिकेनैव दूषितप्रायम् ॥

स्थानेयोगेति ॥ स्थानेन योगोऽस्या इति विग्रहः । निपातनादेत्वम् ॥ अनेकविधमिति ॥ स्थानार्थगुणप्रमाणकृतमित्यर्थः ॥ बलीय इति ॥ तेन चेता स्तोतेत्यत्र प्रमाणत आन्तर्यवान्नाकारो नेति भावः ॥

तस्मिन्निति सप्तम्यन्तानामनुकरणम् । निःशब्दो नैरन्तर्यपरः । दिशि-

---

एव, सप्तम्याश्च यापनायामिति निर्देशः संगच्छते तदाह ॥ कौस्तुभे स्पष्टीकृत इति ॥ नन्वेवं तर्हि किमर्थं प्राचां पक्ष उपेक्षित इति चेच्छृणु । लघूपधांशे इकपरिभाषानुपस्थितावनिग्लक्षणत्वाद्भिदित्यादौ गुणनिषेधानापत्तिभिया स उपेक्षित इति । क्ङिति च इत्यत्र क्ङितस्थानिग्लक्षणत्वेऽपि गुणनिषेधप्रवृत्तिज्ञापकत्वाश्रयणे तु तस्य पदोपस्थितिपक्षज्ञापकत्वमेवोचितमिति दिक् ॥

इत्यादाविति ॥ आदिना झलन्तलक्षणो नुम्, इदितो नुमित्यादि च । अचोऽसंभवादिति । नुमो मित्त्वं तु ज्ञानानीत्यादौ चरितार्थमिति मुचादावन्त्यस्यैव स्यादिति भावः ॥ दीर्घः सिद्ध इति ॥ तच्छब्देन यस्य विहितः स समुदायः परामृश्यते इति भावः । यद्यपि तस्यान्त्याच्च इति व्याख्यानेऽपि भवितेत्यादौ तासऽवयवेटो लघूपधाङ्गावयवत्वेन प्राप्तस्य गुणस्य दीर्घीवेवीटामिति निषेधारम्भेण लोकव्यवहारेण चावयवावयवस्य समुदायावयवत्वाङ्गीकारादत्र न दोषः । तथापि तथा न व्याख्यातम् । पञ्चारत्नीनीत्यादौ पदस्य विभज्यान्वाख्याने उत्तरपदस्यापि नान्तत्वापत्तान्निगन्तेति स्वरानापत्तेरिति स्पष्टं भाष्यादौ । त्रपूणीत्युपलक्षणं, ताता पिण्डानामिति नलोपसिद्धेः । तानितानीत्यर्थे, शेश्छन्दसीति शेर्लोपे तदुदाहरणम् ॥

स्थानेनेति ॥ स्थानशब्दार्थेनेत्यर्थः । तन्निरूपितसंबन्धः षष्ठ्यर्थो, न तु तद्रूपः सम्बन्धस्तदर्थ इति अनेन ध्वनयति ॥ एत्वमिति ॥ व्यधिकरणबहुव्रीहिरप्यत एवेति बोद्धव्यम् ॥ गुणप्रमाणेति ॥ प्रमाणस्य ह्रस्वत्वादेर्गुणत्वेऽपि ब्राह्मणवसिष्ठन्यायेन पृथगुक्तिः । गुणशब्देनोक्तत्वादिति विशिष्टधर्ममात्रम् । तेनाऽनान्तर्यमेवैतयोरान्तर्यमित्यादिस्थानेऽन्तरतमसूत्रस्थभाष्येण न विरोधः । अन्तरतमाभाव एव गुणविधौ ऋकाराकारयोः सादृश्यमिति तदर्थः । बाह्यानां साक्षाद्वर्णावृत्तित्वेऽप्यौपचारिकं गुणत्वं बोद्धव्यम् ॥

अनुकरणमिति ॥ अचीत्यादिसप्तम्यन्तार्थकस्य स्वतन्त्रतच्छब्दस्य निर्देशो, न स्वरूपपरः । व्याख्यानाद् बहुलस्यसंस्कारानुरोधाच्च । सप्तमी तु सप्तम्य-

रुच्चारणक्रियः । अचि यणित्युक्ते व्यवहितेऽव्यवहिते च सति प्राप्तमव्यवहिते एवेति, पूर्वस्य परस्य च प्राप्तं पूर्वस्यैवेति च नियम्यते । अव्यवहितस्येति तु फलितार्थकथनम् ॥

परस्य यदिति ॥ तस्मादित्युत्तरस्यादेरिति तु न सूत्रितम् । आदेरित्यंशस्य सर्वादेशबाधकत्वापत्तेः । सिद्धान्ते तु परत्वात् सर्वादेशत्वं बाधकमित्यनुपदमेव वक्ष्यति ॥

अनेकाल् ॥ शित उदाहरणमिदम इश् । इतः । यत्तु वृत्तिकृता जश्शसोः शिरित्युदाहृतम् । तन्न । सर्वादेशानां प्राक् शित्त्वस्यैवालाभात् । तत्र हि डाणलोरिवानुपूर्व्यादनेकाल्त्वेनैव सर्वादेशत्वमिति सिद्धान्तः ॥ इत्यादाविति ॥ आदिशब्देनातो भिस ऐस् इति गृह्यते ॥ परत्वादिति ॥ अत एवादेः परस्येति पृथक् क्रियते इत्युक्तम् । उत्तरस्येत्यंशस्तु औशैसोरपि प्रवर्तत एव । यत्तु प्राचा आदेरिति सूत्रं विवृण्वता पञ्चमीनिर्देशेनेत्याद्युक्तं, तदसम्बद्धमिति स्पष्टमेव ॥ परनित्येति ॥ परान्नित्यं यथा । तुदति । रुणद्धि । परमपि लघूपधगुणं बाधित्वा श्नश्नमौ । तथा रन्धेर्णिच् रन्धयति । परा-

---

न्तानामेव तच्छब्दार्थत्वमिति बोधनाय । तद्बोध्यार्थस्य निर्दिष्टे इत्यनेन सामानाधिकरण्याय चेति भावः । शब्दार्थकत्वेन त्वनुकरणत्वव्यवहार इति बोध्यम् ॥ दिशिरुच्चारणेति ॥ अत एव जनपदे लुबित्यादौ न दोषः । न ह्यर्थ उच्चारितोऽपि शब्दस्य निरन्तर इति भावः ॥ अचि यणित्युक्ते इति ॥ अचि उपश्लिष्टस्य यणित्युक्ते इत्यर्थः । इदं संहितायामिति सूत्रे भाष्ये स्पष्टम् ॥ फलितेति ॥ सप्तम्यन्तार्थेऽव्यवहिते षष्ठ्यन्तार्थोऽप्यव्यवहित एवेति भावः ॥

न सूत्रितमिति ॥ स्वं रूपमित्यतः प्रागिति शेषः । तत्रादेरिति पृथग्वाक्यम् । तत्रोत्तरस्येत्यनुवर्तते । स्थानषष्ठी चेयम् । पञ्चमीनिर्देशेन यत् कार्यं तदुत्तरसम्बन्धि, उत्तरस्य स्थाने विधीयमानं चादेर्बोध्यमिति वाक्यार्थद्वयम् । वाक्यभेदसामर्थ्याच्चादेरित्यंशं विनापि क्वचिदंशान्तरप्रवृत्तिः । आदेरित्यंशेऽस्वनुवृत्ते उत्तरस्येत्यंशेऽनुवृत्ते परत्वबोधकशब्देन यत्र विधानं तत्रैवेति, नित्यं ङित इत्यादौ न प्रवर्त्तत इति भावः ॥ वक्ष्यतीति ॥ न चानेकालित्यतः पूर्वमेव तस्मिन्निति निर्दिष्टे पूर्वस्य, तस्मादित्युत्तरस्यादेरिति सूत्रे कुतो न पठिते इति वाच्यम् । आदेरित्यंशे, षष्ठीस्थाने इत्यस्यासंबन्धे आज्जसेरसुगित्यादावपि तस्य प्रवृत्त्यापत्तेः । संबन्धे मध्ये, तस्मिन्निति, तस्मादित्यनयोरपि तत्संबन्धे तयोरत्यानमविषयेऽप्रवृत्त्यापत्तेरिति दिक् ॥

डाणलोरिवेति ॥ आदेशानां प्रत्ययाधिकारे पाठेऽपि वाक्यार्थबोधोत्तरमेव

सुप्यापिशलेः बाधित्वा रधिजभोरिति नुम् । न च सोऽपि शब्दान्तरप्राप्त्याऽनित्य इति वाच्यम् । कृताकृतप्रसङ्गमात्रेणापि क्वचिन्नित्यताभ्युपगमात् । अन्तरङ्गं यथा । ऊभये देवमनुष्याः । इह प्रथमचरमेति परमपि विकल्पं बाधित्वा सर्वादीनीति सर्वनामसञ्ज्ञा विभक्तिनिरपेक्षत्वेनान्तरङ्गत्वात् । अपवादोऽपि यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यत एव । तद् यथा । अयजे इन्द्रं, ग्रामे इह, सर्वे इत्थम् । अत्रान्तरङ्गेण गुणेन सवर्णदीर्घो बाध्यते । स च यद्यपि यण्गुणयोरपवादस्तथापि समानाश्रये चरितार्थः । तथा च वार्तिकम् । इण्डिशीनामाद् गुणः सर्वणदीर्घत्वादिति ॥

असिद्धमिति ॥ तेन पचावेदमित्यादावेत ऐत्वं न ॥ अकृतव्यूहा इति ॥ यद्यपि कृतमपि कार्यं निवर्त्तयन्तीति परिभाषान्तरं पठ्यते, फलं च तुल्यम् । तथापि अकृतेत्येव लघु । प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति न्यायादिति भावः ॥ न कुर्वन्तीति ॥ यथा निषेदुषीमित्यादौ कसोरिटमन्तरङ्गत्वात् प्राप्तमपि भाविना संप्रसारणेन वलादित्वं नङ्क्ष्यतीत्यालोच्य न कुर्वन्तीत्यर्थः ॥ इति परिभाषाप्रकरणम् ॥

प्रत्ययत्वज्ञानेनोपदेशे णकारे इत्त्वाप्रवृत्तेस्तदुत्तरं लक्ष्ये प्रवृत्तिकाले इत्त्वेऽप्यनेकाल्त्वात्तेरिति भावः ॥ प्रवर्तत एवेति ॥ उपपादितमेतत् ॥ शब्दान्तरप्राप्त्येति ॥ यद्व्यक्तिसंबन्धितया पूर्वं प्रवृत्तिस्तद्व्यक्तिसंबन्धितयैव पुनः प्रवृत्तौ कृताकृतप्रसक्तित्वं प्रसिद्धमिति भावः ॥ कृताकृतेति ॥ व्यक्तिविशेषानाश्रयणेनेत्यर्थः । वृद्धौत्वतृज्वद्भावेत्यस्य त्वत्र न प्राप्तिः । साहचर्येण विभक्तिनिमित्तानामेव वृद्धादीनां तत्र ग्रहणात् । नित्यत्वेनैव सिद्धे वाचनिकपूर्वविप्रतिषेधाश्रयणे फलाभावाच्चेति दिक् ॥ अन्तरङ्गत्वादिति ॥ भाष्ये त्वयच् प्रत्ययान्तरं, न तु तयबादेशः । उभयीत्यत्र ङीप्तु मात्राजिति प्रत्याहाराश्रयणेन साधितः । एवञ्चोभयशब्दे विकल्पस्य प्राप्तिरेव नेति उक्तम् । अन्तरङ्गस्य बलवत्त्वे ज्ञापकमन्यत्र प्रपञ्चितम् ॥ बाध्यत एवेति ॥ निरवकाशत्वरूपस्य बलवत्त्वबीजस्याभावात् ॥

तेनेति ॥ पूर्वा तु अन्तरङ्गबहिरङ्गयोर्युगपत्प्राप्तावेवेति भावः ॥ न कुर्वन्तीत्यर्थ इति ॥ यदि तु सेदुष इत्यादौ पदावधिकेऽन्वाख्याने सेद्वस् असिति स्थिते इट्सम्प्रसारणयोः प्राप्तौ प्रतिपदविधित्वेन शीघ्रोपस्थितिकत्वात् पूर्वं सम्प्रसारणे वलादित्वाभावादिटः प्राप्तिरेव न, लक्ष्यानुरोधाच्चात्र पदावधिकमेवान्वाख्यानमिति तत्सिद्धिरित्युच्यते, तदैषा परिभाषा निष्फलेति बोद्धम् । अत एव भाष्ये न कापि व्यवहृतेत्यन्यत्र विस्तरेण निरूपितम् ॥ इति परिभाषाप्रकरणम् ॥

इको यणचि ॥ प्रत्याहारग्रहणेषु तद्वाच्यवाच्ये निरूढा लक्षणा । दीर्घाज्जसि चेति ज्ञापकात् । ल्वादिभ्य इति निर्देशाच्च । तेन शब्देन षट्षष्टिर्गृह्यन्ते, यण्शब्देन सप्त । भाव्यमानत्वेन सवर्णाग्राहकत्वेऽपि गुणानामऽभेदकत्वेन नासिक्यानामपि यवलानां ग्रहणात् । अतो नास्ति यथासंख्यं । न च लक्ष्यार्थबोधात् पूर्वभाविनं शक्यार्थबोधमादाय यथासंख्यमस्त्विति वाच्यम् । एवमपि तृतीयचतुर्थाभ्याम् ऋकारलृकाराभ्यां प्रत्येकं त्रिंशदुपस्थितौ लृवर्णानां रेफादेशस्य ऋवर्णानां लादेशस्य च प्रसङ्गात् । तस्मादिह स्थानेऽन्तरतमसूत्रेणैवेष्टसिद्धिरित्यभिप्रेत्याह ॥ स्थानत आन्तर्यादिति ॥

ननु व्यक्तिपक्षे इक्पदोपस्थाप्योकारादिभिर्दीर्घादिग्रहणं न स्यात् । उच्चारित एव शब्दः प्रत्यायके न तु [illegible] इत्यणुदित्सूत्रे भाष्योक्तेः । न चोच्चारितस्यैव प्रत्यायकत्वे रहसि पुस्तकमीक्षमाणस्य बोधानापत्तिरिति वाच्यम् । तत्रापि पुस्तकद्रष्टुः स्वीयसूक्ष्मोच्चारणसत्त्वादित्यत आह ॥ प्रत्याहारग्रहणेष्विति ॥ एतेन दीर्घकारादेर्ग्राहकशास्त्रबलेन इकारादिभिर्बोधेऽपि तेषामिक्पदवृत्त्याऽनुपस्थितत्वेन तदुत्तरप्रत्ययार्थानन्वयापत्तिरित्यपास्तः । वृत्तिप्रयोज्योपस्थितिसत्त्वेनादोषाच्च । नन्वणुदित्सूत्रं व्यर्थम् । न च प्रत्याहाराणामाद्यवर्णैश्चरितार्थम् । अन्त्यसवर्णानामि[illegible] तत्सवर्णानामपि लक्षणयैव ग्रहणसिद्धेः । न च अस्य च्वावित्यादौ चारितार्थ्यम् । व्यक्तिपक्षेऽस्य प्रत्याहारसूत्रस्थतो भेदेनाण्त्वाभावादिति स्पष्टमणुदित्सूत्रे भाष्ये इति चेन्न । लक्ष्यतावच्छेदकज्ञानार्थमेव तच्चारितार्थ्यात् । प्रत्याहारेत्युपलक्षणं, तद्वाच्यवाच्येति च । अस्य च्वावित्यादावपि स्वसदृशवाच्येषु लक्षणावश्यकत्वात् । अणुदित्सूत्रगृहीतलक्ष्यतावच्छेदकिका लक्षणा विधीयमानातिरिक्तविषये एवाप्रत्यय इत्युक्तेः । अत एव त्यदादीनाम इत्यादौ न स्वसदृशवाच्येषु लक्षणा । नाज्झलौ अणुदित्यत्र तु न लक्षणा तद्बोधकाले लक्ष्यतावच्छेदकाग्रहादिति भावः । तत्र प्रमाणमाह ॥ दीर्घादिति ॥ अकृपदप्रयोगेऽपि स्वसवर्णग्रहणेऽपि तत्र, नादिचीत्येव सिद्धमितिभावः ॥ तेन—लक्षणाङ्गीकारेण ॥ भाव्यमानत्वेनेति ॥ विधीयमानविषये लक्षणाभावस्यानुपदमुक्तत्वादिति भावः ॥ अभेदकत्वेनेति ॥ शास्त्रे उच्चारितगुणानां भेदकत्वाभावेऽपि स्वरूपकृतभेदमादाय सप्तत्वसंख्या न विरुद्ध्यते । यदि तु अणुदित्सूत्रेऽण्ग्रहणाद् यणादिविषये गुणानां भेदकतयोचितेति विभाव्यते तदापि चत्वारो यण इति यथा संख्यमसङ्गतमेव । तद्ध्वनयन्नाह ॥ अतो नास्तीति । तत्खण्डने एवाग्रहो, न तु सप्तत्वसंख्यायामिति भावः॥ शक्यार्थबोधमादायेति ॥ ल्वादिभ्य इत्यादिनिर्देशोहितात्पर्यानुपपत्तिग्रहस्य तत्सत्त्व एव संभवेन स बोध आवश्यकः । तत्र च यथासंख्यसहायेन वाक्यार्थे निष्पन्ने ल्वादिभ्य इत्यादिनिर्देशलक्षणया जायमाने पुनर्वाक्यार्थबोधे लक्षितदीर्घादीनां स्ववाचकान्वय्यन्येवान्वय इति भावः॥स्थाने-

अनचि च ॥ द्वे वेति ॥ यरोऽनुनासिक इति सूत्राद् वाग्रहणमनुवर्तत इति नाज्झलाविति सूत्रे कैयटः । एवञ्च सर्वत्र शाकल्य ग्रहणं तत्पक्षभूतं पूर्वोत्तरसूत्रद्वयं च नारम्भणीयमिति भावः । यत्तु दीर्घादाचार्याणामिति सूत्रे आचार्यग्रहणं पूजार्थमित्यभिप्रेत्य, वाक् वाक्क् इति भाष्योदा. ते विकल्पे उपपत्तिचिन्तार्थं क्लिश्यन्ते, तन्मुधैव । पूजार्थतायाः प्रामाणिकैरनुक्तेः । त्रिप्रभृतिष्विति सूत्रे शाकटायनग्रहणस्यापि तथात्वापत्तेः । न चेष्टापत्तिः । संस्कर्तेति त्रिसकारपरकैयटहरदत्तादिग्रन्थविरोधात् । स्वग्रन्थवि-

---

ऽन्तरतमसूत्रेणैवेति ॥ व्यक्तिपक्षे व्यक्तीनामानन्त्येन संख्याज्ञानाभावाद्यथासंख्याऽसंभवाल्लृस्थासिद्धेश्चेति भावः । परे तु व्यक्तिपक्षे [illegible]ऽत्रेषु सर्वझकारादीनां ग्रहणं दुरुपपादम् । न हि तत्र लक्षणा वक्तुं शक्या । लक्ष्यतावच्छेदकाग्रहात् । एवञ्च तत्र प्रत्याहारसूत्रेषु जातिनिर्देशेनैव निर्वाहो, नान्यथा । एवञ्चाइउणित्यादावपि जातिनिर्देश एवोचितः । अर्द्धजरतीयस्यानौचित्यात् । अत एवाणुदित्सूत्रे भाष्ये प्रत्याहारेष्वस्य ञ्वावित्यादौ च उक्तामनुपपत्तिमाशङ्क्य जात्याश्रयणमेव कृतम् । यथासंख्यसूत्रं च व्यक्तिसाम्य इव धर्मसाम्येऽपि प्रवर्तते । स्यतासी लृलुटोरित्यादौ यथा । नाप्यत्र पक्षे ऋकारादौ लकाराद्यापत्तिः । लृत्वादिजातेर्ऋकारादावभावात् । न च जातिपक्षेऽणुदित्सूत्रेऽण्ग्रहणप्रत्याख्याने, उपसर्गादृतीत्यादौ ऋकारेण लृकारग्रहणाय सावर्ण्यवचनस्थाने लृवर्णस्य ऋवदतिदेशाद् लृकारे रेफापत्तिरिति वाच्यम् । क्लृप्तशिक्षार्थं तस्यातिदेशस्यानित्यत्वाद्दश्यकत्वा. । तत्पक्षेऽण्ग्रहणप्रत्याख्यानेऽप्यऽप्रत्यय इत्यंशो वाक्यभेदेन विधीयमाने जातिग्रहणप्राप्तसवर्णग्रहणनिषेधकस्तपरसूत्रवदिति त्यदादीनाम इत्यादौ न दोषः । एवञ्चात्र यण्पदेन जात्याश्रयणेनाऽपि, न सवर्णबोधनमिति स्वौजसित्यादौ अनुनासिकस्थानेऽपि निरनुनासिक एव । अत एव स्थानेऽन्तरतमसूत्रे भाष्येऽस्य तदुदाहरणत्वमाशङ्क्य यथासंख्यमित्यनेनापि सिद्धमित्युक्तम् । तेनात्र तयोः फलाविशेष उक्तः । उञ इति सूत्रे नव्यानां प्रमाद एव । न च झलादिषु झकारादिभी रूपसादृश्येन सर्वझकारादिप्रतीतिरिति वाच्यम् । अगादिष्वपि किञ्चित्सादृश्यमाश्रित्य दीर्घादीनामपि ग्रहणोपपत्तेः । ल्वादिभ्य इति निर्देशानामीषत्सादृश्येनापि ग्रहणमित्यर्थज्ञापकताया युक्तत्वात् । तदप्युक्तम् अइउण्सूत्रे भाष्ये, रूपसामान्याद्वा सिद्धमिति । अणुदित्सूत्रेऽण्ग्रहणं तु प्रत्याहाराद्यवर्णेषु णकारादिभिश्चिह्नैः प्रत्याहारसूत्रस्थोऽयमिति प्रत्यभिज्ञासत्त्वादुपायान्तरपरम् । आचार्याः कृत्वा न निवर्तन्त इति न्यायादिदं [illegible]मभिप्रेत्य तत्रत्यमण्ग्रहणं प्रत्याख्यातं भाष्ये इत्याहुरिति दिक् ॥

किलश्यन्त इति ॥ अनचीत्यनुवर्त्यं पर्युदासपरतया हलि पर एव नित्यनिषेध

रोधाच्च। अत एव प्रातिशाख्यभाष्येऽपि, आ त्वा रथमिति मन्त्रे तकारस्य द्वित्वविकल्प उदाहृतः। माधवेन चास्ते इत्यत्र सकारस्य द्वित्वविकल्प उक्तः। एवञ्च धात्रंश इत्यत्र तकारस्य द्वित्वमसदिति किरेवासतीति दिक् ॥

स्थानिवदादेशः॥ भाष्यकृतोक्तादिताव्यगुणिस्थानिवदादेश इति प्राचोक्तम् । तत् परिगणनमुदाहरणमात्रं वा । नाद्यः । सिच्क्सचङ्ङादीनां श्नादेशस्य शानचश्चासंग्रहापत्तेः । नान्त्यः । अव्यय चाङ्गपदाभ्यां पृथग्ग्रहणवैयर्थ्यात् । प्रस्तुत्येति वृत्तिकारोक्तं तदुदाहरणमपि मन्दम् । क्त्वामात्रस्यानव्ययत्वात् । कृत्त्वेन सिद्धत्वाच्चेत्याशयेनाह ॥ आदेश इति ॥

इति व्याख्यानेनेति भावः ॥ विकल्प उक्त इति ॥ एवञ्च सर्वत्र शाकल्यस्येतिवदिदमपि प्रपञ्चार्थमिति भावः ॥ अस्तीति ॥ यत्तु, नाद्धित्था दौ वृत्तावनचीति प्राप्तिमुद्भाव्य त्रिप्रभृतिषु सर्वत्रेत्यनयोः प्राप्तिमनुद्भाव्य पुनर्दीर्घादित्यत्रानचीति प्राप्तिरुद्भाविता हरदत्तेन, तस्यायमाशयः। निषेधविकल्पे प्राप्त्युद्भावनं नावश्यकं, तद्विकल्पे विधिविकल्पस्य फलितत्वेन विधेरेव अप्राप्तविषयविकल्पसम्भवाद्, नित्यनिषेधे तु तदुद्भावनमावश्यकमिति । तन्न । विकल्पेऽपि निषेधप्रकरणाश्नुल्लेखस्यावश्यकत्वेन प्राप्त्युद्भावनस्यावश्यकत्वात् । मध्ये नञोऽसम्बन्धो, मण्डूकानुवृत्तिरग्रे इत्यत्र मानाभावाच्च। सर्वत्रेति सूत्रेऽस्य द्वित्वमात्रनिषेधकतेति बोधयितुं तदनुल्लेखाच्च । त्रिप्रभृतिष्वित्येतद्विषये नकारषकारयोर्द्विर्वचनाभाव इति मिश्रग्रन्थेन प्राप्त्युल्लेखस्य कृतप्रायत्वाच्च। वृत्तिहरदत्तयोर्नादिन्या–शरोऽचीत्यनयोरपि प्राप्त्युल्लेखस्य बहुषु पुस्तकेष्वनुपलम्भाच्चेति दिक् ॥

चङ्ङादीनामिति । आदिना चिण् । न केवलं ल्यादेशानामेवासंग्रह इत्याह ॥ श्नादेशस्येति ॥ तदभावे ह्यवादिषातामित्यत्रेड् न स्यात् । क्सादेः कादीनामित्त्वं न स्यात् । शानचः शस्य च तन्न स्यात् । मा हि दर्शादित्यादौ अङि गुणो न स्यादिति भावः । ननु सिजादीनां प्रत्ययाधिकारे पाठात्, श्नम्वत् प्रत्ययत्वमस्तीति न स्थानिवत्त्वोपयोगः । न च तेषां प्रत्ययत्वे च्लिविधानं व्यर्थम् । मन्त्रे घसेति सूत्रे चङ्ङ्सिचामिति त्रयाणां ग्रहणे गौरवापत्तेः । सिच्लो लुकि तद्विषये आदिः सिच इति स्वरापत्तेश्चेति भाष्यकैयटयोः स्पष्टमित्यरुचेराह ॥ चेति ॥ तेनाग्रहीदित्यादाविडादेशस्य ईटोऽसंग्रह इत्यर्थः । इदमुपलक्षणम् । अव्ययस्य पदात् पृथग्ग्रहणवैयर्थ्यमपि दोष इति बोद्धम् ॥ अव्ययस्येति ॥ अत्र त्वस्यैव दोषत्वमिति भावः । नन्वव्ययस्याङ्गत्वे फलाभावेन प्रत्ययस्य लुका लुप्तत्वेन च तदप्राप्त्या कथं तेनाव्ययसंग्रहोऽत आह ॥ पदेति ॥ तत्त्वं च ततः परस्य निघातार्थमावश्यकम् । प्रत्ययलक्षणेन सुबन्तत्वाच्च तत्त्वमिति भावः ॥ सिद्धत्वाच्चेति ॥ अत एवात्र तुक् । न च सर्वे सर्वपदादेशा इति न्यायेन प्रस्तुत्वा इत्यस्य स्थाने प्रस्तुत्य इत्यादेशे तस्याव्ययत्वसिद्धिरिति वृत्त्याशय इति वाच्यम् ।

अनल्विधाविति किम् । तेन, तस्मात्, तस्य, तस्मिँश्च विधौ माभूत् । तत्र अला विधौ यथा । व्यूढोरस्केन । अत्र सकारस्य स्थानिवत्त्वेन विसर्गवदुत्वमाश्रित्य [illegible] इति णत्वं प्राप्तम् । अलः परस्य । द्यौः । पन्थाः । हल्ङ्यादिलोपे न । अलो विधौ । धुकामः । वलि लोपो न । अलि विधौ । यजेः क्तः । क इष्टः । हशि चेत्युत्वं न । अल् चेह स्थान्यवयव एव गृह्यते । तेन रामायेत्यादौ सुपि चेति दीर्घः सिद्धः । तद्विधौ हि [illegible]श्रितम् । यः [illegible]देशावयवो, न तु स्थान्यवयव इति । तदेवत्सकलमभिप्रेत्याह ॥ न तु स्थान्यलाश्रय इति ॥ आश्रयणं चेह यथाकथञ्चिन्न तु प्राधान्येनैवेत्याग्रहः । तेन [illegible]पद्येत्यत्र वलादिलक्षण इड् न ॥ तन्निषेधादिति ॥ स्थानिवत्त्वनिषेधादित्यर्थः ॥

अचः ॥ अल्विध्यर्थमिति । तेन वव्रश्चेत्यत्र वस्य संप्रसारणं न । उरदत्वस्य स्थानिवत्त्वेन संप्रसारणतया, न संप्रसारण इति निषेधात् । न चोरदत्वं परनिमित्तं नेति वाच्यम् । अङ्गाक्षिप्ते प्रत्यये परे तद्विधानात् । प्रागभ्यासविकारेभ्योऽङ्गाधिकार इति पक्षं दूषयित्वा आसप्तमसमाप्तेरिति पक्षस्यैव आकरे [illegible]त्वात् । किञ्च पूर्वसूत्रेण स्थानिप्रयुक्तमतिदिश्यते,

---

अर्थवत्येव स्थानिवत्त्वमिति तात्पर्येण कत्वोऽप्यर्थवत्त्वेन तादृशस्थान्यादेशभावकल्पने मानाभावादिति दिक् ॥ अनल्विधाविति किमिति ॥ विधिग्रहणविशिष्टं किमर्थमिति प्रश्नः ॥ णत्वं प्राप्तमिति ॥ न च सकारे स्वतोऽङ्भिन्नत्वसत्त्वात् अङ्नि[illegible]व्यवाये नेति निषेधात् कथं णत्वप्राप्तिरिति वाच्यम् । अतिदिश्यमानधर्मविरुद्धस्वाश्रयधर्मप्रयुक्तकार्याभावस्यातिदेशस्वभावसिद्धत्वात् । इदं चासिद्धवत्सूत्रे कैयटे स्पष्टम् ॥ धुकाम इति ॥ यद्यपि वत्वं हल्त्वाद्यपेक्षया विशेषधर्मस्तथाप्येतद्वाक्योपप्लुते वकारवदुकार इति वाक्ये उपात्तधर्मापेक्षया न तस्य तत्त्वम् । सूत्रकल्पस्थान्यादेशभावमादायैवैतत्कृतवाक्योपप्लवादिति भावः ॥ क इष्ट इति ॥ यद्यपीदं रूपमुत्वे गुणेऽवादेशे पाक्षिकलोपेन सिद्ध्यति, तथापि पक्षे कविष्ट इति स्यात् । कयिष्ट इति चेष्यते इति भावः ॥ स्थान्यवयव एवेति ॥ उपलक्षणमेतत् । स्थानिरूपोऽपीति बोध्यम् ॥ अत एवादेशिन्यल्याश्रीयमाणे प्रतिषेध इति भाष्ये उक्तम् ॥ न तु स्थान्यवयव इति ॥ अतः प्रत्ययत्वं स्थानिवत्त्वेन भवत्येवेति भावः । अग्रहीदित्यादौ, ग्रहोऽलिटीत्यनेनेट एव दीर्घविधानाच्चात्वेन तस्य स्थानितेति तदवृत्तीट्त्वाश्रयस्य सिचो लोपस्य सिद्धिरिति बोध्यम् ॥ यथा कथञ्चिदिति ॥ व्याख्यानादिति भावः ॥

दूषयित्वेति ॥ अङ्गस्येति सूत्रे भाष्ये इति शेषः । एतदसिद्धैव दूषयित्वेत्यर्थः ।

न स्वादेशप्रयुक्तं वार्यते । नायकः पावक इत्यादौ, एचोऽयवायाव इत्यादीनामप्रवृत्तिप्रसङ्गात् । अनेन तु वार्यते । शब्दाधिकारमाश्रित्य भावाभावयोरुभयोरप्यतिदेशोऽयमिति स्वीकारात् । न पदान्तेतिसूत्रे यलोपदीर्घादिग्रहणं चेह लिङ्गम् । अत एव, गणयतीत्यादौ न वृद्धिः । स्थानिनि सत्यभवन्त्यास्तस्या आदेशेऽप्यभावातिदेशात् । उक्तं च, काममतिदिश्यतां वा सच्चासच्चापि नेह भारोऽस्तीति । स्यादेतत् । पूर्वत्वस्य सावधित्वेन सन्निहितस्यैव अवधित्वमुचितम् । सन्निहितं चेह त्रयं— स्थानी, आदेशो, निमित्तं च । तत्र न तावत् स्थानी अवधिस्तस्यादेशेनापहारात् । नाप्यादेशनिमित्ते, वैयाकरण इत्यत्र ऐकारस्यायादेशापत्तेरित्याशङ्क्याह ॥ अचः पूर्वत्वेन दृष्टस्येति ॥ पूर्वत्वमुपलक्षणं, न तु विशेषणमिति भावः । एतेन, अचः पूर्वत्वविज्ञानादैचोः सिद्धमिति वार्तिकं व्याख्यातम् ॥

न पदान्त ॥ पदस्य चरमावयव इति ॥ वृक्षं वेतीति वृक्षवीः । वातीति वृक्षवाः । तमाचष्टे वृक्षव् । विच् । इह लोपो व्योरिति वलोपो न । स्थानिवत्त्वात् । न च, न पदान्तेति निषेधः । इह विधेयस्य लोपस्य पदाऽनवयवत्वात् । पदान्तस्य स्थाने विधौ नेति व्याख्याने तु नेदं सिद्ध्येत् । सुबन्ताण्णिजिति हरदत्तादिमतेऽन्तर्वर्तिसुपा पदत्वात् । न चेष्टवदित्यति-

विस्तरस्त्वन्यत्र द्रष्टव्यः ॥ अनेन तु वार्यत इति ॥ स्थानिनि सति यद्भवति तदादेशेऽपि भवति, तत्र सति यन्न भवति तदादेशेऽपि न भवतीत्यर्थाद्, अजादेशोऽच्कार्यं लभते, न लभते चेति वाच्योऽर्थः । तत्रोपपत्तिमाह ॥ शब्देति ॥ पूर्वसूत्रे स्थानिवत्पदस्य तद्वत्कार्यं लभते इत्येतन्मात्रार्थकस्येहोभयार्थकत्वात्तदाश्रयणमिति भावः ॥ यलोपदीर्घादीति ॥ यलोपदीर्घावादी येषामित्यर्थः । यलोपादयो दीर्घादयश्चेति यावत् । तेन स्वरादीनामपि संग्रहः । यलोपादीत्येव सिद्धे एवमुक्तिर्वैचित्र्याय । न हि यलोपादिविषये भावातिदेशप्रसक्तिरिति भावः ॥ न वृद्धिरिति ॥ अत उपधाया इति वृद्धिर्नेत्यर्थः । क्ङिलुगुपधात्वेति निषेधस्तूपधात्वनिमित्तकप्रत्ययविधावेव, नान्यत्रेतिभाष्येरूपष्टम् ॥ आयादेशापत्तेरिति ॥ यणःस्थानिवत्त्वेनाच्त्वादिति भावः । पूर्वत्वं चात्र व्यवहिताव्यवहितसाधारणं, स्वरे निषेधात् । अतो यण्निमित्ताकारापेक्षयाऽप्यैकारस्य पूर्वत्वमस्तीति तत्पक्षेऽप्ययं दोष इति भावः । आदेशेनापहारात् कथं स्थानिनोऽवधित्वमित्यत आह ॥ उपलक्षणमिति ॥

अन्तशस्य चरमावयववाचित्वं, विधिशब्दो भावसाधनः । कर्मषष्ठ्या समासेन पदचरमावयवे कर्त्तव्ये इत्येवं व्याख्याने फलमाह ॥ वृक्षमिति ॥ विजिति ॥ क्विप् तूट् स्यादिति भावः ॥ स्थानिवत्त्वादिति ॥ णिलोपस्य टिलोपस्य वा स्थानिवत्त्वादित्यर्थः । नन्वस्य पदत्वाभावात् कुतोऽसिद्धिरत आह ॥ सुबन्तादिति ॥

दिहेन णिचि भत्वेन पदत्वबाधः । णेर्लुप्तत्वात् । न च प्रत्ययलक्षणम् । वर्णाश्रयत्वादिति भावः ॥ द्विर्वचनादौ चेति ॥ यलोपादय आदिशब्दग्राह्याः । वरे इति तु वरे योऽजादेशः स न स्थानिवदिति व्याख्येयम् । सहविवक्षाभावेऽपि निपातन दृ द्वन्द्वः सप्तम्यलुक् च । अथोदाहरणानि । पदान्ते । कानि सन्ति । कौ स्तः । द्विर्वचने । सुद्ध्युपास्यः । वरे । यायावरः । यश्च यङ इति वरच् । अतो लोपः । स च, आतो लोप इटि चेत्यालोपे कर्तव्ये न स्थानिवत् । यलोपे । यातिः । यातेर्यङन्तात् क्तिच् । अतो लोपः । यलोपः । अल्लोपस्य स्थानिवत्त्वादातो लोपः । यलोपः । न च पुनरालोपः शङ्क्यः । चिणो लुङ्न्यङ्सनां लोपस्यासिद्धत्वात् स्थानिवद्भावाच्च । स्वरे । चिकीर्षकः । सनोऽतो लोपः । लितीति ककारेकारस्य उदात्तत्वे कर्तव्ये न स्थानिवत् ।

अन्तर्वर्त्तिसुब्निमित्तकपदत्वस्यैकदेशविकृतन्यायेन वाऽन्तेऽपि सत्त्वमितिभावः ॥ प्रत्ययलक्षणमिति ॥ स्थानिवत्त्वेन प्रत्ययनिमित्तं कार्यमित्यर्थः ॥ वर्णाश्रयत्वादिति ॥ णाविष्ठवदित्यनेन, यञि भमिति शास्त्रस्यैवातिदेशः । तच्च वर्णाश्रयम् । एवञ्च स्थानिवत्त्वस्याप्रसक्तिः । कार्यातिदेशेऽपि, यन्निमित्तवैकल्यप्रयुक्तोपदेशाऽप्रवृत्तिस्तन्निमित्तातिरिक्तसर्वनिमित्तकत्वमतिदेशस्यापीत्यङ्गीकाराद् वर्णाश्रयऽत्वाक्षतिः । प्रत्ययलक्षणसूत्रं तु भाष्यकृता प्रत्ययस्य यत्रासाधारणं रूपमाश्रीयते तत्रैव प्रत्ययलक्षणमिति नियमार्थत्वेन स्थापितं, न त्वप्राधान्येनालाश्रयणे विध्यर्थमिति भावः । नच अचः परस्मिन्निति णिलोपस्य स्थानिवत्त्वेन भत्वं सुलभमिति वाच्यम् । णिलोपस्येव टिलोपस्यापि स्थानिवत्त्वापत्तौ वाऽन्ते भत्वस्य दुर्लभत्वेन तत्र पदत्वानिष्पत्तेः । प्रकल्प्य चापवादविषयामिति न्यायेन निषेधविषये तत्प्रतिबन्धाय स्थानिवत्त्वाप्रवृत्तेश्च । हरदत्तादिमते इत्यनेनारुचिर्बोधिता । तद्बीजं त्वयं पक्षो न सूत्रवार्तिकभाष्यसंमत इति प्रातिपदिकात्तदुत्पत्तौ पदत्वाभाव इति । चरमावयवे कार्य इति व्याख्याने फलं तु, एषो यन् हसतीत्यादौ यणः स्थाने इत्यनुवृत्तेरिति सुलोपाभावः । इणः शतरि यन्निति रूपम् । उत्वे च न स्थानिवदनेन निषेधादिति तत्त्वम् ॥ कानि सन्तीति ॥ वाक्यसंस्कारपक्षे एतत् । तत्र पक्षे पूर्वोपस्थितनिमित्तकत्वरूपान्तरङ्गत्वमादायान्तरङ्गाणां पूर्वं प्रवृत्तेरिकारादेः स्थानिभूतादचः पूर्वत्वं द्रष्टव्यम् । एतन्मूलकमेव वाक्यसंस्कारपक्षे श्रुतवर्णक्रमेणैव लक्ष्यसंस्कार इति वदन्ति ॥ न स्थानिवदिति ॥ तेनातो लोपो नेति भावः । न च पूर्वमलोपस्ततो वलि लोप इति क्रमसत्त्वादकारेणाङ्गधातुकत्वाद्यलाभात् कथमतिदेशेन तल्लाभः । सम्भावनामात्रेणाऽपि तल्लाभस्य वरेग्रहणेन ज्ञापनात् । अस्ति चात्रापि, यदि पूर्वं यलोपः स्यात्तदाकारेण प्रत्ययत्वं लब्धं स्यादिति सम्भावना । फलं तु यातिरित्यादिसिद्धिरिति दिक् ॥ क्तिजिति ॥ क्तिच्क्तौ च सञ्ज्ञामित्यनेन । क्तिन् तु न । अ प्रत्ययादित्यनेन बाधात् ॥ न स्थानि-

सवर्णानुस्वारयोः । शिण्ढि । दीर्घे । प्रतिदीव्ना । जक्षि । सग्धिश्च मे । अदनं ग्धिः । अद्देः क्तिनि, बहुलं छन्दसीति घस्लादेशः । घसिभसोर्हलीत्युपधालोपः । झलो झलीति सलोपः । धत्वम् । घस्य जश्त्वम् । सहस्य स इति सूत्रात् स इत्यनुवर्तमाने समानस्य छन्दस्यमूर्द्धप्रभृत्युदर्केष्विति सूत्रेण सः । चरि । जक्षतुः ॥

संयोगान्तस्य ॥ तदन्तस्येति ॥ अलोऽन्त्यपरिभाषयेति भावः । यद्यऽपि, विशेषणेन तदन्तविधिलाभात् संयोगस्येत्येव सूत्रयितुमुचितं, तथाऽपि प्रत्येकं संयोगसंज्ञेति पक्षे इषत्करोतीत्यादौ लोपं वारयितुं संयोगावन्तौ यस्येति द्विवचनान्तेन सामासलाभार्थमन्तग्रहणम् । वृत्तौ हि उपसर्जनानामेकत्वसंख्यौत्सर्गिकी द्वित्वादिकं तु प्रयत्नलभ्यमिति भाष्ये स्थि-

---

वदिति ॥ स्थानिवत्त्वे हि स्वराप्रवृत्तिरेव स्यात् । अकारस्य तु न । स्वविधौ स्थानिवत्त्वनिषेधात् । लित्वं तु, कारक इत्यादौ सावकाशमिति भावः ॥ शिण्ढीति ॥ नन्वत्रानुस्वारस्यादिष्टादचः पूर्वत्वेन स्थानिवत्त्वाप्रवृत्तिः । न चास्मादेव ज्ञापकात्तस्याशास्त्रीयत्वेऽपि स्थानिवत्त्वेन तत्त्वम् । फलाभावात्तद्घटितसन्निवेशाऽपेक्षस्य ततः पूर्वत्वस्यातिदेशसहस्रेणाप्यतिदेष्टुमशक्यत्वाच्च । भोभगो इति सूत्रस्थभाष्यरीत्या तस्य स्थानिभूतात्प्रवृत्तिधर्मत्वेनानल्विधाविति निषेधाच्च । विशेषणतयाऽलाश्रयणाच्च । भाष्ये, पूर्वत्रासिद्धे इत्यवष्टभ्य, वरे–यलोप–स्वरभिन्नानां द्विर्वचनादीनां ग्रहणस्यात्र प्रत्याख्यानेन तस्य च णत्वे प्रतिप्रसवेनात्र स्थानिवत्त्वेन परसवर्णाभावस्यैव लाभादिदमुदाहरणं चिन्त्यम् । णत्वग्रहणे च प्रतिप्रसववार्तिके लक्षणप्रतिपदोक्तपरिभाषा नेत्युपपादयिष्यते । किञ्च दीर्घादाचार्याणामित्युत्तरमनुस्वारस्य यथि, वा पदान्तस्य, तोर्लि, उदः स्था, झयो हो, शश्छोटीति षट्सूत्रीपाठोत्तरं, झलां जश् झशि, अभ्यासे चर्च, खरि च, वाऽवसाने, अणोऽप्रगृह्यस्येति पञ्चसूत्र्याः पाठ इति भाष्यसंमताष्टाध्यायीपाठपक्षे परसवर्णदृष्ट्या, झलां जश् झशीत्यस्य, झरो झरीत्यस्य चासिद्धत्वेन यप्परत्वाभावात्तदप्राप्तेरितिचेत् सत्यम् । पादयतेः क्विपि पाद्धसतीत्यादौ, झयो ह इति पूर्वसवर्णे पञ्चमीसमासेन प्राप्तस्थानिवद्भावनिवारणार्थत्वात् । हरितशब्दादाचक्षाणण्यन्तात् क्विपि हरिद्धसतीत्यादौ उक्तरीत्या प्राप्तस्य तस्य वारणार्थत्वाच्च । अत्रालोपस्यापि तत्प्राप्त्या, कौ लुप्तमित्यस्य विषय एव न । हरिन्नमतीत्यादौ अनुनासिके तदव्याप्त्यर्थत्वाच्च । हयवरट्सूत्रभाष्यरीत्या तत्र सवर्णग्रहणापकर्षेण लस्यापि सवर्णविधित्वादित्यन्यत्र विस्तरः ॥ सूत्रेण स इति ॥ सग्धिः स्त्री सहभोजनमित्यमरात् सहस्य सादेश इति प्रतीयते । झलो झलीति सिच एव लोप इति पक्षे छान्दसो वर्णलोपो बोद्धव्यः । स्पृट् चेदं, धि चेति सूत्रे भाष्ये । लोके तु सग्धिरित्यसाध्वेवेति बोद्धव्यम् ॥

विशेषणेन – पदस्येत्यधिकारप्राप्तविशेषणेन संयोग स्वेत्यनेन ॥ एकत्वसंख्ये-

तम् ॥ यण इति वाचनिकम् ॥ यद्वा वाच्यो व्याख्येयः । व्याख्या च द्वेधा । झलो झलीत्यतो झलग्रहणमपकृष्य झल एव लोपो विधीयते इत्यन्तरङ्गे लोपे कर्तव्ये बहिरङ्गस्य यणोऽसिद्धत्वमिति वा। न च षाष्ठी असिद्धपरिभाषा त्रिपादीस्थत्वेनासिद्धमन्तरङ्गं लोपं न पश्यतीति वाच्यम् । कार्यकालपक्षाभ्युपगमात् । न च नाजानन्तर्ये बहिष्टृप्रक्लृप्तिरिति निषेधः । तस्यानित्यत्वात् । उत्तरकालप्रवृत्ते लोपेऽजानन्तर्याभावाच्च । तथा च वार्तिकम्—संयोगान्तस्य लोपे यणः प्रतिषेधः । न वा झलो लोपाद् बहिरङ्गलक्षणत्वाद्वेति ॥ इह यथोद्देशपक्षे आद्यं वार्तिकद्वयं, तृतीयं तु कार्यकालपक्ष इति विवेकः । यत्त्वाहुः । वार्तिककृतो वचनं, प्रत्याख्यानप्रकारद्वयं तु भाष्यकृत इति । तन्निर्मूलम् । मतभेदे प्रमाणाभावात् । यदप्याहुः । काव्यं, कलत्रं, शाल्वं, चाऽऽचक्षाणः काव् कलत् शाल्, अदभ्रयतेरधब् इति । तदपि न । पक्ष-

---

ति ॥ अभेदैकत्वसंख्येति तदर्थः । संख्यासामान्याभाव इति यावत् । विग्रहे एकवचनं तु औत्सर्गिकं सुबन्तत्वसंपत्तिमात्रफलकमिति समर्थसूत्रे भाष्ये स्पष्टम् ॥ भाष्ये स्थितमिति ॥ संयोगसञ्ज्ञासूत्रस्थे इत्यर्थः । एवञ्च प्रत्येकं संयोगसञ्ज्ञापक्षस्यानन्तरा इति सूत्राक्षरस्वारस्यविरोधेन फलाभावेन चासंगतत्वमिति तत्रैव भाष्ये ध्वनिततयाऽत्रत्यमन्तग्रहणं व्यर्थमेव, न तु फलान्तरेऽभिनिवेशः कार्य इति भावः । यत्तु संयोगेति लुप्तषष्ठीकं, तच्च पदस्येति चान्तविशेषणम् । संयोगान्तस्य सतः पदान्तस्येत्यर्थमन्तग्रहणमिति । तन्न । तादृशलक्ष्याभावात् । अत एव, ध्वसोरिति सूत्रे द्विशकारको निर्देश इति भाष्ये उक्तम् । त्वद्रीत्या संयोगान्तलोपस्य दुर्वारत्वेन शकारद्वयाभावात्तदसंगतिः स्पष्टैव ॥ अपकृष्येति ॥ तच्च षष्ठ्या विपरिणम्य वाक्यभेदेन संबध्यते । तेन पूर्ववाक्यस्य क्वचिदझल्यपि प्रवृत्तिः । उत्तरवाक्येन च तस्य क्वाचित्कत्वं ज्ञाप्यते । तेन च नातिप्रसङ्गः । ध्वनितं चेदममो मशित्यत्र भाष्ये । तत्र हि मद्वयात्मकमादेशं विधाय शित्त्वं प्रत्याख्यातम् । एकस्य मस्य संयोगान्तलोप इति च कैयटेन व्याख्यातम् ॥ अनित्यत्वादिति ॥ तत्र च ज्ञापकं, केऽण इति निर्देशः । क इ अण इति स्थिते लक्ष्यगतपरत्वमाश्रित्य प्राप्त इकारस्य यण् असिद्धपरिभाषया तत्र व्यावर्त्यते । अन्तरङ्गं बलीय इति परिभाषान्तरं नास्त्येवेति भावः । वस्तुत, ओमाङोश्चेत्याङ्ग्रहणादनित्यमिदम् । तद्धि, शिव आ इहीति स्थिते परमपि सवर्णदीर्घं बाधित्वा धातूपसर्गकार्यत्वेनान्तरङ्गत्वादाद्गुणे वृद्धिबाधनार्थम् । उदाहरणं तु, अक्षद्यूरिति । अन्यथा अन्तरङ्गे यण्यूडसिद्धः स्यात् ॥ मतभेद इति ॥ न वेति वाशब्दस्वारस्येन वचनारम्भवादिन एव प्रत्याख्यानप्रकारः । भाष्यकृत्तु, तर्हीह वक्तव्यं न वक्तव्यमित्यादिशब्दैरेव प्रत्याचष्टे इति सर्वं वार्तिककृत एवेति भावः ॥ काव्येत्यादि ॥ संयोगान्तलोपा-

त्रयेऽपि संयोगान्तलोपस्य दुर्लभत्वात्। आद्यपक्षद्वयैकरूप्यार्थं पूर्वं पूर्वमन्तरङ्गं परं परं बहिरङ्गमित्यल्लोपणिलोपयोरसिद्धत्वस्य सुवचत्वात् । अत एव कातन्त्रपरिशिष्टे शुक्लयतेः किपि शुक्ल् इत्युदाहृतम् । वाऽन्तयोः किपि ऊठो दुर्वारत्वात् । न च स्थानिवत्त्वम् । क्वौ विधिं प्रति तन्निषेधात् । विचि, लोपो व्योरिति लोपस्य प्रसङ्गाच्च । गिरिवेश्मयतेस्तु किपि यणः प्रतिषेधार्थं वचनारम्भपक्षे गिरिवेडित्युचितम् । प्रत्याख्यानपक्षे तु मान्तमेवेति दिक् ॥ इति पक्ष इति ॥ पक्षद्वयस्यापि भाष्ये स्थितत्वादिति भावः ॥ चत्वारि रूपाणीति ॥ यत्तु वदन्ति । धकारयकारोभयद्वित्वे उभयोः पुनर्द्वित्वे लोपविकल्पेऽन्यतरद्वित्वेऽनुभयद्वित्वे च नव रूपाणि । तथा हि । एकधं त्रिधा। एकयं द्वियं त्रियं च । एवं द्विधं त्रिधं च त्रिधेति । न चान्तरङ्गे द्वित्वे बहिरङ्गस्य यणोऽसिद्धत्वं, त्रैपादिकेऽन्तरङ्गे बहिरङ्गपरिभाषा न प्रवर्त्तत इति विसर्जनीयसूत्रे भाष्यकैयटयोर्व्यवस्थापितत्वादिति॥ अत्रेदं वक्तव्यम् ॥ पुनर्द्वित्वमशुद्धम् । एकस्यां व्यक्तौ एकं लक्षणं सकृदेव प्रवर्त्तत इति

दिति भावः । ननु पूर्वपूर्वस्थानिकमन्तरङ्गमित्यर्थो न भाष्यसम्मतः । किन्तु पूर्वपूर्वनिमित्तकमित्येव । किञ्च प्रातिपदिकाद् णिजुत्पत्तेरेव भाष्यसंमततया बहिर्भूतसुब्निमित्तकसंयोगान्तलोपोऽपि बहिरङ्ग इत्यरुचेराह ॥ वाऽन्तयोरिति ॥ काव्ये यलोपे स्थानिवत्त्वनिषेधाल्लोपो व्योरिति कृते वाऽन्तत्वमिति ऊठ् दुर्वारोऽन्त्ये च स्वत एवेति तत्र वलोपं बाधित्वोठ् दुर्वार इत्यर्थः ॥ विचीति ॥ काव्यशब्दे इति शेषः । यलोपे स्थानिवत्त्वनिषेधात् । एवञ्च प्राचीनोक्तं संयोगान्तलोपोदाहरणत्वमयुक्तमिति भावः । शाल्वे तु अल्लोपादेः स्थानिवत्त्वान्न तत्प्रसक्तिरिति बोध्यम् ॥ मान्तमेवेति ॥ अस्य प्राप्नोतीति शेषः । तस्मात्तत्पक्षेऽपि वाक्यभेदेन व्याख्याय गिरिवेडित्येव । अन्यथाऽऽरम्भप्रत्याख्यानयोः फलभेदः स्यादिति भावः ॥ दिगिति ॥ दिगर्थस्तु संयोगान्तलोपसंयोगादिलोपविषयकतयाऽऽरब्धस्य यणः प्रतिषेध इति वचनस्य, संयोगान्तलोपविषयकस्य झलो लोपादिति प्रत्याख्यानम्। अत एव तत्र संयोगान्तलोपो झलो लोप इति भाष्ये व्याख्या कृता । बहिरङ्गलक्षणत्वाद्वेत्यस्य तु बहिरङ्गो यणादेशोऽन्तरङ्गो लोप इति व्याख्यानेन वार्तिकस्वारस्येन चेदृशानां लक्ष्याणामनभिधानमेव। वस्तुतस्तृतीयं वार्तिकं विसर्जनीयसूत्रभाष्ये कार्यकालपक्षमुपक्रम्य, अयुक्तोऽयं परिहारो बहिरङ्गलक्षणत्वाद्वेत्यनेन दूषितमित्यलम् ॥ उभयद्वित्वे इति ॥ द्विधं द्वियमेकम् (१) । पुनर्द्वित्वे त्रिधं त्रियम् (२) ॥ अन्यतरेति ॥ एकधं, द्वियं त्रियं च (३ । ४) । एकयं, द्विधं त्रिधं च (५ । ६) । द्वयोरपि द्वित्वे अन्यतरस्य पुनर्द्वित्वे द्विधं त्रियम् (७) । त्रिधं द्वियं च (८) । अनुभयद्वित्वे एकधमेकयम् (९) । लोपविकल्पान्यतरद्वित्वयोः

एकः पूर्वपरयोरिति सूत्रे भाष्ये सिद्धान्तितत्वात् । अन्यथा द्वित्वानामानन्त्यप्रसङ्गः । न च, झरो झरीलि, हलो यमामिति च लोपेन निर्वाहः । लोपस्य वैकल्पिकत्वात् । कथमन्यथा त्रिधं त्रियं चेति भवदुक्तिः सङ्गच्छेत । किञ्चैवं

त्वमफलत्वात् । सम्भवमात्रेण तु तदुक्तिः ॥ एकः पूर्वपरयोरिति ॥ तत्र हि यथाऽनयोः पूलयोः कटं कुर्वित्यादौ एकवाक्यतयैव बोधादेकत्वविवक्षणेनोभयसम्बन्ध्येककटकरणप्रतीतिः तथा,आदचि पूर्वपरयोर्गुणत्वादावपि [illegible] द्वित्वविधेयगतसंख्याविवक्षणान्नोभयोः स्थाने एक एवादेशो भविष्यतीत्येकग्रहणं प्रत्याख्याय शङ्कितं, शास्त्राधिकारिणः पुरुषान् प्रति प्रवृत्तं संस्कारकं तत्तच्छास्त्रं प्रतिपुरुषमेकवाक्यतया सकृदेवार्थबोधकम् । यथाऽऽधानेनाग्नीन् संस्कुर्यादित्यऽर्थक-वसन्ते ब्राह्मणोऽग्नीनादधीतेतिवाक्यं प्रतिब्राह्मणं सकृदेवार्थबोधकं सकृदेव स्वविषये प्रवर्तकं च । अत एव पुनपुनर्नीधानादिसंस्कारः । तथा च वक्ष्यति शास्त्रस्याकर्णादचि पूर्वपरयोर्गुणो भवति,गुणवान् शब्दश्च साधुर्भवति,स च प्रयोक्तव्य इत्येवावत्पर्यन्तं व्याप्यवान् तत्संस्कृतस्यैकस्य बहूनिन्द्रस्य प्रयोगेण शास्त्रार्थस्य करणान्मालेन्द्रादिप्रयोगो न स्यात् । अतस्तत्तच्छास्त्रविषयवाक्योपप्लवेन वाक्यभेदोऽवश्यं वाच्यः । तच्चपूर्वपरविषयेऽपि स्यादिति तत्रैकग्रहणमावश्यकमिति । तत्र गुणो भवतीत्यांशो लक्ष्यसंस्कारक एव । यथाधानमग्निसंस्कारकम् । शास्त्रतात्पर्यविषयप्रयोगविधिश्च पुरुषसंस्कारक एवेति तदाशयः । ततः सिद्धान्तितम् । यथा नित्यनैमित्तिककाम्यविधीनां तदकरणजन्यप्रत्यवायपरिहाराय फलाय च वाक्यभेदेन तत्तद्विषयकशास्त्रोपप्लवात् पुनः प्रवर्तकत्वम् । तथा ममाप्यसाधुप्रयोग प्रत्यवायश्रवणाच्चित्यसमत्वं प्रयोगविधेः; एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवतीत्यनेन काम्यत्वं चेति तत्तद्विषयानन्तवाक्योपप्लवेन भवत्येव मालेन्द्रादिप्रयोग इति । एवं प्रयोगविध्यंशस्य नित्यकाम्यत्वव्यवस्थापनेन गुणविध्यंशस्य शुद्धसंस्कारार्थत्वमेवोक्तम् । एवञ्च तस्याधानादिवदेवाग्निस्थानीयलक्ष्येषु सर्वेषु प्रवृत्तावपि एकाग्नावित्वैकल्पिकलक्ष्ये नावृत्तिरिति पूर्वपरयोर्नादेशद्वयप्रसक्तिरिति तत्तात्पर्यम् । एवञ्च स्पष्टमेव पूर्वपक्षसिद्धान्तयोरस्यं न्यायः संस्कारकविधिविषये सिद्धान्तित इति भावः । सम्प्रसारणाच्चेति सूत्रे भाष्येऽपि स्फुटोऽयम् ॥ वैकल्पिकत्वादिति ॥ एवञ्च पक्षे द्वित्वानामानन्त्यापत्त्या परिनिष्ठितत्वाभावापत्तिः । न च त्वदुक्तरीत्याऽऽनन्त्यापत्तिप्रयुक्तमपरिनिष्ठितत्वमसकृत्प्रवृत्तौ बाधकमिति लभ्यते । तच्च नात्र, द्वित्वस्य वैकल्पिकत्वेन यावच्छक्तिद्वित्वसहितप्रयोगस्य परिनिष्ठितत्वसम्भवात् । अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वं हि परिनिष्ठितत्वमिति वाच्यम् । आनन्त्यापत्तेरित्यस्य चतुष्पञ्चादिधकारयकारणामापत्त्या त्रिधमित्यादित्वदुक्तमर्यादाभङ्गापत्तेरित्यर्थात् । तद् ध्वनयन् वक्ष्यति, नवत्वोक्तिरसङ्गतैवेति ॥ आनन्त्यापत्तिरेव तन्न्यायबीजमिति तु न युक्तम् । उद्ववोढामित्यादौ उद्ववहूस्तामित्यव-

सति, सर्वस्य द्वे इति द्विर्वचने पुनः पुनः प्रवर्तेत । अत एव लिटि धातो-रिति सूत्रेऽभ्यासग्रहणं भाष्ये प्रत्याख्यातम् । सन्नन्ताद्यङन्ताद्वा णिचि चङि द्वित्वाभावार्थं तादिति तु कैयटादिभिरुक्तम् । तस्मादिह स्यज वा पचादीनि रूपाणि, स्वीकुरु वा रूपाणन्त्यमिति, नवत्वोक्तिरसङ्गतैव । सकाराद्वित्वेनाष्टौ विसर्गाद्वित्वेन षोडशेति त्वन्यदेतत् । यदप्युक्तं, त्रैपादिकेऽन्तरङ्गे इत्यादि । तदपि न । भार्कुटो नार्पत्य इत्यत्र विसर्गवारणाय वृद्धेरसिद्धत्वस्य तत्रैव भाष्ये स्पष्टत्वात् । संयोगान्तलोपे यणः प्रतिषेध इत्यस्य बहिरङ्गत्वेन प्रत्याख्यातत्वात् । स्वयमपि तथैवानूदितत्वाच्च । तस्मादिह

स्थायां सिज्लोपादेरसिद्धत्वात् सिचि वृद्धावोकारे, लक्ष्ये लक्षणस्येति न्यायेन पुनर्वृद्धिनेति, सिचि वृद्धिरिति सूत्रस्थभाष्यविरोधात् । आनन्त्यापत्तेः तत्राभावात् । एतद्भाष्यप्रामाण्येन विकारकृतमेदेन न लक्ष्यभेदाश्रयणम् । समः सुटीति सूत्रं चास्यामानम् । अन्यथा, समो वा लोपमित्यनेनान्त्यलोपे पुनर्द्वित्वेन त्रिसकारस्यापि सिद्धैतद्वैयर्थ्यं स्पष्टमेव । इरयोरे इति सूत्रे, इरयोरिति द्विवचनं तु स्वविधेयस्य स्वस्मिन्नुद्देश्यत्वाप्राप्त्या तत्प्राप्तये इति न तदस्यां मानम् । न च तत्र, सहिवहोरोदिति तपरत्वसामर्थ्याद् न वृद्धिरिति वाच्यम् । अशाब्दत्वादतत्कालव्यावृत्तेरेव तेन शब्दमर्यादया लाभात् । एतेन सुद्ध्युपास्य पूर्वधस्य द्वित्वे जश्त्वे लक्ष्यभेदात् पुनर्द्वित्वमित्यपास्तम् । पूर्वमकारस्यैदानीमोकार इति लक्ष्यभेदस्योदवोढाभित्वाद्वाऽपि सत्त्वेनोक्तभाष्यविरोधात् । विकारान्यानुरोधैक्येन लक्ष्यैक्यं तु ममाप्यस्त्येवेति दिक् ॥

इति द्वित्वमपीति ॥ एतेनाभ्यासग्रहणादिह स्थाने द्वित्वमिति लक्ष्यभेदोऽस्तीति परास्तम् । पदद्वित्वस्याप्यावृत्त्यापत्तेः । वस्तुतस्तत् षाष्ठद्वित्ववन्न स्थाने द्विर्वचनमित्यन्यत्र निरूपितम् ॥ प्रत्याख्यातमिति ॥ अनभ्यासप्रतिषेधोऽनर्थकश्छन्दसि वावचनात् । नोनूयतेर्नौनावेत्यादौ न दोष इति भाष्यम् । एकस्यैकाऽचो द्वित्वे कृते एकाज्व्यपदेशे हेतोरचो द्विरुक्तत्वात् । अनेन न्यायेनाचः पुनः पुनर्द्वित्वप्राप्तौ अवयवान्तरस्यैकाच्त्वाभावेन तदप्रवृत्तौ तद् व्यर्थमिति च तदाशयः कैयटेनोक्तः ॥ कैयटादिभिरिति ॥ अत्रारुचिबीजं तु भाष्यप्रामाण्येन तेषामनभिधानं, स्तौतिण्योरिति सूत्रस्थः सोषुप्यतेः सन् सोषुप्षिषत इति भाष्यप्रयोगोऽपि छान्दस इत्याहुः ॥ रूपाणामानन्त्यमिति ॥ रूपाधिक्यमित्यर्थः । तदाह ॥ नवत्वोक्तिरसङ्गतैवेति ॥ सकाराद्वित्वेनेति ॥ अच्परत्वावच्छिन्नं ह्यस्य लक्ष्यम् । तत्रैकस्मिन्धकारे प्रवृत्तावपि तादृशे सकारे लक्ष्यभेदात् पुनः प्रवृत्तिर्भवत्येवेति भावः । एवं संप्रसारणादिविधौ यण्त्वावच्छिन्नमुद्देश्यमिति लक्ष्यभेदाद्यावदुद्देश्यं पुनः प्रवृत्तिर्भवत्येवेति न, न संप्रसारणे इत्यादेर्वैयर्थ्यमिति बोध्यम् ॥ तदपि नेति ॥ यथोद्देशपक्षे इत्यनुक्त्वा सामान्येन यदुक्तं तदपि नेत्यर्थः ॥ तस्मादिहेति ॥ यणो मय इत्यत्रेत्यर्थः ।

यथोद्देशपक्षो ग्राह्यो बहिरङ्गपरिभाषाया अप्रवृत्तत्वे । तथा च भाष्ये, मम परस्य यणो द्वित्वे दध्यत्रेत्युदाहृतम् । न चैवमपि, इकोऽसवर्णे इति शाकलेन रूपान्तरमस्त्विति वाच्यम् । समासे तन्निषेधात् । न च नित्यसमासे एव तन्निषेध इति वाच्यम् । भाष्ये नित्यग्रहणस्य प्रत्याख्यातत्वात् । यथोत्तरं मुनीनां प्रमाण्यात् । नन्विह यणेव दुर्लभः । सुधीशब्दस्य ध्यायतेः [illegible] न निष्पन्नत्वेन, सम्प्रसारणाच्चेति पूर्वरूपापत्तेरिति चेन्न । सम्प्रसारणपूर्वत्वे समाना. ग्रहणमिति वार्तिकोक्तेः । सम्प्रसारणस्थानिकस्याऽतथात्वाच्च । न चैवमपि, न भूसुधियोरिति यण्निषेधः शङ्क्यः । आङ्क्त्वेन प्रत्यये परत एव तस्य प्रवृत्तेः । अनन्तरस्येति न्यायेन, एरनेकाच इति, औस्सुपीति च सूत्रद्वयेन प्राप्तस्यैव निषेधाच्च ॥ धात्रंश इति ॥ अत्र रेफस्य द्वित्वं न । द्वित्वप्रकरणे रहाभ्यामिति साक्षाच्छ्रुतेन निमित्तभावेन रेफस्य कार्यित्वबाधात् । सुद्युपास्य इत्यादौ तु स्थानित्वेन निमित्तत्वमिकस्तस्मादित्युत्तरस्येत्यादिनिर्देशाज्ज्ञापकान्न बाध्यत इति कैयटः । तकार

विसर्जनीयसूत्रभाष्यात्तु कार्यकालपक्षेऽपि त्रिपाद्यां तदप्रवृत्तिरिति लभ्यते । मूले तु कैयटानुसारेणेति परे ॥ सम्प्रसारणस्थानिकस्येति ॥ स्थाने जातस्येति शेषः । साक्षात्सम्प्रसारणस्थानिकपूर्वरूपादेर्हलइत्यारम्भसामर्थ्यादल्विधौ स्थानिवत्त्वाऽङ्गीकारेऽपि पूर्वरूपोत्तरं प्रवृत्तस्य हलइति दीर्घस्य स्थानिवद्भावेन सम्प्रसारणत्वे मानाभाव इति भावः ॥ द्वित्वं नेति ॥ यणो मय इति प्राप्तं नेत्यर्थः ॥ द्वित्वप्रकरणे इति ॥ तथा च भाष्यं, रेफस्यानुनासिकपरसवर्णद्विर्वचनप्रतिषेधो वक्तव्यः । स्वर्नयति । कुण्डं रथेन । भद्रहृदः । न वक्तव्यः । रेफोष्मणां सवर्णा न सन्ति । नेमौ रहौ कार्यिणौ, किं तर्हि ? निमित्तं द्विर्वचनस्येति । अन्यथा वचनारम्भे द्विर्वचनमात्रस्य निषेधेन फलभेदे प्रत्याख्यानानापत्तेः ॥ साक्षाच्छ्रुतेन=विशेषशब्दबोधितेन ॥ यत्र यत्र द्वित्वनिमित्तत्वं तत्र सर्वत्र वाक्यान्तरेणानर्चीत्यनेन कार्यित्वप्रसक्तेरनवकाशेन तेन भाष्यप्रामाण्यात् सामान्यत एव द्वित्वकार्यित्वं बाध्यते इति भावः ॥ न बाध्यत इति ॥ इदं च व्यक्तिपक्षेऽप्यावश्यकम् । अन्यथाऽकः सवर्णे, इत्येतत्पर्यालोचनया श्रीश इत्यादिविषयकयणशास्त्राभावकल्पनवत् संग्राहकवाक्ये इकः स्थानित्वश्रवणात्तद्विषयकलक्षणाभावस्यैव कल्पनं स्यादिति स्पष्टमिको यणचीत्यत्र कैयटे ॥ कैयट इति ॥ अत्रारुचिबीजं तु, अत्र स्थानित्वस्य नानवकाशत्वम् । मध्वत्रेत्यत्र निमित्तत्वाप्राप्त्या तत्र स्थानित्वस्य चारितार्थ्यात् । तक्रकौण्डिन्न्यायोऽप्यनवकाशविषय एव इति स्पष्टं तद्धितेष्वचामिति सूत्रे भाष्ये । तदप्राप्तियोग्यविषयाभावरूपं चानवकाशत्वमेतद्विषये

स्य तु भवत्येवेत्युक्तम् । तच्च, वेत्यतोऽत्र रूपद्वयम् । लाकृतिरिति त्वेकमेव ॥

हलो यमाम् ॥ लोपः स्याद्वेति ॥ झयो ह इत्यतोऽन्यतरस्यामित्यनुवृत्तेः । एतच्च लण्सूत्रे भाष्ये स्पष्टम् ॥ माहात्म्यमिति ॥ अत्र ग्रलोपो नेत्यर्थः । हलो यरां यरि सवर्णे लोप इति तु न सूत्रितम् । आदूर्ध्नोत्, मूर्द्ध्नः, शार्ङ्गम्, आर्ङ्गी इत्यादौ रेफात् परस्य लोपापत्तेः ॥

वान्तो यि ॥ यकारादाविति ॥ विशेषणमात्मान्तस्य सञ्ज्ञा स्यादित्येतदर्थकस्य, येन विधिरिति सूत्रस्यापवादभूतेन, यस्मिन् विधिस्तदादावल्ग्रहणे इति वार्तिकेनायमर्थो लभ्यते ॥ ओदौतोरिति ॥ पूर्वसूत्रे तयोरेव वान्तौ प्रति स्थानित्वेन निर्णीतत्वादित्यर्थः । ननु गव्यूतिरित्यत्र, हलि सर्वेषामिति, लोपः शाकल्येति वा लोपः स्यादित्याशङ्क्याह ॥ वान्त इति ॥ लव्यमिति ॥ लुनातेरचो यत् । सार्वधातुकार्धधातुकयोरिति गुणः॥ अवश्यलाव्यमिति ॥ ओरावश्यक इति ण्यत् ॥ क्षय्यमिति ॥ शकि लिङ् चेति, चात्कृत्याः ॥ क्षेयमिति ॥ अर्हे कृत्यतृचश्चेति यत् ॥ हर एहीति ॥ इह, ओमाङोश्चेति पररूपं प्राप्तम् ॥

उरण् रपरः ॥ आन्तरतम्यादिति ॥ रेफाशिरस्कस्यार् इत्यस्य रेफद्वारा ऋकारेण स्थानसाम्यादित्यर्थः ॥ पक्षे द्वित्वमिति ॥ ऋधेर्धस्येति भावः ॥ लोपो वेति ॥ झयो होऽन्यतरस्यामिति सूत्राद्विकल्पानुवृत्तेः । एत

न च तक्रकौण्डिन्यन्यायो विधेयविषय एव । विशेषविहितेन सामान्यविहितं बाध्यत इति अभियुक्तव्यवहारादिति वाच्यम् । अपूर्वबोध्यत्वेन निमित्तत्वादेरपि विधेयत्वात् । न हि निमित्तवत्तत्त्वमपि मानान्तरसिद्धमिति दिक् ॥ एकमेवेति ॥ यणुतप्राग्वर्तियरोर्द्वित्वप्रयुक्तरूपभेदाभावादिति भावः । वकारस्तु नात्र । अन्यूनानतिरिक्तस्थानकादेशलाभेनाधिकस्थानकस्याऽप्रवृत्तेः । लगा सूत्रस्थभाष्यविरोधेनेदशानामनभिधानमिति तत्त्वम् ॥

आर्ङ्गी इति ॥ आङ्पूर्वादर्त्तेर्बाहुलकान्निप्रत्ययः, धनुषः कोटी उच्येते । आर्तिः पीडाधनुष्कोट्योरित्यमरे नकाररहितः पाठो दृश्यते । आर्तिरिति पाठान्तरम् । वार्तिकेत्यनेन तस्य वाचनिकत्वं सूचितम् ॥

पूर्वसूत्रे इति ॥ वाऽन्तज्ञानाय तत्पर्यालोचनस्यावश्यकत्वादिति भावः ॥

ऋधेर्धस्येति ॥ न च द्वित्वभिन्ने पूर्वत्र कर्तव्ये परमसिद्धमित्यर्थकेन पूर्वत्राऽसिद्धमद्वित्वे इत्यनेन धातुधकारस्य जश्त्वे दस्येति वक्तुमुचितमिति वाच्यम् । फले विशेषाभावेन तदनादरणात् । न ह्यत्र जश्त्वात् पूर्वमनन्तरं वा द्वित्वे रूपे विशेषोऽस्ति। तदनन्तरं जश्त्वप्रवृत्तेः सत्त्वात् । यत्र पूर्वत्रासिद्धप्रवृत्तौ

च, नाज्झलाविति सूत्रे भाष्यकैयटयोः स्पष्टम् । प्राचस्तु विकल्पानुवृत्तेरनुक्तेर्न्यूनता । यदपि व्याख्यातृभिः, शरोऽचीति ज्ञापकमुपन्यस्य तत्संवादार्थं भाष्यमुपन्यस्तम्– अनुवर्त्तते विभाषा शरोऽचि यद् वारयत्ययं द्वित्वमिति । तन्न । तदुत्तरभाष्ये एव उक्तज्ञापकस्य दूषितत्वात् । लोपस्य हि नित्यत्वे, अचो रहाभ्यामिति द्वित्वं लोपापवादः स्यात् । तथा च, शरोऽचीत्यस्य सार्थक्यं स्पष्टमेव । तस्माद्विकल्पानुवृत्तौ ज्ञापकान्तरमनुसर्तव्यम् । भाष्यकारादिव्याख्यानमेव वा शरणम् ॥ द्वित्वलोपयोरिति ॥ यत्तु द्वित्वविधानसामर्थ्याद् द्वावेव शिष्येते इति । तन्न । लोपस्य वैकल्पिकत्वेन द्वित्वस्य पक्षे चारितार्थ्यात् ॥ त्रिधमिति ॥ यणो मय इति लक्षणान्तरेण पुनर्द्वित्वे तु चतुर्धमपि बोद्धव्यम् ॥

एत्येधत्यूठ्सु ॥ अत्र एचीत्यनुवर्त्तते । तच्च एतेरेव विशेषणं, न त्वेधतेः । अव्यभिचारात् । नाऽप्यूठः । असम्भवादिति प्राञ्चः । अत्र कैयटः । धतेरपि विशेषणम् । मा भवान् प्रेदिधदित्यत्र व्यभिचारात् । यद्यपीदं कैयटपुस्तकेषु प्रायेण न दृश्यते, तथाऽपि क्वचिद् दृश्यत एव । न च, णौ चङीति ह्रस्वे कृते नायमेधतिरिति वाच्यम् । एकदेशविकृतस्यानन्यत्वात् । न चैवमप्यजादेर्द्वितीयस्येति धिशब्दस्थाने धिधिशब्दादेशे सति

तन्निषेधे वा फले विशेषस्तत्रैवास्तु: परिभाषात्वेन प्रवृत्तेरित्यन्यत्र विस्तरः । यद्वा धस्य तत्स्थानिकस्येत्यर्थ इति दिक् ॥

नाज्झलाविति सूत्रे इति ॥ हयवरट्सूत्रशेषे चेत्यपि बोद्धव्यम् ॥ अनुक्तेरिति ॥ हलो यमामित्यत्र झरो झरीत्यत्र चेति भावः ॥ ज्ञापकमिति ॥ उभयत्रापि विकल्पानुवृत्ताविति भावः ॥ लोपस्य हीति ॥ लोपमात्रस्येत्यर्थः ॥ लोपापवाद इति ॥ आरम्भसामर्थ्यादिति भावः ॥ ज्ञापकान्तरमिति ॥ अणुदित्सूत्रस्थमण्ग्रहणं हलः परस्य यरो लोपो वैकल्पिक इति सामान्यापेक्षमाश्रयणीयमिति भावः । तस्य हलो यमामिति विशेषापेक्षत्वे आह ॥ व्याख्यानमेव वेति ॥ यदि तु हलो यमामित्यत्र विकल्पं सिद्धं कृत्वा द्वित्वस्य तद्विषये चारितार्थ्येन झरो झरीत्यत्र तदनुवृत्तौ, शरोऽचीति ज्ञापकमुपन्यस्यते तदा सम्यगेव । परं तु प्राचां भाष्यसंमतिलेखः प्रामादिकः । तद्भाष्यस्योभय[illegible]तया प्रवृत्तेः ॥

असंभवादिति ॥ नच,आअवतीति और्जनस्य और्जनौरित्यादाववेः कावूठ्याद् गुणे परादिवत्त्वेनोद्त्वात् संभवोऽस्ति । न च वृद्धेरेचीति सिद्धिः, ओमाङोश्चेत्यनेन बाधाद्, अनेन तु सामर्थ्यात् तद् बाध्यत इति वाच्यम् । तस्यानभिधानादित्याशयात् । किञ्च, ओमाङोरित्येतद्बाधकल्पनापेक्षया सामर्थ्येन लक्ष्यानुरोधेन चैचीत्यस्यासंबन्धकल्पनैवोचिता ॥ ह्रस्वे कृते इति ॥ ह्रस्वेः पूर्वमित्यादिः

वस्नसोरिव प्रकृतिप्रत्ययाविभागसंमोह इति वाच्यम् । द्विः प्रयोगो द्वयवचनं षाष्ठमिति षाष्ठभाष्ये सिद्धान्ततत्वात् । अन्यथैव णिलोपो न स्यात् । जिघांसतीत्यादौ सनः सकारेण विशिष्टस्य द्वित्वे कृते कुत्वं च न स्यात् । न चान्तरङ्गत्वात् प्रथमं चङीति द्वित्वे कृते ह्रस्वो न भवत्येवेति वाच्यम् । ओणेर्ऋदित्करणेन बहिरङ्गस्यापि, णौ चङीति ह्रस्वस्य प्रथमं प्रवृत्तिरिति ज्ञापितत्वात् ॥ अत्र माधवः ॥ मा भवान् मेदिधदित्यत्र नातिप्रसङ्गः । ण्यन्तस्य शब्दान्तरत्वादेधतिग्रहणेनाग्रहणात् । अत एव हि, न भाभूपूकमिगमीत्यत्र ण्यन्तानां च भादीनामुपसंख्यानमित्युक्तम् । तत्रैव शब्दान्तरत्वादप्राप्तावुपसंख्यानमिति कैयटन्यासकारहरदत्तादिभिःसर्वैरेवोक्तम् । किञ्च ण्यधिकस्यापि ग्रहणे, उपसर्गात् सुनोतीत्यत्राभिषावयतीत्युदाहृत्य ण्यन्तेनाभेर्योगात्सुनोतिं प्रत्यनुपसर्गत्वात् कथं षत्वमित्याशङ्क्याभेः प्रकृत्यर्थविशेषकत्वेन सामाधानं भाष्यकाराद्युक्तमसङ्गतं स्यात् । न च हेरचङीति लिङ्गात् प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणमिति भ्रमितव्यम् । ज्ञापकस्य कुत्वमात्रविषयकत्वात् । तथा च वार्तिकम् । हेश्चङि प्रतिषेधानर्थक्यमङ्गान्यत्वात् । ज्ञापकं तु चङोऽन्यत्र ण्यन्तेऽपि कुत्वभावस्येति । तस्माद् युक्तिविरोधाद् भाष्यवार्तिकवृत्तिन्यासादिग्रन्थैः पूर्वापरस्वग्रन्थेन च

वार्णपरिभाषयेति भावः ॥ अनन्यत्वादिति ॥ न चाऽचः परस्मिन्निति स्थानिवत्त्वेनैजादित्वं सुलभम् । पूर्वपरविधित्वात् । पूर्वस्यैव विधौ हि सः । मध्येऽपवादन्यायेनादगुणं बाधित्वा इहैव स्यात् । उपैधत इत्यादौ तु परत्वात् पररूपमेव स्यादिति भावः ॥ संमोह इति ॥ एधतेरादेशाभावेन न स्थानिवत्त्वेन तत्त्वम् ॥ न स्यादिति ॥ न च णेरनिटीत्यस्य ण्यन्तस्याङ्गस्य लोप इत्यर्थः । स चाऽलोन्त्यपरिभाषयान्त्यस्य । एवञ्च प्रकृते न दोषः । सर्वे सर्वपदादेशा इति न्यायेनेधीत्यस्येधिधि इत्यादेशसत्त्वेन स्थानिनो ण्यन्ततया आदेशेऽपि स्थानिवद्भावेन ण्यन्तत्वस्य सुलभत्वादितिवाच्यम् । अलोऽन्त्यपरिभाषया, निर्दिश्यमानपरिभाषया च, णेरनिटीत्यस्य ण्यन्तस्याङ्गस्यान्त्यो यो निर्दिश्यमानो णिस्तस्यलोप इत्यर्थेनादोषात् । अन्ते णेरसत्त्वात् । सूत्रं तु आद्यादित्यादौ चरितार्थमिति भावः ॥ कुत्वं च न स्यादिति ॥ हन्त्यवयवहकाराभावात् सन्सम्बन्धिसकारवैशिष्ट्याभावे तु स्थानिवद्भावेन कुत्वं स्यादपीति भावः ॥ अन्तरङ्गत्वादिति ॥ चङ्परणिनिमित्तह्रस्वापेक्षया चङ्मात्रनिमित्तत्वेनाल्पपदार्थापेक्षत्वादित्यर्थः । भाष्ये तु नित्यत्वमात्रमे[illegible]त्वस्योक्त ॥ ज्ञापितत्वादिति ॥ इदं च णौ चङीति सूत्रे भाष्ये स्पष्टम् ॥ असंगतं स्यादिति ॥ सुनोतिग्रहणेन सावयवेरपि ग्रहणेन शङ्काया

विरोधादुपेक्ष्योऽयं कैयट इति । अत्रेदं वक्तव्यम् । अस्तु विशिष्टस्य शब्दान्तरत्वं तावताऽपि प्रकृतिभागस्यैधृरूपत्वं केनापगतमित्यवधार्यताम् । न ह्युपैधत इत्यादौ तिङन्तस्यैधृरूपता नास्तीति प्रकृत्यंशे सा हीयते । तथा चोपसर्गात् सुनोतीति सूत्रे वार्तिकं, सिद्धं त्ववयवान्यत्वादिति । यत्त्वऽभिषावयतीत्यत्रत्यभाष्यविरोधोद्भावनं, तद्विपरीतम् । यतः प्रकृतेः सुनोतिरूपानपायात् कैयटमते सिद्धा यथोक्तव्यवस्था । त्वन्मते तु रूपान्तरत्वेन ण्यधिकस्याग्रहणादसङ्गतैव प्रागुक्तव्यवस्था स्यात् । को ह्येधयतिसावयत्योर्विशेषो, यदेधतेर्ण्यधिकस्याग्रहणं सुनोतेस्तु ग्रहणमिति । यदपि ण्यन्तभादीनामुपसंख्यानमुपन्यस्तं, तदपि नास्माकं प्रतिकूलम् । विशिष्टस्य शब्दान्तरत्वेन [illegible] तु णिचा व्यवधानेनोपसंख्यानस्यावश्यकत्वात् । अत एव न तत्रत्यन्यासादिभिः स्वोक्त्या वा विरोधः । प्रत्युत तवैव विरोधः । षाष्ठे [illegible] धत्योरिति योगं विभज्यैचीति विशेषितत्वात् । तस्मादिह वृत्तिग्रन्थो माधवग्रन्थश्चासङ्गत एवेत्यभिप्रेत्य व्याचष्टे ॥ एजाद्योरिति ॥ अक्षौहिणीति ॥ ऊहोऽस्त्यस्या ऊहिनी, अक्षाणामूहिनीति विग्रहः । परिमाणविशेषविशिष्टा सेना अक्षौहिणी । पूर्वपदात् सञ्ज्ञायामिति णत्वम् । यत्तु प्राचा विगृहीतम् अक्षाणामूहः समूहः, सोऽस्त्यस्या इति । तदपि ऊहिनीशब्देन षष्ठीतत्पुरुष इत्येवम्परतयैव कथञ्चिन्नेयम् । ऊहशब्देन समासे तत इनौ तु वृद्धिर्न स्यात् । अन्तरङ्गेण गुणेन बाधात् । अपवादभूताया अपि वृद्धेरूहिनीशब्देन विग्रहे चरितार्थत्वात् । तथाचोक्तं प्राक् । इण्डिशीनामादृगुणः सवर्णदीर्घत्वादिति ॥ स्वादीरेरिणोः ॥ इरेरिण्योरिति क्वाचित्कोऽपपाठः । स्वैरीति णिन्यन्तस्य स्त्रियां वृद्ध्यभावप्रसङ्गात् । स्वैरिणीत्यत्र तु ङीपः प्राग्भागमादाय वृद्धिर्बोद्धव्या । यत्तु व्याचख्युः । लिङ्ग-

---

एवाभावादिति भावः ॥ अयवानन्यत्वादिति ॥ ण्यन्तावयवस्य सुनोतेः सुनोतिभिन्नत्वाभावादिति तदर्थः ॥सुनोतिरूपानपायादिति॥ सुनोतित्वानपायादित्यर्थः ॥ असङ्गतैवेति ॥ ण्यन्तेनाभेर्योगादिति शङ्का प्रकृत्यर्थविशेषकत्वेन समाधानरूपा च व्यवस्थाऽसङ्गतैव स्यात् । त्वदुक्तरीत्या ण्यधिके षत्वाप्राप्तेरित्यर्थः । तदेवाह ॥ को ह्यीति ॥ विग्रह इति ॥ समस्यमानपदस्वरूपबोधक इत्यर्थः ॥ तत इनाविति ॥ अत इनिठनाविति विहित इत्यर्थः ॥ अन्तरङ्गेणेति ॥ प्रथमप्रवृत्तिकेनेत्यर्थः । समर्थग्रहणेन कृतसन्धिकार्यादेव तद्धितोत्पत्त्या तद्विषयेऽकृतव्यूहपरिभाषाया अप्रवृत्तेस्तस्या असत्त्वाच्चेति भावः॥चरितार्थत्वादिति॥ तदूघटकोहिनी-

विशिष्टपरिभाषयेति । तन्निष्फलम् ॥ प्रादूहोढोढ्येषैष्येषु ॥ अत्रोहशब्दः कैश्चित् प्रक्षिप्तो, भाष्यादौ तु न दृश्यत इति प्राज्ञः । इदानीन्तनपुस्तकेषु तु भाष्यवार्तिकयोरूहशब्दो दृश्यत एव ॥ नानर्थकस्येति ॥ उपास्थितस्यार्थस्य शब्दं प्रति विशेषणत्वसम्भवे त्यागायोगादिति भावः । सीरदेवस्त्वाह । ब्रश्चेति सूत्रे राजेः पृथग् भ्राजिग्रहणमिह ज्ञापकमिति । नन्वेतदयुक्तं, फणादिना राजिना राज्ञ्यर्थाद् तथाभूतस्यैव षत्वार्थतया भ्राजिग्रहणस्योपक्षीणत्वादिति चेत् । विभ्राट् विभ्रागिति रूपद्वयं हि साध्यम् । तच्च ब्रश्चादिसूत्रे, राजृ इति पठित्वाऽपि सुसाधम् । एकस्य भ्राजतेर्ऋकारस्य प्रागपि दातुं शक्यत्वात् । ऋभ्राज इति । भ्राजभासेति विकल्पस्य वाचनिकतया ऋकारस्य आत्मनेपदमात्रफलकतया वक्ष्यमाणत्वेन तत्स्थानेऽकारस्य सुपठत्वाच्च । तस्मात् सीरदेवोक्तं ज्ञापकमपि सम्यगेव ॥ प्रैष्य इति ॥ एषसाहचर्याद्देष्योऽपि अनव्ययं गृह्यते । तेन ण्यन्तादिषेः क्त्वो ल्यपि पररूपमेव, न तु वृद्धिः। प्रेष्य गतः ॥ प्रवत्सतरेति ॥ अत्र कालापानुसारिणो वत्सरशब्दमपि पठित्वा, वत्सरे देयमृणं वत्सरार्णमित्युदाहरन्ति । अपरे तु वत्सशब्दमपि पठन्ति । तत् सर्वं भाष्यादिविरुद्धम् ॥

अन्तादिवच्च ॥ इहैकः पूर्वपरयोरित्यनुवर्तते, यथासंख्यं चेत्यभिप्रेत्याह ॥ पूर्वस्यान्तवदिति ॥ स्थानिवत्सूत्रेणैव गतार्थमिदं सूत्रम् । न चा-

---

शब्दस्य कल्पितार्थेनाप्यर्थवत्त्वाभावेन तत्रैतत्सूत्राप्रवृत्तेश्चेत्यपि बोद्धव्यम् ॥ ज्ञापकमितीति ॥ भ्राजौ राजेरपि सत्त्वेन राजिग्रहणेनैव सिद्धेस्तद् व्यर्थं सज्ज्ञापकमिति भावः ॥ तथाभूतस्यैवेति ॥ फणादेरेवेत्यर्थः ॥ राजृ, इति पठित्वेति ॥ न चैवमनुबन्धनिर्देशाद्राराष्टीत्यादौ यङ्लुकि षत्वं न स्यादिति वाच्यम् । यङ्लुकश्छान्दसत्वात् । शितपा शपेत्यस्यानित्यत्वाच्च । भाष्ये तस्यानुक्तत्वाच्च । एतेन, फणादित्वेन ग्रहणे गणेन ग्रहणाद् यङ्लुकि न स्यादित्यपास्तम् । गणेन निर्देशाभावाच्च । राट्, विभ्राट् इत्यादौ राजृत्वं तु भूतपूर्वगत्या । राशब्दपूर्वकजृधातोः क्विपि निष्पन्नराजृशब्दे नपुंसके न षत्वम् । सूत्रे, राज इत्यनुनासिकस्य पाठात् ॥ सुपठत्वाच्चेति ॥ एवञ्च, भ्राजभासेति सूत्रे भ्राजग्रहणं न कार्यमिति बोध्यम् ॥ सीरदेवोक्तमिति ॥ अत्रारुचिबीजं तु ब्रश्चादिसाहचर्येण धातुसञ्ज्ञकराजेर्ग्रहणं स्यादिति भ्राजिग्रहणस्यावश्यकत्वं । किञ्च, भ्राजन्तर्गतराजेर्न ऋकारानुबन्धत्वं; तस्य समुदायानुबन्धत्वादिति ॥ भाष्यादिविरुद्धमिति ॥ तदनुक्तत्वादिति भावः ॥

गतार्थमिदमिति ॥ पूर्वपरयोरिति द्विवचननिर्देशेनोभयोरपि प्रत्येकं स्थानि-

[illegible]ति [illegible]यम् । अस्याप्यल्विधावनिष्टत्वात् । अन्यथा अयजे इन्द्रमित्यत्र सवर्णदीर्घापत्तेः । तथा च वार्त्तिकम् । न वा अतादूप्याऽतिदेशादिति ॥ न विसर्ग इति ॥ एतच्च सुखार्त इत्यादावपि तुल्यम् । अत्र च [illegible]र्यकालपक्षे बहिरङ्गत्वादसि[illegible]त्वमपि बोद्धव्यम् । न च नाजानान्तर्य इति निषेधः । यत्रान्तरङ्गे बहिरङ्गे वा अचोरानन्तर्यं तत्रेति हरदत्तपक्षे तत्प्राप्तावपि, यत्र पश्चात् प्रवर्तमानेऽजानान्तर्यमिति कैयटमते निषेधाप्राप्तेः । बहपेक्षत्वेन बहिरङ्गायां वृद्धावजानान्तर्यसत्त्वेऽपि पश्चात् प्रवर्तमाने तदभावात् ॥ उपसर्गेणेति ॥ यत्क्रियायुक्ताः [illegible]त्रं प्रत्येव गत्युपर्गसञ्ज्ञा इत्युक्तत्वादिति भावः ॥ भार्षभीयतीति ॥ शरोऽचीति द्वित्वनिषेधः ॥ प्रेजत इति ॥ एजृ दीप्तौ । कम्पनार्थस्तु परस्मैपदी । एजते कम्पते इति तु प्राचां व्याख्यानं प्रामादिकमेव । एङ्येङित्येव सिद्धे परग्रहणमुत्तरार्थं, रूपग्रहणं

त्वादिति भावः । ननु,प्राच्छतीत्यादौ विसर्गवारणाय ज्ञापकाश्रयणमपि न कार्यं यतस्तत्र स्थानिवत्त्वेन रेफान्ते पदत्वं दुर्लभम् । तस्य तत्स्थानिधर्मत्वाभावात् । आ[illegible]भानिकवचनकल्पनया प्रच्छतीत्यस्य प्राच्छर्धादेशे तु समुदाये प्रशब्दधर्माणां स्थानिवत्त्वेन लाभेऽपि प्रारित्यत्र तदलाभेन रेफे पदान्तत्वस्य दुर्लभत्वादिति बोद्धव्यम् ॥ न वेति ॥ वर्णाश्रये विधावन्तादिवद्भावप्रतिषेधो वाच्य इत्यस्य प्रत्याख्यानमेतत् । न वा वक्तव्यं, तादूप्यस्य वर्णमात्र [illegible]त्तिधर्मस्यानेनातिदेशाभावादिति तदर्थः । पूर्वस्य परस्य च समुदायस्यान्तादिभ्यां वर्णाभ्यां पृथगवस्थिताभ्यां ये व्यवहाराः, प्रातिपदिकत्व–सुबन्तत्व–प्रत्ययत्वाद्यस्ते कृतैकादेशस्यापि भवन्तीत्यर्थात् । अत एव, तुक्यसिद्धवचनं चरितार्थम् । अन्यथाऽधीत्येत्यादौ ह्रस्वत्वप्रयुक्ततुक्सिद्धेरसिद्धवचनवैयर्थ्यं स्पष्टमेव । अत एव खद्वाभिरित्यत्रैस् नेति दिक् ॥ अत्र चेति ॥ सुखार्त इत्यत्र प्राच्छतीत्यत्र चेत्यर्थः । आद्ये विशिष्य ऋतशब्दस्य [illegible]तीयासमासस[illegible]पेक्षत्वेनान्त्ये उपसर्गत्वधातुत्वादिसापेक्षत्वेन वृद्धेर्बहिरङ्गत्वादिति भावः ॥ अचोरानन्तर्यमिति ॥ अचोऽजानन्तर्यनिमित्तमित्यर्थः ॥ पश्चात् प्रवर्तमाने इति ॥ अन्तरङ्गे इत्यर्थः । अत्र च, षत्वतुकोरिति सूत्रस्थं तुग्ग्रहणं ज्ञापकम् । अन्यथाऽधीत्येत्यादौ ल्यप्प्रवृत्तये पूर्वं समासे तत्र जाते संहिताया नित्यत्वाल्ल्यबुत्पत्तिपर्यन्तमप्यसंहितयाऽवस्थानासम्भवेन एकादेशे ल्यपि तुगपेक्षया पदद्वयसम्बन्धिवर्णद्वयापेक्षैकादेशस्य बहिरङ्गतयाऽसिद्धत्वेन तद्वैयर्थ्यं स्पष्टमेव । तत्र पश्चात् प्रवर्तमाने तुक्यचोऽन्यानन्तर्यनिमित्तककार्य[illegible]न्न दोषः ॥ अजानन्तर्यमिति ॥ अचोऽन्यानन्तर्यमित्यर्थः ॥ यत्क्रियेति ॥ यदर्थक्रिया[illegible]का इत्यर्थः ॥ इत्युक्तत्वादिति ॥ भाष्यकारादिभिरिति शेषः ॥ उत्तरार्थमिति ॥ तेनाद्यर्थात्, मिन्धुः, पचन्तीत्यादिसिद्धिः । अतो गुण इत्युत्तरार्थमिति क्वचित्को-

तु चिन्त्यप्रयोजनम् । एङि पर इत्येव सिद्धेः । यथा, अमि पूर्व इति ॥ नियोगोऽवधारणमिति ॥ यदाहुः—

नावकल्पौ यदा दृष्टः पररूपस्य गोचरः ।

एवस्तु विषयो वृद्धेर्नियमेऽयं यदा भवेदिति ॥ एतेन नियोजनं नियोगो व्यापार इति व्याख्यानं परास्तम् । यदैव पूर्वं ज्वलने शरीरं, ममैव जन्मान्तरपातकानामित्यादिप्रयोगविरोधात् । उदाहृतवृत्तिस्थश्लोकविरोधात् । लङः शाकटायनस्यैव, तपस्तपःकर्मकस्यैवेत्यादिसौत्रप्रयोगविरोधाच्च । यत्तु श्लोकवार्तिकमिदमित्याहुस्तद्भसात् ॥ शकन्ध्वादिष्विति ॥ शकन्ध्वादि-

---

ऽपपाठः ॥ चिन्त्यप्रयोजनमिति ॥ न च शिवायेत्यत्राणोऽप्रयुह्यस्येत्य- नासिकत्वे तदनुकरणे ततः परमोमित्यस्य ओमाङोश्चेति पररूपेऽनुनासिकाभावार्थं परस्य यादृशं रूपं तादृशं यथा स्यादिति रूपग्रहणम् । स्पष्टं चेदमौजित्यत्र भाष्ये कैयटे चेति वाच्यम् । तृज्वत्क्रोष्टुरिति सूत्रभाष्योक्तरीत्या गुणस्य शब्दत्वाद्रूपत्वाभावेन रूपग्रहणेनाव्याप्तेः । रूपशब्देन च श्रावणज्ञानविषयोऽवयवसंस्थानवान् । अत एव, तृज्वत्सूत्रे, न हि स्वरो रूपवानित्युक्तम् । वर्णरूपावयवसंस्थानमेव शब्दस्य रूपं, तद्वत्तयैव शब्दस्य रूपमिति व्यवहारः । स्वरस्तु न तद्वानिति शब्दत्वादिवन्न स शब्दस्य रूपमिति तदर्थः । तत्र सूत्रे रूपातिदेशे स्वरातिदेशो न स्यादित्युपक्रम्येदमुक्तम् । परः किङ्गुणको भवतीत्याकाङ्क्षायां, स्थानिगुणक इति लभ्यते । तत्रोभयगुणकस्यासम्भवादेकस्थान्यन्तरतमत्वात्तद्गुणकस्यैवोपस्थित्या च तस्यैव सिद्धेश्च । परशब्देन प्रयोगस्थस्योपस्थितस्य ग्रहणम् । प्रयोगे च गुणो भेदक एव । शास्त्रे परमुच्चारितो गुणोऽभेदको, न तु प्रयोगे इति परशब्देनोपस्थितानुनासिकस्यैवैकस्थान्यन्तरतमत्वाद्विधिः । यत्र तु स्थानिद्वयगुणकसम्भवस्तत्र स एव । अत एव स्वरितान्तसुब्रह्मण्याशब्दस्य निपातत्वादुदात्तेन औशब्देनोमाङोरित्येकादेशः । सुब्रह्मण्योमिति स्वरित इति तस्यादित इति सूत्रे भाष्यकैयटयोरुक्तम् । ऐओजितिसूत्रे एकादेशे आद्गुण इत्यादौ दीर्घग्रहणं कर्तव्यं त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति वार्त्तिककृतोक्तेऽकः सवर्णे इत्यत्र योगविभागेनैकः पूर्वपरयोरिति यो निर्दिष्टः स दीर्घ इति व्याख्याने पचन्तीत्यत्र दोषमाशङ्क्यैकदेशिनोक्तं- रूपग्रहणात् परस्य यादृशं रूपमित्यादि भाष्ये, तत्तु ह्रस्वत्वस्य रूपत्वाभिमानेन । सिद्धान्ते तु स्पष्टार्थमेव रूपग्रहणमिति तत्रैव भाष्ये सूचितम् । इको गुणेति सूत्रस्थकैयटस्तु चिन्त्य एव । तत्र हि इक्परिभाषाभावे जनेर्गुणोऽनुनासिकः स्यादिति शङ्कते, पररूपेण शुद्धो भविष्यतीति भाष्ये उक्तम् । तस्य मदुक्तरीत्या उपपत्तेः । ऐओजितिसूत्रस्थकैयटस्तु पूर्वपक्षोपपादकत्वान्न स्वार्थे साधक इति दिक् ॥

नावकल्पौ यदेति पाठे, न च छन्दोभङ्गः ॥ तद्भसादिति ॥ वृद्धौ भवमिति

विषये तत्सिद्ध्यनुगुणं पररूपं वाच्यमित्यर्थः । अत एवाह ॥ तच्च टेरिति ॥ यदि त्वादित्याधिकाराद् अकारस्यैवेष्येत तर्हि, मनीषा, पतञ्जलिरिति न सिद्ध्येत् । केचित्तु मनः तक्ष्णोः पृषोदरादित्वादन्त्यलोपेऽकारस्यैव पररूपमाहुः । शकानां देशविशेषाणामन्धुः कूपः शकन्धुः । कर्काणां राज्ञामन्धुः । बदरीवाची तु कर्कन्धूशब्दो दीर्घान्तः । अन्धूदम्भू इत्यादिना उणादिषु वक्ष्यते । अटतीत्यटा । पचाद्यच् । कुलस्य अटा कुलटा । ईष उञ्छे, ईष गत्यादिषु । आभ्यां, गुरोश्च हल इत्यप्रत्यये ईषा । मगस ईषा मनीषा । हलस्य ईषा हलीषा लाङ्गलदण्डः । मूर्द्धन्योपधः । यस्तु, मधुशङ्करयोरीशः स्त्रियां लाङ्गदण्डके इति रभसकोशात् तालव्योपधस्तस्मिन् परे आद् गुण इत्येव भवति, हलेशा । पतन्नञ्जलिर्यस्मिन् नमस्कार्यत्वादिति पतञ्जलिः ॥ मार्तण्ड इति ॥ केचिदत्र सवर्णदीर्घमाहुः । परा मार्तण्डमास्थत्, नर्मार्ताण्डमाभरत्, विश्वो र्ताण्डो व्रजदित्यादिवैदिकप्रयोगास्तेषामनुकूलाः ॥ ओत्वोष्ठ्योरिति ॥ अकारस्य ओत्वोष्ठ्योश्चैकत्र समासे स्थितौ इत्यादिदं प्रवर्तते । तेनेह न । वृषलसुतौष्ठ्रवणस्ते इति । अव्यक्तशब्दं व्याचष्टे ॥ ध्वनेरिति ॥ अ कारणस्येति ॥ परिस्फुटाकारादिवर्णस्येति भावः । तस्य चाकारणत्वं किञ्चित्साम्येन बोद्धव्यम् । यत्तु प्राचोक्तम् । अतः किम् । दकारान्ते मा भूदिति । यच्च व्याख्यातं, दकारान्त इति रूपान्तरोपलक्षणं, वटक्, मरुत्, इत्यादेरपि । तन्निःसारम् । प्रश्नस्य, दान्त इत्युत्तरस्य च निरालम्बनत्वात् । यत्तु व्याचख्युः । अतो गुण इत्यतोऽत इत्यनुवर्त्य

व्याख्याने वार्त्तिकशब्दस्य र्वानिपातापत्तिरित्याहुः ॥ विषये इति ॥ शकन्ध्वादित्विति विषयसप्तमीति भावः ॥ अत आहेति ॥ ईदृशव्याख्यानतो लब्धमाहेत्यर्थः ॥

आहुरिति ॥ अत्रारुचिबीजं तु वचनद्वयव्यापारो व्यर्थः । पृषोदरादित्वाद्धिलोपेनैव सिद्धेरिति ॥ देशविशेषाणामिति ॥ देशविशेषस्य यौगिकत्वेन जातिवाचकत्वाभावाद्विशेषणानां चाजातेरिति न निषेध इति बोद्धव्यम् ॥ कुलस्याटेति ॥ कर्मणः शेषत्वविवक्षायां षष्ठी । अन्यथा कर्मण्यणि कुलाटीति स्यादिति भावः ॥ किञ्चित्साम्येनेति ॥ तदभावे हि भग्नदन्ताद्युच्चारिताव्यक्तशब्दे एव स्यात् । अव्यक्तत्वं चार्थबोधाजनकत्वेनापि वक्तुं शक्यमित्याहुः ॥ निरालम्बनत्वादिति ॥ अग्रहणं तद्भिन्नव्यावृत्त्यर्थमित्यर्थस्य बालैरपि सुज्ञेयत्वेनातः किमिति प्रश्नस्य दान्ते मा भूत्, वटक्, मरुदित्यत्र च मा भूदिति उत्तरस्य च निरालम्बनत्वामे-

शब्दाधिकाराश्रयणात् सिद्धमिति प्रश्नः । यदा जश्त्ववशाद्दान्तत्वं तदाऽपि स्यात् । पुनरद्ग्रहणे तु श्रौततान्तत्वस्य विवक्षणान्नेत्युत्तरमिति । तच्चिन्त्यम् । जश्त्वशास्त्रस्यासिद्धत्वेन पररूपस्यैव प्रवृत्तेः । नाम्रेडितस्येति निषेधे पटत्पटदितीत्युदाहरणस्यासंबद्धत्वापत्तेश्च । तत्र हि भवदुक्तरीत्या प्राप्तिरेव नास्ति । दान्तत्वात् । एतेना-[illegible]द्धरणयोरभेदविवक्षया विभक्त्यभावेन गवित्ययमाहेतिवदपदत्वात्, पटत् इतीत्यत्र जश्त्वं नेति ग्रन्थोऽपि प्रत्युक्तः। उत्तरग्रन्थविरोधात् । जश्त्वस्यासिद्धतया पररूपेणैव बाधाच्च । ननु तदपि नित्यं, तथाच कथं पररूपविरहेण प्रयोग इति चेन्न । अलौकिकं प्रक्रियावाक्यमिदमिति स्वयमेव व्याख्यातत्वात्। संहिताया अविवक्षायां तत्संभवाच्चेति दिक् ॥

अकः सवर्णे ॥ अचि पर इति ॥ यदा तूष्मणामीषद्विवृतत्वमाश्रित्य नाज्झलाविति सूत्रं प्रत्याख्यायते तदा इहाचीति नानुवर्तनीयम्। अकोऽकि दीर्घ इति सुवचम् ॥ वर्णद्वयं द्विमात्रामिति ॥ यत्तु प्राचा व्याख्यातं– दीर्घे प्राप्ते, ह्रस्व ऋकार लृकारश्च विधीयत इति । तद्भाष्यकैयटादिविरोधादुपेक्ष्यम् ॥

त्यर्थः ॥ शब्दाधिकारेति ॥ तदाश्रयणाच्चाच्छब्दस्येत्यर्थो भविष्यतीति भावः ॥ तदाऽपि स्यादिति ॥ एकदेशविकृतन्यायेनाच्छब्दत्वादिति भावः ॥ जश्त्वशास्त्रस्येति ॥ अनुकार्यानुकरणयोर्भेदे पदान्ततया जश्त्वेऽपीत्यादिः । तदसिद्धत्वेनात एव सत्त्वादिति भावः । ननु पुनरद्ग्रहणाज्जश्त्वासिद्धत्वमपि बाध्यतामत आह ॥ नाम्रेडितेति ॥ उदाहरणस्य=वृत्त्यादिस्थस्य ॥ अनुकार्यानुकरणयोरिति ॥ सर्वत्र जश्त्वप्राप्त्योदाहरणासम्भवाशङ्कायां ह्येतदुक्तं तैरिति बोध्यम् ॥ उत्तरग्रन्थेति ॥. नाम्रेडितस्येत्यस्य पटत्पटदितीत्युदाहरणपरग्रन्थेत्यर्थः । ननु स ग्रन्थो जश्त्वाऽसिद्धत्वेन योज्य इति चेत्तत्राह ॥ जश्त्वेति ॥ तस्यासिद्धतया पररूपेणैव भवितव्यमिति जश्त्वस्याप्रवृत्तिलक्षणो बाधः । एवञ्च यदा जश्त्ववशाद्दान्तत्वमिति ग्रन्थासङ्गतिरिति सेयमुभयतस्पाशा रज्जुरिति भावः॥ दिगिति ॥ दिगर्थस्तु अपदान्तादित्यनुवृत्त्यैव जश्त्वविषये व्यावृत्तिसिद्धेः पुनरद्ग्रहणं व्यर्थमेव । एतेन पुनरद्ग्रहणं श्रौततान्तत्वविवक्षाद्वारा जश्त्वविषयेऽभेदविवक्षायामेव यथा स्यान्न तु भेदविवक्षायां जश्त्वविषय इत्यर्थकमित्यपास्तम् । ममाद्ग्रहणं तु शब्दाधिकारानित्यत्वज्ञापनार्थमिति दिक् ॥

सुवचमिति ॥ जातिपक्षाश्रयणे यथासंख्येनेष्टसिद्धेरिति भावः । एवंरीत्या यथासंख्यमिको यणचीत्यत्रापि बोद्धमिति सूचितम् ॥तद्भाष्येति॥तुल्यास्यसूत्रस्थभाष्येत्यर्थः । तत्र हि, अकः सवर्ण इति सूत्रेणैतद्वार्तिकान्यथासिद्धिरुद्भाविता ॥

एङः पदान्तात् ॥ ङसिङोश्चेत्यस्यारम्भादस्य पदान्तविषयत्वे लक्ष्ये उत्तरार्थं पदान्तादिति स्पष्टार्थमिहैव कृतम् ॥

सर्वत्र विभाषा गोः ॥ यद्यपि छन्दसीति न प्रकृतं, तथाऽपि पजुष्पुर इत्यादिप्रयोगाच्छन्दस्येवेति संभाव्येत। अतः सर्वत्रेत्युक्तम्। तद् व्याचष्टे ॥ लोके वेदे चेति ॥ इह एङ इत्यनुवर्त्यैङन्तस्य गोरिति व्याख्येयम्। तेनेह न ॥ चित्रग्वग्रामिति॥ प्रतिपदोक्तस्य एङो ग्रहणान्नेह, हे चित्रगोऽग्रम् ॥ प्रकृतिभाव इति ॥ प्रकृत्याऽन्तःपादमिति सूत्रात् प्रकृत्येत्यनुवृत्तेः। यद्यपि भाष्ये, इको गुणवृद्धी इति सूत्रे, नान्तः पादमिति पाठः स्थितः। षाष्ठभाष्येऽप्येवम्। तथापि शाकलसूत्रे ह्रस्वश्चेति चकारेण प्रकृत्येनुकृष्यते इति भाष्यदर्शनात् प्रकृत्यान्तःपादमिति पाठोऽपि साधुरेव। नेति पाठे तु सर्वत्रेति सूत्रेण पूर्वरूपमेव विकल्प्येत इत्यवधेयम् ॥

अव स्फोटायनस्य ॥ अत्राप्येङन्तस्य गोरिति व्याख्येयम्।

आरम्भादिति ॥ अपदान्ताच्चेद् ङसिङोरेवेति नियमादिति भावः ॥ उत्तरार्थमिति ॥ इकोऽसवर्ण इत्याद्यर्थम् ॥ स्पष्टार्थमिति॥ विभक्तौ चेद् ङसिङोरेवेति नियमशङ्कावारणार्थमिति भावः ॥ इत्यनुवर्त्येति ॥ षष्ठ्या विपरिणमय्येत्यपि बोध्यम् ॥ प्रतिपदोक्तस्येति ॥ एङ्ग्रहणानुवृत्त्येति भावः। प्रतिपदोक्तपरिभाषया वा। वर्णग्रहणे तदप्रवृत्तिज्ञापकस्य तदनित्यतामात्रज्ञापकत्वम्। ध्वनितं चेदमोत्सूत्रे भाष्ये। एङः पदान्तादित्यत्र तु हलोऽनन्तरा इत्यादिनिर्देशान्न प्रतिपदोक्तग्रहणम्। अत्र च स्थानिवत्सूत्रस्थं भाष्यं मानमित्यन्यत्र विस्तरः ॥ पूर्वरूपमेवेति ॥ पूर्वरूपमपीत्यर्थः। गोशब्दस्य यद्यत् प्राप्तं तन्नेतिव्याख्यानेन,नान्तःपादमित्यनेनैव पूर्वत्वादिकं विकल्पेन निषिद्धेतेत्यर्थः। तेनावादेशोऽपि न ॥

एङन्तस्य गोरिति ॥ प्रतिपदोक्तस्यैङ इत्यपि बोध्यम्। ननु, गोरग्वचनं स्वरसिद्ध्यर्थमन्यथावङ् कदाचिदन्तोदात्तोऽपि स्यादित्येतत्सूत्रस्थभाष्यप्रामाण्याच्चित्रग्वग्रमित्यत्रावङभावोऽस्तु। तत्रागवङ्ये रूपे विशेषस्य स्पष्टत्वात्। चित्रगोऽग्रमित्यत्रावङभावकल्पने किं मानमितिचेन्न। उपदेशे आद्युदात्तत्वनिपातनेनावङन्यासस्थापनपरभाष्यस्य मानत्वात्। चित्रगोशब्द आमन्त्रिताद्युदात्तत्वेनान्तानुदात्तस्तत्राकि तस्यागमानुदात्तत्वे उभयोरनुदात्तयोरेव श्रवणं स्यात्। आद्युदात्तनिपातने तु गकाराकारस्योदात्तस्येति विशेषः स्पष्टः। न च गवाक्ष इत्यादावङ आद्युदात्तस्य श्रवणं मा भूदिति तस्योपदेशिवद्भावो वाच्य इति समासान्तोदात्तादिवामन्त्रिताद्युदात्तादपि प्रागवङ्स्वरप्रवृत्तौ पञ्चादामन्त्रितस्वरे स्वरभेदाभाव इति वाच्यम्। गवाक्ष इत्यादौ समानकालप्रवृत्तिकस्य परत्वेन प्रथमं प्राप्तस्य समासस्वरस्य प्रागप्रवृत्तौ उपदेशिवद्भावबचनचारितार्थ्येनाङ-

आगेति सूत्रयितुमुचितम् । विभाषानुवृत्तेः स्फोटायनग्रहणं पूजार्थम् ॥ गवीति॥ यत्तु प्राचा, गवे इति प्रत्युदाहृतम् । तन्न । सत्यप्यवङि, अतो गुण इति पररूपेण रूपसिद्धेः । न च सत्यवङि ङेर्यादेशः स्यात्, स्त्रियां तु टाप् स्यादिति वाच्यम् । सन्निपातपरिभाषया यादेशटापोः सुसमाधानत्वात् । न च साऽनित्येति वाच्यम् । तावताप्यौत्सर्गिकतत्प्रवृत्त्येष्टसिद्धेः ॥ गवाक्ष इति ॥ गवामक्षीवेति विग्रहः । अक्ष्णोऽदर्शनादित्यच् समासान्तः । वातायने रूढोऽयम् । पुंस्त्वं लोकात् ।

इन्द्रे च ॥ आरम्भसामर्थ्यान्नित्यमिदम् । इन्द्रे च नित्यमिति पाठस्तु भाष्यासंमतत्वादुपेक्षितः ॥

एहि कृष्णेति ॥ दूराद्धूते चेति प्लुतः । यत्तु कृष्ण३ एहीति प्राचोक्तम् । तन्न । दूराद्धूते चेत्यादौ वाक्यस्य टेरित्यधिकारात् ॥ चक्रयत्रेति॥ इह स्कोरिति कलोपो न । यणः कार्यकालपक्षे बहिरङ्गपरिभाषयाऽसिद्धत्वात् । स्थानिवद्भावाच्च । पूर्वत्रासिद्धीये नेति तु नास्ति । तस्य दोषः संयोगादिलोपेत्याद्युक्तेः ॥

दूराद्धूते च ॥ हूतमाह्वानं, तच्च सम्बोधनमात्रोपलक्षणमित्यभिप्रेत्याह ॥ दूरात् सम्बोधन इति ॥ उपलक्षणतया व्याख्यानस्य फलमुदाहरति॥ सक्तून् पिबेत्यादि ॥

सञ्ज्ञापेक्षबहिरङ्गगुणापेक्षयान्तरङ्गत्वात् पूर्वमेवामन्त्रितस्वरप्राप्त्या तदप्रवृत्तिसम्पादनेऽस्य सामर्थ्याभावात् । तद् ध्वनयन्नाह ॥ अगितीत्यादि ॥ यथान्यासे त्वाद्युदात्तनिपातनोपदेशिवद्भावयोः करणे गौरवादस्यौचित्यमिति भावः। स्थानिवत्सूत्रे भाष्येऽप्युक्तं, गोः पूर्वत्वे स्थानिवत्त्वप्रतिषेधो वक्तव्यः । चित्रगवम् । सर्वत्र विभाषा गोरिति पूर्वत्वं प्राप्नोति । नैष दोषः । एङ इति वर्त्तते । तत्रानल्विधाविति प्रतिषेधो भविष्यति । एवन्तर्हि चित्रगोऽग्रमित्यत्र प्राप्नोतीति । अत्र पूर्वत्वशब्देन तदपवादप्रकृतिभावावङौ विनिगमनाविरहात्, सर्वत्रेत्यवङित्यस्याऽप्युपलक्षणम् । अत एव प्रकृतिभावे इति त्यक्त्वा पूर्वत्वे इत्युक्तं वार्तिके भाष्ये च । चित्रगोशब्दस्य लाक्षणिकत्वेऽपि स्थानिवत्त्वप्राप्तौ तत्प्रतिषेधः कृतः । एङः प्रतिपदोक्तत्वाश्रयणे तु तन्न कार्यमिति लाघवमिति दिक् ॥ टाप् स्यादिति ॥ ङीष उपलक्षणमिदम् ॥ [illegible] ॥ गवीत्यस्य स्थाने गवे इति स्यादिति तदग्रन्थव्याख्यानमपि न समञ्जसम् ॥ भाष्यासम्मतत्वादिति। इन्द्रे इति सामर्थ्यान्नित्यमिति तदुक्तेरिति भावः ॥ प्लुत इति ॥ प्रकृतिभाववचनसामर्थ्यादेव प्लुतस्य तत्र नासिद्धत्वमिति भावः ॥ उपलक्षणेति ॥ एवञ्चासत्यप्याह्वाने भवतीति भावः ॥

गुरोरनृतः ॥ अपिशब्दो गुरोरगुरोश्च टेः प्लुतार्थः ॥ देवदत्तेति ॥ अस्यैहीत्यादिः । एवमग्रेऽपि ॥ सर्वः प्लुत इति ॥ तथा च, अग्नीत्प्रेषणे परस्य चेति सूत्रे भाष्यम् । सर्वः प्लुतः साहसमनिच्छताऽपि विभाषा कर्तव्य इति । साहसं शास्त्रत्यागः, तदानिच्छताऽपि शास्त्रमनुरुन्धानेनापीत्यर्थ इति हरदत्तः । वैकल्पिकेष्वनुष्ठानक्लेशं धर्माधिक्यफलकमप्यशक्तत्वादनिच्छतेत्यर्थ इत्यन्ये । एतेन, द्वैपायनो विरहकातर आजुहाव पुत्रेति भागवतं व्याख्यातम् । प्लुतस्य वैकल्पिकत्वात् । किञ्चेह पुत्रशब्दस्य वाक्यान्तत्वं नास्तीत्यपि सुवचम् । आख्यातप्राग्वर्तिनोऽप्यनुकरणसम्भवात् । अपि च अस्तु प्लुतः, प्रकृतिभावस्तु वैकल्पिकत्वान्मास्तु । तथाच, ई चाक्रवर्मणस्येति सूत्रे भाष्यम् । ईग्रहणेन नार्थः, वशा इयं वशेयमिति । प्लुतप्रकृतिभावः सर्वोऽपि चाक्रवर्मणमते नास्तीति भावः । अपिच इह प्रकृतिभावोऽपि दुर्लभ एव । अप्लुतवदुपस्थित इति सूत्रात् । उपस्थितं नामावैदिक इतिशब्दस्तस्मिन् परे प्लुतोऽप्लुतवत् स्यादिति हि तस्यार्थः । एवं चतुर्धापि निर्वाहे स्पष्टे, आर्षः प्रयोग इति श्रीधरोक्तिर्नादर्तव्या ॥

द्विवचनमिति ॥ सुप्तिङन्तमित्यन्तग्रहणेन सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति ज्ञापितत्वादिति भावः । तेनेह न । कुमार्योर्वध्वोश्चागारं कुमार्यगारं वध्वगारमिति । स्पष्टं चेदं भाष्यादौ । द्विवचनान्तं प्रगृह्यं स्यादिति तु प्राचः प्रमाद एव ॥ हरी एताविति ॥ इह शाकलं न । प्लुत-

---

एहीत्यादिरिति ॥ वाक्यस्य टेरित्युक्तेरिति भावः ॥ हरदत्त इति ॥ कैयटोऽप्येवम् । अत्र पक्षे, विभाषा पृष्टेत्यत्र विभाषाग्रहणमवयुत्याऽनुवादः । अविद्वांसः प्रत्यभिवादे इत्यादि परपशास्थं भाष्यमपि वैकल्पिकेषु भावानुष्ठानौचित्येन शास्त्राज्ञाननिन्दापरं बोद्धव्यम् ॥ आख्यातप्रागिति ॥ पुत्र एहीति वाक्यस्थस्येत्यर्थः । अनुकरणे दूरात् संबोधनत्वाभावाच्चेत्यपि बोद्धव्यम् ॥ वैकल्पिकत्वादिति ॥ अस्य अप्लुतवद्भावस्य वैकल्पिकत्वेन तत्त्वमित्यर्थः ॥ प्लुतप्रकृतिभाव इति ॥ तस्य मते अप्लुतवद्भावोक्तेरिति भावः । एतेन चाक्रवर्मणस्याचार्यस्याप्लुतवदित्येव भाष्योक्तेरिदं सर्वं चिन्त्यमित्यपास्तम् । प्रकारान्तरेणाप्यप्लुतवद्भावोऽत्रेत्याह ॥ अपि चेति ॥ अवैदिक इति ॥ अस्य पुराणस्थत्वेनावैदिकत्वं स्पष्टमेव ॥

कुमार्योरिति ॥ अत्र हि प्रत्ययलक्षणेन द्विवचनान्तत्वं श्रुत्या चेदन्तत्वमस्तीति भावः । इदं च द्विवचनान्तमीदन्तमित्यर्थे । ईदन्तं यद् द्विवचनं तदन्त-

प्रगृह्या इत्यत्र नित्यग्रहणादित्युक्तम् । अत्र वृत्तिकारः । मणीवादीनां प्रतिषेधो वक्तव्य इति पठित्वा, मणीव, रोदसीव, दम्पतीव, जम्पतीवेत्युदाजहार । तच्च मुनित्रयाऽकृत्वादप्रमाणमिति कैयटहरदत्तादयः । एवं स्थिते मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ ममेति भारतप्रयोगं समर्थयते ॥ इवार्थ इति ॥ वशब्द इति ॥ वं प्रचेतसि जानीयादिवार्थे च तदव्ययमिति मेदिनी। व वा यथा तथैवैवं साम्ये इत्यमरग्रन्थव्याख्यावसरे शात्रवं व पपुर्यश इति कालिदासप्रयोगस्याभियुक्तैरुदाहृतत्वात् । कादम्बखण्डितदलानि व पङ्कजानि इत्यादिदर्शनाच्चेति भावः । यत्तु पाठान्तरं, वद्वा यथा तथेत्यादि । तदयुक्तम् । नामलिङ्गानुशसानप्रक्रमे तद्धितवतेरननुगुणत्वात् । अपत्यसमूहादिपर्यायमद्ध्येऽण्फिञ्वुञादीनामनुक्तेश्च ॥

अदसो मात् ॥ इह एकारो नानुवर्तते, असम्भवादित्यभिप्रेत्याह ॥ ईदूताविति ॥ ननु उकारानुवृत्तिर्व्यर्था । स्त्रियौ फले वा अमू आसाते इत्यत्र पूर्वेणैव सिद्धेः। मुत्वस्यासिद्धत्वेऽप्येकारान्तत्वादत आह॥रामकृष्णाविति ॥ पुंसि पूर्वेण न सिद्ध्यति, औकारान्तत्वादिति भावः । अदसो मादिति सूत्रं प्रति तु मूत्वमीत्वे नासिद्धे । आरम्भसामर्थ्यात् ॥ एकारोऽपीति ॥ तथाच एकाराननुवृत्तितात्पर्यग्रहणफलकं माद्ग्रहणमिति भावः । अत्रेदं चिन्त्यम् । ईदूत्सप्तम्यर्थे प्रगृह्यम् । अदसः । एच्च द्विवचनमित्येव कुतो न सूत्रितम् । एवं हि पूर्वसूत्रस्थमीदूद्ग्रहणं प्रकृतसूत्रे माद्ग्रहणं च मास्तु । एकदेशानुवृत्तिक्लेशोऽपि नेति ॥

मित्यर्थे तदन्तविध्यसंभव एव दोषो बोद्धः ॥ इत्युक्तमिति ॥ मूले इति शेषः ॥ शात्रवं वेति ॥ शात्रवं यश इवेत्यर्थः। ववेत्यादिकोशप्रदर्शनेन वशब्द इवपर्यायः स्वतन्त्र एव, न तु सत्याभामादिवदेकदेश इति सूचयति । विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपो वाच्य इति वचनेन तादृशस्थले तथा कल्पनेऽप्यखण्डे पदे तथात्वे मानाभावात् ॥

आरम्भसामर्थ्यादिति ॥ ननु कार्यकालपक्षेऽनुनासिकप्रतिषेधेन चारितार्थ्यम् । तत्पक्षे हि सञ्ज्ञा॥ अस्य न पृथग् बोधकत्वं, पूर्वत्रासिद्धमिति चातिदेशः कार्यार्थः । कार्यज्ञानं वाक्यार्थबोधोत्तरमिति यद्देशे वाक्यार्थबोधस्तद्देशस्थत्वमेव तस्य । किञ्च अधिकारः सः । एवञ्च मुत्वदृष्ट्या अनुनासिकविधेरसिद्धत्वेन तदेकवाक्यतापन्नसञ्ज्ञाया अपि तदृदृष्ट्याऽसिद्धतया मुत्वशास्त्रेऽनुवृत्तपूर्वत्रासिद्धमित्यत्रत्यपूर्वशब्देन तदेकवाक्यतापन्न यादसोमादित्यस्य ग्रहीतुमशक्यत्व-

शे ॥ छान्दसमपीदं सन्दर्भशुद्ध्यर्थमुक्तम् । वस्तुतस्त्वनुकरणार्थतया लोकार्थमपि सम्भवत्येव । त्वे रायो मे राय इत्यादौ, त्वे इति, मे इति इत्यनुकरणे प्रयोजनलाभात् ॥ अस्मे इति ॥ अस्मभ्यमित्यर्थः । भ्यसः सुपां सुलुगिति शेआदेशः । शेषे लोपः ॥

निपात ॥ अनाङिति पर्युदासादेवाङ्रूपनिपाते लब्धे निपातग्रहणमुत्तरार्थं स्पष्टार्थमिहैव कृतम् ॥ आ एवमिति ॥ पूर्वं प्रक्रान्त[illegible] वाक्यार्थस्याऽन्यथात्वद्योतकोऽयमाकारः । पूर्वमित्थंनामंस्थाः, इदानीं त्वेवं मन्यसे इत्यर्थः । आ पूर्वं किलेति ॥ स्मरणद्योतकोऽयमाकारः ॥ वाक्येत्यादि ॥ तथाच भाष्यम्—

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।

एतमातं ङित्तं विद्याद्वाक्यस्मरणयोरङि[illegible], इति ॥ अत्र अङ्ङित्त्वलक्षण एव तात्पर्यं, लाघवात् । अन्यस्य ङित्त्वं त्वर्थसिद्धम् । ईषदर्थेत्यादिस्तु अवयुत्याऽनुवादः । एवञ्च, अभ्रआँ अप इत्यत्र सप्तम्यर्थवृत्तेरप्याकारस्य ङित्त्वादाङो नासिकश्छन्दसीति प्रवर्तत इति भावः ॥

ओत् ॥ निपातः किम् । देवोऽसि । वायवायाहि ॥

सम्बुद्धौ ॥ ऋषिवदस्तदुपपत्तेरित्यादौ तथा दर्शनादित्यभिप्रेत्याह ॥ अवैदिक इति ॥ सम्बुद्धौ किम् । अहो इति । अत्र परत्वाद्विकल्पो मा भूत् ।

म् । एतेन कार्यकालपक्षेऽपि पाठकृतपूर्वत्वस्यानपगमेन सञ्ज्ञां प्रत्यसिद्धत्वं दुर्वारमित्यपास्तमिति चेन्न । अप्रगृह्यादस इति न्यासेनैव सिद्धौ सामान्यसञ्ज्ञासूत्रकरणसामर्थ्येन प्लुतप्रगृह्या इत्यत्राप्युपस्थित्या तत्सामर्थ्येन [illegible] धात् ॥ हेऽसुकाऽसुक इत्यादौ व्यवस्थितविभाषाश्रयणात्तयोरनभिधानाद्वा सूत्रमतेऽपि नानुनासिक इत्याशयात् । स्पष्टं चेदं भाष्ये ॥

छान्दसमिति ॥ शेआदेशस्य छान्दसत्वादिति भावः ॥ मे इतीत्यनुकरण इति । प्रकृतिवदनुकरणमतिदेशेन पदत्वात् पदान्तत्वप्रयुक्तः प्रकृतिभावस्तत्र । तेनातिदेशेन प्रगृह्यत्वं तु न । त्वे राय इत्यादावनुकार्ये फलाभावेन प्रगृह्यत्वाप्रवृत्त्या तदनुकरणेऽतिदेशेनासिद्धोपदेशप्रवृत्तिरेव वाच्येति भावः ॥

अन्यथात्वेति ॥ अनभिमतत्वेत्यर्थः । तदाह ॥ नामंस्था इति ॥ स्मरणेति ॥ विस्मृतस्य स्मरणविषयतायोतक इत्यर्थः । मर्यादाभिविधावित्यत्र मध्यमपदलोपी समासः । तत्सहितेऽभिविधावित्यर्थः ॥ सप्तम्यर्थेति ॥ तद्वृत्तित्वं च तस्य निरुक्ते स्पष्टम् । अव्ययीभावाभावश्च श्रुतौ छान्दसत्वाद् बोध्यः ॥

अत्र [illegible] ॥ न चैतदभावे नित्याविधिर्दुर्वारः । इति-शब्दातिरिक्ते ओदित्यस्य, निपाततारतिरिक्ते सम्बुद्धावित्यस्य चारितार्थ्येन सामर्थ्याभावादेवञ्च

यस्त्वोदित्यत्र निपातावृत्तेरिह च सम्बुद्धिग्रहणस्य प्रत्युदाहरणं वृत्त्यादावुक्तं भवित्वयमाहेति । तन्न । तत्र प्रगृह्यसञ्ज्ञासत्त्वेऽपि प्रकृतिभावाप्रसक्तेः । इकोऽसवर्ण इत्यत्र हि पदान्तग्रहणमनुवर्त्तत इत्याकरे स्पष्टम् । एवञ्च प्लुतप्रगृह्या इति सूत्रे तत्सम्बन्ध आवश्यकः । गवीति च न पदम् । अकार्यानुकरणयोरभेदविवक्षया अर्थवत्त्वाभावेन विभक्तेरनुत्पादात् ॥

उञ्छः ॥ निपात एकाजिति प्राप्ते विभाषेयम् ॥

ऊँ॥अनुनासिक इति॥ तेनास्मिन् परे,यरोऽनुनासिक इति विकल्पः । यदेतनूँ इति पठसि यदेतदूँ इति वा तदीर्घमित्यादि । एतदर्थमेव तत्रानुनासिकग्रहणम् । अन्यथा, यरो ञमि ञम् वेत्येवावक्ष्यत् ॥

फलेऽविशेष इति वाच्यम् । परत्वेन विकल्पप्रवृत्तावभावपर्यन्तमप्यस्य व्यापारेण सङ्गतिन्यायेन औदित्यस्य तदभावेऽप्रवृत्तेः । अत एव, न यदि, विभाषा साकाङ्क्षे, इति सूत्रे निषेधीयोभयत्र विभाषेति संगच्छते । अन्यथा परत्वादेतत्प्रवृत्तावप्यनेन निषेधाभावे पूर्वसूत्रस्य दुर्वारत्वेन सा दुर्लभा स्यात् । न चाकडारसूत्रेणान्यत्र सञ्ज्ञानां बाध्यबाधकभावाभावस्य ज्ञापितत्वात् परत्वाद्विकल्प इत्यऽसङ्गतमिति वाच्यम । सञ्ज्ञाया एकत्वा । ज्ञापकस्य च विशेषापेक्षत्वेन सञ्ज्ञा[illegible]दिति भाव इति केचित् ॥ ॥ परे तु— ओदित्यस्येतिशब्दनिरपेक्षत्वेनान्तरङ्गत्वमिति परत्वं न युक्तम् । सम्बुद्धाविति तु निपातपदानुवृत्तये । अन्यथौदन्तनिपातस्यैवेतौ विकल्पापत्तिः । नित्यविकल्पविज्ञोर्युगपत्प्रवृत्तावपि विरोधाभावेन परत्वादित्यस्यासङ्गतेः । एवञ्च परत्वादित्यस्योत्कृष्टत्वादपवादत्वादित्यर्थः । ओद्ग्रहणानुवृत्त्यैव सिद्धे पुनरोद्ग्रहणेनाऽपि तन्निवृत्तिसिद्धौ वैचित्र्यार्थमेव सम्बुद्धिग्रहणमित्याहुः ॥ आवश्यक इति ॥ अन्यथा इकोऽसवर्ण इत्यत्र मण्डूकानुवृत्त्यापत्तिः । सा च सम्बन्धतदभावोभयकल्पनापत्त्याऽन्याय्येति भावः ॥ अनुत्पादादिति ॥ अत एव तस्याः श्रवणं न । अभेदविवक्षापदार्थश्चार्थवत्सूत्रे निरूपयिष्यते । न च लिङ्गसर्वनामनपुंसकताभ्युपगमेन उत्पन्नाया विभक्तेर्लुक् । ह्रस्वापत्तेः । न च सुप्सुपेति समासेन निर्वाहः । इतिशब्दस्य शब्दस्वरूपपरतातात्पर्यग्राहकत्वेन तेनैकार्थीभावरूपसामर्थ्यस्य दुरुपपादत्वात् । नच गोभ्यां गोक्षीरमित्याद्येकदेशगोशब्दानुकरणे,ऋलृक्सूत्रभाष्योक्तेन प्रकृतिवदनुकरणमित्यतिदेशेन पदत्वं सुलभमिति वाच्यम् । क्षियो दीर्घादिति सूत्रभाष्योक्तेन तदतिदेशानित्यत्वेन तदप्रवृत्तिमाश्रित्यापि सुसाधत्वेनासाधारणप्रयोजनत्वाभावादिति भावः ॥

एतदर्थमेवेति ॥ एतदर्थमपीत्यर्थः । अनितेः किपि सम्बुद्धावान् चिनोषीत्यत्र नश्छवीति रुत्वेऽनुनासिक इति पूर्वस्यानुनासिके तदेतनाँञ्चिनोषि कमलूँ आँञ्चिनोषीत्यत्रापि फलसत्त्वा । ॥ अवश्यदिति॥ न चैवं न्यासे यथासंख्यापत्तिः।

मय उञो वो वा ॥ मयः परस्येति । परादिति तु प्राचः प्रमादः । षष्ठीनिर्दिष्टस्य हि आदेशा उच्यन्ते इति भाष्यात् । आदेशविधौ स्थानिनः षष्ठ्या एव न्याय्यत्वाच्च ॥ असिद्धत्वादिति ॥ अत एवेदं वत्वं त्रिपाद्यां विधीयते । प्रकृतिभावमात्रबाधनार्थत्वे हि इको यणित्यनन्तरं, मय उञो वेत्येवावक्ष्यत् । यणं चान्ववर्त्तयिष्यत् । इह मय उञ इतौ परे अष्टाविंशति-रूपाणि । तथाहि । उञ इति प्रगृह्यत्वे किमु इति । वत्वपक्षे किम्वि । ऊँ, आदेशे किमूँ इति । आदेशस्य स्थानिवत्त्वेन मय उञ इति प्रकृतिभावा-ऽपवादभूते आन्तरतम्यादनुनासिके वकारे किम्विँति । अनुनासिकाननुना-सिकयोर्वकारयोर्मयो यण इति द्वित्वस्य मकारस्यानचि चेति द्वित्वस्य च विकल्पेन वत्वपक्षे रूपाष्टकम् । तदभावे द्वयमिति दशकम् । प्रगृह्यसञ्ज्ञा-विरहपक्षे मय उञ इति वत्वस्यासिद्धत्वादिको यणिति यणेव । तस्य सिद्ध-त्वान्मोऽनुस्वारे, वा पदान्तस्येति परसवर्णपक्षे अनुनासिकाननुनासिकवकार-द्वयोपेतमेकादशं रूपम् । अनुनासिकस्य द्वित्वे, हलो यमामिति लोपस्य [illegible] त्रिवकारं द्वादशं रूपम् । परसवर्णाभावपक्षे अनुस्वार-स्य यर्त्वात् पाक्षिके द्वित्वे द्वे । [illegible] चतुर्दश । इतिशब्देकारस्य, अणो-ऽप्रगृह्यस्येत्यनुनासिकविधित्वादप्राप्तिरिति ॥ इत्यच्सन्धिः ॥

तस्यासार्वत्रिकत्वात् । आन्महत इत्यादिनिर्देशाच्चेति भावः । पूर्वोक्ते कमलाँ-श्चिनोषीत्यत्र लस्य नकारापत्तिवारणाय विधेयकोटावनुनासिक इति । विधेय-कोटौ यकारमारभ्य प्रत्याहारे तु विधेयविषये सवर्णग्रहणाभावेन पूर्वोक्ते निर-नुनासिकलस्यैवापत्तिरिति यथान्यासमेव साधु ॥

इत्येवावक्ष्यदिति ॥ न चात्रापि न्यासे सन्निपातपरिभाषयाऽनुस्वाराप्राप्तिरि-ति वाच्यम् । त्रिपाद्यां तथा पाठेन सन्निपातपरिभाषाऽनित्यत्वस्यापि ज्ञापना-दिति भावः ॥ अनुनासिके वकारे इति ॥ इदं कैयटानुरोधेन । मय उञ इत्यत्र विधीयमानस्य सवर्णग्राहकत्वाभावेनानेन सानुनासिकविधानाभावेन कथमत्र सः । अन्यथेदमो मस्यानुनासिकोऽकारः स्यात् । अत एवेदृशे विषये गुणानाम-भेदकत्वपक्षानाश्रयणमिति चिन्त्यम् ॥ इति स्वरसन्धिः ॥

स्तोः श्चुना ॥ स्तोरिति समाहारद्वन्द्वः । सौत्रं पुंस्त्वम् ॥ श्चुनेति ॥ सहयुक्तेति सूत्रे विनापि तद्योगं तृतीयेति वक्ष्यते । योग इत्येतदध्याहार्यम् । अत्र स्थान्यादेशयोर्यथासंख्यं, निमित्तकार्यिणोस्तु न । शादिति ज्ञापकात् । अल्पाच्तरमित्यादौ तु सौत्रत्वात्, श्चुत्वं न । तज्ज्ञानमित्यादौ तु भवत्येव । स्तोः श्चौ श्चुरिति सुवचम् । न च तस्मिन्निति निर्दिष्ट इति परिभाषोपस्थानेन यज्ञः याच्ञा इत्यादि न सिद्ध्येत् । शादिति लिङ्गेन तस्या इहानुपस्थानात् ॥

ष्टुना ॥ इहापि कार्यिनिमित्तयोर्यथासंख्यं न । तोष्षि, इति ज्ञापकात् । ष्टौ ष्टुरिति सुवचम् । ईट्टे ईष्टे इत्यादौ, न पदान्तादिति ज्ञापकान्न दोषः ॥ सर्पिष्टममिति ॥ ह्रस्वात्तादाविति षत्वम् ॥

प्रत्यये भाषायामिति ॥ यत्तु प्राचा मयटि नित्यमिति पठितम् । यच्च हलन्तप्रकरणे षण्णां, षड्णा मित्युदाहृतम् । यच्च, यरोऽनुनासिक इति वाऽनुनासिक इति तत्र व्याख्यातं, तत् सर्वं भाष्यविरोधादुपेक्ष्यम् ॥ यवादिगण इति ॥ यचि भं तसौ मत्वर्थ इति संहितया पाठे तसाविति तात् पूर्वं दकारं प्राश्लिष्य भत्वेनाप्येतत् समाधातुं शक्यम् ॥

विनाऽपि तद्योगमिति ॥ साहित्यं च योगक्रियायाम् ॥ एतदिति ॥ संयोग इति तदर्थः । सत्या भामेतिवन्निर्देशः । संयोगश्चाव्यवहितयोरेवेति, चितं, कटुतैलमित्यादौ न दोषः ॥ यथासंख्यमिति ॥ तथदधनेत्यादेरप्यनादितया तमादाय परस्मैपदानां णलित्यादौ सूत्रान्तरस्थक्रमेणेव यथासंख्यमिति भावः । ष्वादिशब्दैश्चानादिसिद्धलोकः [illegible] तैवोपस्थितिरिति तात्पर्यम् । ननु तज्ज्ञानमित्यादौ श्चुयोगाभावान्न स्यादत आह ॥ तज्ज्ञानमिति ॥ जश्त्वयोगे तथोच्चारणमात्रं, न त्विदं वर्णान्तरमिति भावः ॥ अनुपस्थानेति ॥ पूर्वत्वांशानुपस्थानेत्यर्थः । तेन चितमित्यादौ न दोषः ॥

षत्वमिति ॥ न च षस्य पदान्ते जश्त्वं भविष्यतीति तद् व्यर्थमिति वाच्यम् । षत्वस्यासिद्धत्वेनास्य जश्त्वाभावात् ॥ भाष्येति ॥ प्रत्यये इत्येव तत्र पाठादिति भावः ॥

दकारमिति ॥ चर्त्वेनेति भावः । मृच्छब्दस्य यवादिगणे पाठे न मानमिति तत्र झय इति वत्वे मृद्वानित्येवेति तात्पर्यम् । " इति केचित्तन्न । मृन्मान् " इति क्वाचित्कोऽसांप्रदायिकः पाठः ॥

ननु सवर्णपदाधिकं, परसवर्णेत्यत्रैकथर्भावापन्नस्यान्यत्र सम्बन्धो वक्तुमशक्यः । न च पूर्वस्येत्यस्य सम्बन्ध्याकाङ्क्षायां यत्किञ्चित्सम्बन्धिकल्पना-

उदः स्था॥ अनुस्वारस्य ययीत्यत्र समस्तमपि सवर्णग्रहणमिह निष्कृष्य [illegible]ते। एकदेशे स्वरितत्वप्रतिज्ञानादित्याशयेनाह ॥ पूर्वसवर्णः स्यादिति ॥ अघोषस्येत्यादि ॥ एतेन सस्य तकार इति प्राचां ग्रन्थाः प्रत्युक्ताः। यदपीह, चयो द्वितीयाः [illegible], तदतिरभसात् ॥

तच्छिव इति ॥ यत्तु प्राचा तत् शिव इत्यत्र जश्त्वे कृते खरि चेत्युक्तम्। तन्न। तदो दान्तत्वेन जश्त्वोपन्यासवैयर्थ्यात्। यत्तु तत्पौत्रेणोक्तं तदो, वावसान इति चर्त्वे कृते पश्चाच्छिव इत्यनेन सम्बन्धे, झलां जशोऽन्ते इति जश्त्वे, खरि चेति चर्त्वमिति। तदतिस्थवीयः। जश्त्वं प्रति अवसाने [illegible]। जश्त्वे शिवशब्दानपेक्षणाच्च। भाविन्यवसानभङ्गे वावसान इत्यस्य पूर्वमप्रवृत्तेश्च। प्रवृत्तस्य वा निवृत्तिसम्भवात्। उक्तं च अकृतव्यूहाः पाणिनीया इति, कृतमपि शास्त्रं निवर्तयन्तीति च। अन्यथा

ऽपेक्षया पूर्वत्रोपस्थितार्थवाचकपदाद्याहारौचित्यात्तल्लाभः। चुटू इत्यादावादेरप्येवमेव सम्बन्धोपपत्तौ तत्र तत्र स्वरितत्वप्रतिज्ञाया वैयर्थ्यापत्तेः।नच स्वरितत्वप्रतिज्ञासामर्थ्यादेवेत्यनुवृत्तिः। तोर्लीत्यत्र समुदायानुवृत्त्या तस्याश्चारितार्थ्यादित्यत आह ॥ अनुस्वारस्येत्यादि ॥ एकदेशे इति च ॥ पकारमात्रे स्वरितत्वप्रतिज्ञयैव तोर्लीत्यादावनुवृत्तिसिद्धौ पुनः सकारांशे तत्प्रतिज्ञया तावतोऽप्यंशस्य उत्तरत्रानुवृत्तिरिति भावः ॥ तदतिरभसादिति ॥ चयोऽभावात्। दीर्घादाचार्याणामित्युत्तरमनुस्वारस्य यथि, वा पदान्तस्य, तोर्लि, उदः स्था, झयो हो, शश्छोटीति षट्सूत्रीपाठोत्तरं, झलां जश् झशि, अभ्यासे चर्च, खरि च, याऽवसाने, अणोऽप्रगृह्यस्येति पञ्चसूत्र्याः पाठे भाष्यसम्मते धस्य चर्त्वेऽपि तस्यासिद्धत्वाच्छर्परत्वाभावाच्चेति भावः ॥

चर्त्वमिति ॥ ततः श्चुत्वे छश्छोटीति प्रक्रियेतिभावः ॥ चर्त्वस्यापवादत्वादिति ॥ एवञ्च तत्र कृते जश्त्वाप्रवृत्तिरिति भावः। न च जश्त्वे कृते चर्त्वस्य चारितार्थ्येन तस्यासिद्धत्वादपवादत्वे न मानमिति वाच्यम। तत्कालेऽवश्यं प्राप्तत्वेन येन नाप्राप्तिन्यायेनापवादत्वस्य सुलभतयोक्तरीतेरसम्भवात्। एतदेवाभिप्रेत्य मिदचोऽन्त्यात्सूत्रे भाष्ये उक्तं, सत्यपि सम्भवे बाधनं भवतीति। अन्यथा कौण्डिन्याय तक्रमित्यनेन ब्राह्मणेभ्यो दधीति प्राप्तदधिदानस्यापि बाधो न स्यात्। तद्दानोत्तरं तत्पूर्वं वा तद्दानं चारितार्थ्यात्। अत एवाजादेर्द्वितीयस्येति सूत्रे प्रथमद्विर्वचनोत्तरमस्य चारितार्थ्येन प्रथमद्विर्वचनस्यानेन बाधो न स्यादित्याशङ्क्य सत्यपि सम्भवे इति न्यायेन बाधकत्वमुक्तं भाष्ये। एवञ्च, दयतेर्दिगीति सूत्रस्थकैयटादिग्रन्था असम्भवे एव बाधकतेति वार्तिकानुसारेण

हरिरयमित्यत्रापि त्वदुक्तरीत्या प्रवृत्तो विसर्गः केन वार्यताम् । अथ तनोतीति तादिति किबन्तं ब्रूषे, एवमपि जश्त्वेन दकारोऽस्तु । चर्त्वे कृते श्चुत्वमिति तु न न्याय्यम् । श्चुत्वं प्रति चर्त्वस्यासिद्धत्वात् । यत्तु, न ष्टु ने इत्यत्र नेति योगं विभज्यासिद्धत्वमिह नेत्याहुः । तदपि न । असिद्धत्वेऽपि रूपसिद्धौ निर्बाधायां योगविभागस्यागतिकगतिभूतस्येहाश्रयणे प्रमाणाभावात् ॥ आक्रंस्यत इति ॥ आङ उद्गमन इति तङ् । स्नुक्रमोरिति नेट् ॥

समसम्बन्धी विधिरिति ॥ समकर्मकं विधानमिति तु नोक्तम् । अनुवाद्ययोरपि यथासंख्यस्येष्टत्वात् । समूलाकृतजीवेषु हनःकृञ्ग्रह इत्यत्र यथा ॥

ङ्णोः ॥ कुक्टुकोः पूर्वान्तत्वात् प्राङ्क्साये इत्यत्र, सात्पदाद्योरिति षत्वं न । सुगण्दृसाय इत्यत्र, न पदान्तादिति ष्टुत्वं न । पुष्करे तीर्थविशेषे सीदतीति पुष्करसत् । तस्यापत्यं पौष्करसादिराचार्यः । बाह्वादित्वादिञ् । अनुशतिकादित्वादुभयपदवृद्धिः ॥

ङः सि धुट् ॥ उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् परत्वादित्यभिप्रेत्याह ॥ सस्येति ॥ सीति सप्तमीनिर्देशस्तु लाघवार्थः ॥ षट्सन्त इति ॥ धुटश्चर्त्वेन तकारः । यत्त्वाहुः । चयो द्वितीया इति पक्षे तस्य थ इति ॥ तन्न । चर्त्वस्यासिद्धत्वात् । अत एव धुडभावे षट्सन्त इत्यत्र टस्य ठो न । टकारनकारविसर्गाणां द्वित्वविकल्पात् षोडश । खयः शर इति सकारद्वित्वे

प्रवृत्ता अयुक्ता एवेति बोध्यमिति भावः ॥ केन वार्यतामिति ॥ एवञ्चेदृशविषये वाक्यसंस्कारपक्षेणैव साधुत्वान्वाख्यानमिति स्वीकृत्य अकृतव्यूहपरिभाषा त्याज्येति चेदिष्टापत्तिरिति बोध्यम् । अन्ये तु– पदसंस्कारे हरिः अस्तीति सविसर्गमपि साध्वेव, सत्यभिधाने । परिभाषाया भाष्येऽदर्शनादित्याहुः ॥ प्रमाणाभावादिति ॥ योगविभागस्य भाष्येऽदर्शनेनाप्रामाणिकत्वाच्चेत्यपि बोध्यम् ॥

यथासंख्यस्येति ॥ ख्यान्तैकदेशेन सूत्रस्य ग्रहणं बोध्यम् ॥

परत्वादिति ॥ तस्मिन्निति सूत्रापेक्षया, तस्मादित्यस्य परत्वादित्यर्थः । ङकारात्सकारे धुडित्यर्थे तस्मिन्नित्यस्य प्रवृत्तावुपस्थितडकारस्यागमित्वं तस्मादित्यस्य प्रवृत्तावुपस्थितसस्य तत्त्वमित्यसम्भवरूपविरोधे परत्वेन व्यवस्थेति सस्यागमित्वनिर्णय इति भावः । स्पष्टं चेदं तस्मिन्निति सूत्रे भाष्ये ॥ लाघवाऽर्थ इति ॥ षष्ठ्याः प्रयोग एव कर्त्तव्य इत्यर्थः ॥ चर्त्वस्यासिद्धत्वादिति ॥ अत एव, तुडिति नोक्तम् ॥ अत एव – चत्वस्यासिद्धत्वादेव ॥ ननु, धुक् ङः सीत्यस्तु । सप्तमी च यथाश्रुतैव । ङ इति च षष्ठ्यन्तम् । परमार्थतो वाक्यशक्त्यो-

द्वात्रिंशत् । न च तत्र चर्त्वस्यासिद्धत्वं शङ्क्यम् । पूर्वत्रासिद्धीयमद्वित्व इत्युक्तेः । न च शरोऽचीति द्वित्वनिषेधः शङ्क्यः । तस्य सौत्रद्वित्वमात्रविषयत्वात् । अत एव, शरः खघ इति वार्तिकस्य, वत्सः, अप्सराः, इत्युदाहरणं भाष्ये स्थितम् । धुटः परादित्वं, न पदान्तादिति ष्टुत्वनिषेधार्थम् । अत एव वक्ष्यमाणस्तुगिहैव न कृतः । यत्त्वाहुः । एवमपि प्रक्रियालाघवार्थं तुडेव कर्तुमुचित इति । तन्न । चयो द्वितीया इति पक्षे थकारापत्तेः ॥ श्चुत्वं धुटि सिद्धं वाच्यम् ॥ अटतीत्यट् श्रोतति । इह धुड् न ॥

शि तुक् ॥ शीति सप्तमी पूर्वत्र कृतार्थाया, न इति पञ्चम्याः षष्ठीं कल्पयतीत्याह ॥ नस्येति ॥ ननु प्रकृतो धुडेवास्तु, किं तुका । मैवम् । छ्वोः शूडित्यस्य हि पदान्ताज्झयः परस्य शस्य छ इत्यर्थ आकरे स्थितः । एवञ्च धुटः परादित्वात् सञ्च्छम्भुरित्यत्र छो नस्यात् । विपूर्वाद्रेपेरौणादिके शप्रत्यये, मध्वश्रोतन्त्यभितो विरप्शमित्यादौ यथा । अतः पूर्वान्तस्तुक् कृतः । नन्वेवं कुर्वञ्च् शेते इत्यत्र पदान्तस्येति णत्वनिषेधो न स्यादिति चेन्न । कार्यकालपक्षे बहिरङ्गत्वेन तुकोऽसिद्धत्वात् । यथोद्देशपक्षे, स्तोः श्चुनेति योगो विभज्यते, नेति वर्तते, ण इति च । स्तोः श्चुना योगे णत्वं न स्यात् । नकारार्थमिदम् । सकारग्रहणं वर्गग्रहणं चोत्तरार्थम् । ततः श्चुरिति । पूर्वमनुवर्तते । एवं, नश्चेति सूत्रे– कुर्वन्त्सीदतीत्यत्र पदान्तस्येति णत्वप्रतिषेधो धुटः परादित्वे प्रयोजनमिति प्राचां ग्रन्थोऽपि यथोद्देशपक्षे बोद्धव्यः । यत्तु वदन्ति । इदं प्रयोजनं बहिरङ्गपरिभाषया गतार्थत्वात् प्रत्युक्तमिति । तत् पाक्षिकम् । त्रिपादीस्थेऽन्तरङ्गे बहिरङ्गपरिभाषेयं न प्रवर्तत इति सुद्ध्युपास्य इत्युदाहरणे स्वोक्त्या सह विरुद्धं चेत्यास्तां तावत् ॥

कारेण पूर्वान्तत्वे परादित्वे वा न शक्तताव्रच्छेदकभेदोऽत आह ॥ धुटः परादित्वमिति ॥ श्रोततिरुपदेशे सादिः । श्चुत्वस्य धुटि सिद्धत्वेऽपि तुक्यसिद्धत्वात्, सन् श्रोततीत्यत्र तुग् नेति बोद्धव्यम् ॥

षष्ठीं कल्पयतीति ॥ न च शीति सप्तमीनिर्देशो लाघवार्थः । द्वयोरचरितार्थत्वे लाघवेनान्यविभक्त्युच्चारणं युक्तं, न त्वन्यथेत्याशयात् ॥ धुडेवास्त्विति ॥ शीति च षष्ठ्यर्थे इति भावः ॥ विरप्शमिति ॥ छान्दसार्थमपि बहुशः सूत्रकृतोयत्नदर्शनादिति भावः ॥ णत्वं न स्यादिति ॥ एतद्दृष्ट्या श्चुत्वस्यासिद्धत्वं तु न, वचनसामर्थ्यादिति भावः । त्रिपाद्यां सर्वथा परिभाषाऽप्रवृत्तौ पक्षद्वयेऽपीदमेव समाधानम् ॥ यथोद्देशपक्षे इति ॥ कार्यकाले तु असिद्धत्वान्न दोषः

सञ्च्छम्भुरिति ॥ इह [illegible]कोरसिद्धतामाश्रित्य, नश्छवीति रुत्वं न शङ्क्यम् । छत्वस्यासिद्धत्वात् ॥

ङ्मो ह्रस्वात् ॥ ङ्म् प्रत्याहारः । सञ्ज्ञायां च कृतं टित्त्वं सामर्थ्यात् संज्ञिभिः सम्बद्ध्यते । तेन यथासंख्यं, ङुट् णुट् नुटः प्रवर्तन्ते । नित्यग्रहणं विस्पष्टार्थम् । हे मपरे इति, मय उञो वो वेति च विकल्पद्वयस्य मध्ये पाठादेव नित्यत्वलाभात् ॥ सुगण्णीश इति ॥ ण्यलोपौ न स्थानिवत् । पूर्वत्रासिद्धे तन्निषेधात् । ङ्मुटः परादित्वं, [illegible]र्वभास्ते इत्यत्र णत्वप्रतिषेधार्थम् । अत एव, ङ्मो ह्रस्वादचि ङ्मे इति नासूत्रि । परं णत्वं प्रति पूर्वस्य सिद्धतया णत्वापत्तेरिति प्राञ्चः । यत्त्वाहुः, बहिरङ्गपरिभाषया गतार्थत्वादुभयमप्यसङ्गतमिति । तदपि पाक्षिकम् । राज्ञ इत्यत्रैव यथोद्देशे त्रैपादिकेऽन्तरङ्गे परिभाषाविरहस्योक्तत्वेन प्राचां ग्रन्थस्य सौष्ठवात् । कथमन्यथा द्वियं त्रियं च स्वयमेवोक्तमिति दिक् ॥ ननु पदाण्डिनावित्यादौ अन्तर्वर्तिविभक्त्या पदत्वान्नुट् स्यादिति चेन्न । उत्तरपदत्वे चापदादिविधा-

---

पूर्वान्तत्वेऽपीति भावः ॥

संज्ञायाम्– ङमिति प्रत्याहाररूपायाम् ॥ विकल्पद्वयस्य मध्ये इति ॥ विभाषामध्ये च ये विधयस्ते नित्या इति पूङः क्त्वा चेति सूत्रे भाष्योक्तेरिति भावः । न च तन्मध्ये पाठेन नित्यत्वकल्पने तन्मध्यपतितानां, नपरे न इत्यादीनामपि नित्यत्वापत्तिः । स्वरितत्वबलादनुवृत्तस्य पुनर्वाग्रहणान्निवृत्तौ कल्प्यमानायां स्वानन्तर एव तत्कल्पनेनोपपत्तौ न्यत्र तत्कल्पने मानाभावात् । तस्मादुत्तरत्र वाग्रहणसामर्थ्यात् पूर्वसूत्रे एव वाग्रहणस्य निवृत्तिरिति भावः ॥ तन्निषेधादिति ॥ तस्य दोष इत्यस्य तु न प्राप्तिः । लत्वसाहचर्येणादेशणत्वस्यैव ग्रहणात् । पञ्चमीसमासस्यानित्यत्वाच्चेत्यपि बोध्यम् ॥ णरादित्वमिति ॥ ततः परस्याच इति व्याख्यानेनेत्यर्थः । ङम इत्यस्य षष्ठ्यन्तत्वमाश्रित्य ङमन्तपदावयवस्य ह्रस्वात् परस्य, ङमो ङमुडजादौ पदे इत्यर्थेन पूर्वान्तत्वेऽपि कुतो न कृतम् । पदस्येति च मादुपधाया इत्यादाविवावयवषष्ठी । अजादौ पदे इत्युक्तेर्म्ना अभ्यासे इत्यतः शतरि मनेत्यादावनन्त्यस्य नेतिभावः॥ बहिरङ्गपरिभाषयेति ॥ नुटो बहिरङ्गतयाऽसिद्धत्वादित्यर्थः ॥ उभयं– ङमुटः णरादित्वं, ङे इति सूत्रकरणं च ॥ पाक्षिकम् = कार्यकालसंबन्धि ॥ दिगिति ॥ देगर्थस्तु– तत्परिभाषाया[illegible]पाधाममा एव । किञ्च, यदि यदागमा इति न्यायेनागमानामागमिधर्मवदित्यपि बोध्यते इति, तेन नकाराद्यवयवनस्यापि यदान्तत्वाणत्वनिषेधसिद्धिरित्युच्यते तर्हि ह्रस्वात् परस्य ङमन्तपदस्याचि परे ङुडित्येवार्थस्तथा सति स्यान्न प्रागुक्तमतिमहदनिष्टमिति । स्पष्टं चेदं सर्वं

विति प्रत्ययलक्षणप्रतिषेधात् । अत एव परस्मवाचौ, परमगोदुहौ, परम-लिङादित्यादौ कुत्वधत्वढत्वादीनि न । यत्तु प्राचा उञि च पदे इत्यतः पदे इत्यनुवर्त्याजादेः पदस्येति व्याख्यानाद् इमुद् नेत्युक्तं, तदनेन प्रत्युक्तम् । इहैव नलोपं वास्यितुं तत्करीतेरेव तेनाप्यनुसर्तव्यत्वात् ॥

स्वमः लुटि॥यद्यपि मोनुस्वारेण सिद्धं तथाप्यनुनासिकत्वात्त्रिसकारकत्वसिद्ध्यर्थमिदम् ॥

अत्रानुनासिकः ॥ अयमधिकारो विधिर्वेति द्वैतम् । आद्येऽत्रग्रहणमनर्थकम् । अधिकारादेव रूपकरणलाभात् । तुशब्दस्त्वधिकारपक्षे परस्मात् कार्यिणो विशेषद्योतनार्थः— परस्य नित्यं रुत्वं, पूर्वस्य तु वाऽनुनासिक इति । विधिपक्षे व्यर्थः । वाग्रहणं स्पष्टार्थम् । अनुनासिकात् पर इति ज्ञापकादेव सिद्धेः । न हि विकल्पं विनाऽनुनासिकाभावपक्ष इति सम्भवति । इदमेव ध्वनयितुं वृत्तौ, तु-वेति शब्दौ नोक्तौ ॥

अनुनासिकः ॥ ल्यब्लोपे पञ्चमीत्याह ॥ अनुनासिकं विहायेति ॥ एवञ्च संसर्गवद् विप्रयोगस्यापि विशेषावगतिहेतुत्वादवत्साऽऽनीयतामि-

---

भाष्ये ॥ प्रत्ययलक्षणप्रतिषेधादिति ॥ इदं च प्रकृतसूत्रे भाष्ये स्पष्टम् ॥ अनुसर्त्तव्यत्वादिति ॥ यदि तु स निषेधोऽपदादिविधाविति पर्युदासेन पदान्तत्वनिमित्तके विधावेवेति, न लुमतेति सूत्रे भाष्ये स्पष्टम् । किञ्चोत्तरपदस्य कार्यित्वे एव तत्प्रवृत्तिरत एव माषकुम्भवापेनेत्यादौ पदव्यवायेऽपीति निषेधसिद्धिरित्युच्यते, तदा प्राचीनोक्तमज देः पदस्येति व्याख्यानमेव शरणम । स्पष्टं चैवं व्याख्यानं प्रकृतसूत्रे, उञि च पदे इत्यत्र च भाष्ये । तेन निषेधेन सिद्धम्—इति प्रकृतसूत्रभाष्योक्तिस्त्वेकदेशिन इत्यास्तां तावत् ॥

त्रिसकारकत्वेति ॥ न च पुनर्द्वित्वेन तदपि सिद्धम । लक्ष्ये लक्षणस्येति न्यायात् । अत्र चेदमेव ज्ञापकं बोद्धम् ॥

अनर्थकमिति ॥ इदमुपलक्षणं प्रतिसूत्रमावृत्तौ गौरवं चेत्यपि बोद्धम् ॥ स्पष्टार्थमिति ॥ अनेन तुग्रहणमधिकारपक्षेऽपि परस्य रुस्ततः पूर्वस्यानुनासिक इत्यर्थस्य स्पष्टं बोधनार्थं वाशब्दवदिति सूचितम् । विधिपक्षेऽत्रग्रहणं तु एतद्रूपकरणे इत्यर्थलाभार्थम् । वस्तुतोऽत्राधिकारत्वमेवोचितम । मतुवसोरुरिति सूत्रे कृतयोः, वन उपसंख्यानं, विभाषा भवदित्यनयोरुदाहरणे भाष्येऽनुनासिकानुच्चारणात् । विधित्वे तु तत्र प्रवृत्तिर्दुर्वारैव । अधिकारत्वे तूत्तरत्रैव प्रवृत्तिः । स्पष्टं चेदं वृत्ताविति तत्त्वम ॥

ल्यब्लोपे इति ॥ दिग्योगलक्षणा तु न । अत्रानुस्वारपरानुनासिकः पूर्वस्य

त्यत्रेव सम्भवितानुनासिक्यस्य णक एव उपस्थितत्वादाकाङ्क्षितत्वाऽऽधित्वेन सम्बद्ध्यत इत्यभिप्रेत्याह ॥ रोः पूर्वस्मादिति ॥ अनुस्वारागम इति ॥ आगमत्वं च परशब्देनैव लभ्यते, पूर्वौ तु ताभ्यामैजित्यत्र पूर्वशब्देनैचोरिवेति भावः ॥

विसर्जनीय य ॥ खरीति ॥ एतच्च मण्डूकप्लुत्या खरवसानयोरिसूत्रादनुवर्तते । नन्वनुस्वारस्याच्त्वात्ततः परस्य द्वित्वं न स्यादेवेत्यत आह ॥ अनुस्वारविसर्गेत्यादि ॥ अकारोपरीति ॥ यदि त्विकारोपरि पठ्येरँस्तर्हि, पयःसु यशःसु इत्यादौ, इणः परस्येति षत्वं स्यादिति भावः॥ अच्त्वादिति ॥ न चैवं, हरिः कर्त्ता हरिं स्मरेदित्यादौ यणादिप्रसङ्गः । त्रिपादीस्थत्वेन विसर्गादीनामसिद्धत्वात् ॥ अनुस्वारस्यापि द्वित्व इति ॥ अपिशब्दात् ककारस्य ॥ वचनान्तरेणेति ॥ अचो रहाभ्यामिति कृतेऽपि, यणो मय इति भवत्येवेति भावः ॥

पुमः खयि ॥ पुंसः संयोगान्तलोपे कृतेऽवशिष्टभागस्येदमनुकरणम् ॥ पर्युदासादिति ॥ इदुदुपधस्येति षत्वविधायके सूत्र इति भावः । अप्रत्ययस्य यो विसर्ग इति वैयधिकरण्येन व्याचक्षाणानां प्राचां मतेनेदम् । वक्ष्यमाणरीत्या सामानाधिकरण्येनान्वये तु षत्वप्राप्ताविति बोद्धव्यम् ॥ रूयाव्यादेश इति ॥ आदेशे हि उपदेशो रूश्यादिः । असिद्धप्रकरणे णत्वानन्तरं

तु वेति न्यासेन सिद्धावनुनासिकात् पर इत्यस्य वैयर्थ्यापत्तेरिति भावः ॥ परशब्देनैवेति ॥ प्रसिद्धावेवकारः ॥

मण्डूकेति ॥ एकदेशे स्वरितत्वप्रतिज्ञयेत्यपि बोद्धव्यम् । अत एवाऽवसाने न सः । पूर्वेण संनिकर्षरूपा संहिता त्वत्रापेऽप्यस्त्येव । अत एव संहिताधिकारेऽवसानकार्यपाठः संगच्छते ॥ षत्वं स्यादिति ॥ अत एव, पुंस्वित्यादावुकारं निमित्तीकृत्य अनुस्वारव्यवधाने षत्वमाशङ्क्य नुमस्थानिकाऽनुस्वारस्यैव, नुमविसर्जनीयेति सूत्रे ग्रहणान्नेति भाष्यं संगच्छते। इकारादुत्तरं पाठे हि अनुस्वारमिणं गृहीत्वा षत्वं दुर्वारं स्यादिति भावः ॥ यणादीति ॥ पूर्वसवर्णदीर्घ आदिशब्दार्थः । अयं पाठोऽनित्यः । अट्कुपिति सूत्रेऽनुस्वारोपलक्षणनुमग्रहणात् । अत एव, हरिँ जयतीत्यादौ, झलां जश् झशीति नेति बोद्धव्यमिति कश्चित् ॥ भवत्येवेति ॥ एकस्य द्वितीयोच्चारणस्यैकेन साधुत्वबोधनं तयोर्मध्ये परस्य द्वितीयोच्चारणमन्येन साधुत्वबोधनमिति भावः ॥

वक्ष्यमाणरीत्येति ॥ प्रत्ययरूपो यो विसर्ग इति व्याख्यादर्शनरीत्येत्यर्थः । वस्तुतस्तदसङ्गतम् । कविभिः कृतमित्यादौ दोषापत्तेः । एतच्चान्ये त्विति तुना-

ख्शाव्यः शस्य यत्वं विकल्प्यते । तेन सुप्रख्येन निर्वृत्तं सौप्रख्यम् । तत्र भवः सौप्रख्यः । यत्वस्यासिद्धत्वाद्धन्वयोपधादिति वुञ्नेत्यादिप्रयोजनान्याकरे स्थितानि । एवञ्च यत्वस्यासिद्धतयाऽम्परत्वाभावात् । पुमः खयीति रुत्वं नेत्यर्थः ॥ ख्यानमिति ॥ चक्षिङो ल्युट् । ख्याज्यादेशः । नन्वादेश इह दुर्लभः । वर्जने प्रतिषेधः, असनयोश्चेति वार्तिकादितिचेत् । सत्यम् । बहुलं तण्यन्तवधकमात्रविचक्षणाजिराद्यर्थमिति वार्तिके बहुलग्रहणात् समाधेयम् । तथाच ख्शादित्वप्रयोजनगणनवार्तिकम् । रुविधिः, ख्यानमिति । णत्वं, पर्याख्यानमिति । निष्ठानत्वमाख्यातम् इति च । शकारेण व्यवधानात्, कृत्यच इति णत्वं न । तथा, अख्यातमित्यत्र संयोगादेरात इति नत्वं न । यत्वस्यासिद्ध्या यण्वत्ताविरहात् । एवञ्च, न ध्याख्येति सूत्रे ख्याग्रहणं न कर्तव्यमिति भावः । न च, ख्या प्रकथने इत्येतदर्थं तदिति वाच्यम् । तस्य सार्वधातुकमात्रविषयत्वात् । अत्र च सस्थानः शमः ख्यात्रे इत्युत्तरवार्तिकं प्रमाणम् । सस्थान इति जिह्वामूलीयस्य प्राचां सञ्ज्ञा । स इह न । शर्परे विसर्जनीय इत्यस्य प्रवृत्तेरिति भावः । यदि स्वतन्त्रोऽपि धातुरार्द्धधातुके इष्येत तदा जिह्वामूलीयस्य दुरितयेदं वार्तिकमसङ्गतं स्यात् । यत्तु हरदत्तमाधवादिभिरुक्तं, ख्याधातुरपि ख्शादिर्यत्वविधिरप्युभयसाधारण इति । तच्चिन्त्यम् । भाष्ये चक्षिङ एवोपक्रमात् सार्वधातुकेऽपि ख्शादिप्रयोगापत्तेश्च । न चेष्टापत्तिः । माधवेन आर्द्धधातुकेष्वेवायं ख्शादिरित्युक्तत्वात् । सार्वधातुकेऽनभिधानस्यैव शरणीकर्तव्यत्वापत्त्या गौरवग्रस्तत्वाच्चेत्यास्तां तावत् । स्यादेतत् । बहवः

ऽरुचिबोधकेन सूचितम् । यदा तु सूतेः सस्य पकारोऽन्त्यस्य ह्रस्वो, म्सुः प्रत्यय इति, स्त्रियामिति सूत्रभाष्यैरव्युत्पादितस्य सस्य लोपे मस्यैव प्रत्ययत्वमिति व्याख्यादर्शोक्तसामानाधिकरण्येऽपि षत्वाप्राप्तिरेव । पातेर्डुम्सुञिति व्युत्पत्तिमादाय तु मूलमिति दिक् ॥ शकारेणेति ॥ यत्वासिद्धत्वादिति भावः ॥ न कर्तव्यमिति॥यत्वासिद्ध्या यण्वत्ताविरहेण नत्वाप्राप्तेरितिभावः॥अत्र चेति॥ख्यातेः सार्वधातुकमात्रविषयत्वे इत्यर्थः ॥ सञ्ज्ञेति ॥ एवञ्च तदुत्तरभावप्रत्ययेन सस्थानशब्द उच्यते । तेन सवाच्यो जिह्वामूलीयो वार्त्तिके लक्ष्यते । कुत्वं कस्मान्न भवतीत्यत्रेति भावः । कशादीति पाठे प्रयोगे चर्त्वप्रवृत्तिरिति भावः ॥ इत्युक्तत्वादिति ॥ एवञ्च माधवो नेष्टापत्तिं कर्तुमर्हं इत्यर्थः ॥ अनभिधानस्यैवेति ॥ ख्यादेरनभिधानस्यैवेत्यर्थः॥ गौरवेति ॥ ख्शादित्वं स्वीकृत्य अनभिधानस्वीकृ-

पुमांसोऽस्मिन् कुले बहुपुम् ख्यातीत्यत्र रुत्वं स्यात् । उरःप्रभृतिषु पुम्-शब्दस्यैकवचनान्तस्यैव पाठान्नेह कप् । सार्वधातुके च ख्यातेः प्रयोगो निर्बाध एवेति चेत् । इष्टापत्तेः । संहिताया अविवक्षायां तु रुत्वं नेति स्पष्टमेव । यत्तु प्राचा ख्याधातौ नेति केचिदित्युक्तं, तत्र यदि ख्याआदेशे इत्यर्थस्तर्हि केचिदित्यनुचितम् । स्वतन्त्रे धातौ चेत्तर्हि सार्वधातुकविषयेऽपि निषेधः स्यात् । न चेष्टापत्तिः । निर्मूलत्वात् ॥ चक्रिँख्रायस्वेति ॥ यत्तु प्राचा त्राहीत्युक्तम् । तत्र परस्मैपदमयुक्तम् । त्रायतेर्ङित्त्वात् । त्रायत इति त्राः, स इवाचरेत्यर्थे कर्तरि क्विबन्तादाचारकिपि वा बोद्धव्यम् ॥ प्रशानिति॥ प्रपूर्वाच्छाम्यतेः किप् । अनुनासिकस्य क्वीति दीर्घः । मो नो धातोरिति नः । तस्यासिद्धत्वान्नलोपो न ॥

नॄन् पे॥ पकारोपर्यकार उच्चारणार्थः । तेन, नॄः पुनातीत्यादिसिद्धम् । उभयथार्क्षित्यत उभयथेत्यनुत्तेर्विकल्पः फलित इत्याशयेनाह ॥ रुः स्याद्वेति॥

कुप्वोः ॥ सूत्रे खर्परत्वाद्विसर्गः । जिह्वामूलीयस्य खर्त्वात् । खर्परे शरीति विसर्गस्य लोपः । जिह्वामूलीयस्य शर्त्वाद्, वा शरीति विसर्ग एव वा । आदेशयोः कपावुच्चारणार्थौ॥ चाद्विसर्ग इति ॥ यत्तु प्राचा चाद्विकल्प

रापेक्षया तदस्वीकृत्यैव ख्यातेरार्धधातुकेऽनभिधानस्यैव स्वीकारे लाघवमिति भावः । रुत्वमित्युपलक्षणं, जिह्वामूलीयस्य षत्वस्य च– नमः ख्याति, निख्यातीत्यादौ ॥ त्रायतेर्ङित्त्वादिति ॥ अत्र त्रायते इत्युक्त्या सत्यपि परस्मैपदे त्रायेत्यस्य प्राप्त्या त्राहीत्यस्यासिद्धिः सूचिता ॥ आचारकिपि वेति ॥ नामधातौ मूलधात्वादेर्ङित्त्वाद्याश्रित्यानुदात्तङित इत्यादेः प्रवृत्तिर्नेत्यभिमानः । अत एव, त्राहि मां पुण्डरीकाक्षेति संगच्छते इति भावः । आर्षं तत्र तदित्यन्ये ॥ शाम्यतेरिति । न तु, शान तेजने इत्यतः । तस्य पदान्ते नलोपेन नान्तत्वासंभवादिति भावः । न चाप्रशानिति पर्युदासेन नान्तग्रहणेन सिद्धे, न इति व्यर्थमिति वाच्यम् । अस्य लक्षणवशसंपन्ननान्तत्वेन पर्युदासेनापि लक्षणवशसंपन्ननकारान्तानामेवापत्तेः ॥

ननु कुप्वोरित्यत्र जिह्वामूलीयस्य खर्त्वाद्विसर्गे तस्य सत्वे सश्रवणापत्तिरत आह ॥ सूत्रे इत्यादि, शर्त्वादित्यन्तेन ॥ विसर्गलोपश्च सत्वापवादः । एवञ्च सूत्रे निर्विसर्गपाठ इति भावः । सविसर्गपाठेऽप्याह ॥ वा शरीति ॥ स च सत्वापवादः । खर्पर इति च वैकल्पिकामिति भावः ॥ उच्चारणार्थाविति ॥ तयोरुच्चारणस्य तौ विनाऽसम्भवेन नान्तरीयकतया तयोरुच्चारणं, न तु तयोर्विधेयत्वम् । किन्तु तन्मात्रे तयोर्लक्षणा । व्याख्यानादिति भावः ॥ चाद्विकल्प इति ॥

इत्युक्तम् । तन्न । ×क×पाभ्यां मुक्ते विसर्गस्य सत्त्वप्रसङ्गात् ॥

कानाम्रेडिते ॥ कान् कानीति वाच्ये, आम्रेडितग्रहणं यत्र द्विरुक्तिस्तत्रैव यथा स्यादिह मा भूत् । कान् कान् पश्यसि । अत्रैकः किं शब्दः प्रश्ने द्वितीयः क्षेपे । कान् कुत्सितान् पश्यसीत्यर्थः ।

कस्कादिषु च ॥ अत्र प्राचा विसर्जनीयस्य ×क×पौ नेत्युक्तम् । नाऽसौ सूत्रार्थः । ×क×पयोरस्वरितत्वाद् नञश्चाप्रकृतत्वात् । किं त्वार्थिकाऽर्थकथनं तादिति ध्वनयन्नाह ॥ ×क×पयोरिति ॥ कौतस्कुत इति ॥ कुतः कुत आगत इत्यर्थेऽव्ययात्त्यपि प्राप्ते गणपाठसामर्थ्यादण् । सर्पिष्कुण्डिकेति॥ नित्यं समास इत्येव इह सिद्धे पाठस्य प्रयोजनं तु तत्रैव वक्ष्यते ॥ सेनासुरेति ॥ यदि हि छस्य तुक् स्यात् तर्हि छस्य चर्त्वे सति चद्वयं स्यात् । सन्निपातपरिभाषया चर्त्वाप्रवृत्तौ तु छकारोपरि चकारः श्रूयेतेति भावः ॥ इति हल्सन्धिः ॥

निपातानामनेकार्थत्वाच्चशब्दो विकल्पार्थ इति तदाशयः ॥ सत्वप्रसङ्गादिति ॥ चानुकृष्टविसर्गस्तु सत्वापवाद इति, नास्माकं दोष इति भावः ॥ गणपाठसामर्थ्यादिति ॥ एतेन पञ्चम्यन्तात् स्वार्थे तसिल्विधानेनाव्ययादुत्सर्गतः प्रथमैकवचनोत्पादेन पञ्चम्यन्तत्वाभावात्तत आगत इत्यर्थे कथमणित्यपास्तम् । अव्ययानामिति टिलोपः ॥ संनिपातेति ॥ असिद्धविषयेऽपि सा प्रवर्तते । यद्वा पूर्वत्र कर्त्तव्येऽसिद्धत्वेऽपि तत्र कृते उत्तरस्यासिद्धत्वे मानाभाव इति नासिद्धत्वेन सन्निपातपरिभाषाप्रवृत्तिप्रतिबन्धः शङ्क्य इतिभावः । वैकल्पिकेष्वपि भावानुष्ठानस्यैवौचित्यं फलाधिक्यायेति तात्पर्यम् ॥ इति हल्सन्धिः ॥

शर्परे ॥ सत्वादेरयमपवादः । यदि तु, शर्परे नेत्येवोच्येत तर्हि प्रकृते सत्वे निषिद्धेऽपि कुप्वोः ×क×पौ स्याताम् । वासः क्षौममद्भिः प्सातमिति । विसर्जनीयवचनात् विकारमात्रं बाध्यते इत्याशयेनाह ॥ न त्वन्यदिति ॥ तदेव स्फुटयति ॥ इहेति ॥

सोऽपदादौ ॥ अपदाद्योरिति ॥ सूत्रे तु व्यत्ययेनैकवचनम् । यदि तु खर् विशेष्यतेऽपदादौ खरीति तदा यथाश्रुतं साधु । किन्तु खरीति मण्डूकप्लुत्याऽनुवर्त्यमिति क्लेशः । न चानुवृत्तेरुत्तरत्राप्यावश्यकता । खरं विना विसर्गस्य दुर्लभत्वेन तदनुवृत्तेर्निष्फलत्वात् ॥ पाशकल्पककाम्येष्विति वृत्तिः । सम्भवप्रदर्शनमेतन्न तु परिगणनम् । अन्यस्यासम्भवात् ॥ प्रातःकल्पामिति ॥ अधिकरणशक्तिप्रधानस्यापि प्रातःशब्दस्येह वृत्तिविषये शक्तिमत्परत्वम् । दोषाभूतमहः, दिवाभूता रात्रिरितिवत् ॥ गीःकाम्यतीति॥ इहेणः ष इति षत्वं न । तत्रापि, काम्ये रोरेवेत्यस्यानुवृत्तेः । यदि तु तत्रैवेदं पठ्येत, तर्हि षत्वमात्रप्रतिषेधेऽपि पूर्वेण सत्वं स्यात् ॥

नेत्येवोच्येतेति ॥ कुप्वोरित्यत्रापि चेन सत्वं नेत्येवानुकृष्टव्यमिति भावः ॥ स्यातामिति ॥ सत्वनिषेधे खरवसानयोरिति विहितविसर्गस्य सत्वादिति भावः ॥ विकारमात्रमिति ॥ तत्सामर्थ्याच्चेन तस्यैव प्रत्यापत्तावपि न तावितिभावः । एतेनैतद्विहितस्य स्थानेऽपि तौ स्याताम् । किञ्चास्यैव तौ स्याताम् । खरवसानयोरिति विहितस्य त्वेतयोरसिद्धत्वाद्विसर्जनीयस्येति सत्वमेव स्यादित्यपास्तम् । अर्थाधिकारेण खरवसानयोरिति विहितविसर्गस्यैवादेशाच्च । विसर्जनीयस्य सोऽशर्परे— इति तु न सूत्रं कृतम् । वा शरीत्यनेन सत्वस्य विकल्पेन सिद्धावपि, कुप्वोरित्यत्राशर्परे इत्यनुवृत्त्या तयोः शर्परेऽप्रवृत्तावपि, कुप्वोरिति सूत्रे चाद्विसर्गलाभानापत्तेः ॥

व्यत्ययेनेति ॥ सौत्रत्वादिति भावः ॥ इति क्लेश इति ॥ किञ्च पूस्तरेत्यादौ षत्वादिवारणाय कुप्वोरित्यनुवर्त्य तदन्तर्गते खरीति व्याख्याने सुतरां क्लेश इत्यपि बोद्धव्यम् ॥ अन्यस्यासम्भवादिति ॥ अयं भावः । अपदे इत्येव, कुप्वोरित्यनुवर्त्य यस्मिन् विधिरिति परिभाषया कपवर्गादौ अपदे इत्यर्थेन सिद्धे आदिग्रहणमपदस्यैवादिरित्यर्थलाभार्थम् । तेनोरः कायतीति विग्रहे सुबुत्पतेः पूर्वं समासेऽप्युरःकैणेत्यादौ न सत्वम् । आदिग्रहणसामर्थ्येन तल्लब्धावधारणेन च पदत्वयोग्यप्रातिपदिकानवयवस्यैव ग्रहणादिति ॥ शक्तिमत्परत्वमिति ॥ अव्ययत्वं तु भूतपूर्वगत्या बोद्धव्यमिति भावः ॥ षत्वं नेति ॥ सत्वं नेत्यपि बोद्धव्यम् ॥ तत्रापि— षत्वविधावपि ॥ एवञ्चात्र पाठात्तत्रानुवृत्तेश्चोभयमपि नेति बोद्धव्यम् ॥

इणः षः ॥ पूर्वस्यापवादः । इदं सूत्रं स इति च द्वयमपि उत्तरत्रा-ऽनुवर्तते । तेन यथासम्भवमिणः परस्य षोऽन्यस्य स इति विवेकः ॥ पुरः प्रष्टव्या इति ॥ पॄ पालनपूरणयोः । भ्राजभासेत्यादिना क्विप् । तदन्ताज्जस् जसन्ततां स्फुटीकर्तुं, पूः पुराविति पुन्यस्तम् ।

इदुदुपधस्य ॥ इदुतौ उपधे यस्य समुदायस्य तस्यावयवो यो विसर्जनीय इति वैयधिकरण्येन सम्बन्धः । अप्रत्ययस्येति तु अप्रत्ययो यो विसर्ग इति सम्बद्ध्यते । सम्भवति सामानाधिकण्ये वैयधिकरण्यस्यान्याय्यत्वात् । न च विसर्गस्य प्रत्ययत्वमप्रसिद्धमिति वाच्यम् । अग्निः करोतीत्यादौ स्थानिवद्भावेन तत्प्रसिद्धेः । न चातिदेशं प्रति त्रिपाद्या असिद्धत्वं शङ्क्यम् । अप्रत्ययस्येति निषेधेनैव सिद्धत्वज्ञापनात् । अत एवाग्निरित्यादौ रोर्विसर्गः सिद्ध्यति । अन्यथा अपदान्तत्वान्न स्यात् । विसर्गविधिस्तु पुनरित्यादौ चरितार्थः । ज्ञापकं च विशेषापेक्षम् । तेनाऽचः परस्मिन्निति

समुदायस्येति ॥ अलोन्त्यादिति सूत्रे अवयववाचकान्त्यशब्देन समुदायस्याक्षेपेण उपधात्वस्य समुदायनिरूपितत्वादिति भावः । इदुदुपधस्य विसर्गान्तस्य पदस्येति सामानाधिकण्येनान्वयः । षत्वं त्वलोन्त्यस्येत्यनेन विसर्गस्येत्यन्ये । व्याख्यादर्शोक्तरीत्याऽऽह ॥ अप्रत्ययो य इति ॥ तत्प्रसिद्धेरिति ॥ विसर्गस्य प्रत्ययत्वप्रसिद्धेरित्यर्थः ॥ न स्यादिति ॥ रोरसुप्त्वेन पदत्वाप्रवृत्तेरिति भावः ॥ चरितार्थ इति ॥ ननु तत्रापि पुनर्सित्यवस्थायां जातपदत्वस्यातिदेशेनैव सुलोपे कृते आनयनमिति को विशेषः । न चैकदेशविकृतन्यायेन सिद्धिः । अग्निरित्यत्रापि समत्वात् । न चाग्निरित्यत्रादेशस्यातिदेशलभ्यकार्यस्य चासिद्धत्वमत्र तल्लभ्यकार्यस्यैवेति विशेष इति वाच्यम् । सर्वथाऽतिदेशापेक्षणेन तस्याकिञ्चित्करत्वात् । किञ्च रुत्वासिद्धत्वेनाग्निरित्यत्र पदत्वं सुलभम् । किञ्च विसर्गस्थान्यलूरूपरेफवृत्तिप्रत्ययत्वस्य स्थान्यलूधर्मत्वेन तदतिदेशाप्रवृत्तिरिति प्रत्ययरूपो विसर्गो दुर्लभः । स्पष्टा चेयं रीतिर्भोभगो इति सूत्रे भाष्ये । किञ्चैवं सामानाधिकरण्येऽसौरिति वक्तव्येऽप्रत्ययग्रहणं व्यर्थं स्यात् । किञ्चैवं, नित्यं समासे इति सूत्रेऽनुत्तरपदस्थस्येत्यस्य वैयर्थ्यम् । परमसर्पिःकुण्डिकेत्यादावनेन षत्वस्य दुर्वारत्वात् । किञ्चैवं, नित्यं समासे इति सूत्रस्थभाष्यासंगतिः । तथाहि । अथाव्युत्पन्नं प्रातिपदिकं सर्पिरादि ततो नित्यं प्राप्ते, इसुसोः सामर्थ्य इति विभाषा आरभ्यत इति तत्रोक्तम् । प्रत्ययत्वपर्याप्तत्वधिकरणभिन्नस्येत्यर्थे तु व्युत्पत्तिपक्षेऽपि नित्यषत्वप्राप्तेरथाव्युत्पन्नमित्यादेरसंगतिः स्पष्टैव । अत्र भाष्येऽथेति यद्यर्थे । तेन सर्पिषा [illegible] षत्वसिद्धये व्युत्पत्तिपक्ष एव, न त्वसाविति सूचितम् । तस्मादत्र प्रत्ययपदं तत्संबन्धिपरम् । प्रत्ययसंबन्धिभिन्नस्य

त्रिपाद्यां न प्रवर्तते । एवञ्च पूर्वत्रासिद्धे न स्थानिवदिति सिद्धान्त उक्त-युक्तिमूलको, न तु वाचनिक इति प्रपञ्चितं शब्दकौस्तुभेऽस्माभिः ॥ नन्वेवं,मातुः कार्यमित्यादौ षत्वं स्यादितिचेन्न। कस्कादिषु भ्रातुष्पुत्रशब्दस्य पाठेन ङसिङसोरत उकारात् परस्य सस्य षत्वं नेति ज्ञापनात् । एवञ्चा-[illegible]त्येतदपि व्यधिकरणमेवेति हरदत्तेनोक्तं नातीवादर्तव्यम् ॥ मातु-

---

विसर्गस्येत्यर्थ उचितः । अत एव कविभिः कृतमित्यादौ न दोषः । नित्यं समासे इति सूत्रस्थानुत्तरपदस्थस्येत्यस्य कस्कादिषु सर्पिष्कुण्डिकाद्यर्थस्य चैतदर्थज्ञापकतैवोचितेति चेत्सत्यम् । व्याख्यादर्शानुसारेणैतद्ग्रन्थसत्त्वात् । तद्ध्वनयन् वक्ष्यति । नातीवादर्तव्यमिति ॥ न प्रवर्तत इति ॥ अत एव, तिरश्चेत्यादौ सस्य श्चुत्वसिद्धिः । एतच्चेष्टानुरोधेन संयोगादिलोपलक्षणत्वातिरिक्तविषयम् । तेन तत्र स्थानिवत्त्वं भवत्येवेति, तस्य दोष इत्याद्यपि न वाचनिकमिति भावः ॥ मातुः कार्यमिति ॥ सिद्धान्तव्याख्यानेऽप्यत्र दोषः । तथाहि । सकारसन्निधावकारो नैव प्रत्ययः, समुदायनिवेशित्वात् प्रत्ययत्वस्येति तदादेशस्योरः प्रत्ययत्वाभावेन विसर्गस्य तत्संबन्धित्वाभावात् । यस्तूत्वे कृतेऽवशिष्टः सकारः प्रत्ययसञ्ज्ञकः स लुप्त एव। न चान्तादिवच्चेत्यस्य पूर्वस्य परस्य समुदायस्यान्तादिभ्यां वर्णाभ्यां पृथगवस्थिताभ्यां ये व्यवहाराः प्रत्ययत्वादयस्ते एकादेशेऽपि स्युरित्यर्थादुर्सित्यत्र प्रत्ययत्वस्य सुलभतया एकदेशविकृतन्यायेन उरित्यस्य प्रत्ययतया न दोष इति वाच्यम् । त्रिपाद्या असिद्धत्वेन तत्रान्तवत्त्वाप्रवृत्तेः । स्थानिवत्त्वेन तु न निर्वाहः । उपात्तस्य स्थानिनोऽकारस्य प्रत्ययत्वाभावात् । प्रत्ययसबन्धित्वं तु न स्थानिवत्त्वलभ्यमशास्त्रीयत्वात् । सर्वे सर्वपदादेशा इति न्यायेन, मातृ असित्यस्य स्थानित्वेऽप्यसित्यस्य स्थानित्वालाभेनोर्सित्यस्य प्रत्ययत्वमलभ्यमिति । एतदेवाभिप्रेत्य प्रकृतसूत्रे, उरण् रपर इति सूत्रे च भाष्ये उक्तम्, इह कस्मान्न भवति पितुः करोति। अप्रत्ययस्येति षत्वं प्राप्नोति । अप्रत्ययविसर्जनीयस्येत्युच्यते । प्रत्ययविसर्जनीयश्चायम् । लुप्यतेऽत्र प्रत्ययविसर्जनीयो, रात्सस्येति । लुप्यतेऽत्रेत्यादेरयमर्थः । प्रत्ययविसर्जनीयत्वेन यस्तवाभिमतः स लुप्यते, न दृश्यते । स्थानिनः प्रत्ययस्यैव लोपादिति बोद्धव्यम् ॥ ज्ञापनादिति ॥ त्रिपाद्यामप्यन्तवत्त्वप्रवृत्तिज्ञापनद्वारेति भावः । अत एवामी क्षीरपेणेत्यादौ मीत्वणत्वे सिद्ध्यतः। अत्रैकारस्यादस्संबन्धित्वं,पे इत्यस्यैकाजुत्तरपदत्वं चान्तवद्भावाधीनमिति बोद्धव्यम् ॥व्यधिकरणमेवेति॥ प्रत्ययस्य संबन्धी यो विसर्गस्तस्य नेत्यर्थ इति तद्भावः। अगत्या च वाक्यभेदासमर्थसमासवैयधिकरण्यान्वयरूपदोषत्रयसहनम् इति तदभिमानः ॥ नातीवेति ॥ वैयधिकरण्यान्वयफल च कविभिःकृतमित्यादेःप्रत्ययसंबन्धिभिन्नस्य विसर्गस्येत्येवं लक्षणया सामानाधिकरण्येनापि संग्रहसंभवादिति भावः । व्याख्यादर्शोक्तसामानाधिकरण्ये तु लेशतोऽपि तदादराभावादतीवेत्यसंगतमेव स्यादिति । अनेनोक्तव्याख्याया एव

रिति ॥ अत्र हि, ऋत उदित्येकादेशशास्त्रं विसर्गं प्रति परम्परया प्रयोजकम् । आकरे त्वेकादेशशास्त्रनिमित्तादिति प्रचुरः पाठः । तत्र एकादेशशास्त्रं निमित्तं यस्य उकारस्य तस्मादित्यर्थः ॥

मुहुःकामेति ॥ इह कुप्वो ×क×पाविति प्रवर्तते । वृत्तौ, मुहुस्कामेति सकारः क्वचित् पठ्यते । तत् प्रामादिकमिति हरदत्तः ॥

द्विस्त्रिश्चतुरिति ॥ इह द्वित्रिभ्यां सुजन्ताभ्यां साहचर्यात् चतुःशब्दोऽपि सुजन्त एव ग्रहीष्यते । कृत्वोऽर्थग्रहणं ज्ञापकम् । साहचर्यं न सर्वत्र व्यवस्थापकमिति । तेन दीधीवेवीटामित्यत्र धातुसाहचर्येऽपि आगमस्येटो ग्रहणम् । उभयत्र विभाषा चेयम् । चतुरित्यस्येदुदुपधस्येति प्राप्ते इतरयोस्त्वप्राप्ते । न च तयोरपि, इसुसोः सामर्थ्ये इत्यनेन सिद्धिः शङ्क्या । इसः [illegible] त्ययस्य अर्थवतश्च तत्र ग्रहणात् ॥ चतुष्कपाल इति ॥ इदुदुपधस्येति नित्यं षः ॥ व्यपेक्षाविरहेऽपीति ॥ तिष्ठतु सर्पिष्कुण्डिकामानयेत्यादा-

---

स्वाभिमतत्वं सूचितवानित्यलम् ॥ परम्परयेति ॥ एकादेशशास्त्रसंपन्नरेफस्थानिकत्वेन [illegible] शास्त्रनिमित्तकत्वमिति भावः ॥प्रचुरः पाठ इति॥ओषधीस्कुधीत्यादौ शसैकादेशे, कः करत्करतिकुधीति षत्वनिवृत्तिश्च तत्फलमुक्तम् । मूले तु तस्य फलस्य छान्दसत्वाच्छन्दसि वा प्रेत्यतः, इणः ष इत्यस्य निवृत्त्या अदोषाच्च षष्ठ्यन्तमेव पठितमिति दिक् ॥

प्रामादिकमिति ॥ पदादित्वेन, सोऽपदादावित्यस्याप्राप्तिरिति भावः ॥

साहचर्यमिति ॥ नच रामलक्ष्मणावित्यादौ दृष्टसाहचर्यसंबन्धस्याभिधानियामकत्वं दृष्टम् । न चैषां क्वापि साहचर्यसंबन्धो गृहीत इति कथमेतदिति वाच्यम् । पञ्चम्यपाङ्परिभिरित्यनेन लक्षणादिद्योतकपरियोगे पञ्चमीशङ्कायां, यद्यऽप्ययं परिर्दृष्टापचारो वर्जने चावर्जने चायं खल्वपशब्दोऽदृष्टापचारो वर्जनार्थ एव कर्मप्रवचनीयस्तस्य कः सहायो भवितुमर्हति अन्यो वर्जनार्थात् । यथाऽस्य गोः सहायेनार्थ इति गौरेवानीयते, नाश्वो न गर्दभ इति कर्मप्रवचनीययुक्त इति सूत्रस्थभाष्येण सदृशानामेव प्रयोगे सहायत्वमित्यर्थस्य प्रतिपादनेनाक्षतेः । परिभाषायां सहचरितशब्देन सदृशस्यैव ग्रहणं, सहचरस्य भावः साहचर्यम् । सहचरणं च सदृशयोरेवेति साहचर्यशब्देन सादृश्यमुच्यते । सदृशयोरेव सहविवक्षा, तयोरेव च सह प्रयोगः । रामलक्ष्मणावित्यादावपि सादृश्यमेव नियामकमिति दिक् ॥ अर्थवतश्चेति ॥ प्रतिपदोक्तस्य चेत्यपि बोध्यम् ॥ नित्यं ष इति ॥ भाष्यप्रामाण्येनात्राव्युत्पत्तिपक्षस्यैवाङ्गीकारेण व्युत्पत्तिपक्षे प्रत्ययसंबन्धित्वात् कथं षत्वमिति न शङ्क्यम् । अत एव, चतुष्पाद्भ्यो ढञित्यादिनिर्देशसंगतिः ॥

वित्यर्थः ॥ व्यपेक्षयामिति ॥ इदं सर्पिष्कुण्डिकाया इत्यत्रेत्यर्थः । यत्तु पारायणिका आहुः कस्कादिषु सर्पिष्कुण्डिकादीनां पाठ उत्तरपदस्थत्वेऽपि षत्वार्थ इति । तद्भाष्यविरोधादुपेक्ष्यम् ॥ अयःसहितेति ॥ न त्वयसो विकारः । जानपदेति ङीष्प्रसङ्गात् ॥ अयस्कर्णीति ॥ अय इव कर्णौ यस्याः । नासिकोदरोष्ठेत्यादिना ङीष् ॥

अधःशिरसी ॥ एतयोरिति ॥ सूत्रे तु षष्ठ्याः स्थाने प्रथमा बोद्ध्या ॥ अधस्पदमिति ॥ मयूरव्यंसकादित्वात् समासः ॥ शिरस्पदमिति॥ षष्ठीसमासः ॥ इति विसर्गसन्धिः ॥

इत्यर्थ इति ॥ अत्रत्यं तत्त्वं पूर्वं सूचितम् ॥ तद्भाष्येति ॥ अनुत्तरपदस्थस्येति किम् । परमसर्पिःकुण्डिकेति, नित्यं समास इति सूत्रस्थभाष्ये इत्यर्थः । आबन्त-प्रयोगसूचितमर्थं स्फुटप्रतिपत्तये आह ॥ न त्वयस इत्यादि ॥ इति विसर्ग-सन्धिः ॥

ससजुषो रुः ॥ पदस्येत्यनुवृत्तं ससजूभ्यां विशेष्यते । विशेषणेन तदन्तविधिः । न च सजूःशब्दान्ते, ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्तीति निषेधः शङ्क्यः । तस्य [illegible] । सान्तं सजुष्शब्दान्तं च यत् पदं तस्य रुः स्यात्, स चालोऽन्त्यस्य । एवं स्थिते फलितमाह ॥ [illegible]स्येति ॥ सजुष्शब्दस्येति ॥ तदन्तस्य पदस्येत्यर्थः । तेन सजुष इत्यादौ नातिप्रसङ्गः । न च सजूरित्यत्राव्याप्तिः, व्यपदेशिवद्भावोऽप्रातिपदिकेनेति निषेधादिति वाच्यम् । येन विधिरिति सूत्रे शब्दकौस्तुभेऽस्य प्रत्याख्यातत्वात् । व्यपदेशिवद्भावोऽप्रातिपदिकेनेति, ग्रह[illegible], च परिभाषाद्वयमपि प्रत्ययविधिविषयकमिति दिव उत्सूत्रे कैयटहरदत्ताभ्यामुक्त-

---

तस्य प्रत्ययविधीति ॥ अत एव येन विधिरिति सूत्रे भाष्ये प्रत्ययविधिभिन्नेऽप्तृन्नित्यादौ गृह्यमाणप्रातिपदिकेनापि तदन्तविधिप्रतिपादनं, स्वसा परम स्वसेत्युदाहृतं च संगच्छते । अस्य समासप्रत्ययविधाविति निषेधानुवादकतायां एव [illegible]त्वाच्च । यत्त्वस्य ज्ञापकं, सपूर्वाच्चेति सूत्रम् । अन्यथा पूर्वादिनिरित्यत्र [illegible]धिनैव सिद्धे किं तेन । तत्प्रत्ययविधौ प्रतिषेध इत्यस्यैव ज्ञापकमिति वक्तुं शक्यम् । अत एव तदन्तविधिसूत्रभाष्ये समासेत्यादिनिषेधवदस्य न कथनमिति बोध्यम् ॥ प्रत्याख्यातत्वादिति ॥ फलाभावात् । सूत्रान्ताट्टक्, दशान्ताड् इत्यादावन्तग्रहणसामर्थ्येन व्यपदेशिवद्भावाप्रवृत्तेरिति भावः । नन्वेकगोपूर्वादित्यस्य केवलैकशब्दगोशब्दयोरप्रवृत्त्यर्थं साऽऽवश्यकी, सूत्रान्ताट्टशान्तादित्यर्थं च । तन्त्रान्तग्रहणं तु प्रत्ययविधौ तदन्तग्रहणनिषेधात्तदन्ते प्रवृत्त्यऽर्थमावश्यकमिति न तत्सामर्थ्याद् व्यपदेशिवद्भावाप्रवृत्तिर्वक्तुं शक्या । न च भयाढ्यादाविव सूत्रान्तादित्यादौ विशेषणविशेष्यभावव्यत्यासेन सिद्धेऽन्तग्रहणसामर्थ्यं सूपपादमिति कौस्तुभोक्तरीत्या निर्वाहः । समासप्रत्ययविधावित्यादीनां सूत्रशब्दादेर्विशेष्यत्वे तात्पर्यग्राहकत्वस्य सत्त्वेन विपरीतस्य तस्य वक्तुमशक्यत्वात् । न चास्यां मानाभावः । पूर्वात् सपूर्वादिनिरित्येकयोगेन सिद्धे [illegible]थ्योगकरणस्य मानत्वात् । न चेष्टादिभ्य इत्यत्रानुवृत्त्यर्थं तथा पाठः । अत एवानिष्टीत्यादिसिद्धिरिति वाच्यम् । ज्ञापकपरभाष्यप्रामाण्येनानिष्टीत्यादिप्रयोगाणामनिष्टत्वात् । एकयोगेऽपि तत्रैव स्वरितत्वबलेन तावत एवोत्तरत्र नुवृत्तौ बाधकाभावाच्च । व्यपदेशिवद्भावस्य प्रातिपदिके निषेधस्वीकारादेव नान्तादसंख्यादेरिति चरितार्थम् । अन्यथा पञ्चम इत्यादावपि व्यपदेशिवद्भावेन संख्यादित्वात्तद्वैयर्थ्यं स्पष्टमेवेत्यरुचेराः ॥ व्यपदेशिवद्भाव इत्यादि ॥ दिव उत्सूत्रं यत्रेति बहुव्रीहिणा तत्सूत्रघटिते पादे इत्यर्थः । एवञ्च, दिव उदिति सूत्रे हरदत्तेनेन्द्रे चेतिसूत्रे कैयटेनोक्तमिति भावः । येन विधिरिति सूत्रे कैयटेन सूत्रोपात्तान्तादिशब्दविषयतास्येतिवदता स्पष्टमेव प्रत्ययविधिविषयतोक्ता । असमासे

त्वाच्च । एवञ्च परमसजूर्भ्यामित्याद्यपि निर्बाधम् । एवं स्थिते इह सजुष्-शब्देन तदन्तविधिर्नेति प्राचामुक्तिरापातत इत्यवधेयम् ॥

भोभगो ॥ असन्धिः सौत्र इति ॥ भगोअघोशब्दयोरोकारस्याकारस्य च पूर्वरूपं सौत्रत्वान्नेत्यर्थः । यदि तु भोस्, भगोस्, अघोस्, इति सान्तं रान्तं वा अनुकृत्य, भो इत्यादीनां त्रयाणामलोऽन्त्यस्य यः स्यादपूर्वस्य रोश्चेति व्याख्यायते तर्हि असन्धिर्न्याय्य एव । युक्तं चैतत् । अन्यथा, विभो-रिदं, सुप्रभा गौर्यस्य स सुप्रभगुस्तस्य सुप्रभगोरिदं, रघोरिदमित्यत्रापि यत्वापत्तेः । भवति ह्ययं भो—शब्दादिपूर्वो रुः । न चात्र भोशब्दादेर्लाक्ष-णिकत्वादग्रहणम् । विभाषा भवद्भगवदघवतामोत्वावस्येति वार्तिकेन निष्प-न्नानां भवदादिप्रकृतिकानां भोशब्दादीनामपि लाक्षणिकत्वाविशेषात् । अन-र्थकत्वमप्युभयत्र तुल्यम् । रुविशिष्टानामेवार्थवत्त्वात् । ननु रोरुकार-स्यानुबन्धत्वाद्रेफमात्रं विसर्गस्य स्थानि, तथाचानल्विधाविति स्थानेवद्भावो न स्यादित्याशङ्क्याह ॥ न ह्ययमिति ॥ यथाऽग्रहीदित्यत्र, ग्रहोऽलिटीति दीर्घस्य स्थानिवद्भावेनेट्त्वादिट ईटीति प्रवर्त्तते । एवमिहापि विसर्गस्य रुत्वाद्यत्वं प्रवर्तेतेति भावः । तथाच स्थानिवत्सूत्रे भाष्यम् । विशिष्टं ह्येषो-ऽनलमाश्रयतें इटं नामेति । इतोऽपि हेतोर्धात्वङ्गेत्यादिपरिगणनमशुद्धमि-त्यवधेयम् ॥ निपाता इति ॥ भोभगो इति सूत्रे निर्दिष्टाश्चादेराकृतिगण-

---

निष्कादिभ्य इति सूत्रे भाष्ये कैयटे च स्पष्टमनयोः प्रत्ययविधिविषयतोक्तेति दिक् ॥ इत्याद्यपीति ॥ आदिना सजूर्भ्यामिति ॥

ननु सान्तानुकरणे विभाषा भवदिति वार्त्तिकनिष्पन्नानां ग्रहणं न स्यादत आह ॥ रान्तं वेति ॥ कृतरुत्वानुकरणमित्यर्थः ॥ अलोऽन्त्यस्येति ॥ न च, भो राजसे इत्यादौ, रो रीति लोपे कृते एकदेशविकृतन्यायेन भोःशब्दत्वादन्त्यस्यौ-कारस्य यत्वापत्तिरिति वाच्यम् । तेषामभिधाने एषां रोरपूर्वस्य च रोरिति व्याख्यानेनादोषो बोद्धव्यः । अत्र पक्षेऽघोशब्दान्तद्वन्द्वे षष्ठ्याः सौत्रो लुग् बोद्धव्यः ॥ अवधेयमिति ॥ यदि ग्रहोऽलिटीति सूत्रे इटः स्थानित्वेन निर्देश इति, तत्रा-ऽनलाश्रयणं, प्रकृते तु विसर्गे रेफस्यैव स्थानित्वाद्वैषम्यमल्विधावित्यस्य स्थान्यऽवृत्तिधर्माश्रये स्थानिसंबन्ध्यवृत्तिधर्माश्रये च नेत्यर्थः । तत्र स्था-न्यलेरेफवृत्ति रुत्वं स्थानिवत्त्वेन दुर्लभमल्विधित्वात् । स्पष्टं चेदं प्रकृत-सूत्रे भाष्ये इत्युच्यते तदा पयःस्वित्यत्र यत्ववारणायाहीति । तत्र हि, रोः सुपीति विसर्गः । नियमशास्त्राणां च विधिमुखेनैव प्रवृत्तिरिति तत्र रुर्विशिष्टः स्थानीति तद्वृत्तिरुत्वस्य स्थानिवत्त्वेन लाभः सुकरः । यदि तु, रोः सुपीत्य-

त्वात्तत्र बोद्धव्याः। तथा च विभाषा भवद्भगवदिति वार्तिकं नाश्रयणीयम्। अन्यथा पुँल्लिङ्गैकवचनमात्रे, भो हरे इत्यादिसिद्धावपि, भो हरिहरौ, भो विद्वद्वृन्द, भो गङ्गे इत्यादि न सिद्ध्येदिति भावः। एतच्च वृत्तिहरदत्तादिमतेनोक्तम्। भाष्यस्वरसरीत्या तु विभाषेत्यादिवार्तिकमारब्धव्यमेव। किन्तु निपातोऽपि भोःशब्दोऽस्ति। तेन द्विवचनादौ स्त्रीनपुंसकयोश्च न दोषः। युक्ततरं चैतत्। हे भवन्निति वद्, हे भो इति प्रयोगस्यापीष्टत्वात्। तस्य च [illegible] एव सिद्धेः। स्युः प्याडाद्यैर्भो इत्यमरोक्तानां सम्बोधनार्थानां निपातानां सहप्रयोगात्। किञ्चाऽत्रभवान् हरिस्तत्रभवान् इतिवत्, तत्रभो इत्याद्यपि वार्तिके सत्येव सिद्ध्यति। इतराभ्योऽपि दृश्यन्ते इति सर्वविभक्त्यन्तात् त्रतसोर्भवदादियोग एवेष्टत्वात्। किञ्चामन्त्रितत्वे पदात् परस्याष्टमिकनिघातः, आमन्त्रितं पूर्वमित्याद्यविद्यमानवद्भावः, आम कान्तरमिति विधिः, वाक्यादेरामन्त्रितस्येति द्विर्भावः, सुबामन्त्रित इति पराङ्गवद्भावश्चेत्यादि सर्वं सिद्ध्यति, न त्वन्यथेति दिक्। भगो, अघो इति निपातावपि यदि प्रामाणिकौ तर्हि स्तां नाम। आमन्त्रितस्यासिद्धि-

---

त्रापि र इत्यनुवर्त्य रो रेफस्यैव तेन विसर्गस्तदाऽग्रहणमुत्तरार्थं सत् स्पष्टार्थमिहैव कृतमित्यवधेयम्॥ तत्रेति॥ चादिष्वित्यर्थः॥ वार्तिकं नाश्रयणीयमिति॥ भोइत्यादिप्रयोगाणां निपातैरेव सिद्धेर्निपातानामपि संबोधनान्तभवदादिसमानार्थकत्वात् संबोधनविभक्त्यन्तत्वेनामन्त्रितत्वमस्ति। भवदादीत्यत्र भोःशब्दस्याऽप्यादिना ग्रहणात्तत्रभो इत्यादिसिद्धिरिति भावः॥

अन्यथा – साधारणानामभावे॥ भो विद्वद्वृन्देति॥ नपुंसके सोर्लुका लुप्तत्वेन वार्तिकाप्रवृत्तेरिति भावः॥ भो गङ्गे इति॥ विभक्तौ लिङ्गविशिष्टाग्रहणाद् ङीपा व्यवधानाद्भवतः संबुद्धिपरत्वाभावेनेति भावः। स्युः प्याडित्यस्य, निपातमात्राङ्गीकारे इत्यादिः। ननु निपातोऽप्ययं भवच्छब्दसमानार्थ एवेति, हे भो इत्यस्य नासंगतिः। अत एव भाष्यकैयटयोर्वार्तिकसिद्धविभक्त्यन्तप्रतिरूपकमव्ययमित्युक्तम्। विभक्त्यन्तप्रतिरूपकत्वं च शब्दतोऽर्थत इत्यन्यत्र स्पष्टम्। किञ्च व्यतिलुनीतइत्यादिवदेतयोरपि सहप्रयोगसंभव इत्यरुचेराह॥ किञ्चेति॥ पदात् परस्येति॥ इदं च न भोःशब्दे फलमुभयोरपि भोःशब्दयोः संबोधनार्थत्वेन संबोधनप्रथमान्तत्वेनामन्त्रितत्वात्। किन्तु तिष्ठसि भगो, तिष्ठसि अघो, इत्यादौ भगवन् अघवन् तिष्ठसीत्यर्थके आमन्त्रितस्येति निघातसिद्धिः। निपातयोस्तु तयोः संबोधने शक्तौ मानाभावेन संबोधनप्रथमान्तत्वाभावेनामन्त्रितत्वाभावात्। भगो तिष्ठसीत्यादौ अविद्यमानत्वम्। आँ भगो देवदत्तेत्यादौ द्विर्भावः। धनेन भगो इत्यादौ पराङ्गत्वमिति भावः॥ यदि प्रामाणिकौ [illegible] ति॥ यदीत्यनेनेदं सूचितं– तौ

स्तु वार्तिकायत्तैवेति सुधीभिराकलनीयम् । यत्तु वदन्ति । सकारान्तानेवैतान् निपातानास्थाय रुत्वौत्वे भाष्ये प्रत्याख्याते इति । तदतिरभसात् । स्यादेतत् । निपातानामभ्युपगमे यत्वविधौ त एव गृह्येरन् प्रतिपदोक्तत्वात् । न तु सम्बुद्ध्यन्ताः । लाक्षणिकत्वादितिचेन्नैवम् । स्वरितेनाधिकार इत्यत्र अधिकः कारोऽधिकार इति व्याख्यानमाश्रित्य लक्ष्यानुरोधेन स्वारितत्वमाश्रित्योभयग्रहणात् । भुवश्च महाव्याहृतेरिति सूत्रे महाव्याहृतिग्रहणं लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वज्ञापनार्थमिति हरदत्ताद्युक्तेश्च । न चैवमपि प्रभोरित्यादावतिव्याप्तिः । परस्परसाहचर्येण निपातानां वार्तिकोक्तानां च ग्रहणेऽप्यन्येषामग्रहणात् ॥

व्योर्लघु ॥ लघुप्रयत्नतरः । स चान्तरतम्याद्वस्य वो य यस्य इत्याह ॥ वयाविति ॥

ओतो गार्ग्यस्य ॥ ओकारादिति ॥ यत्त्वोकारान्तादङ्गादिति प्राचा व्याख्यातं, तन्न । अङ्गस्याप्रकृतत्वाद् असम्भवाच्च । न ह्युदाहरणेष्वोकारान्तमङ्गमस्ति ॥

हलि सर्वेषाम् ॥ यकारस्येति ॥ वकारस्य नानुवर्तते । भोभगोअघोपूर्वस्यासम्भवात् । अपूर्वस्तु यद्यपि सम्भवति, वृक्षवत् करोतीति, तथापि

न प्रामाणिकौ । अत एव भाष्ये विभाषा भवदिति व्याख्याय भो ब्राह्मणीत्यस्यैवाऽसिद्धिमाशङ्क्याऽव्ययमेष भोःशब्दो विभक्तिप्रतिरूपकत्वादित्येवोक्तम् । एवञ्च, भगो हरिहरावेत्याद्यसाध्वेव ॥ तदतिरभसादिति ॥ भोभगो, मतुवसोरिति सूत्रयोरस्यार्थस्य भाष्ये अस्पृष्टत्वादिति भावः ॥ उभयग्रहणादिति ॥ वार्त्तिकबोधितसाधुत्वानामपि, कुलटाया वेत्यादौ कार्यान्तरबोधनाय सूत्रकृतानुवादस्य करणादिति भावः ॥ हरदत्तेति ॥ एवञ्चानित्यत्वात्तदप्रवृत्तौ उभयोर्ग्रहणसिद्धिरिति भावः । विभाषा भवदिति वार्तिके भो ब्राह्मणा, भो ब्राह्मणीत्यसिद्ध्याशङ्कायाम् अव्ययमेष भोःशब्द इति सिद्धान्तेनोभयोरत्र ग्रहणलाभादिति बोध्यम् ॥ परस्परसाहचर्येणेति ॥ तेन चार्थवतामेव ग्रहणमिति भावः । अर्थवत्परिभाषयेत्यपि बोध्यम् ॥ अन्येषाम् अनर्थकानाम् ॥ सान्तरान्तान्यतरानुकरणमिति पक्षे प्रसिद्धा भोइत्यादिपूर्वकरेफान्तानामेवार्थवतां ग्रहणस्य न्याय्यत्व भोइत्याद्योकारान्तानुकरणपक्षेऽपि वार्त्तिकनिष्पन्नानां निपातानांचैकदेशभूतभोशब्दादीनामेव ग्रहणमिति भावः । अत्रेदं तत्त्वम् । रान्तानामेवानुकरणं, सूत्रे सन्ध्यभावो न्याय्य एवेति भाष्यस्वरसः ॥

लघूच्चारणतस्ते लघुतरोच्चारणः ॥

तत्र लोपाप्रसङ्गः । अशीत्यनुवर्त्याशा हलो विशेषणात् । दृक्षव् हसतीत्यादि तु अनभिधानादसाध्वित्याहुः । व्याख्यद् तु पदान्तत्वं नास्ति। मन्यूतिरित्यत्र तु वकारश्लेषाद् वलोप इत्युक्तम् । ननु देवा नम्पा इत्यादौ, लोपो व्योरित्येव सिद्धम् । मैवम् । तं प्रति यत्वस्यासिद्धत्वात्। देवा यान्तीत्यत्र वल्परत्वाभावाच्च ॥ अहोरात्र इति ॥ रात्राह्नाहा इति पुंस्त्वम् ॥ अहरादीनामिति ॥ उभयत्राप्यादिशब्दः प्रकारे । तेन स्वर्चक्षा रथिक्षः सत्यशुष्मः । विप्रः कविः काव्येन स्वर्चना इत्यादि ग्राह्यम् ॥

तृढो दृढ इति ॥ उदित्त्वेन वेट्कत्वाद्धस्य विभाषेति निष्ठायां नेट्। ढत्वधत्वष्टुत्वढलोपाः । यत्तु प्राचा प्रत्युदाहृतं, दृढ इति । तन्न । तत्र ढलोपस्यैवाभावात् । तथा हि । दृढः स्थूलबलयोरिति सूत्रेण दृंहेर्नकारहकारयोर्लोपः । तकारस्य ढत्वं च निपात्यते । न चासिद्धकाण्डस्थढत्वस्येह प्रवृत्तिः । दादेर्धातोरिति धत्वेन बाधात् । न च इडभावो ढत्वं च निपात्यतां धत्वष्टुत्वढलोपान् भविष्यन्त्येवेति वाच्यम् । तथा सति परिद्रढय्येत्यत्र, ल्यपि लघुपूर्वादिति णेरयादेशो न स्यात् । पारिदृढीकन्येत्यत्राणिजोरिति ष्यङ् च स्यात् । ढलोपस्यासिद्धत्वेन गुरूपोत्तमत्वादिति भाष्ये स्थितम् । यत्तु प्राचा व्याख्यातं, दृंहेरेवेदं निपातनं, दृह वृद्धाविति तु प्रकृत्यन्तरम् । तस्य निष्ठायामागमशास्त्रस्यानित्यत्वादिडभावे, वा द्रुहेत्यत्र वेति योगविभागात् पक्षे धत्वाभावे ढलोपे च प्रत्युदाहरणमिदं द्रष्टव्यमिति। तन्न । उभयोरपि निपातनाभ्युपगमात् । तदाह वामनः । अथ दृहिः प्रकृत्यन्तरमास्ति तस्याप्येतन्निपातनं नलोपवर्जमिति । युक्तं चैतत् । अन्यथा हि अस्माद् णेरय् न स्यात्, ष्यङ् च स्यात् ॥

हलो विशेषणादिति ॥ स्पष्टं चेदं भाष्ये ॥ इत्याहुरिति ॥ हरदत्तादयः । वकारलोपे ततस्तदर्थानवगतेरित्यर्थः । एवञ्च करोत्यादिपरेऽपि तत एव लोपो न भविष्यतीत्यशा हलो विशेषणं व्यर्थमिति सूचितम् । भाष्यमपि तदेकदेश्युक्तिरेव न पदान्ताः परेऽणः सन्तीति लण्सूत्रस्थभाष्यविरोधाच्च ॥

इडभावो ढत्वं चेति ॥ चेन नलोपसंग्रहः ॥ ढलोपा इति ॥ ढो ढे लोप इत्येतद्दृष्ट्या ष्टुत्वं तु नासिद्धं, सामर्थ्यादिति भावः ॥ भाष्ये स्थितमिति ॥ दृढः स्थूलेति सूत्रे इति शेषः ॥ द्रष्टव्यमितीति ॥ ष्यङि णेरयाभावे चेष्टापत्तिरिति भावः ॥ उभयोरपीति ॥ त्वदवलम्बभूतेन वृत्तिकृतेति शेषः । तदाह ॥ वामन इति ॥ अत्रारुचिबीजं तु दृंहेर्नकारहकारलोपार्थमिति भाष्यविरोधः । अग्निदिसो

उत्वमेवेति ॥ सिद्धासिद्धयोरतुल्यबलत्वेन विप्रतिषेधे परमित्यस्याऽप्रवृत्तौ निष्प्रतिपक्षत्वादुत्वमेव भवतीत्यर्थः । तदुक्तम् । पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति । एतेन विभक्तिकार्यं प्राक् पश्चादुत्वमत्वे इत्यादि व्याख्यातम् ॥

सूत्रे, सु इति पृथक्पदं लुप्तषष्ठीकमित्याह ॥ एतत्तदोर्यः सुरिति ॥ एतत्तदर्थगतसंख्याभिधायी यः सुस्तस्येत्यर्थः । कृञ्चानुप्रहित इति व्याख्याने तु परमस दददाति परमैष ददातीत्यादौ न स्यात् । अर्थद्वारकसम्बन्धाश्रयणे लिङ्गं त्वनञ्समास इति बोद्धव्यम् ॥ अकोः किमिति ॥ साकच्-योः शब्दान्तरत्वादप्रसङ्ग इति भावः ॥ एषक इति ॥ अकोरिति प्रतिषेध एव, तन्मध्यपतितस्तदुग्रहणेन इति परिभाषां ज्ञापयतीति भावः ॥

बहुलग्रहणेति ॥ अत एव लोपं विना पादपूरणेऽपि क्वचिद्भवति । सास्माअरम् सः । अस्मै इति च्छेदः ॥ इति स्वादिसन्धिः ॥

दृंहेस्तु दृहितमित्येवेष्यत इति कैयटविरोधश्चेति । किञ्च प्रसादोक्तरीत्या दृंहेरपि इडभावढत्वयोः सिद्धाविण्निषेधप्रकरणे दृढ इति निपातन व्यर्थत्वमित्यलम् ॥

अभावादुत्तरस्येति ॥ आहार्याभावारोपादित्यर्थः ॥

लिङ्गमिति ॥ विहितविशेषणे तद्वैयर्थ्यं स्पष्टमेवेति भावः ॥

सास्माअरमिति ॥ सोस्माअरमिति सन्धावपि पादपूर्त्तेः । न च प्रकृत्यान्तःपादमिति पूर्वरूपस्याभावेन न पादपूर्त्तिः । सोऽयमागादित्यादाविव अत्रापि प्रातिशाख्येन सिद्धेः । एवञ्चावधारणपरतया न व्याख्येयम् । सोऽहमाजन्मेत्यादौ बहुलग्रहणेन क्वचिदप्रवृत्त्याऽपि सिद्धेरिति तात्पर्यम् ॥

इति श्रीभट्टोजिदीक्षितपौत्रहरिदीक्षितकृते मनोरमाव्याख्ये ने
लघुशब्दरत्ने पञ्चसन्धिप्रकरणम् ॥

अर्थवदधातुः ॥ प्रत्ययं प्रत्ययान्तं चेति ॥ सूत्रे तन्त्रादिना उभयं विवक्षितमिति भावः । तथाहि । प्रत्ययस्यैव पर्युदासे कृत्तद्धितेति सूत्रेण तदन्तस्य संज्ञाविधानं व्यर्थं स्यात् । न च तत्रापि तदन्तं न ग्राह्यमिति वाच्यम् । अर्थवदित्यत्र वृत्तिसामर्थ्यात्तदन्तग्रहणात् । प्रशंसायां हि मतुप् एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वं च प्रशंसामूलम् । न च अर्थवदित्यस्य पूर्वसूत्रे चरितार्थता । धातुप्रत्ययपर्युदासेनैव तल्लाभात् । तस्मात् प्रत्ययान्तं च वर्जयित्वेत्युचितमेव । यदि तु प्रत्ययो न पर्युदस्येत तर्हि सात्पदाद्योरिति सूत्रे सातिग्रहणं व्यर्थं स्यात् । अर्थवदिति किम् । धनं,वनमित्यादौ प्रतिवर्णं संज्ञा मा भूत् । तस्यां च सत्यां स्वादयः स्युः । ननु सैरूयाकर्मादेरभावाद् न भविष्यन्तीतिचेन्न । एकवचनमुत्सर्गतः करिष्यते इति सिद्धान्तात् । हुंफडादिभ्य इव सोर्दुर्वारत्वात् । न च अर्थवद्ग्रहणपरिभाषयाऽनर्थके न स्यादिति वाच्यम् । तस्या विशिष्टशब्दविषयत्वात् ।

व्यर्थं स्यादिति ॥ न चास्यापत्यम् इत्यादौ प्रत्ययत्वप्रयुक्तनिषेधबाधनेन तच्चरितार्थम् । अग्नि इत्यवस्थायां प्रवृत्तसंज्ञाया एकदेशविकृतन्यायेन सुलभत्वात् ॥ एकार्थीभावेनेति ॥ न चैतत्प्रत्ययमात्रस्य, तन्मात्रे एकार्थीभावाभावादिति भावः । एकार्थीभावश्च यस्य प्रातिपदिकसंज्ञा चिकीर्षिता तन्मात्रवृत्तिरेव ग्राह्यः । तेन पञ्चनावप्रिय इति समासघटक श्रनावेत्यस्य तद्धितान्तत्वसमासत्वयोरपि न प्रातिपदिकत्वम् । प्रियशब्दान्त एव तत्रैकार्थीभावो, न तु तन्मात्र इत्यदोषात् । न च क्विबन्ते दोषः । तत्र धातोरेव विशिष्टार्थबोधकत्वेन अर्थवद्द्वितीयाभावेन पृथगर्थानामेकोपस्थितिजनकत्वरूपैकार्थीभावाभावादिति वाच्यम् । अलौकिके वाक्ये कल्पितैकार्थीभावस्य तत्राप्यारोपेणादोषात् ॥ व्यर्थं स्यादिति ॥ अनेन प्रत्ययपर्युदासे मानमुक्तम् । सातेः प्रातिपदिकत्वे हि तत औत्सर्गिकैकवचने तस्यापि सुबन्तत्वेन पदत्वे पदादित्वादेव निषेधसिद्धेस्तद् व्यर्थमिति भावः ॥ सोर्दुर्वारत्वादिति ॥ तस्य च समुदायप्रातिपदिकत्वेन तदवयवत्वाल्लुक् । समुदायसंज्ञा चान्तरङ्गत्वादवयवेभ्यः प्रातिपदिकत्वात् सुपि च सति प्रवर्तत इति तस्य तदवयवत्वमक्षतम् । पचति, ध्वनतीत्यादौ नावयवानां सा । धातुप्रत्ययान्तपदयोस्तदवयवपरत्वेन तत्र तन्निषेधात् । तस्मादव्युत्पन्नप्रातिपदिकावयवेभ्यस्तदुत्पत्तिरापाद्या । धनशब्दस्य धिनोतेर्धनमिति व्युत्पत्तिपक्षे तु वनाद्युदाहरणं बोद्धव्यम् । ध्वनितं चेदं भाष्यकैयटयोः । तस्मान्नलोपाद्यापत्तिर्दोषः । [illegible] इव तेभ्योऽपि सुप एकवचनाभ्युपगमेन । यदि तु तदुत्पत्तिः सत्येव गमके यथान्ययेभ्य उत्पत्तावव्ययादाप्सुप इति गमकम् । नान्यत्र । एकवचनमिति महासंज्ञाकरणात् । प्रकृते तु न तथा गमकम् । अत एव, ङ्याबितिसूत्रे प्रातिपदिका-

अधातुरित्यादिपर्युदासबलेन यद्यप्यर्थवत्त्वं लभ्यते तथाऽपि उत्तरार्थं तदित्युक्तम् । एतच्च सुबन्तेऽपि सूत्रे भाष्ये ध्वनितम् । यत्त्वाहुः । पर्युदासो नार्थवत्त्वं गमयति । अनर्थकयोरपि धातुप्रत्यययोर्दर्शनात् । अधीते पावक इति । अधिकर्तुरस्यैवेङः प्रयोगाद् विशिष्ट एव अर्थवान् न तु केवलः । इङ् अध्ययने इत्यादयर्थनिर्देशस्तु अवयवे समुदायार्थारोपात् । एवं कन्नप्यनर्थकः । यावशब्दादपि तदर्थप्रतीतेः । ओषधेश्च विभक्तावप्रथमायामकर्तरि च कारक इति विभक्तिकारकग्रहणाभ्यां, नञ्विवयुक्तन्यायस्यानित्यत्वकल्पनाच्चेति । अत्रेदं वक्तव्यम् । धातुरनर्थक इति तावद्व्याहतम् । क्रियावाचकत्वं विना धातुत्वायोगात् । आरोपितं तदिति चेत् । सत्यम् । तावतैवेष्टसिद्धेः । प्रकृतिप्रत्ययविभागस्तत्तदर्थविभागश्च सर्वः कल्पित एव । परमार्थतस्तु स्फोट एवार्थवानिति सिद्धान्तात् ॥

उक्तं च हरिणा—

ऽधिकाराभावे तिङन्तेभ्यस्तदुत्पत्तिमाशङ्क्यैकत्वादीनामुक्तत्वान्नेति समाहितं भाष्ये । त्वद्रीत्यौत्सर्गिकमेकवचनं दुर्वारमेव । अत एवाग्रे भाष्येऽर्थवत्पदस्य, दश दाडिमानीत्यादिपदसमुदायो निरर्थको व्यावर्त्यत्वेन प्रदर्शितः । तत्र हि, सुपो धात्वित्यस्य प्राप्तिरिति तदेवास्य मुख्यं व्यावर्त्यम् । पचतःकल्पमित्यादौ तत्प्रवृत्तौ रूपप्सूत्रस्थं भाष्यं गमकम् । समासग्रहणकृतनियमस्तु अर्थवत्समुदायविषयक इति भाष्ये स्पष्टमिति न तेनास्य व्यावृत्तिरिति दिक् ॥ यद्यप्यर्थवत्त्वमिति ॥ व्याख्यानादर्थवत्त्वेनैव सादृश्यं गृह्यत इति भावः ॥ उक्तमिति ॥ एतेनेदमुक्तमेव पुनर्दार्ढ्यायोच्यत इति सूचितम् ॥ भाष्ये इति ॥ एवं हि तत्र भाष्यम् । अर्थवदिति वर्त्तते कृत्तद्धितान्तं चैवार्थवद्, न केवलाः कृतस्तद्धिता वेति, कृत्तद्धितेति सूत्रेऽन्तग्रहणं नकार्यमिति । अर्थवद्ग्रहणानुवृत्तिसामर्थ्यादेव चेदृशार्थलाभ इति कैयटः ॥ समुदायार्थारोपादिति ॥ तेन तन्मात्रस्य क्रियावाचित्वनिबन्धनधातुत्वसिद्धिरिति भावः ॥ तत् – क्रियावाचकत्वम् ॥ तत्तदर्थविभागश्चेति ॥ तस्य तस्येति कृतद्धितवचनेन षष्ठीसमासे स सोऽर्थविभाग इति कर्मधारये वा विभक्तिलुकि इदं साधु । एतेनान्यान्यप्रादुर्भावादिति, अपादाने पञ्चमीतिसूत्रस्थभाष्यप्रयोगोऽपि व्याख्यातः । सुबन्तत्वमपि द्विःप्रयोगपक्ष इव स्थाने द्विर्वचनपक्षेऽप्याद्यान्यशब्दे प्रकृतित्वबुद्ध्या द्वितीयान्यशब्दे प्रत्ययत्वबुद्ध्या सूपपादम् ॥ सर्व इति ॥ धातूपसर्गविभागो वृत्तिष्वेकार्थीभावश्चैवमेवेति भावः ॥ स्फोट एवेति ॥ पदरूपो वाक्यरूपो वेत्यर्थः । लोकानां तत्रैव शक्तिग्रहेण बोधादिति भावः । अत एव तस्य परमार्थत्वं लोके बोधजनकत्वात् । शास्त्रेण प्रकृतिप्रत्ययविभागव्युत्पादनेन विशिष्ट एव तत्तदर्थबोधनद्वारा विशिष्टे पदे विशिष्टार्थबोधकत्वमेव बोध्य-

उपायाः शिक्षमाणानां बालानां प्रलालनाः ।

असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहत, इति ॥ कथमन्यथा इत्वं द्विर्वचनमदादयश्च स्युः । तथा च प्रत्याहारादिके अर्थवन्तो वर्णा इति प्रवृत्तके अध्येति अधीत इत्यत्रेकारोऽर्थवानिति भाष्ये स्पष्टमेतत् । एवं कन् प्रत्ययोऽप्यर्थवानेव । स्वार्थिकानां प्रकृत्यर्थेनैवार्थवत्त्वात् । कल्पना [illegible] । उक्तोत्तरत्वात् । नैषा कल्पना शास्त्रकृत्संमतेतिचेन्न । द्विर्वचनेऽचि तुर्यातुर्याणि इति सूत्रे पूरणात् स्वार्थेऽप्रत्ययस्य पूरणार्थतया भाष्यकारैरेवोक्तत्वात् । प्रत्यय इति महासंज्ञां कुर्वतः सूत्रकृतोऽपि संमतमेवेदम् । यदपि, ओषधेश्चेत्यादि । तदपि न । अनित्यत्वेऽप्यौत्सर्गिकप्रवृत्त्या इष्टसिद्धेः । इष्टस्थलेऽप्यप्रवृत्तौ न्यायस्य निर्विषयत्वापाताच्च । अनित्यत्वज्ञापनस्य कथञ्चिदावश्यकत्वे अर्थवद्ग्रहणस्यैव ज्ञापकत्वसम्भवाच्च । उत्तरार्थस्यापि, इह किञ्चित्रपो इति न्यायेन इह करणस्य [illegible] चित्यात् । ओषधेश्चेत्यादौ विभक्तिकारकग्रहणयोरेवेत्थं सति प्रत्याख्यानसम्भवाच्चेति दिक् ॥ अधातुरिति किम् । अहन् । नलोपो मा भूत् । न च कार्यकालपक्षे प्रत्ययान्तत्वेन पर्युदासोऽस्त्विति वाच्यम् । प्रत्ययलक्षणेनोक्त-

---

ते ॥ उपलालना इत्यस्य भवन्तीति शेषः । न तु वास्तवा इति भावस्तदाह ॥ असत्ये इति ॥ आरोपिते इत्यर्थः । लोकनान्तत्तच्छब्दजन्यबोधानुपयोगित्वात्तत्त्वम् ॥ सत्यं – विशिष्टशक्त्या बोधकं पदादीत्यर्थः ॥ स्युरिति ॥ अधिजगे; अध्यगीष्टेत्यादौ ॥ अर्थवत्त्वादिति ॥ आरोपितार्थवत्त्वादित्यर्थः ॥ शास्त्रकृत् भाष्यकृदादिः ॥ संमतेति ॥ तद्धितविषये इति शेषः । औत्सर्गिकप्रवृत्तौ हेतुमाह ॥ इष्टस्थलेऽपीति ॥ चः पञ्चम्यर्थहेतुत्वानुवादकः ॥ कथञ्चिदिति ॥ अनेन तदनावश्यकत्वमेवेति ध्वनयति । ननूत्तरत्र चरितार्थस्य कथं ज्ञापकत्वमत आह ॥ उत्तरार्थस्यापीति ॥ इकोऽचीति सूत्रेऽज्ग्रहणस्योत्तरार्थतामुक्त्वा भाष्ये उक्तमिह किञ्चित्रपो इति । न लुमतेति निषेधानित्यत्वज्ञापनद्वारा, त्रपो इत्यत्र गुणः फलमिति तदर्थः ॥ इत्थं सतीति ॥ लघुनाऽनेनैवानित्यत्वज्ञापनमाश्रित्य न्यायानुसरणेन तयोः प्रत्याख्यानसम्भव इति भावः ॥ नलोप इति ॥ सुबुत्पत्तिस्तु नोक्ता । भूवादय इत्यस्य लविधौ तिबादिविधौ चोपस्थितेर्निरवकाशतयाऽपवादैस्तिबादिभिर्बाधात् ॥ कार्यकालपक्षे इति ॥ न च यथोद्देशेऽपि प्रत्ययान्तत्वस्य भावित्वेनाकृतव्यूहपरिभाषया फलाभावेन च संज्ञाया अप्रवृत्तिरिति वाच्यम् । अकृतव्यूहपरिभाषाया अनित्यत्वादसत्त्वाच्च । भविष्यति किञ्चित् फलमित्यभिसन्धिमात्रेण अत्र पक्षे संज्ञायाः प्रवृत्तेः प्रगृह्यसंज्ञाप्रकरणे कैयटेनोक्तत्वाच्च । यथोद्देशपक्षेण

पर्युदासाप्रवृत्तेर्न ङिसम्बुद्ध्योरिति निषेधेन ज्ञापितत्वात् । कथमन्यथा राजेत्यादौ नलोपः स्यात् । अप्रत्ययः किम् । हरिषु । करोषि । अत्र सुप्सिपोर्मा भूत् । अप्रत्यान्तः किम् । तत्रैव विभक्तिविशिष्टयोर्मा भूत् । नान्तवद्भावेन, काण्डे, कुड्ये इत्यादौ प्रातिपदिकत्वं स्यादेव । तथा च ह्रस्वो नपुंसक इति ह्रस्वत्वं सोरुत्पत्तिश्च स्यादिति वाच्यम् । कार्यकालपक्षेणेष्टसिद्धेः । यथोद्देशेऽपि विभक्त्येकादेशो नान्तवत् । सप्तम्यधिकरणे चेत्यादिनिर्देशात् । ह्रस्वो नपुंसक इति सूत्रे प्रातिपदिकग्रहणं वा उक्तार्थे सामान्यापेक्षं ज्ञापकमस्तु । यत्तु वदन्ति । प्रत्ययपर्युदासो न कर्त्तव्यः, प्रत्ययान्तपर्युदासेनैव गतार्थत्वात् । व्यपदेशिवद्भावेन तस्यापि प्रत्ययान्तत्वादिति । तन्न । प्रत्ययग्रहणे यस्मात् स विहितस्तदादेर्ग्रहणात् । केवलस्य

पर्युदासे लक्ष्यसिद्धेः शङ्कासमाधाने अत्र निर्हले । नहि व्यवस्थितयोः पक्षयोरन्यतरेण लक्ष्ये सिद्धे पक्षान्तरेण शङ्काप्युचितेत्यर्थस्य प्रगृह्यसंज्ञाप्रकरणे भाष्ये ध्वनितत्वादिति काश्चित् ॥ कथमन्यथेति ॥ न च राजेत्यादौ कृदन्तत्वात् प्रवृत्तिः। तत्राप्यप्रत्यय इत्यस्य सम्बन्धात् । अत एव, दाक्षी, दिदृक्षू इत्यादौ परादिवद्भावेन न सुपो लुक् । न च सुब्लोपविषयमेव ज्ञापकम् । असति बाधके प्रमाणानां सामान्ये पक्षपात इत्यर्थस्यापि ज्ञापनादन्यथा सूत्रोपस्थितङिसम्बुद्धिमात्रविषयता स्यादिति राजपुरुषासिद्धिः । स्पष्टा चेयं रीतिः, सार्वधातुकमपिदित्यत्र भाष्ये । प्रकृतसूत्रभाष्ये चेदं स्पष्टम् ॥ अत्र सुप्सिपोरिति ॥ तयोः प्रातिपदिकत्वे तत्सामर्थ्यादौत्सर्गिकैकवचने तच्छ्रवणापत्तिः । विभक्त्यर्थस्य लिङ्गं प्रति स्वरूपायोग्यत्वेन न नपुंसकत्वाश्रयो विभक्तिलुक् । तत्सत्त्वे तु पदादित्वेन षत्वनिषेधापत्तिर्दोष इति भावः ॥ तत्रैवेति ॥ अत्राप्यौत्सर्गिकैकवचनापत्तिः सुपो धात्विति लुगापत्तिश्च । पचेरन्नित्यादौ नलोपापत्तिश्चेति भावः ॥ स्यादेवेति ॥ पूर्वं विभक्त्युत्पत्तये ज्ञातस्यातिदेशेन विभक्त्यन्ते बुद्धिरिति भावः ॥ यथोद्देशेऽपीति ॥ अपिना कार्यकालपक्षेऽपि । न हि तत्र पक्षे उपदेशेनैवैकवाक्यता, नातिदेशेनेत्यत्र मानमस्ति । अतिदेशैकवाक्यतयैव ह्रस्वप्राप्तेः सुवचत्वात् ॥ प्रातिपदिकग्रहणं वेति ॥ नपुंसकवृत्तित्वस्य प्रातिपदिकधर्मत्वान्नपुंसके वर्तमानस्येत्यर्थेनैव प्रातिपदिकलाभे सिद्धे तस्य व्यर्थत्वादिति भावः ॥ उक्तार्थे— विभक्त्येकादेशस्यान्तवत्त्वाभावे ॥ सामान्यापेक्षमिति ॥ अन्यथा ह्रस्व एव न स्यात्, स्वाद्युत्पत्तिस्तु स्यादेवेति भावः । यद्यपीदं प्रातिपदिकग्रहणं सत्त्वप्रधानप्रातिपदिकग्रहणार्थं, तेनात्र न ह्रस्वः । मूलोक्तार्थे ज्ञापिते चारितार्थ्यं दुर्निरूपं च । संख्याकर्माद्ययोगात् स्वाद्युत्पत्तिरपि न । औत्सर्गिकमेकवचनमपि न । गमकं विना तदनुत्पत्तेः । सुपो धात्विति लुगपि न । धातुसाहचर्येण सुप्तिङन्तरसमभिव्याहृतस्यैव तेन लुग्विधानात् । एवञ्च प्रत्ययान्तपर्युदासो न कर्तव्य इति सूत्रशेषे भाष्ये ध्वनित-

च अतथात्वात् । अन्यथा त्वदुक्तरीत्या सुप्तिङोरपि तदन्तत्वात् पदत्व स्यात् । तथा च, हरिषु, करोषि इत्यादौ षत्वं न स्यात् । [illegible] निषेधात् । अ[illegible]त्यत्र विति सिद्धे नञ्द्वयोपादानं स्पष्टार्थम् । मह [illegible]णं श्रुत्यनुरोधात् । तथा चार्थवणे पठ्यते— को धातुः, किं प्रा पदिकं, कः प्रत्यय इति । डित्थादीन्यव्युत्पन्नानीहोदाहरणम् । अव्युत्पत्ति पक्षस्य चेदमेव [illegible] प्राञ्चः । यत्तु व्युत्पत्तिपक्षेऽपि निपातार्थमनु करणार्थं चेदमिति हरदत्तेनोक्तम् । तच्चिन्त्यम् । तत्रापि प्रकृत्यादिकल्पन सम्भवात् । वस्तुतस्तु व्युत्पत्तिपक्षेऽपि बहुपटव इत्याद्यर्थं सूत्रम् । न चैव बहुच्पूर्व इत्येव [illegible]त्यतामिति वाच्यम् । [illegible]लकेनोपदंशम् इत्यादौ कृदन्त त्वेनातिप्रसङ्गात् । न च समासग्रहणं नियमार्थमिति निस्तारः । अर्थवत् सूत्रारम्भं विना समासग्रहणस्य नियमार्थत्वायोगादिति दिक् ॥

म् । पचेरन् सर्वस्मिन्नित्यादौ नकारोच्चारणसामर्थ्येन न नलोपः । तथाप्येतावत्क्लिष्टकल्पनापेक्षया लाघवात् प्रत्ययान्तपर्युदास एवोचित इति भावः ॥ अतथात्वादिति ॥ यस्माद्धितस्तदादित्वस्याशास्त्रीयत्वेन व्यपदेशिवद्भावालभ्यत्वादिति भावः ॥ निषेधादिति ॥ यद्यपि व्यपदेशिवद्भावेनैकाच्त्वादेरिवास्याप्यशास्त्रीयस्यातिदेशेन लाभसंभवोऽतं एव भवतीत्यादौ भवतेः शबनिरूपिताङ्गत्वसिद्धिर्व्यर्थेति से इत्यादौ सेइत्यस्य पदत्वसिद्धिश्च । इरित्यादौ कार्यकालपक्षे तद्धितान्तत्वनिबन्धन प्रातिपदिकत्वसिद्धिश्च । युवापत्ये तत इञन्तत्वनिबन्धनफक्सिद्धिश्च । तथाप्यऽसहाय एव व्यपदेशिवद्भावो, नतु ससहाये । तेनेतरावयवे तदप्रवृत्तिः । स्पष्टा चेयं रीतिरादेच उपदेश इत्यत्र कैयटे । अत एव सभासंनयने व्यपदेशिवद्भावेनाकारस्य नादित्वं, दरिद्राधातावविकारस्य नान्तत्वम् । तथा सति वृद्धत्वप्रयुक्तश्छः, इवर्णान्तत्वप्रयुक्तोऽच्प्रत्ययश्च स्यात् । ततोऽत्र न किञ्चिद्वैषम्यम् । लोकेऽपि बहुत्वसत्त्वे नैकस्मिन् ज्येष्ठकनिष्ठादिव्यवहारः । विजातीयकन्यादिसत्त्वे त्वेकस्मिन्नपि तथा व्यवहारो भवत्येवेति बोध्यम् । अत एव हरिष्वित्यादौ सोः पदत्वं न । निजौ चत्वार एकाच इतिभाष्यं त्वेकस्मिन्नित्यस्यापर्यालोचितमेवेत्येवं किरिति तात्पर्यम् । वस्तुतस्तु पर्युदासेनैवार्थवत्त्वे लब्धे अर्थवद्ग्रहणादत्र सूत्रेऽपि विभक्तीतरानपेक्षयाऽर्थबोधकत्वमर्थवत्त्वं गृह्यते । एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वमिवेदमप्यलौकिके आरोपितमस्तीति, दक्षअस्इ इत्यवस्थायां प्रातिपदिकत्वा क्षतिः । तदा प्रत्ययस्य प्राप्तिरेव नेति केवलप्रत्ययपर्युदासो व्यर्थः । ध्वनितं चेदं प्रत्ययपर्युदासानुक्त्वा भाष्ये । सुप्तिङन्तमिति सूत्रस्थभाष्य कैयटयोरप्यत्रै तात्पर्यमिति बोध्यम् ॥ इत्याद्यर्थमिति ॥ अन्यथा विभक्त्यन्त स्योदात्तता स्यात् । प्रातिपदिकत्वे तु पूर्वं विभक्तिलुकि टकारोकारस्योदात्तत्वं पुनर्जसि टकारोकारोदात्तत्वसिद्धिरिति भावः ॥ कृदन्तत्वेनेति ॥ न च समास

कृत्तद्धितसमासाश्च ॥ अर्थवदित्यनुवर्तते । तत्सामर्थ्यात् तदन्तविधिः । न हि जहत्स्वार्थायां वृत्तौ कृतां तद्धितानां च अर्थोऽस्ति । भूतपूर्वगतिलभ्यस्तु न प्रशस्तः । अजहत्स्वार्थायामपि न प्रत्ययमात्रेणार्थपर्यवसानमित्यभिप्रेत्याह ॥ कृत्तद्धितान्ताविति ॥ लिट्, धुक् इत्यादौ अधातुरिति कर्तेत्यादौ अप्रत्ययान्तमिति पर्युदासे प्राप्ते कृदन्ते विधिरयम् ॥ नियमार्थमिति ॥ न च प्रत्ययान्तत्वेन पर्युदासे प्राप्ते विध्यर्थमस्त्विति शङ्क्यम् । वाक्यस्याप्रत्ययान्तत्वात् । प्रत्ययग्रहणे यस्मात् स विहितस्तदादेरेव ग्रहणात् । ननु स्त्रीप्रत्यये तदादिनियमो निषिद्धः । एवञ्च राजकुमारीत्यादौ विध्यर्थमस्त्विति चेन्मैवम् । अन्तरङ्गस्यापि हल्ङ्यादिलोपस्य लुग्विषयेऽप्रवृत्त्या श्रूयमाण एव सुपि समासप्रवृत्तेः । तत्र चाप्रत्ययान्तत्वेन प्रवृत्तायाः संज्ञाया एकदेशविकृतन्यायेन विभक्तिलुक्यपि सुलभत्वात् । अत एव गोमात्रिय इत्यादौ नुमादयो न। लुकः प्रागन्तरङ्गप्रवृत्तौ तु स्युरेव । नन्वेवमपि असमर्थसमासे दशदाडिमादिवदनर्थके विध्यर्थमस्त्विति चेन्न । अर्थवदित्यस्यानुवृत्तेरुक्तत्वात् । कथं तर्हि असमर्थसमासे संज्ञेति चेद् धर्मिग्राहकमानादेवेति गृहाण । असूर्यललाटयोरित्यनेन हि असूर्यशब्दे उपपदे खश्

विकल्पविधानस्य वैयर्थ्यम् । समासे एकस्वरश्रवणं, समासाभावे प्रातिपदिकत्वे तु पूर्वोत्तरपदयोर्भिन्नस्वरश्रवणमिति विशेषात् । दधि, उपदंशमित्यादौ पक्षे प्रकृतिभावप्रवृत्तेरपि फलस्य वक्तुं शक्यत्वाच्च ॥

तत्सामर्थ्यादिति ॥ अन्यथा संज्ञाविधित्वान्न स्यात् ॥ न प्रत्ययमात्रेणेति । प्रकृतेरपेक्षणादिति भावः ॥ अधातुरिति ॥ कर्तृरूपार्थस्याधिकस्य भानेऽपि क्रियावाचकत्वाक्षत्या धातुत्वाक्षतेरिति भावः ॥ स्त्रीप्रत्यये इति ॥ अनुपर्सजनस्त्रीप्रत्यये इत्यर्थः । तस्य येनकेनापि रूपेण ग्रहणे तन्निषेध इत्यभिमानः शङ्कितुः ॥ राजकुमारीति ॥ नन्वत्र प्रातिपदिकत्वस्य न फलम् । लिङ्गविशिष्टपरिभाषयैव तत्कार्यसिद्धेरिति चेन्न । प्रातिपदिकत्वतद्व्याप्यधर्माणां लिङ्गप्रत्ययरहिते दृष्टानां तद्विशिष्टेऽनयाऽतिदेशेन तस्या अत्राप्रवृत्तेः । न हि ङीब्रहिते राजकुमारेत्यादौ तदस्ति । ङ्याब्ग्रहणं त्वन्यार्थमिति वक्ष्यते । शङ्कितृभिमानानुसारेणैवोत्तरयति ॥ अन्तरङ्गस्यापीति ॥ सुलभत्वादिति ॥ यथोद्देशे इदम् । यदि त्वस्य निषेधस्य प्रत्ययग्रहणपरिभाषाशेषत्वम् । एवञ्च यथा सा प्रत्ययग्रहणे एव, न तु प्रत्ययाप्रत्ययग्रहणे इति उगितश्चेति सूत्रे भाष्ये स्पष्टम् । तथाऽयं निषेधोऽपि स्त्रीप्रत्ययमात्रग्रहणे, न तु स्त्रीप्रत्ययास्त्रीप्रत्ययग्रहणे इत्युच्यते तदा न दोषः । समुदायस्य प्रत्ययान्तत्वाभावादिति दिक् ॥

असमर्थसमासे इति ॥ असूर्यंपश्या इत्यादावित्यर्थः ॥ धर्मिग्राहकेति ॥ प्रातिपदिक-

विधीयते । उपोच्चारितं पदं चोपपदम् । पदं च सुप्तिङन्तमिति । नियम-शरीरमाह ॥ यत्र सङ्घाते इत्यादि ॥ पूर्वो भाग इत्युपलक्षणम् । उत्तरस्तु प्रत्ययो नेत्यपि बोध्यम् । अन्यथा जन्मवानित्यादौ संज्ञा न स्यात् । तद्धितग्रहणस्य औपगवादौ कृतार्थत्वात् । पूर्वो भागः पदमिति किम् । बहुज्विश्लिष्टस्य प्रातिपदिकसंज्ञा यथा स्यात् । तेन बहुपटव इत्यत्र प्रथम-जसो लुकि बहुपटुशब्दस्य चित्स्वरे पुनर्जसि उपोत्तमोदात्तत्वं सिद्ध्यति । यद्वा । प्रकृतिप्रत्ययावानापन्नसङ्घातविषयको नियमोऽस्तु । न चाद्यपक्षे राजपुरुषावित्यादौ पुरुषावित्यादेः संज्ञा स्यादिति वाच्यम् । अर्थवत्त्वेनैव वारणात् । प्रत्ययार्थो हि विश्लिष्ट एवान्वेति, न तूत्तरपदार्थमात्रे । येन पुरुषावित्यस्यार्थवत्त्वं स्यात् । नियमफलमाह ॥ तेनेत्यादि ॥ नन्वेवमपि श्लोकेनोपदंशमित्यादौ वाक्यस्य संज्ञा दुर्वारा । कृद्ग्रहणे गतिकारकपूर्व-

---

संज्ञाधर्मस्तद्धर्मी असमर्थसमासः । ग्राहकं मानं खण्डविधायकम् । अन्यथा पर-स्परमसंबन्धेनैकार्थीभावाभावात् समासो दुर्लभः स्यात् ॥ असूर्यशब्द इति ॥ तत्प्रकृतिके सुबन्त इत्यर्थः । सुपीत्यधिकारात् । उपपदमिति महासंज्ञाकरणाच्च । तदेतदाह ॥ पदं चेत्यादि ॥ शशशृङ्गादिपदानां च बौद्धे तस्मिन् शक्तिरिति न तदर्थमपि समासग्रहणमिति बोध्यम् ॥ यत्र संघाते इतीति ॥ अर्थवतीति शेषः । सजातीयापेक्षनियमस्यौचित्यादिति बोद्धव्यम् । प्रत्ययो नेत्यस्य पूर्वभागप्रकृतिक-प्रत्ययो नेत्यर्थः । तेन राजा इयानित्यादौ न दोषः ॥ जन्मवानित्यादाविति ॥ तत्र पूर्वभागस्य पदत्वादिति भावः । ननु तद्धितग्रहणसामर्थ्यं, तत्राह ॥ तद्धितेति ॥ तत्र पूर्वभागस्य भत्वात् पूर्वो भागः पदमित्यत्र च पदशब्देन पदसंज्ञकग्रहणमि-ति भावः । नन्वत्र पक्षे गवित्ययमाहेत्यादौ दोषः । गोइत्यादीनां सुबन्तत्वाभावेन पदत्वाभावात् । वृषण्वसुरित्यादिसमासे पूर्वभागस्य भत्वेन तत्साजात्येन पूर्वो भागः पदमित्यर्थलाभासंभवश्चेत्यत आह ॥ यद्वेति ॥ प्रकृतसूत्रे भाष्ये तु अर्थव-त्समुदायानां सममसग्रहणं नियमार्थमित्युक्तम् । अत्र तन्त्रेण षष्ठीतत्पुरुषः, कर्म-धारयश्च । तत्र षष्ठीसमासे अर्थवदित्यस्य स्वातन्त्र्येणाऽपि प्रयोगार्हार्थवदित्य-ऽर्थः । गवित्ययमित्यादावनुकरणस्थानितिपरस्यापि प्रयोगसत्त्वेन तत्त्वमस्त्येव । प्रकृतिप्रत्ययसमुदास्य तु न व्यावृत्तिः । प्रत्ययस्य स्वातन्त्र्येण प्रयोगार्हार्थवत्त्वा-भावात् । सरूपसूत्रे भाष्ये सुबन्तानामित्यनेनेदमेवोपलक्ष्यतेइतिस्पष्टमेव कैयटेनो-क्तमिति बोद्धव्यम् ॥ पुरुषावित्यादेरिति ॥ तत्पूर्वभागस्योत्तरपदत्वे चेति निषेधेना-ऽपदत्वात् । परस्य तत्प्रकृतिकप्रत्ययत्वाभावादिति भावः ॥ अर्थवत्त्वेनैवेति ॥ उत्तरपदस्य कार्यित्वाभावेन तन्निषेधाप्रवृत्तेश्चेत्यपि बोद्धव्यम् ॥ वाक्यस्येति ॥ कृदन्तत्वादिति भावः । तदाह ॥ कृदिति ॥ न चास्य भुजौ करणत्वेनोपदंशं प्रति

स्यापि ग्रहणादितिचेन्नैवम् । समासग्रहणकृतनियमेन परत्वाद् बाधात् । एवञ्च, कृत्तद्धितेति सूत्रे कृद्ग्रहणपरिभाषा नोपतिष्ठत एव निष्फलत्वादिति तत्त्वम् । यत्तु वदन्ति । समासग्रहणं न नियमार्थं, किन्तु विध्यर्थमेव । अर्थवत्त्वं हि वृत्तिमत्त्वम् । वृत्तिश्च द्विधा । शक्तिर्लक्षणा च । न च सा समासेऽस्तीति । अत्रेदं वक्तव्यम् । सिद्धान्ते तावदेकार्थीभावाभ्युपगमाद् वृत्तिर्नास्तीति बाधितमेव । मीमांसकमतेऽपि लक्षणाऽस्त्येव । यदाहुः— सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति च स्थितमिति । अथ नैयायिकरीत्योच्यते । तदपि न । बहुपटव इत्याद्यसिद्धेः । तद्धितग्रहणं तद्विशिष्टपरामिति चेन्न । पचतकीत्यादावतिव्याप्तेः । किञ्चैवं कृद्ग्रहणपरिभाषया मूलकेनोपदंशमित्यादावतिव्याप्तिर्दुर्वारैवेत्यास्तां तावत् । चकारोऽनुक्तसमुच्चयार्थः । तेन निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्येति गतार्थम् । येषां द्योत्योऽप्यर्थो नास्ति तदर्थमिदम् । अवद्यति । अनुकरणेषु तु अनुकार्येण सहाऽभेदविवक्षायामर्थवत्त्वाभावादेव न प्रातिपदिकत्वम् । भू सत्तायामिति यथा । भेदविवक्षायां तु संज्ञा स्यादेव । भुवो वुगिति यथा ॥

न कारकत्वम् । मूलकस्योपदंशे कर्मत्वेनान्वयो, विभक्तिस्तु प्रधानानुरोधिकरणत्वकृता तृतीयैवेति तं प्रत्यपि कारकत्वमित्याशयात् ॥ परत्वाद् बाधादिति ॥ नियमस्यार्थतो निषेधेऽपि तात्पर्येणार्थवत्सूत्रापवादस्यास्य परत्वेन कृदन्तत्वप्रयुक्तस्यापि निषेधे तात्पर्यादिति भावः । निषेधानां बलवत्त्वाच्चेत्यपि बोध्यम् ॥ निष्फलत्वादिति ॥ स्पष्टं चेदं पुंयोगादिति सूत्रे भाष्यकैयटयोः ॥ न च समासे इति ॥ नापि वाक्ये इति बोध्यम् ॥ एकार्थीभावेति ॥ एकोपस्थितिनियामिका समुदायशक्तिरेवैकार्थीभाव इति भावः । एवं समासे वृत्तिः सिद्धा । वाक्येऽपि शक्तिरस्ति । विशेषणविशेष्यभावांशे तच्छक्तेरर्थवत्सूत्रभाष्यादावुक्तत्वात् ॥ लक्षणेति ॥ वृत्तौ वाक्ये चेति भावः ॥ असिद्धेरिति ॥ समास इव तद्धितेऽपि शक्तिलक्षणयोरभावादिति भावः ॥ पचतकीत्यादाविति ॥ न च पूर्ववर्तित्वोत्तरवर्तित्वाभ्यामेव वैशिष्ट्यं निवेशनीयम् । विनिगमनाविरहेण मध्यवर्तित्वस्यापि ग्रहणापत्तेरित्याशयात् । किञ्च बहुपटवस्तिष्ठन्तीति वाक्यस्यापि संज्ञापत्तिः ॥ एवं— समासग्रहणस्य नियमार्थत्वाभावे ॥ न चार्थवत्त्वाभावाद्वारणम् । न्यायनये उत्तरसूत्रे तदसम्बन्धात् । तृतीयाप्रभृतीनीति तु स्वरे विशेषार्थम् ॥ अभेदविवक्षायामिति ॥ सादृश्यमूलाभेदविवक्षायामित्यर्थः । अनुकरणं च स्वसादृश्येनानुकार्यमुपस्थापयति तथोपस्थितस्य शाब्देऽन्वयप्रतियोगित्वं व्युत्पत्तिवैचित्र्यात् । एवञ्च वृत्त्यर्थबोधकत्वरूपार्थवत्त्वाभाव इति भावः । अत एव भू सत्तायामित्यादिनिर्देशाः सङ्गच्छन्ते । तदाह ॥ भू इति ॥ अपदं न प्रयुञ्जीतेत्यस्यापरिनिष्ठित-

लिङ्गविशिष्टस्येति ॥ लिङ्गबोधकप्रत्ययाविशिष्टस्यापीत्यर्थः । परिभाषायाः प्रयोजनं तु अयस्कुम्भी । अतः कृकमीति सत्वम् । तद्धि कंसादितरपदेषु विधीयते । किञ्च । कुमारीमाचष्टे कुमारयति । णाविष्ठाविति टिलोपः । एवं, यामिनयन्त्य इनीत्यत्र आचारे किबपि फलम् । ङ्याब्भ्यां प्रागिति । तेन लोहिनिका आर्यका च सिद्ध्यति । तथा हि । स्वार्थिकत्वेनाऽन्तरङ्गः परश्च लोहितान्मणाविति कन् ङीपं बाधेत । ततो लोहितिकेत्येव स्याद्, इष्यते तूभयम् । ङीब्ग्रहणसामर्थ्यात्तु ङ्यन्तात् कानिरूपद्वयं सिद्धम् । वर्णादनुदात्तादित्यस्य वैकल्पिकत्वात् । आर्यशब्दात्तु, न सामिवचने इत्यत्र ज्ञापयिष्यमाणोऽत्यन्तस्वार्थिकोऽपि कन् आब्ग्रहणसामर्थ्यात् पूर्वं न प्रवर्त्तते । तेनोदीचामातः स्थाने यकपूर्वाया इति इत्वविकल्पः सिद्ध्यति । स्यादेतत् । एवं सति बहुगोमत्केति न सिद्ध्येत् । बहुगोमच्छब्दात् कपः प्रागुगिल्लक्षण-

---

मित्यर्थः । अस्य चास्मादेव लिङ्गात् परिनिष्ठितत्वम् ॥ भेदविवक्षायामिति ॥ अर्थवत् शब्दोऽपि वृत्तिविषय एवैतत्पक्षे इति भावः । अयं पक्षो, मतौ छः सूक्ष्मेति सूत्रे भाष्ये । अनयोश्च लक्ष्यानुरोधाद् व्यवस्थेति दिक् ॥

विशिष्टस्यापीत्यर्थ इति ॥ प्रातिपदिकत्वतद्व्याप्यधर्माणां लिङ्गप्रत्ययाविशिष्टेऽतिदेशादिति भावः । स्पष्टं चेदं बहुव्रीहेरूधस इत्यत्र भाष्ये । इयं च प्रातिपदिकसामान्यग्रहणे तद्विशेषग्रहणे च । तद् ध्वनयन्नाह ॥ अयस्कुम्भीति ॥ किञ्चेत्यादि च ॥ उत्तरपदेति ॥ अत्र च ङ्यन्तमुत्तरपदमिति भावः ॥ टिलोप इति ॥ इदमुपलक्षणं पुंवत्त्वस्य णिचश्च । सामान्यग्रहणेऽपि प्रवृत्तेरेवानया परिभाषया ङ्याब्ग्रहणवैयर्थ्यं भाष्ये शङ्कितम् । न च दृष्टा माला दृष्टा गौरीति समुदायस्यानुपसर्जनस्त्रीप्रत्यये तदादिनियमाभावाद् ङ्याबन्तत्वेन ततः सुबुत्पत्त्यर्थं तदस्तु । लिङ्गविशिष्टपरिभाषया तु नात्र सिद्धिः । ङ्याब्रहितस्य, दृष्टा माला इत्यादेः समुदायस्य प्रातिपदिकत्वाभावेन तदतिदेशासम्भवेः । एवञ्चाम् दृष्टा माला देवदत्तेत्यादावेकपदान्तरितत्वेनैकान्तरतापत्तिरिति वाच्यम् । एतद्भाष्यप्रामाण्येन प्रातिपदिकसाहचर्येण च पृथगर्थोपस्थापकविभक्त्यन्तानवयवकङ्ग्याबन्तस्यैव ग्रहणेनादोषात् । प्रत्येकमपि पदत्वसत्त्वेनैकान्तरत्वाभावाच्च । उत्तरसङ्ख्यायाः पूर्वसङ्ख्याबाधकत्वात् । नियमार्थं तु न । त्यूङन्ते दोषापत्तेः । कुत्सार्थकस्वार्थिकानां, कुत्सित इति सूत्रस्थभाष्योक्तरीत्या ङ्याबन्तादुत्पत्तेः सिद्धत्वादत्यन्तस्वार्थिके फलमाह ॥ तथा हीत्यादिना ॥ स्वार्थिकत्वेन – अत्यन्तस्वार्थिकत्वेन । परश्चेत्यभ्युच्चयः । एवञ्च लोहिताल्लिङ्गबाधनं वेति न वक्तव्यमिति भावः ॥ विकल्पः सिद्ध्यतीति ॥ अन्यथाऽऽर्यशब्दात् कनि समुदायोत्तरटापैव लिङ्गसम्बन्धबोधनसम्भव [illegible] समुदायादेव टापि कनः पूर्वं

ङीप्प्रसङ्गादितिचेन्नैवम् । अकृत एव समासेऽलौकिकप्रक्रियावाक्ये एव उत्तरपदस्यावयवीभूय [illegible] प्रवर्तते इति वक्ष्यमाणत्वात् । स च विभक्तेः पुस्तादित्येके । [illegible]दि पक्षे तु तद्धितान्तत्वात् सुब्लुकि पुनः सुपि चाकृते समास इति सिद्धान्तः । तस्मादन्तरङ्गादपि तद्धितात् प्राग् ङ्यापोः प्रवृत्त्यर्थं ङ्याब्ग्रहणमिति स्थितम् ॥ यत्त्वाहुः । आब्ग्रहणं स्पष्टार्थ-

---

टाबभावे आतः स्थानिकत्वाभावाद्विकल्पासिद्धिरिति भावः ॥ ङीप्प्रसङ्गादिति ॥ अन्यपदार्थस्य स्त्रीत्वादिति भावः ॥ अकृत एवेति ॥ इदं गोस्त्रियोरिति सूत्रे भाष्ये स्पष्टम् । समासान्ता इत्यत्र तादर्थ्यात्ताच्छब्द्यमिति हि तत्र भाष्यम् । अलौकिके प्रक्रियावाक्ये एवेत्यस्य, प्रवर्त्तत इत्यनेनान्वयः । क्व प्रवर्त्तते, तत्राह ॥ उत्तरपदस्येति ॥ अनन्तरमिति शेषः । अवयवीभूयेत्यस्य [illegible]क्यस्येत्यादिः । एतत्स्वरूपकथनम् । अवयवत्वे प्रमाणमाह ॥ समासान्त इति ॥ तच्छब्दवाच्यत्वादिति भावः । समासस्यैवायमन्तावयव इत्यन्त इति सूत्रे भाष्ये स्पष्टम् ॥ इत्येके इति ॥ अत्रारुचिबीजं तु समासार्थवाक्यस्यान्त इति गोस्त्रियोरिति सूत्रस्थभाष्यस्य वाच्यार्थविरोधः । न हि सुब्रहितं समासार्थं, किं तु तद्विशिष्टमेव । किञ्च ततः पूर्वं कापि ततः समाससंज्ञायां सुब्लुकि टापि बहुचर्मिकेत्यादावापः सुपः परत्वादित्वानापत्तिः । विभक्त्यन्तेऽन्यपदार्थबोधकत्वारोपेण स्त्रीत्वबोधकत्वस्य तदन्ते सत्त्वात् सुब्लुकः पूर्वं कबन्ताट्टाबिति वक्तुमशक्यमिति ॥ परस्तादिति पक्षे त्विति ॥ न च विशिष्टस्य सुबन्तत्वाभावेन सुबन्तात्तद्धित इति सिद्धान्तविरोधः । तेषामतिरिक्तार्थाभावेन, परिपूर्णं पदमिति न्यायाविषयतया तस्य सिद्धान्तस्य समासान्तविषयेऽभावात् । एवञ्च समासान्तेषु ङ्याप्प्रातिपदिकादित्यस्यासम्बन्ध एव । तस्यामवस्थायां वाक्यस्य प्रातिपदिकत्वाभावादिति भावः ॥ तद्धितान्तत्वादिति ॥ प्रातिपदिकत्वेनेति शेषः ॥ पुनः सुपि चाकृते इति ॥ प्रत्ययलक्षणेन सुबन्तत्वात् समाससंज्ञा । कपस्तद्धाक्यावयवत्वेन तद्ग्रहणेन [illegible]त्थ ग्रहणम् । सुपि च कृते इति क्वाचित्कः पाठः प्रामादिकः । यद्यपि तत्र पाठे अलौकिकविग्रहवाक्येऽपि अन्यपदार्थान्तर्भावेण एकार्थीभावारोपात् स्त्रीत्वसत्त्वेन पूर्वं टापि ततः सुपि आपः सुपः परत्वाभावाद् बहुचर्मिकेत्यत्रेत्वसिद्धिरस्ति, तथापि तदुत्पत्तिपर्यन्तं समाससंज्ञाया अप्रवृत्तौ मानाभावात् । न च सुबन्तत्वाभावः । अनेन सुपा समुदायस्य सुबन्तत्वेऽपि उत्तरपद[illegible]स्य तत्त्वाभावात् । पूर्वपदस्य सुबन्तताया: प्रत्ययलक्षणेनैवोपपाद्यत्वात् । एवञ्च पूर्वं तत्करणे फलाभावः । बहिर्भूतसङ्ख्याकारकसापेक्षसुपस्तस्यामवस्थायां तदनभिव्यक्त्याऽप्रवृत्तेश्च । वस्तुतस्तु तद्धितान्तत्वनिमित्तप्रातिपदिकसंज्ञासमकालमेव विरोधाभावेन तत्पूर्वभागस्य समाससंज्ञेति बोध्यम् । यौगपद्यासम्भव एव शास्त्राणां क्रमप्रवृत्त्यङ्गीकारादिति दिक् ॥ यत्त्वाहुरिति ॥ ङीग्रहणन्तु लोहिनिकेत्यर्थमिति

मिति । तदनेन प्रत्युक्तम् । वस्तुतस्तु ङ्याप्योर्ग्रहणं मास्तु, सुबन्तात्तद्धितोत्पत्तौरिति निष्कर्षः । सुपः प्रागेव च ङ्यापौ प्रवर्त्तेते, स्वार्थादिप्रयुक्तकार्याणां क्रमिकत्वस्वीकारादित्यवधेयम् ॥ सुङस्योरिति ॥ सोरुकारोऽर्वणस्रसावित्यत्र विशेषणार्थः । असीत्युक्ते ह्रसकारादावित्यर्थः स्यात् । तथा च, वाजमर्वत्सु पथ उस्रियासु इति न सिद्ध्येत् । ङसेरिकारो, युष्मदस्मद्भ्यां ङसोऽशित्यत्र अस्य ग्रहणं मा भूदिति । यदि तु, एकवचनस्य च इत्यत्र पञ्चम्या इत्यनुवृत्तेः परिशेषादन्यस्य ङसोऽत्र ग्रहणं भविष्यतीत्युच्यते तर्हि टाङसिङसामित्येतदर्थः । जश्शसोर्जकारशकारौ, जसः शी, तस्माच्छसो न इत्यनयोर्विषयविभागार्थौ । अन्यतरस्य निरनुबन्धकत्वमेवास्त्विति चेन्न । जसो जकाराभावे औइत्यस्याव् स्यात् । ततश्च प्रत्ययस्य वकारान्तताऽपि सम्भाव्येत । एवं शसः शकाराभावे औटो डित्वं सम्भाव्येत । अतोऽसन्देहार्थं तत्करणौचित्यात् । औटष्टकारः सुडिति प्रत्याहारार्थः । टाटकारस्तु टाङसीति विशेषणार्थः । ङेप्रभृतीनां ङकारो घेर्ङितीतिविशेषणार्थः ।

तद्भावः॥अनेनेति॥आर्यकेत्यस्य साधनेनेत्यर्थः॥सुबन्तात्तद्धितोत्पत्तौ प्रागेव ङ्यापोः प्रवृत्तौ च बीजमाह ॥ स्वार्थादीति ॥ स्वार्थद्रव्यलिङ्गसङ्ख्याकारकेत्यर्थः । स्वार्थः प्रवृत्तिनिमित्तम् । विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् पूर्वं जात्यादिज्ञानं, ततो धर्मित्वेन प्रधानत्वाल्लिङ्गादिभिरप्याकाङ्क्षितत्वात्तदाश्रयज्ञानं, ततः स्वमात्रापेक्षत्वाल्लिङ्गस्य ज्ञानं, ततो विजातीयक्रियाकारकापेक्षया सजातीयपदार्थापेक्षसङ्ख्यायाः प्रथममुपस्थित्या तज्ज्ञानं, ततः कारकरूपविभक्त्यर्थाकाङ्क्षा, तन्निवृत्तौ हि बहिर्भूत कुत्सादियोग इति, कुत्सित इति सूत्रे भाष्ये स्पष्टम्। एवञ्च [illegible] नुरोधेनैव तत्तत्प्रयुक्तकार्यप्रवृत्तेरौचित्येन क्रमिकत्वं स्पष्टमेव। यद्यपि लोकानां बोधो न क्रमेण, तथाऽपि शास्त्रप्रक्रियायां शास्त्रकृत्कल्पितोऽयं क्रमः । अर्थवदुद्देशेन प्रातिपदिकत्वविधानात् । प्रातिपदिकोद्देशेन लिङ्गादौ ङीबादिविधानादिति बोध्यम् । अत एव घकालतनेष्विति चरितार्थम् । स्पष्टं चेदम् अचः परस्मिन्नत्यत्र भाष्यकैयटयोः । एवञ्चैतन्न्यायसिद्धार्थानुवाद एव ङ्याब्ग्रहणम् ॥ अत्यन्तस्वार्थिकानारभ्य तस्य निवृत्तेरुक्तन्यायविषयाभावाच्च समासान्तेषु न दोषः । अत्यन्तस्वार्थिके कन्यार्यिकेत्येव, यद्यभिधानमस्ति । लोहिनिकेत्येतत्सिद्ध्यर्थं च, लोहिताल्लिङ्गबाधनं वेति कार्यमेवेति भावः । स्पष्टं चेदं सूत्रशेषे भाष्ये इत्यन्यत्र विस्तरः ॥ पञ्चम्या इत्यनुवृत्तेरिति ॥ तृतीयाव्यावृत्तये इति भावः ॥ टाङसीति ॥ तत्रेकारानुच्चारणे इष्टस्य यथासङ्ख्यस्यानापत्तिरिति भावः ॥ डित्त्वमिति ॥ ततश्च टिलोपः स्यादिति भावः ॥ विशेषणार्थ इति ॥ तत्फलन्तु, सुपां सुलुगिति त्रेणाकासादेशे इनादेशाभावः ॥ घेर्ङितीति ॥ न च, घेः सुपि गुण

पकारस्तु प्रत्याहारार्थः । एवञ्च सर्वेषां सफलत्वेऽपि संज्ञार्था इति प्राचो ग्रन्थोऽसङ्गत एव । सम्यग् ज्ञानं संज्ञा तदर्थाः विशेषणार्था इति यावत्, इति भङ्क्त्वा व्याख्यानेऽपि क्लिष्टत्वमेवेत्युपेक्षितम् ॥

सुपः ॥ तिङस्त्रीणि त्रीणीति सूत्रात् त्रीणि त्रीणीति पदं, तान्येकवचनेत्यादि सूत्रं च सम्पूर्णमनुवर्तते इति व्याचष्टे ॥ सुपस्त्रीणि त्रीणीत्यादिना ॥ एकश इति ॥ एकैकमित्यर्थः । सङ्ख्यैकवचनाच्चेति वीप्सायां प्रथमान्ताच्छस् । यत्तु प्राचा, एकैकश इत्युक्तम् । तदयुक्तम् । शसैव वीप्सायां उक्तत्वेन द्विर्वचनायोगात् । येन नाप्राप्तिन्यायेन द्विर्वचनापवादः शस् इति सिद्धान्तात् । यत्त्वाहुः । सर्वस्य द्वे इत्यत्र एकैकशो ददातीति भाष्यप्रयोगात्, तान्येकेति सूत्रे एकश इति सूत्रकारनिर्देशाच्चोभयं साध्विति । तन्न । उदाहृतभाष्यस्यान्यविषयत्वात् । यत्र तद्धितेनाऽनुक्ता वीप्सा भवति तत्र द्विर्वचनमित्युपक्रम्य हि, तद्यथा– एकैकशो ददातीति भाष्ये उदाहृतम् । व्याख्यातं च कैयटेन, अल्पार्थोऽप्येकशब्दोऽस्ति, तस्य वीप्सायां द्विर्वचने बह्वल्पार्थादिति शस्प्रत्यय इति । न चैषोऽर्थः प्रकृते संभवतीत्यास्तां तावत् ॥ राम इति ॥ सञ्ज्ञाशब्दोऽयमव्युत्पन्न इति पक्षेऽर्थवत्सूत्रेण प्रातिपदिकसंज्ञा । करणाधिकरणयोश्चेत्यधिकारे घापवादेन हलश्चेति घञ्, रमन्तेऽस्मिन्निति व्युत्पादने तु कृत्तद्धितेति सूत्रेणेति विवेकः ॥

इत्येवास्तु । जसि चेति नियमात्तु नाऽऽङिति प्रवृत्तिरिति वाच्यम् । पतय इत्यर्थं जसिचेत्यस्यावश्यकत्वात् ॥ तान्येकेति ॥ तत्रानुवृत्ततानीत्यस्य लब्धव्याकरणान्तरोक्तप्रथमादिसञ्ज्ञानीत्यर्थः ॥ वीप्सायां द्विर्वचने इति ॥ शसः कारकाद्विधानेन मङ्गलामङ्गलरूपार्थापेक्षणेन च बहिरङ्गतया द्विर्वचने कृते शसिति भावः । यद्यपि क्वचिदुक्तार्थानामपि प्रयोगो भवति तथाऽपि यत्र तद्धितेनानुक्ता वीप्सा भवति तत्र द्विर्वचनमाश्रयथैकैकशोददातीत्यादिभाष्योक्त्याऽल्पार्थैकैकशब्दाद्वीप्सायां द्विर्वचने बह्वल्पार्थादिति शसिति कैयटोक्त्या च प्रकृते तद्वक्तुमशक्यम् । न चैवमृषिसहस्रमेकां कपिलामेकैकशः सहस्रकृत्वो दत्वा तया ते सर्वे सहस्रदक्षिणाः संपन्ना इत्यइउणसूत्रस्थभाष्ये, एकैकश इति प्रयोगासङ्गतिरिति वाच्यम् । एकेति प्रधानार्थकसंबोधनसत्त्वेनैकश इत्यस्य प्रत्येकमित्यर्थकत्वेनादोषात् । एतद्भाष्यप्रामाण्येन स्वार्थिकद्विर्वचनकल्पनापेक्षया मदुक्तस्यैव न्याय्यत्वात् । किञ्च नायं भाष्यप्रयोगः, किन्तु गौण्यप्युत्तरा संख्या पूर्वां संख्यां बाधते इत्यत्र श्रौतो वा स्मार्त्तो वाऽयं व्यवहारो दृष्टान्तत्वेनोक्तो भगवतेति तत्र छान्दसत्वान्न दोषः । एकैकशः पितृसंयुक्तानित्यादिवदितिदिक् ॥ रमन्तेऽस्मिन्निति ॥ योगिन इति शेषः ॥

रूपाणामेकशेष एकविभक्तौ ॥ एकविभक्तौ यानीति ॥ विभक्तिः सारूप्ये उपलक्षणं,न त्वेकशेषे निमित्तम् । एवञ्चानैमित्तिकत्वेन ऽन्तरङ्गोऽयमेकशेषः सुबुत्पत्तेः प्रागेव प्रवर्त्तते । यद्येतन्नारभ्येत तर्हि प्रत्येकं विभक्तिः स्यात्, द्वन्द्वश्च प्रवर्तेत । आरब्धे त्वेकशेषेऽनेकसुबन्तविरहाद् द्वन्द्वस्याप्राप्तिरेव फलिता भवतीति भावः॥ सरूपाण्येवेति ॥ एतच्चोत्तरसूत्रस्थस्यैवकारस्येहाकर्षणाल्लभ्यते । तेन मातृशब्दयोर्जननीवाचिपरिच्छेत्तृवाचिनोर्नैकशेषः । मातृभ्यामित्यादौ सारूप्येऽपि औजसादिषु वैरूप्यात् ॥

इति भाव इति ॥ एतावतैव द्वन्द्वापवाद एकशेष इति व्यवहार इति भावः । एतेनैकशेषस्य स्वफलमपि निरूपितं द्वन्द्वनिवृत्तिरूपम् ॥ उत्तरसूत्रस्थस्येति ॥ वृद्धो यूनेतीत्यर्थः ॥ अनुकर्षणादिति ॥ अनु पश्चात् कर्षणादाकर्षणादित्यर्थः । क्वचिदपकर्षणादित्यपि पाठः ॥ नैकशेष इति ॥ भ्यामादावपीत्यर्थः । भ्यामि स्त्रीपुंसयोस्ताभ्यामित्यनुप्रयोगस्य समत्वात् । एतेनानुप्रयोगविरोधादत्र नैकशेष इत्यपास्तम् । पुमान् स्त्रियेत्येकशेषोऽपि न । तत्राप्येकविभक्तौ सरूपाण्येवेत्यनुवृत्तेः । अत एव प्रातिपदिकैकशेषे मातृमात्रोः प्रतिषेधो वक्तव्य इति वार्तिककृतोक्तम् । ननु वार्तिके प्रातिपदिकैकशेष इत्ययुक्तम् । विभक्त्यन्तानामेकशेषेऽपि जननीमातृधान्यमात्रर्थके मातृभ्यां देहि मातृभ्यां चेत्यत्र प्रतिषेध आवश्यकः । न च तत्पक्षे इष्टापत्तिः । किमुच्यते प्रातिपदिकानामेकशेष इति, न पुनर्यस्यापि विभक्त्यन्तानामेकशेषस्तेनापि प्रतिषेधो वक्तव्यस्तस्यापि ह्येतानि क्वचिद्विभक्त्यन्तानि सरूपाणि मातृभ्यां चेति । अथ मतमेतद्विभक्त्यन्तानां सारूप्ये भावितव्यमेकशेषेणेति भाष्योक्तेरिति वाच्यम् । सूत्रव्याख्यानपक्षभेदेनैकलक्ष्यस्य साधुत्वासाधुत्वयोरनौचित्यात् । अत एवाथ मतमेतदिति प्रतीकमुपादायाभ्युपगमवादेन त्वेतदुच्यते इति कैयटादिभिर्व्याख्यातमिति चेन्न । ईदृशविरुद्धमभ्युपेत्यैव वार्त्तिके तदुक्तेः । अत एव तदुत्तरम्, एवञ्च कृत्वा चोद्यते इत्युक्तं भाष्ये । अस्त्व प्रातिपदिकानामेकशेष इत्यादीति शेषः । अनेन चास्य पूर्वपक्षवार्तिकत्वं स्फुटमेवोक्तम् । तत्र मातृग्रहणं विभक्तौ विरूपाणामुपलक्षणम् । अयं च पूर्वपक्षः प्रातिपदिकैकशेषस्यैकविभक्ताविति पदाभावे एवोपपत्तिं मत्वा कृतः । तदभावे हि यानि सरूपाणि तेषामेकशेष एवेत्यर्थ एव प्राप्नोति । प्रयोगमात्रावच्छेदेन सारूप्यस्य हरिणहरितप्रकृतिकहरिणीशब्दादौ तद्धिते वैरूप्येणासम्भवात्प्रयोगसामानाधिकरण्येनैव सारूप्यं च ग्राह्यतया तस्यात्रापि सत्त्वात् प्राप्तस्य स निषेधः । अत एवाग्रे विभक्तेः सारूप्ये उपलक्षणत्वमित्य तत्पक्षस्थापनेन तत्खण्डनं कृतमित्येवकारापकर्षो भाष्ये ध्वनितः । तं विना तावन्मात्रेण तत्खण्डनाऽयोगात् । एतेनैकविभक्ताविति यावत्यैकविभक्तौ सरूपाणामेकविभक्तौ विवक्षितायामेकशेष इत्यर्थे यस्यां विभक्तावेकशेषस्तस्यां विभक्तौ सरूपाणामित्यर्थस्य

एक एवेति ॥ एतच्च सहविवक्षयामेव प्रवर्तते । इतरेतरयोगद्वन्द्वस्य विषये इति यावत् । यत्र ह्यनेकस्यार्थस्य मिलितस्येतरान्वयः स तथाभूतोऽस्य विषयः । इदश्च, इदितो नुम् धातोरिति लिङ्गाल्लभ्यते न्यायाच्च । तथा हि । यः शिष्यते स लुप्यमानार्थाभिधायीति स्थिते श्रूयमाणैकशब्दोपस्थितं सर्वमविशेषादैकरूप्येणैवान्वेतुमर्हति।यद्वा पूर्वसूत्राद् द्वन्द्वे इत्यनुवर्त्य द्वन्द्वे प्रसक्ते सतीति व्याख्येयम् । स्यादेतत् । द्वन्द्वे कृते सतीत्यर्थोऽस्तु।मैवम् । पन्थानौ पन्थान इत्यादौ समासान्तापत्तेः।करौ करा इत्यादौ एकवद्भावापत्तेः। सर्वे सर्वेषामित्यादौ, द्वन्द्वे च विभाषा जसीत्यनयोरापत्तेश्चेति दिक् ॥

यत्तु प्राचा राम राम औ इति स्थिते इत्युक्तम्, एकविभक्तौ परत इति च । तत्रेत्थमुक्तिसंभवः । राम राम इत्यत्र अवयवयोरिव समुदायस्यापि प्रातिपदिकसंज्ञास्ति। मिलितेनार्थवत्त्वात् । नचाऽर्थवत्त्वेऽपि समासग्रहणस्य नियमार्थत्वान्नैवमिति वाच्यम् । यत्र समुदाये पूर्वो भागः पदं तद्विषयको नियम इत्युक्तत्वात् । बहुपटव इत्याद्यनुरोधेन नियमस्य सजातीयविषयताया औचित्याच्च । तथाचैकाद्द्विर्वचनन्यायेन समुदायप्रातिपदिकादेव द्विवचनाद्युत्पत्तिः । तावताऽप्यवयवार्थानां संख्यान्वयेनानुग्रहसंभवात् । नन्वेवं रामकृष्णावित्यादिष्वपि द्वन्द्वं विनैव समुदायाद्विभक्तिः

प्रत्यासत्त्या लाभेन भ्यामादावेकशेषो नौजसादाविति वार्तिकं व्यर्थमिति तदाऽऽशय इत्यपास्तम् । वार्तिकमते भ्यामादावपि तदभावस्य प्राप्तत्वाच्चेति दिक् ॥

एतच्चेति ॥ एकशेषविधायकं चेत्यर्थः । ध्वनितं चेदं पृथक् सर्वेषां विभक्तिपराणामेकशेष इति पक्षे विभक्त्यन्तानामेकशेष इति पक्षे च द्वन्द्वप्रतिषेधो वक्तव्य इत्याशङ्क्यानवकाश एकशेषो द्वन्द्वं बाधिष्यत इति ग्रन्थेन भाष्ये ॥ इतरेतरेति ॥ एकवद्भास्यान्यतरस्यामित्यनेनैकशेषविषयपदानां समाहारेऽवृत्तिबोधनादिति भावः ॥ इतरान्वय इति ॥ एकरूपेणैकरूपावच्छिन्ने इतरत्रान्वय इत्यर्थः ॥ इदित इति ॥ अत्र ह्यभेदेन परस्परान्वयाद्भेदघटितसाहित्यानिमित्तैकशेषाप्रवृत्तिरिति भावः ॥ ऐकरूप्येणैवेति ॥ पुष्पवन्तपद इवेति भावः ॥ द्वन्द्वे प्रसक्ते इति ॥ विभक्त्युत्पत्तौ सत्यां तत्प्रसक्तिर्बोध्या ॥ एकवद्भावापत्तेरिति ॥ एवञ्चेतरेतरयोगविषयाभावेनैकशेषानापत्तिरिति भावः ॥ इत्यनयोरिति ॥ जसः शीत्यत्र वेति वक्तव्ये विभाषा जसीति तूद्भूतावयवभेदविवक्षया बहुवचने एकशेषद्वन्द्वयोरभावात्तत्र विकल्पवारणायोत्तरार्थं चेति भावः ॥

सजातीयेति ॥ स्वातन्त्र्येण प्रयोगार्हत्वेन साजात्येऽपि न दोषः । एतत्पूर्वभागस्य विभक्त्युत्पात्तिमनपेक्ष्य स्वातन्त्र्येण प्रयोगानर्हत्वात्॥अनुग्रहसंभवादिति ॥

स्यादिति चेन्मैवम् । द्वन्द्वविधावनेकं सुबन्तमित्यस्यानुवृत्त्या एकाज्द्विर्वचन-न्यायस्य बाधादिति दिक् ॥ इत्थमुक्तिसंभवे सत्यपि समुदायादेकविभक्तौ परत इति पक्षः किमर्थमुपेक्षित इतिचेत् । शृणु । अस्मिन् पक्षे मातृमातारौ इत्यादावप्येकशेषः स्यात् । नन्वेकविभक्ताविति व्यर्थं एवकारं चानुकृष्य एकविभक्तौ यानि सरूपाण्येवेति व्याख्येयमिति चेन्न । आवृत्तौ मानाभावात् । विभक्तेरेकशेषस्य विशेषणत्वे फलाभावाच्च । न च पयः पयो जरयतीत्यादिव्यावृत्तिः फलम् । सहविवक्षायामित्यस्यावश्यकत्वात् । अन्यथा पयः पयो नयतीत्यत्र गौणमुख्यकर्मणोरेकशेषापत्तेः । देवदेव इत्यादावतिप्रसङ्गाच्च । प्रत्युत आवृत्त्या उभयविशेषणत्वे भिक्षाणां समूहो भैक्षमिति न सिद्ध्येत् । तथाहि । भिक्षा ३ आम् अ इति स्थितेऽन्तरङ्गानपि विधीन् बहिरङ्ग इति लुकि कृते विभक्तिपरत्वाभावादेकशेषो न स्यात् । लुका लुप्ते प्रत्ययलक्षणाभावात् । किञ्च, रामावित्यादौ परत्वान्नित्यत्वाच्च वृद्धिरेचीत्येकादेशे

अत एव न प्रत्येकं तदुत्पत्तिः ॥ बाधादिति ॥ अन्यथा द्वन्द्वोच्छेदो नलोपाद्यसिद्धिश्चेति भावः ॥ यानि सरूपाण्येवेति ॥ तेषामेकविभक्तौ परत एकशेष इति शेषः ॥ मानाभावादिति ॥ भाष्येऽनुक्तत्वादिति भावः । किञ्चावृत्तौ प्रत्यासत्तिन्यायेन यस्यां विभक्तावेकशेषस्तस्यां विभक्तौ यानि सरूपाण्येव तेषामित्यर्थापत्त्या भ्यामादावेकशेषापत्तिः । प्रातिपदिकैकशेषे मातृमात्रोः प्रतिषेधो वक्तव्य इति वार्तिकेन भ्यामादावपि तदभावस्यैवेष्टत्वानुमानात् ॥ फलमिति ॥ समुदायादेकविभक्तेरभावाद्विभक्तेर्लुका लुप्तत्वाच्चेति भावः ॥ सहविवक्षायामिति ॥ सा च समुदायस्यैकार्थनिरूपितैककारकावेश एव भवतीति भावः ॥ गौणमुख्यकर्मणोरिति ॥ उभयोरपि कर्मत्वेन तत्र समुदायादेकविभक्तेः कर्तुं शक्यत्वेन विभक्तिपदेन व्यावर्त्यासंभवेन सहविवक्षायामित्यावश्यकमिति भावः । नन्वत्रापि लुकि विभक्तिपरत्वाभाव इत्यरुचेराह ॥ देवदेव इति ॥ असहविवक्षायामप्येकशेषे तत्पुरुषादिविषयेऽपि तदापत्तिरिति भावः । तत्रापि समुदायादेकविभक्तेः सत्त्वात् । नन्वनेकबोधकैकभिक्षाशब्दादपि भैक्षसिद्धिरस्तीत्यत आह ॥ तथा हीत्यादि ॥ एकशेषारम्भे एकशेषं विना तादृशस्य ज्ञानासंभव इति भावः ॥ विभक्तिपरत्वाभावादिति ॥ परत्वान्नित्यत्वाच्चादिवृद्धौ सारूप्याभावाच्चेत्यपि बोद्धव्यम् । अविरविकन्यायेन समाधानं तु लक्षणैकचक्षुष्कैर्दुर्ज्ञेयम् । न च समर्थग्रहणेन परिनिष्ठितप्रातिपदिकात्तद्धितोत्पत्तेः पूर्वमेकशेषे पश्चात्तद्धित इति वाच्यम् । प्रातिपदिकाधिकारात् किं तत्समर्थं कृतवर्णानुपूर्वीकमिति भाष्यात् प्रातिपदिकसंबन्धिवर्णमात्राश्रयतत्संबन्धिवर्णनिमित्तकार्येण परिनिष्ठितत्वस्यैवाश्रयणात् । अत एवाद्विमानणिति सङ्गच्छते । अन्यथा प्रकृत्यंशे दीर्घ-

कृते विभक्तिपरत्वाभावादेकशेषो न स्यात् । उभयत आश्रयणेऽन्तादिवद्भावाभावादिति दिक् ॥

यत्तु प्राचा व्याख्यात्रा पक्षान्तरमुपन्यस्तं,सविभक्तिकानामेकशेष इति। तन्न । निवर्तमानानां विभक्त्या सहैव निवृत्तावपि शिष्यमाणे एकवचनश्रवणप्रसङ्गात् । अथोच्येत युगपदधिकरणवचनतायां द्विवचनबहुवचनान्तानामेकशेषः । द्वन्द्वोऽप्येवम् । तथाहि । अजहत्स्वार्थायां वृत्तौ एकैकमनेकार्थाऽभिधायि परस्परसमभिव्याहारात् । तथाच अलौकिके द्वन्द्वैकशेषयोः प्रक्रियावाक्ये द्विवचनबहुवचनयोरेव प्रवेशाद् विभक्त्यन्तानामेकशेष इति पक्षो निर्बाध एवेति । तदपि न । जहत्स्वार्थायां वृत्तौ तदयोगात् । पक्षान्तरेऽपि प्रथमप्रवृत्तस्यैकवचनस्य त्यागायोगात् । अन्यथा षष्ठीतत्पुरुषाद्युच्छेदापत्तेः । तत्रापि पूर्वपदस्य उत्तरपदार्थे उपसंक्रमेण षष्ठ्याद्ययोगात् । तथा च भाष्यम् । सेयं युगपदधिकरणवचनता दुःखा च दुरुपपादा चेति । यदपि

श्रवणं स्यात् ॥ उभयत इति ॥ विभक्तौ परतो यतः प्रत्ययविधिस्तस्यैकशेष इत्यऽर्थात्तदाश्रयणमिति भावः। अचः परस्मिन्निति स्थानिवत्त्वं तु न । लोकसिद्धतन्त्रानुवादकत्वादस्य शास्त्रस्यानुवादसामर्थ्यादेव द्वन्द्वनिवर्तकस्य शास्त्रीयविधित्वाभावात् । अनयाऽपि रीत्याऽन्तवद्भावाप्रवृत्तिरित्यन्यत् । यदि त्वेकदेशविकृतन्यायेन प्राग्दीव्यतोऽणिति सूत्रस्थभाष्यप्रामाण्यात् स्थानषष्ठ्यबोधितविकारस्यापि ग्रहणमशास्त्रीयस्य च तेनातिदेशस्तदा मान्तस्य तेन न्यायेन तत्प्रकृतितया औइत्यस्य च प्रत्ययत्वेनादोषः । अत एव तस्य पदत्वसिद्धिः । अत एव श्रायसावित्यत्रैकादेशे कृते नुममाशङ्क्याचः परस्मिन्निति स्थानिवत्त्वेन परिहृतं भाष्ये इत्युच्यते तर्हि वैरूप्यादेकशेषो न स्यात् । विरूपाणामित्यनेन तत्साधने तु न दोष इत्यलम् ॥ युगपदाधिकरणेति ॥ युगपदधिकरणानां द्रव्याणां वचनं यैः पदैस्तद्भाव इत्यर्थस्तदाह ॥ एकैकमित्यादि ॥ अलौकिके इति ॥ तत्रैव द्वन्द्वादिप्रवृत्तिसत्त्वात् । तत्रापि तत्कल्पनादिति भावः । रामकृष्णावित्यादौ विरूपाणामपीत्येकशेषस्तु न । द्वन्द्वविधानसामर्थ्येन तत्प्राक्कालिकस्यैव समानार्थत्वस्य तत्र निमित्तत्वात् । एवं चैकस्य विभक्त्यन्तस्य निवृत्तावपरस्य तद्विशिष्टस्य श्रवणमिति भावः ॥ पक्षान्तरेऽपीति । अयं भावः । अलौकिके तत्कल्पनेऽपि प्रत्येकं सुबुत्पत्त्यनन्तरमेव तत्कल्पना । तदनन्तरमेव तत्कल्पकद्वन्द्वैकशेषयोः प्रवृत्तेः । एवञ्चान्तरङ्गत्वादुत्पन्नैकवचनत्यागेन द्विवचनाद्युत्पत्तौ मानाभाव इति ॥ उत्तरपदार्थे उपसंक्रमेणेति ॥ उपसंक्रमश्च तदालिङ्गितस्यैव स्वार्थस्योपस्थितिः । सा च विभक्त्यर्थसम्बन्धाद्यन्तर्भावेणैवेति तस्योक्तया तदनापत्तौ तदुच्छेद इति भावः ॥ दुःखा चेति ॥ वृद्धव्यवहारस्य शब्दार्थनिश्चयहेतुत्वम् । न च प्लक्ष-

व्याचख्युः । व्यक्तिपक्षे यावद्व्यक्ति तत्तच्छब्दप्रयोगे प्राप्ते एकस्यैव प्रयोगो यथा स्यादिति सूत्रम् । आकृतिपक्षे तु एकेनैवाकृत्यविनाभूतानेकव्यक्तिलाभादनर्थकमिति । तन्न । व्यक्तिपक्षेऽपि न ब्राह्मणं हन्यादित्यत्र ब्राह्मणशब्देनैवान्येनाप्यनेकस्य तन्त्रेण सुवचत्वात् । अन्यथा जातिपक्षेऽपि, वासेन सम्यक् क्षमयोश्च तस्मिन्, इत्यादिनानार्थानुरोधेन सूत्रं विना अनिर्वाहात् । तस्माज्जातिव्यक्तिपक्षयोरुभयोरपि तन्त्रेण प्रयोगान्निर्वाहेऽपि सर्वत्र तन्त्रेणैव बोधनीयमिति नियामकाभावात् पाक्षिको द्वन्द्वः सूत्रं विना दुर्वारः। घटोऽयं घटोऽयमिति नानाशब्दप्रयोगदर्शनात्तद्वद्घटघटाविति द्वन्द्वस्य न्यायप्राप्तत्वात् । न चैवमपि घटकलशाविति द्वन्द्वापत्तिः । विरूपाणामपि समानार्थानामिति वार्तिकात् । रूप्यते बोद्ध्यत इति व्युत्पत्त्या रूपशब्दस्य अर्थपरत्वमाश्रित्य वार्तिकार्थस्यापि सूत्रेणैव क्रोडीकाराच्च । तस्माद् घटघटौ

शब्दस्य न्यग्रोधाभिधायित्वं वृद्धव्यवहारे दृश्यते । न्यग्रोधशब्देन तल्लाभाच्च न लक्षणाऽपि । प्लक्षन्यग्रोधावित्यादौ बोधावृत्त्यननुभवाच्च ॥ दुरुपपादा चेति ॥ न च द्विवचनाद्यनुपपत्तिस्तदुपपादिका । समासस्योद्भूतावयवभेदसमुदायाभिधानशक्तिमत्त्वाद् द्विवचनादिसिद्धा तदनुपपत्तेस्तदुपपादकत्वाभावात् । समुच्चयान्वाचययोः समासस्यासामर्थ्यनैव वारयिष्यमाणतया न तदापत्तिरेतदुपपादिका । न चान्यत्रोपपादयितुमशक्यत्वेऽपि एकशेषे कस्य शेष इत्यत्र विनिगमकाभावात् सर्वेषां सर्वार्थत्वमावश्यकम् । तथा सत्येकशेषस्यैव वैयर्थ्यापत्तेः। तस्मादेकशेषज्ञानोत्तरं शास्त्रवासनावतां तच्छक्तिज्ञानं, न तु ततः प्रागपीति न दोषः ॥ आकृत्यविनाभूतेति ॥ नियमेनाकृतिसंबद्धेत्यर्थः । ब्राह्मणशब्देनेवेति भावः । न हि तत्रैकशेषः। तावद्ब्राह्मणशब्दज्ञानासंभवात्। तस्मात्तत्र जातिपक्षेण तन्त्रेण वा यथा निर्वाहस्तथान्यत्रापीति भावः । न ब्राह्मणमित्येकवचनं त्वार्षम् ॥ तन्त्रेण सुवचत्वादिति ॥ अयं भावः ॥ भाष्येऽर्थावर्थौ प्रति यदर्थान् अर्थान् प्रति च यत्तदपि प्रत्यर्थमेवेत्युक्तम् । एवञ्चैकेनानेकार्थबोधनमपि प्रत्यर्थमेवेति एकेनैव ब्राह्मणपदेनानेकार्थबोधनं तत्र । अन्यथा अविद्यमानायाः शक्तेरेकशेषशास्त्रसहस्रेणापि उपपादयितुमशक्यतया बोधानुपपत्तिरेव स्यात् । तन्त्रं चात्रार्थतन्त्रम् । एकत्रैव शब्देऽनेकार्थानां सत्वाच्छब्दस्य पर्यायपरिवृत्तिसहतयाऽर्थतन्त्रमेवैतत् । अक्षा इत्यादौ तु तदसहतया शब्दतन्त्रमेव ॥ अन्यथा—तन्त्रानङ्गीकारे ॥ क्षमाशब्दः क्षान्तिभूम्योर्वाचकः ॥ नानार्थानुरोधेनेति ॥ सूत्रमावश्यकं तत्रेति शेषः ॥ न्यायप्राप्तत्वादिति ॥ अनभिधानमाश्रित्य तु भाष्ये पक्षद्वयेऽपि सूत्रं प्रत्याख्यातमित्यन्यत् । अनेकघटादिपदानां चार्थे वृत्तिरेव न।

षटकलशावित्यादिपाक्षिकानिष्टवारणाय पक्षद्वयेऽपि सूत्रमावश्यकमित्यवधेयम् । एवं स्थिते सूत्रवैयर्थ्यमेव हृदि निधाय यदिह व्याचक्षुः । नानेनैकशेषो विधीयते इत्यादि । यच्च समुदायादेकस्यां विभक्ताविति पक्षं प्रत्याख्याय पुनराहुः । राम राम औ इति स्थिते इति । अलौकिकमेतत्प्रक्रियावाक्यमूह्यते, न तु लौकिकम् । अलौकिके च विभक्त्येकादेशादिकार्यं न प्रवर्तते । प्रयुक्तानामेवान्वाख्यानादित्यादि । तत् सर्वं सन्दर्भविरुद्धं न्यायविरुद्धं च । प्रयुक्तानेव ह्यन्वाख्यातुमलौकिकमुत्प्रेक्ष्यते । शास्त्रीयकार्यं च सर्वमलौकिकेष्वेव प्रवर्तते, न तु परिनिष्ठिते । प्रथमयोः पूर्वसवर्ण इत्यादीनां प्रवृत्तिं विना परिनिष्ठितरूपालाभात् । परिनिष्ठिते तत्प्रवृत्तेर्दुरुपपादत्वाच्चेत्यास्तां तावत् ।

अमि पूर्वः ॥ अम्यचीति ॥ अमि योऽच् तस्मिन् अमोऽवयवेऽचीति यावत् । तेन मकारसहितस्य न पूर्वरूपम् । एवम् अक्षादूहिन्यामित्यादावपि ऊहिन्यां योऽच् तस्मिन्नित्यादि बोद्धव्यम् । इको यणचीत्यञ्ग्रहणस्यानुवृत्तेर्निर्विवादत्वात् । पदास्वैरिवाह्येत्यादिनिर्देशाश्चेह लिङ्गम् ॥

अनभिधानादिति द्वन्द्वाप्राप्तिरेवेति तदाशयः ॥ आवश्यकमिति ॥ अनभिधानाज्ञाने इति शेषः ॥ नानेनैकशेषो विधीयते इति ॥ किन्तु न्यायसिद्ध एवानूद्यते इति एतच्छेषस्तदग्रन्थे ॥ प्रयुक्तानामिति ॥ अयं भावः । वृद्ध्यादिप्रवृत्तावेकशेषशास्त्राऽप्रवृत्या नित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वेन तदेव परिनिष्ठितं स्यात् । तच्च न लोके प्रयुज्यते । प्रयुक्तानां चेदमन्वाख्यानमिति न तत्प्रक्रियावाक्ये वृद्ध्यादिप्राप्तिरिति ॥ सन्दर्भविरुद्धमिति ॥ एकस्यैव प्रयोगो यथा स्यादिति सूत्रमिति समुदायादेकविभक्ताविति पक्षः प्रत्याख्यात इति च सन्दर्भ इत्यर्थः । न्यायविरोधमाह ॥ प्रयुक्तानेवेति ॥ न च यद्यादृशशास्त्रीयकार्यप्रवृत्त्या परिनिष्ठितं सल्लोके प्रयोगार्हं कल्पिते तदीयालौकिके तच्छास्त्रप्रवृत्तावपि अत्र वृद्ध्यादिप्रवृत्तिर्नोचिता वैषम्यादिति वाच्यम् । कृतद्वन्द्वानामेकशेष इति पक्षे नावावनड्वाहावित्यादौ परत्वादिना आवादौ कृते एकशेषानापत्तेरिति दूषणदानपरभाष्यवार्तिकासङ्गत्यापत्तेरित्यलम् ॥

अमि योऽजिति ॥ अवयविन आधारत्वविवक्षायां वृक्षे शाखेतिवत् सप्तमी । तदाह ॥ अमोऽवयवेऽचीति ॥ पूर्वपरयोरित्यधिकृत्य शास्त्रेण विशेष्यत्वादजेव गृह्यते इति बोद्धव्यम् ॥ निर्विवादत्वादिति ॥ उत्तरानुवृत्तेः सत्त्वादिति भावः ॥ लिङ्गमिति ॥ अनुवृत्तावनुवृत्तस्य विनियोगे चेत्यर्थः । स्पष्टं चेदमौतौमशास्त्रोदिस्युपक्रम्य प्रत्ययलक्षणसूत्रे भाष्ये ॥

तस्माच्छसः ॥ तच्छब्देन सन्निहितः पूर्वसवर्णदीर्घः परामृश्यते । शस इत्यवयवषष्ठी । स चावयवः परत्वेन विशेष्यते । पूर्वसवर्णदीर्घात् परस्य शसोऽवयवस्येति । तदेतदाह ॥ परो यः शसः सकार इति ॥ परो यः शस् इति तु नोक्तम् । असंभवात् । न हि कृते पूर्वसवर्णदीर्घे परः शस् संभवति ॥

अट्कुप्वाङ् ॥ रषाभ्यामिति पञ्चमीनिर्देशाद् व्यवहितस्याप्राप्तौ वचनमिदम् । अत्र सर्वैवर्ण्यवायोऽसंभवी । एकैकमात्रव्यवाय इत्यपि नार्थः । क्षुभ्नादिषु क्षुभ्नशब्दपाठसामर्थ्यात्, सरूपाणामित्यानिर्देशाच्चेत्यभिप्रेत्याह ॥ व्यस्तैर्यथासंभवमिलितैश्चेति ॥ नन्वेवम् आदर्शेनेत्यादौ अतिप्रसङ्गः । न च अडादिभिरेव व्यवधाने इति नियमः । अप्राप्ते विधिरयमित्युक्तत्वात् । सत्यम् । योगविभागोऽत्र बोद्धव्यः । व्यवायेऽपीत्येको योगो विध्यर्थः । अट्कुप्वाङ्नुम् इत्यन्यो नियमार्थः । छान्दसो भिसो लुक् ॥ निषेधं बाधितुमिति ॥ तेन पर्याणद्धमित्यत्र, उपसर्गादसमासेऽपीति णत्वं सिद्ध्यतीति भावः ॥ नुम्ग्रहणमिति ॥ तत्स्थानिकस्य स्वाभाविकस्य चानुस्वारमात्रस्योपलक्षणमित्यर्थः । तेन, बृहि वृद्धौ । इदित्वान्नुम् । तस्यानुस्वारः । तृंह हिंसायाम् । स्वाभाविकोऽत्रानुस्वारः । बृंहणम् । तृंहणम् । उभयत्रापि णत्वं सिद्धम् । इवि प्रीणने । प्रेन्वनम् । इह, कृत्यचः, इजादेः सनुम इति णत्वं न । यथा, नक्षत्रं दृष्ट्वा वाचं विसृजेदिति विधौ नक्षत्रदर्शनस्य कालविशेषोपलक्षणत्वात् सत्यपि दिवा नक्षत्रदर्शने वाङ् न विसृज्यते । उपलक्षितस्य कालविशेषस्याभावात् । रात्रौ असत्यपि नक्षत्रदर्शने विसृज्यते । तस्य

अवयवषष्ठीति ॥ अवयवावयविभावसंबन्धबोधिका षष्ठीत्यर्थः ॥ निर्देशाच्चेति ॥ नुम्ग्रहणाच्चेत्यपि बोद्धव्यम् ॥ नियमार्थ इति ॥ स च साजात्यादाक्षरसमाम्नायिकविषयकः । अतो नृणामित्यादावुत्तराङ्भागेन व्यवधानेऽपि णत्वसिद्धा, ऋवर्णान्नस्येति वचनं न कार्यमिति भावः । इदं प्रत्याहाराह्निके प्रकृतसूत्रे च भाष्ये स्पष्टम् । यद्यपि रषाभ्यामिति पञ्चम्योपस्थितनिर्दिष्टपदस्य, व्यवाये इत्यनेनाविरोधायाडाद्यतिरिक्ताव्यवहितपरतयाऽऽदर्शेनेत्यादौ णत्वं सुशकंवारणम् । ध्वनितं चेदं प्रकृतसूत्रे वार्त्तिककृता, तथाऽपि तत्र नृणामित्यर्थं वचनारम्भे गौरवनिरासाय मूलकृता ॥ स्वाभाविकस्येति ॥ तद्भिन्नस्थानिकस्य पाणिन्युच्चारितस्येत्यर्थः । तृंह इत्यादेरपि नकारजावनुस्वारेति वृद्धोक्तेर्नस्थानिकत्वात् । अत एव तृंह इत्यस्य नलोपे तृढ इत्यस्य सिद्धिः ॥ इवि प्रीणने इति ॥ हिवि दिवीति दण्डकपठितस्येदं निष्कृष्य ग्रहणम् । प्रेन्वनमित्यादौ नुमो नस्य

सत्त्वात् । तथेहापि बोद्धव्यम् । नन्वेवं नुम्ग्रहणं व्यर्थम्, अनुस्वारस्याद्त्वेनैव संग्रहात् । उरःकेणेत्यादौ विसर्गजिह्वामूलीयादिव्यवधाने ह्येवैव गतिरिति चेत् सत्यमित्याह ॥तच्चेति॥ स्यादेतत् । उक्तरीत्या नुम् विसर्जनीयेति सूत्रेऽपि नुम् ग्रहणं त्याज्यं स्यात् । तत्राप्यनुस्वास्य लक्षणीयत्वात् । अन्यथाऽसम्भवात् । न हि षत्वप्रवृत्तिवेलायां सर्पींषीत्यादौ नुम् लभ्यते । षत्वस्यासिद्धत्वेन ततः प्रागेवानुस्वारप्रवृत्तेः । यद्यपि सुहिन्सु इत्यत्र सम्भवत्येव, तथापि तत्रैवातिव्याप्तिं वारयितुं लक्ष्यानुरोधान्नुम्स्थानिकेऽनुस्वारे लक्षणाऽऽश्रयणीयैव । व्याख्यानात् । तस्य चं शत्वेन तद्व्यवाये षत्वस्य सिद्धत्वादितिचेत् । मैवम् । उक्तरीत्या तत्रत्यविसर्गग्रहणस्य प्रत्याख्यानसम्भवेऽपि नियमार्थं नुम्ग्रहणम् । तथा हि । अनुस्वारेण व्यवधाने चेत् षत्वं तर्हि नुम्स्थानिकेनैवेति नियम्यते । तेन पुंस्वित्यादौ षत्वं नेति दिक् ॥

यस्मात् प्रत्ययविधिः॥ अत्र प्राचोक्तम् । यस्माद्धातोः प्रातिपदिकाद्वेति । तन्न । तिङन्तादीनामपि तरबादिकं प्रत्यङ्गत्वात् । सङ्कोचस्य निर्मूलत्वात् । आमुष्यायण इत्यादौ वृद्ध्यभावापत्तेश्च । न हि प्रातिपदिकादयं तद्धितः, किन्तु सुबन्तादिति दिक् ॥

अतो भिस ऐस् ॥ नन्वेस् इत्येवास्तु । न च अतो गुणे इति पररूपापत्तिः । एकारोच्चारणवैयर्थ्यापत्तेः । अन्यथा इसमेव विदद्ध्यादितिचेत् सत्यम् । एदैतोर्द्विमात्रत्वाविशेषेण गौरवाभावादैस् कृतः । एवञ्च पररूपशङ्कैव नास्तीति महल्लाघवम् । यत्त्वाहुः । ऐस्करणं निर्जरसैरित्यैकारश्रवणार्थमिति । तद्भाष्यविरुद्धम् । सन्निपातपरिभाषया जरसादेशाप्रवृत्तेर्निर्जरैरित्येव भाष्ये सिद्धान्ततत्वात् ।

नामि ॥ परिभाषाविरोधादिति ॥ एतच्च रुधादिभ्यः श्नमिति सूत्रे

श्नुम्नादित्वाण्णत्वाभावः ॥ इति दिगिति ॥ तद्वदत्र तु न वक्तुं शक्यम् । तृंह इत्यस्य तृंहणमित्यसिद्धेः । स्पष्टं चेदं भाष्ये ॥

अङ्गत्वादिति॥तदनङ्गीकारे ह्यपाचितरामित्यादौ चिणो लुगापादनादिपरभाष्यविरोधः । चिणः परस्याङ्गसंज्ञानिमित्तस्य प्रत्ययस्य लुगित्यर्थात् ॥ दिगिति ॥ दिगर्थस्तु— याथाकथाचमित्यादौ, यथाकथाचहस्ताभ्यां णयतावित्यनेन वचनसामर्थ्येन निपातसमुदायात् प्रत्ययेऽङ्गत्वानापत्तौ वृद्ध्यनापत्तेरित्यलम् ॥

ऐस्कृत इति ॥ नद्यैरित्यादिसिद्ध्ये उत्तरार्धं तदित्यन्ये ॥

नलोप इति सूत्रे च भाष्यकैयटयोः स्पष्टम् ॥ आरम्भसामर्थ्यादिति ॥ सुपि चेत्यस्य तु न सामर्थ्यम् । रामाभ्यामित्यादौ सावकाशत्वादिति भावः । एवञ्च रामशब्दे नामीत्यस्योपन्यासो लेखकप्रमादादिति यदुच्यते तच्चिन्त्यम् ॥

आदेशप्रत्यययोः ॥ एकाऽपि षष्ठी विषयभेदाद्भिद्यते इत्याशयेन व्याचष्टे ॥ आदेशः प्रत्ययावयवश्चेति ॥ यदि तु आदेशावयवो गृह्येत तर्हि तिसृणामित्यादौ दोषः । यदि च प्रत्ययो यः सकार इति, तर्हि रामेष्वित्यादौ न स्यात् । यद्यप्येवं वैरूप्येण व्याख्याने सहविवक्षाविरहाद् द्वन्द्वो न युज्यते, तथाऽपि सौत्रत्वाद् बोद्धव्यः ॥ [illegible]स्येति ॥ यत्तु वदन्ति सकारस्य सोष्मणोऽघोषस्यान्तरतमः ष एव मूर्धन्य इति । तन्न्यूनम् । ठकारेऽतिप्रसङ्गात् । तथाच प्रातिशाख्यम्— वर्गे वर्गे च प्रथमावघोषौ युग्मौ सोष्माणावनुनासिकोऽन्त्य इति । न च दधिसेच इत्यादौ प्राक् सुबुत्पत्तेः समासे षत्वं वारयितुं पदादिरिति पञ्चमीसमासो भाष्ये उक्तः । ततश्चेहापि

स्पष्टमिति ॥ सुपि चेत्यपेक्षया नामीति तत्र नित्यमित्यपि ध्वनितम् ॥ विषयभेदादिति ॥ तन्त्रेण षष्ठीद्वयोच्चारणाद् आदेशरूपसस्य स्थाने प्रत्ययावयवसस्य स्थाने च षो भवतीत्येवंरूपः षष्ठीभेद इत्यर्थः । ओस् सम्बन्धद्वयार्थक इत्यभिमानः ॥ तिसृणामिति ॥ तिस्रादेशे सकारोच्चारणन्तु तिस्र इत्यत्र,न रपरेति षत्वनिषेधे चरितार्थमिति भावः ॥ ठकारेऽतिप्रसङ्गादिति ॥ सोष्मणः सोष्माण इति द्वितीया इति स्थानेऽन्तरतमसूत्रस्थभाष्येण तस्यापि सोष्मत्वबोधनात् । सोष्मण इत्यस्योष्मत्वसहितस्येत्यर्थः । अत्रार्थे ऋष्यन्तरसंवादमप्याह ॥ तथा चेति ॥ प्राक् सुबुत्पत्तेरिति ॥ सोपपदात् सिचेर्विजिति भावः । केवलात् सिचेर्विचि दध्नः सेचाविति समासे तूत्तरपदत्वे चेत्यस्यापदादिविधाविति निषेधेन प्रत्ययलक्षणेन पदत्वसत्त्वात् पदस्यादिरिति पक्षेऽपि सिद्धिरिति भावः । यद्यपि कैयटेन सोपपदात् सिचेर्विजेव नानभिधानादित्युक्तं, तथाऽपि, यचि भमित्यत्र सुप्तिङन्तमित्यतः सुबित्यनुवर्त्य यजादावसर्वनामस्थाने तत्प्रकृतिर्भसंज्ञा भवति यजाद्यसर्वनामस्थानपरं सुबन्तं यद्यस्ति तदपि भसंज्ञं, तेन सुवाचेत्यादौ न कुत्वम् । अत्र तत्प्रकृतेः सञ्ज्ञा प्रधानशिष्टा, अवयवसुबन्तस्य त्वन्वाचयशिष्टा। एवं स्वादिष्विति योगं विभज्य स्वादिषु पूर्वस्य पदत्वं विधायासर्वनाम स्थाने इत्यत्र सुबन्तमित्यनुवर्त्य यचीत्यपकृष्य प्रसज्य प्रतिषेधमाश्रित्य यजादौ सर्वनामस्थाने परतः पूर्वं पदं न, तत्परं यदि सुबन्तमस्ति तदपि पदं नेत्यर्थः। सुबन्तं च यजादिप्रत्ययाव्यवहितमेवातो राजपुरुषादौ पूर्वपदे नलोपादिसिद्धिः।

सात्पदाद्योरिति निषेधः स्यादितिचेत् । मैवम् । स्वादिष्विति या पदसंज्ञा तामाश्रित्योक्तनिषेधो न प्रवर्तत इति सातिग्रहणेन ज्ञापितत्वात् । यच्चाहुः । प्रत्ययविषये नाऽयं निषेध इति ज्ञाप्यत इति । तन्न । व्यतिसे इत्यादौ षत्वापत्तेः । ननु पदस्यादिरिति पक्षे व्यतिस इत्यत्र षत्वं दुर्वारम् । न च व्यपदेशिवद्भावेन से इत्यस्यापि तिङन्तत्वात् पदत्वं शङ्क्यम् । प्रत्ययग्रहणे यस्मात् सविहितस्तदादेरेव ग्रहणात् । अन्यथा रामेष्वित्यादावपि षत्वनिषेधापत्तिरितिचेत् सत्यम् । न वयं प्रत्ययमात्रस्य तदन्ततां ब्रूमः, किन्तु प्रकृतिप्रत्ययसमुदाये प्रवृत्तां पदसंज्ञां [illegible] लुप्तप्रकृतिके प्रत्यये-

---

तत्र समुदायस्य स्वादिष्विति प्राप्ताऽवयवस्य सुबन्तमिति प्राप्ता श्रूयमाणे सौ पूर्वपदस्य संज्ञेष्टैव । तेन सुवाचावित्यादिसिद्धिरिति । एवमुत्तरपदत्वे चेत्यस्य प्रत्याख्याने दध्नः सेचाविति षष्ठीतत्पुरुषेऽपि षत्वनिषेधाय पञ्चमीसमास आवश्यक इत्यनभिधाने न मानमिति तात्पर्यम् । प्रत्याख्याने पञ्चमीसमासे बहुसेचावित्याद्यर्थं बहुच्पूर्वस्य षत्वं नेति वचनं कार्यम् । वार्त्तिकारम्भे तत्रैव कुत्ववारणाय बहुच्पूर्वस्य चापदादिविधौ नेतिवदिदमपि योगविभागस्येष्टसिद्ध्यर्थतया यत्रोत्तरपदस्य कार्यित्वं तद्विषय एव पदान्तत्वप्रयुक्तकार्य एव च बोद्धमित्यन्यत्र विस्तरः ॥ या पदसंज्ञेति ॥ न च राजपुरुषेष्वित्यत्र दोषः । अन्तर्वर्त्तिविभक्त्या सुबन्तमिति पदत्वमाश्रित्य निषेधापत्तेरिति वाच्यम् ।

सातिग्रहणेन स्वादिष्विति यस्य पदसंज्ञा तदुत्तरस्य षत्वनिषेधो नेति ज्ञाप्यत इति तात्पर्यात् । प्रत्याख्यानरीत्या तस्यापि स्वादिष्विति पदत्वाच्च । सर्वं चेदं, न लुमतेति सूत्रे भाष्ये स्पष्टम् ॥ व्यतिसे इति ॥ यद्यपि व्यतिहारस्यानेककर्तृकक्रियाविषयत्वादेकवचनस्य तत्रासम्भवस्तथाऽपि विश्वामित्राश्रमे मारीचं प्रति, किमर्थं ब्रह्मवधं करोषीति पृष्टे, ममायं धर्म इति तेनोत्तरिते "धर्मोऽस्ति सत्यं तव राक्षसायमन्यो व्यतिस्ते तु ममापि धर्मः । ब्रह्मद्विषस्ते प्रणिहन्मि येन" इति भट्टिकाव्यस्थरामवाक्ये तव धर्मेण ममान्यो धर्मस्तपोरूपो व्यत्यासेन भवति, येन धर्मेण त्वत्संबन्धिनो निहन्मीत्यर्थके एकवचनदर्शनान्न दोषः।अद्यारभ्य त्वद्धर्मः क्रौर्यं मयि भवति, मद्धर्मोऽक्रौर्यं च त्वयि । वर्त्तमानसामीप्ये लट् । रामबाणपातेन समुद्रसमीपे पतितो मारीचस्तत्पश्चचारेति रामायणे प्रसिद्धम । अन्यसंबन्धिक्रियामितरः करोति इतरसंबन्धिनीमन्य इति [illegible]व्यतिहारस्तंभवादिति जयमङ्गला । व्यतिसे इत्यस्य, हे चैत्र मैत्रेण सह व्यत्यस्तो भवसीत्यर्थः । यद्देशे मैत्रसत्ता तद्देशे चैत्रस्य सा, यद्देशे चैत्रस्य सा तद्देशे मैत्रस्य सेति फलति । यद्यपि व्यपदेशिवद्भावेनैकाच्त्वादेरिवास्याप्यशास्त्रीयस्यातिदेशो वक्तुं शक्यः । रामेष्वित्यादौ त्वसहायत्वाभावान्न तत्प्रवृत्तिस्तथाऽपि पूर्वपक्ष्युक्तमभ्युपेत्यापि समाधातुमुपक्रमते– न वयमित्यादिना ॥

ऽप्यनन्यायामः । रामौ रामा इत्यादावपि हि एकदेशविकृतन्यायेनैव पदत्वम् । एकादेशात् प्रागेव पदसंज्ञाप्रवृत्तेः । न त्वेकादेशे कृते सुप्तिङन्तपरित्यस्य प्राप्तिरस्ति । उभयत आश्रयणे नान्तादिवदिति सिद्धान्तात् । यत्तु वदन्ति । प्रकृतिसन्निधाने प्रत्ययस्य पदत्वं नास्ति । मन्त्रेषु सर्वेषामित्यादिनिर्देशादिति । तन्मन्दम् । उक्तरीत्या पदत्वाभावे न्यायसिद्धे ज्ञापनस्याऽसम्भवादनुपयोगाच्च ॥

सर्वादीनि सर्वनामानि ॥ सर्वादीनीति तद्गुणसंविज्ञानो बहुव्रीहिः । इलि सर्वेषामिति निर्देशात् ॥ द्वन्द्वे चेतीति ॥ स हि समुदायस्य निषेधो, न त्ववयवानामिति वक्ष्यते । न च तदन्तविधिं विना समुदाये संज्ञाप्रसक्तिरस्तीति भावः । ननु तदन्तसञ्ज्ञायाः किं फलम् । न च परमसर्वस्मायित्वादौ स्मायादयः फलम् । अङ्गाधिकारे तदन्तविधिनैव तत्सिद्धेरित्यत आह ॥ तेनेति ॥ न चेहापि प्रातिपदिकादित्यनुवृत्तेः सर्वनाम्ना तद्विशेषणे तदन्तविधिर्भवतीति वाच्यम् । समासप्रत्ययविधौ प्रतिषेध इत्युक्तेरिति भावः॥ अकच्चेति ॥ चकारात् परमसर्वत इत्यत्र तासिल् ॥

जसः शी ॥ अनेकाल्त्वादिति ॥ न तु शित्त्वादिति भावः ॥ अवर्णान्तादिति ॥ अवर्णान्तादङ्गात् परस्येत्यर्थः । अतो, येषां केषां तेषामित्यादौ नाव्याप्तिः ॥ सर्वनाम्नो विहितस्याम इति ॥ सर्वनाम्नः परस्येति

सिद्धान्तादिति॥सुप्तिङन्तेत्यत्र,यस्मात् प्रत्ययविधिरित्यनुवृत्तेरिति भावः।अत्र कृतेऽप्येकादेशे एकदेशविकृतन्यायेनोक्तरीत्या मान्तस्य प्रकृतित्वाद् औ इत्यस्य परादित्वं साधितम् ॥ अनुपयोगाच्चेति ॥ चेन ससहाये व्यपदेशिवद्भावाप्रवृत्त्या तत्संनिधाने तेषां पदत्वं नास्तीति सूचितम् । आद्यन्तवत्सूत्रस्थभाष्योक्तैकपुत्रादिदृष्टान्तबलेन तथैव लाभादितिदिक् ॥ ॥ तद्गुणसंविज्ञान इति ॥ तस्यान्यपदार्थस्य गुणा विशेषणानि संविज्ञायन्ते कार्यित्वादिना यत्रेत्यर्थः । प्रायः संयोगसमवायान्यतरसंबन्धेन संबन्धी यत्रान्यपदार्थस्तत्र तद्गुणत्वम् । तदतिरिक्तस्वस्वामिभावादिसबन्धेन संबन्धिनस्तत्त्वेऽतद्गुणत्वम् । नागयज्ञोपवीती भोज्यतामित्यादौ यज्ञोपवीतस्य कार्यित्वाभावेऽपि तत्संनिहितत्वमस्त्येवेति तद्गुणत्वमेवेति हरिग्रन्थे स्पष्टम् ॥ तसिलादिति ॥ न च सर्वनाम्नो विहितत्वाभावः । तदन्तसंज्ञाभावे, द्वन्द्वे चेत्यादीनामवयवसंज्ञानिषेधकत्वेन विहितविशेषणे फलाभावादिति भावः ॥ तसिलिति ॥ अवयवसर्वनामत्वेन तु न निर्वाहः । सर्वनामप्रकृतिकसप्तम्याद्यन्तत्वाभावादिति भावः ॥

तु नोक्तम् । दक्षिणोत्तरपूर्वाणामित्यत्र सुद्प्रसङ्गात् । द्वन्द्वे चेति निषेधो हि समुदायस्य, न त्ववयवस्य । न च तस्मादयमाम् विहितः, किन्तु समुदायादेवेति न सुद् । विहितविशेषणत्वस्याश्रयणे प्रमाणं तु, दक्षिणोत्तरपूर्वाणामिति भाष्यप्रयोग एव ॥ पञ्चात्रिंशदिति ॥ पञ्च च त्रिंशच्चेति द्वन्द्वः । पञ्चाधिकास्त्रिंशदिति तत्पुरुषो वा । यत्तु प्रत्याहारा एकचत्वारिंशादिति प्राचो ग्रन्थं व्याचक्षाणैरुक्तम् । नायं मध्यमपदलोपी तत्पुरुषः । तथा सति राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु संख्येति विधीयमानः पूर्वपदप्रकृतिस्वरो न स्यात् । तस्मात् समाहारद्वन्द्व एवाऽयम् । एकविंशतिरित्यादौ नपुंसकत्वं तु न भवति । लोकाश्रयत्वाल्लिङ्गस्येति । तच्चिन्त्यम् । समासभेदेन स्वरभेदे इष्टापत्तेः । तथा च, बहुव्रीहौ संख्येये इति सूत्रे, संख्यायास्तत्पुरुषस्योपसंख्यानं निस्त्रिंशाद्यर्थमन्यत्राधिकलोपादिति वार्तिकं व्याचक्षाणो भाष्यकार आह— एकाधिका विंशतिरेकविंशतिः, द्वाविंशतिरिति ॥ अत एवेति ॥ द्वयोर्द्विवचनस्यैव न्याय्यत्वादिति भावः । नन्वेवं सर्वादिषु पाठो व्यर्थः सर्वनामकार्याणां स्यायादीनां द्विवचनेऽभावात् । न च उभाभ्यां हेतुभ्यामुभयोर्हेत्वोरित्यत्र सर्वनाम्नस्तृतीया चेति पाक्षिकतृतीया तत्फलमिति युक्तम् । निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति वार्तिकेन गतार्थत्वात् । न च वृत्तिकृता सर्वनाम्नस्तृतीया चेति सूत्रे पठितत्वादिदं वार्तिकं सर्वनामसंज्ञासापेक्षमिति वाच्यम् । भाष्ये हेताविति सूत्रे तस्य पठितत्वादत एवाऽन्नेन कारणेन वसति अन्नस्य कारणस्येत्युदाहृतं हरदत्तेनेत्याशङ्क्याह ॥ तस्येह पाठस्त्विति ॥ अयच्प्रसङ्गादिति ॥ अयं भावः ॥ उभादुदात्तो नित्यमित्यत्रोभादुदात्त इति योगो विभज्यते । अवयवद्वत्तेः संख्यावाचिन उभशब्दादवयविन्यर्थेऽयच् स्यात् । उभयो मणिः । ततो नित्यम् । उभशब्दाद् वृत्तिविषये नित्यमयच् स्यात् स्वार्थे । तेन, उभयपक्षविनीतनिद्रा इत्यादौ अयच् यथा नित्य एवं कप्रत्ययेऽपि स्यादिति । नन्वेवम् अकचि कृतेऽपि

भाष्यप्रयोग इति ॥ दिङ्नामान्यन्तराले दक्षिणोत्ताराभ्यामिति सूत्रस्थ इति शेषः ॥ एवम् — नित्यद्विवचनान्तत्वे ॥ स्वाङ्गशिटामित्याद्युदात्तत्वं च न फलम् । उभे भद्रे इत्यादावन्तोदात्तपाठेन गणेऽन्तोदात्तनिपातनात् । वृषादित्वेन तत्सिद्धेरिति भावः ॥ प्रायदर्शनमिति ॥ प्रायग्रहणादुभातिरिक्तासर्वनाम्नः प्रथमाद्वितीये न स्त इत्यर्थकल्पनसंभवान्नासर्वनामत्वे स दोषः ॥ अयच् स्यादिति ॥

अयज् दुर्वार इतिचेन्मैवम् । योगविभागस्येष्टसिद्ध्यर्थतया उभौ साभ्यासस्येति निर्देशेन च यत्र द्विवचनं श्रूयते तत्रैवायामिति व्याख्याना । तथाच वार्तिकम् । अन्याभावो द्विवचनटाब्विषयत्वादिति । अकचि हि सति तन्मध्यपतितस्तद्ग्रहणेन गृह्यते इति न्यायेनोभशब्दस्य द्विवचनविषयत्वं न विहन्यते, कमत्यये तु [illegible] ॥ तदुक्तमिति ॥ वार्तिककृतेति शेषः । यद्यपि पूर्ववार्त्तिके टाबप्युक्तस्तथाऽपि नाऽसौ विवक्षितः । टाब्विषयत्वमपि द्विवचनपरत्व एव बोद्धव्यमिति कैयटादिभिर्व्याख्यातत्वादित्याशयेन व्याचष्टे ॥ द्विवचनपरत्वाभावे इति ॥ टाबेकादेशस्यापि पूर्वान्तत्वेन ग्रहणाद् द्विवचनपरत्वमस्तीति भावः । यद्यप्युभावित्यादौ द्विवचनपरत्वं दुरुपपादम्, उभयत आश्रयणेऽन्तादिवद्भावविरहात्, तथाप्युभशब्दादुत्पन्नं द्विवचनं लुका नापहृतं यत्र ततोऽन्यत्रायच् इतीह विवक्षितोऽर्थः । यद्यपि भाष्ये कमत्ययस्यापि स्वार्थिकत्वेनोभशब्दात् परस्य द्विवचनत्वमस्तीत्याश्रित्योभयशब्दपाठः प्रत्याख्यातः । तथाऽपि प्रौढिवादमात्रं तत् । [illegible] द्विवचनस्येह ग्रहीतुमुचितत्वात् । अन्यथा त्रतसिलादावतिप्रसक्तत्वात् । ननु कारकविभक्तघन्ताद्विहितौ त्रतसिलौ स्वार्थिकत्वेऽपि द्वित्वमात्रं नाभिधत्त इतिचेन्न । कमत्ययस्याप्यज्ञाताद्यर्थबोधकत्वात् । पञ्चकपक्षेऽधिकबोधकत्वप्रौढ्याच्चेति दिक् ॥

अत्रापि स्थानिवत्सूत्रस्थभाष्यरीत्या प्रत्ययान्तरत्वमिति भावः ॥ निर्देशेन चेति ॥ [illegible]षिविषये इत्यनुक्त्वा इदमेव वक्तव्यमिति भावः ॥ अन्याभाव इति ॥ अन्येषां सर्वनामकार्याणामभाव इत्यर्थः । पूर्वपक्षिणाऽन्तवद्भावविरहादिति वदता एकदेशविकृतन्यायोऽशास्त्रीयविकार[illegible]षयोऽपीति नाभ्युपेतमिति तदनुसारेणैव समाधिं वक्तुमुपक्रमते ॥ तथापीत्यादि ॥ उभशब्दादिति ॥ अत्यन्तस्वार्थिकानां सुबुत्पत्तेः पूर्वमेव अन्तरङ्गत्वादुत्पन्नेनाभघटिताच्छब्दादुभयशब्दादित्यर्थः । यत्र लुकाऽपहृतं तत्रायजिति तु नोक्तम् । प्रातिपदिकप्रकृतिकाचारक्विबन्ते यदि अयजिष्यते, तदा तस्यानापत्तेस्तत्रोत्पत्तेरभावेन विशिष्टाभावाक्षतेः ॥ लुका नापहृतमिति ॥ लुक्कृतापहारसंभावनाभाववदित्यर्थः । एतेनोभशब्दस्य पाठाभावेऽसर्वनामत्वेन ततस्तसिलादिविक्षायाः कर्तुमशक्यत्वेन द्विवचनस्य लुकाऽनपहारस्यैव सत्त्वेन ततोऽयजनापत्तावुभयत्रेत्यसिद्धिरित्यपास्तम् । यद्ययच् स्यात्तदा त्रलादि स्यात्तस्मिंश्च लुगपि स्यादिति लुकापहारसंभावनासत्त्वेन लुक्कृतापहारसंभावनाभाववतोऽन्तत्वात् ॥ यद्यपि भाष्ये इति ॥ स्वार्थिकत्वेनोभशब्दात् परस्य कमत्ययस्यापि द्विवचनत्वम [illegible]तीत्यन्वयः ॥ अधिकेति ॥ संख्यापेक्षयाधिकलिङ्गकर्केत्यर्थः ॥ दिगिति ॥ दिगर्थस्तु भाष्यस्याप्रौढिवादत्वमपि समर्थयितुं शक्यमिति।

नास्तीति ॥ अनभिधानादिति भावः । तथाचोभयशब्दस्य द्विवचनानुत्पादादसर्वविभक्तिकत्वेनाव्ययत्वे प्राप्ते तद्धितश्चासर्वविभक्तिरितिसूत्रे कृत्तद्धितानां ग्रहणं च पाठे इति भाष्यं कैयटेनावतारितम् ॥ अस्तीति॥पचतिकल्पं, पचतिरूपमित्यादिवारणेन पाठस्योपक्षीणत्वादनभिधाने प्रमाणं नास्तीति भावः ॥ तयप्प्रत्ययान्ततयेति ॥ उभयशब्दस्येति भावः ॥ नित्यैवेति ॥ परेऽवरउभया अमित्रा इति तु छान्दसत्वाद् बोद्धव्यम् ॥ अव्युत्पन्नाविति॥एतच्च पस्पशायां कैयटे स्पष्टम् ॥ एके ॥ काशिकाकाराः । एतन्त्वं मन्ये इत्युदात्तस्य उत त्वः पश्यन् इत्यनुदात्तस्य च दर्शनादिति भावः ॥ एकः ॥ प्रथमः । संहितया पाठे तान्तत्वस्यासटत्वेऽपि तान्तश्छेत्तव्योऽन्यथा एकश्रुत्या सकृदेव पठेत् । न च तान्ते विप्रतिपत्तव्यम् । त्वत्त्वसमसिमेत्यनुच्चानीति फिट्सूत्रात् । तथा च ऋङ्मन्त्रः । स्तरीरुत्वद्भवति सूतउत्वादिति । वेदभाष्यकाराश्चेत्थं व्याचख्युः, त्वदिति सर्वनामसु पठितोऽनुदात्तोऽयमन्यपर्याय इति । जयदेवोऽपि प्रायुङ्क्त । त्वदधरमधुरमधूनि पिबन्तामिति । त्वतोऽन्यस्या अधर इति विग्रहो, न तु तवाधर इति । पश्यति दिशि दिशि रहसि भवन्तामिति पूर्ववाक्येन सहानन्वयापत्तेः ॥ नेम इति ॥ श्रूयते च । प्रनेमस्मिन् ददृशे सोम इति ॥ सम इति ॥ तथा च श्रूयते । नभन्तामन्यके समे । मानो वृकाय वृक्ये समस्मै । उरुष्याणो अघायतः समस्मात् । उतो समस्मिन्ना इत्यादि । सिमः कृत्स्ने च शक्ते च स्यान्मर्यादावबद्धयोः । श्रूयते

तथा हि।कप्रत्ययस्य स्वार्थिकत्वेन द्वयर्थाभिधानसमर्थत्वेन वार्तिके द्विवचनशब्देन तस्यापि ग्रहणम् । द्विवचनत्वं द्वित्वसंख्याप्रकारकसङ्ख्येयविशेष्यकबोधविषयार्थानुवादकत्वम् । अतसिलौ तु विभक्त्यन्तस्य स्वार्थे विहितौ इति तत्तत्कारकशक्तिप्रधानावेवातो न तयोरुक्तं द्विवचनत्वम् । कस्य तु अज्ञाताद्यर्थविशिष्टोभार्थे विधानेन तत्त्वमक्षतमेवेति भाष्याशयः । कल्पाद्यन्तेऽयज् नैव भवति । तत्रोभयो मणिरित्यादौ अप्रवृत्तये अस्य, लिट्यभ्यासस्योभयेषामिति निर्देशेनानित्यत्वावश्यकत्वात्।कल्पबादेस्तस्मादनभिधानमेवेत्यलम् ॥कैयटेनावतारितमिति ॥उभयोऽन्यत्रेति वार्तिके उभयो मणिरुभये देवमनुष्याइति भाष्यकृतोदाहरणात्स्वार्थिकोपक्रमेण तत्प्रवृत्तेश्चोभयोरपि ग्रहणमिति तस्य द्विवचनाभावोऽनभिधानादावश्यक इति तद्भावः॥ इति भाव इति ॥ इत्यभिमान इत्यर्थः। तदबीजं तूक्तम् ॥अनन्वयापत्तेरिति ॥ तेन हि वाक्यशेषेण कृष्णस्य संबोद्धृत्वावगत्या सम्बोद्धुस्य च युष्मदर्थत्वेनानन्वयः । पिबन्तं भवन्तामिति चानन्वितमिति बोद्धव्यम् । अत्र पक्षे, त्व—

च । आद्राक्षी वासस्तनुते सिमस्मै । उच्छुक्रमत्कमजते सिमस्मात् । उभयत्रा-ऽपि सिमशब्दः सर्वपर्याय इति वेदभाष्यम् ॥ गणसूत्र इति ॥ यद्यपि भाष्ये अष्टाध्यायीस्थे सूत्रेऽपुरीति वक्तव्यमिति वार्त्तिकं पठितं, तथाऽपि त-द्गणसूत्रस्य शेषः । न तु जसि विभाषाविधायकस्य । अत इत्यधिकृत्य जसः शीविधानात्, टाबन्तात् प्राप्त्यभावात् ॥ अन्तरायामिति ॥ प्राकाराद् बाह्यायां तदन्तर्वर्तिन्यां वेत्यर्थः । लिङ्गविशिष्टपरिभाषया एकादेशस्य पूर्वा-न्तत्वेन ग्रहणाद्वा प्राप्तिर्बोद्धव्या। त्यद्, तद्, एतौ उक्तपरामर्शकौ । तत्राद्य-श्छान्दस इति गणरत्नकारः । तन्न । स्यश्छन्दसि बहुलमिति सूत्रे छन्दो-ग्रहणवैयर्थ्यापत्तेः ॥ एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा * साधारणे समानेऽल्पे संख्यायां च प्रयुज्यते ॥ स्वाभिधेयेति ॥ स्वस्य पूर्वादिशब्द-स्याभिधेयेनापेक्ष्यमाणस्यावधेर्नियम इत्यर्थः । दिशः सपत्नी भव दक्षिण-स्या इत्यादावपि व्यवस्थाऽस्त्येव । प्रसिद्धत्वात्तु नावधिवाची शब्दः प्रयु-ज्यते । न च संज्ञात्वान्निषेधः । आधुनिकसङ्केतो हि संज्ञा । न च दिक्षु साऽस्तीति असंज्ञाधिकरणे कैयटहरदत्तादयः । अत्र दिक्षु चिरन्तनः कुरुषु

इत्येकश्रुत्योदात्तानुदात्तयोर्निर्देश इति बोद्धव्यम् ॥ प्राप्त्यभावादिति ॥ पूःशब्देन स्त्रीत्वविशिष्टस्यैव बोधनेन तादृशार्थस्य विशेष्यत्वे एव तत्प्रवृत्तेः । अत एव भाष्ये, अन्तरायामिति स्त्रियां सप्तम्यामेवोदाहृतमिति भावः ॥ केवल इति ॥ असहाय इत्यर्थः । स्वाभिधेयापेक्षावधीति समस्तपाठं व्याचष्टे ॥ स्वस्येत्यादि ॥ अपेक्षेति कर्मणि घञ् ॥ व्यवस्थाऽस्त्येवेति ॥ पूर्वादिशब्दैरेकस्या एव दिश उपाधिकृतभेदस्य प्रतिपादनम् । उपाधिश्च पृथ्वीमध्यं तत्प्रान्तवर्त्तिनश्चत्वारः पर्वताश्च । रामायणे किष्किन्धायां सुग्रीवेण मध्यदेशावधिकस्यैव दिग्विभागस्यो-क्तेः । पृथ्वीमध्यं च मध्याह्नसूर्यसंयोगिदेशः । एवञ्च तन्मध्यभागावधिकोदया-चलादिपर्यन्तदेशरूपोपाधिविशिष्टदिशि पूर्वादिशब्दानां तत्तच्छब्दं प्रवृत्तिनिमि-त्तीकृत्य प्रवृत्तिरित्युपाध्यन्तर्गततया व्यवस्थाऽस्त्येव । उदयाचलपर्यन्तरूपोपाधे-स्तदभिधेयस्य तदाकाङ्क्षत्वं चास्त्येव । मध्याह्नसूर्यसंयोगिदेशात्तत्सन्मुखदेश उदक् । तत्पृष्ठस्थदेशश्च दक्षिणा । मध्याह्ने सूर्यस्योदङ्मुखत्वात् । स्पष्टं चेदं हेलाराजीये ॥ व्यवस्थायामिति च । वैषम्य[illegible]ति भावस्तदाह ॥ प्रसिद्धत्वादि-ति ॥ देशवृत्तीनां तत्तदवधिकोदयाचलसन्निहितत्वादि प्रवृत्तिनिमित्तमित्यादि बोद्धव्यम् ॥ आधुनिकसङ्केतो हीति ॥ असंज्ञापदसामर्थ्यात् । अन्यथा सर्वादीनां केवलरूढत्वेनेन्द्रादिपदानामिव रूढत्वरूपसंज्ञात्व[illegible] सर्वत्र सप्त्यात्तदसङ्गतिः

तु आधुनिकः सङ्केत इत्यत्र व्याख्यातृवचनमेव प्रमाणम् । एतेन विश्वेषां देवानामिति व्याख्यातम् । वेदप्रसिद्धत्वाद् देवगणविशेषे विश्वशब्दस्य आधुनिकसङ्केताभावात् ॥ दक्षिणा गाथका इति ॥ इहामुकस्मात् कुशला इति अवध्यन्वयसंभवेऽपि तन्नियमो नास्तीति भावः । अधरे ताम्बूल-रागः, उत्तरे प्रत्युत्तरे च शक्त इत्यपि प्रत्युदाहर्तव्यम् । कथं तर्हि, तथा परेषां युधि चेति कालिदासः । अपरे प्रत्यवतिष्ठन्ते इत्यादि च । अत्रा-ऽऽहुः । देशवाचितया व्यवस्थाविषययोरेव परापरशब्दयोरुपचाराच्छत्रौ प्रति-वादिनि च प्रयोगः । न चैवमुपसर्जनता । न हि लाक्षणिकत्वमुपसर्जन-त्वम् । किन्तु स्वार्थविशिष्टार्थान्तरसंक्रमः । स च समासादिवृत्तावेव । अत एव, भूवादिसूत्रे एतान्यपीति एतत्प्रतिपाद्यानि वस्तूनीत्यर्थ इति कैयटोक्तिः सङ्गच्छते । वस्तुतस्तु परापरशब्दयोर्देशान्तरनिष्ठत्वादिकमेवार्थः । शत्रुत्वादिकं तु आर्थिकोऽर्थः । असंज्ञायां किम् । उत्तराः कुरवः । सुमेरुमवधिमपेक्ष्य कुरुषूत्तर-शब्दो वर्त्तते इत्यस्तीह व्यवस्था । किन्तु आधुनिकसङ्केतोऽयमित्याहुः ॥

स्वमज्ञातिधनाख्यायाम् ॥ आत्मात्मीयज्ञातिधनवाची स्वशब्दः । तत्र ज्ञातिधनयोः पर्युदासाद् आत्मात्मीयौ परिशिष्टावित्याशयेन व्याचष्टे ॥ आत्मीया इत्यर्थः । आत्मान इति वेति ॥ यत्त्वाहुः । आत्मनि स्वशब्दो नपुंस-कः । तेन, स्वे, स्वा इत्युदाहरणं तत्र न संभवतीति । तच्चिन्त्यम् । आत्म-न्यपि स्वशब्दस्य पुंस्त्वात् । विभाषा जसीति प्रकरणे स्वमात्मीये इत्येव-वक्तव्ये गुरुनिर्देशं कुर्वतः सूत्रकारस्यैवात्र प्रमाणत्वात् । यदपि स्वोक्तेऽर्थे

स्पष्टमेवेति भावः ॥ व्याख्यातृरिति ॥ कैयटादीत्यर्थः ॥ आधुनिकसङ्केताभावादिति ॥ किं त्वैश्वर एवेति भावः । यदि तत्रोत्कर्षस्यावधिसापेक्षत्वाद् व्यवस्थास्तीत्या-ग्रहस्तदा प्रत्युदाहरणान्तरमाह ॥ अधरे इत्यादि ॥ अत्रापि संज्ञात्वं मत्वाऽऽह ॥ उत्तरे इत्यादि ॥ उपचारादिति ॥ तत्त्वारोपादिति भावः ॥ अर्थान्तरसंक्रम इति ॥ स्वार्थविशिष्टार्थान्तरबोधकत्वमित्यर्थः । इदञ्च, अितश्च तत्प्रत्ययादिति सूत्रे भाष्ये ध्वनितम् ॥ मेवार्थ इति ॥ देशवदयमपि तच्छक्य इत्यर्थः । तुल्यन्यायादे-तच्छब्दस्यापि कैयटोक्तार्थः शक्य इति ध्वनितम् ॥ सुमेरुमिति ॥ हिमवानवधिरिति तु ये केचन परेण हिमवन्तं जनपदा उत्तरकुरवः उत्तरमद्रा इति ऐतरेयब्राह्मणे श्रूयन्ते । उत्तरा इत्यस्य तन्नामान इत्यर्थस्तदाऽऽह ॥ आधुनिकेति ॥ उत्तराः कुरवो दक्षिणान् कुरूनपेक्ष्योत्तरा उच्यन्ते इति तु कपिञ्जलाधिकरणे शाबरभाष्ये उक्तम् ॥

उपष्टम्भार्थं, स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने इति अमरसिंहोक्तिमाहुः । तदपि चिन्त्यम् । कोशे हि आत्मनीति पूर्वान्वयि । स्वमिति तु उत्तरान्वयि । तथाच हेमचन्द्रः । द्यौः स्वर्गनभसोः स्वो ज्ञात्याऽऽत्मनोः स्वं निजे धने इति । मेदिनीकारोऽपि, स्वः स्यात् पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीयेऽस्त्रियां धने इति । तस्मात् स्वे स्वा इत्यस्यात्मान इति विवरणं सम्यगेवेति स्थितम् ॥ज्ञातिधनवाचिनस्त्विति॥ ताच्छील्ये णिनिना ज्ञातिधनयोरपि आत्मीयत्वं पुरस्कृत्य प्रवृत्तौ सर्वनामताऽस्त्येवेति ध्वनयति । एतदर्थमेव हि सूत्रे आख्याग्रहणं कृतम् ॥

अन्तरं बहिर्योगोपसंव्यानयोः॥ बहिरित्यनावृतो देशो बाह्यं चोच्यते । तत्राद्यमर्थं गृहीत्वाह ॥ बाह्या इत्यर्थ इति ॥ द्वितीये तु आभ्यन्तरा इत्यर्थो बोद्धव्यः । बाह्येन हि आभ्यन्तरस्य योगोऽस्ति । अर्थद्वयमप्याकरे स्थितम् । उपसंव्यानशब्दोऽपि करणव्युत्पत्त्योत्तरीयपरः । कर्मव्युत्पत्त्या तु अन्तरीयपरः ॥

पूर्वादिभ्यो नवभ्यो वा ॥ अत्रेदमवधेयम् । एतत्सूत्रं जसः शीत्यत्रानुवर्त्य वाक्यभेदेन व्याख्येयम् ॥ वा.च्छन्दसीत्येतद्, अमि पूर्व इत्यत्र यथा । एवञ्चाष्टाध्याय्यां, पूर्वपरेत्यादित्रिसूत्री गतार्थेति महल्लाघवम् । एकशब्दस्याष्टावर्था उक्तास्तत्र विशेषमाह ॥ संख्यायामिति ॥ अन्येषु सप्तसु तु वचनान्तरमपि स्यादेव । एके एकेषाम्, इति यथेति भावः ॥

हेमचन्द्र इति ॥ कोशेऽप्यात्मनीत्यर्थे संभवति विरोधो न न्याय्य इति भावः । यदि तु– एवमन्वये, स्वो ज्ञातावात्मनि धने त्वस्त्री आत्मीयके त्रिष्विति पाठेनैव सिद्धे त्रिः स्वग्रहणवैयर्थ्यापत्तेः ॥ बन्धूकबन्धूभवदेतदस्या मुखेन्दुनानेन सहोज्जिहाना * रागश्रिया शैशवयौवनीयां स्वमाह सन्ध्यामधरोष्ठलेखा, इति–श्रीहर्षश्लोके, आत्मानमित्यर्थकस्वमित्यस्य बन्धूकबन्धूभवादिति विशेषणेन च नपुंसकत्वमस्तीत्युच्यते तर्ह्यस्तु । मेदिन्यादिप्रामाण्यात् पुँल्लिङ्गोऽप्यस्त्येवेति, स्वे, स्वा इत्युदाहरणं न संभवतीति प्राचीनोक्तिरसङ्गतैवेति ध्वनयन्नाह॥विवरणं सम्यगेवेति ॥ एतदर्थमेवेति ॥ एतदर्थमपीत्यर्थः । धनत्वेनात्मीयस्य बोधो मा भूदित्यर्थं चेत्यपि बोद्धव्यम् । आत्मात्मीयाख्यायामिति तु नोक्तम् । लाघवाभावात् ॥

बाह्यं चेति ॥ उक्तबहिर्देशस्थमित्यर्थः ॥ उपसंव्यानशब्दोऽपीति ॥ एवञ्च तद्ग्रहणं बहिर्योगस्य गृहेष्वेव प्रसिद्धिमाश्रित्य सूत्रे कृतमिति भावः ॥

महल्लाघवमिति ॥ त्रिसूत्र्या जसाधारे शीभावे एव विकल्पविधानात् । व्यवस्थायामित्यादि गणे एव पाठविशेषणमिति भावः ॥

न बहुव्रीहौ ॥ कृते बहुव्रीहौ निषेधो व्यर्थः । उपसर्जनीभूता न सर्वादय इति वक्ष्यमाणत्वादत आह ॥ चिकीर्षिते इति ॥ समासात् प्रागेवेति च ॥ प्रक्रियेति ॥ अलौकिके विग्रहवाक्ये इत्यर्थः । नन्वस्तु तत्राकच्, अत आह ॥ स चेति ॥ न च निमित्तस्यानुपसर्जनत्वस्य विनाशोन्मुखत्वात् प्रागेव संज्ञा न भविष्यतीति वाच्यम् । अकृतव्यूहपरिभाषाया अनित्यत्वात् । तत्र चैतत्सूत्रस्यैव ज्ञापकत्वात् ॥ अतिभवकानिति ॥ एतदेव ज्ञापनफलमिति भावः ॥ इष्टापत्तिं कृत्वेति ॥ च्छ्वोः शूडिति सतुक्ग्रहणं प्रकृतिप्रत्यापत्तिवचनं वा अनित्यत्वे ज्ञापकम् । लक्ष्यानुरोधाद् व्यवस्थेति भावः ॥ यथोत्तरमिति ॥ तथाचाद्यत्वे भाष्यकारोक्तैव व्यवस्थेति भावः । यत्तु प्राचोक्तम् । बहुव्रीहौ सर्वादेः सर्वनामता न स्यात् । प्रियसर्वाय । सूत्रकारमते बहुव्रीहौ न सर्वनामता । भाष्यकारमते गौणत्वमात्रे । त्वत्कपितृको मत्कपितृक इत्यत्र समासावयवयोर्युष्मदस्मदोः सर्वनामत्वादनङ्गकार्यत्वेनाकच् स्यात् । स मा भूत् । कप्रत्यय एव स्यादित्येतदर्थमिदं सूत्र-

---

वक्ष्यमाणत्वादिति ॥ एकद्वा इति बहुव्रीहेरभिधानेऽपि तत्रैकद्यन्यतरा इत्यर्थादुपसर्जनत्वमेव । समासान्ते कृते विशिष्टस्य सर्वाद्यन्तत्वाभावाच्च । समासान्तानामुत्तरपदावयवत्वं तु नेत्युक्तम् ॥ चिकीर्षित इतीति ॥ अध्याहारलभ्यमेतत् । एतदर्थमेव, न बहुव्रीहिरिति वक्तव्ये बहुव्रीहाविति गुरुनिर्देश इति भावः॥ विनाशोन्मुखत्वादिति ॥ यद्यप्यलौकिके एवैकार्थीभावस्यारोपोऽस्ति तथाऽपि तत्र स्वार्थविशिष्टार्थान्तरबोधकत्वरूपोपसर्जनत्वाभावादेवमुक्तम् ॥ अनित्यत्वादिति ॥ अत एवातिभवकानित्यादिसिद्धिः । वस्तुतः सा भाष्यानुक्तत्वान्नास्त्येवेति बोद्धव्यम् ॥ सतुक्कग्रहणमिति ॥ च्छ्वोः शूडिति सूत्रे प्रष्टेत्यादावन्तरङ्गत्वाज्ज्ञातस्य तुको निवृत्तये तत् क्रियते । सतुक्कनिर्देशसामर्थ्याच्च नान्त्यस्य शः । वाञ्छादिप्रकृतिककिबन्तादेस्तु अप्रयुक्तत्वेन लक्षणविषयतैव नेत्यादि भाष्ये स्पष्टम् । तत्परिभाषासत्त्वे हि शादेशे निमित्तविनाशेन पूर्वं तदप्रवृत्तिरेवेति स व्यर्थ एव स्यादिति भावः ॥ प्रकृतिप्रत्यापत्तीति ॥ कंसं घातयतीत्यादौ कृल्लुकि तन्निमित्तकादेशनिवृत्तये क्रियमाणाख्यानात् कृतस्तदाचष्टे कृल्लुक् प्रकृतिप्रत्यापत्तिश्चेति वचनमित्यर्थः । अत्रेदं चिन्त्यम् । लुक्यपि प्रत्ययलक्षणसत्त्वाद्राजा, ऐनेय इत्यादाविवाकृतपरिभाषाया अत्राप्राप्तिः । न लुमतेति निषेधस्तु प्रत्यये परतो जायमानपूर्वकार्य एवेति स्पष्टमेव । तस्मात् पुष्ययोगं जानाति पुष्येण योजयतीत्येतत्साधके पुष्ययोगे ज्ञीति वचने भाष्यकृत्कृतप्रत्यापत्त्यनुवृत्तिर्ज्ञापिका । तत्र हि, चजोरिति धिति परतः कुत्वमिति ॥ भाष्यकारोक्त्येति ॥ अकच्स्वरौ तु कर्त्तव्यौ प्रत्यङ्गं मुक्तसंशयाविति च तदुक्तिः । एतदेवाभिप्रेत्य, धिन्धि-

मिति न्यासकृन्मतमिति । अत्रेदं वक्तव्यम् । किं बहुव्रीहौ संज्ञा नेति विवक्षितम्, उत तदवयवानां सर्वादीनामिति । नाद्यः । समासावयवयोर्युष्मदस्मदोरित्युत्तरग्रन्थविरोधात् । समुदाये प्राप्तिविरहाच्च । न च तदन्तविधिना प्राप्तिः । बहुव्रीह्यवयवानामुपसर्जनतया सर्वादिबहिर्भावेन तदन्ते प्राप्तेर्दूरापास्तत्वात् । अत एव न द्वितीयोऽपि । न चोपसर्जनानां पाठात् पर्युदासो वार्तिककृतोक्तो, न तु सूत्रारूढ इति वाच्यम् । अन्वर्थसंज्ञाबलेन सूत्राक्षरैरेव तल्लाभात् । एतेन सूत्रकारमते बहुव्रीहौ न सर्वनामतेत्यपि परास्तम् । बहुव्रीहावेवेति तस्यार्थः । भाष्यकारमते इत्याद्यपि न । विशेषोपादानेन हि सूत्रकारवार्त्तिककारयोर्मतमन्यादृशमिति प्रतीयते । देवदत्तो वामेनाक्ष्णा पश्यतीत्युक्ते दक्षिणेन न पश्यतीतिवत् । तच्च न । सूत्रवार्त्तिकमतेऽपि गौणपर्युदासस्येष्टत्वात् । यत्तु त्वत्कपितृक इत्यादि, तदित्थं प्राचा व्याख्यातम् । त्वं पिता यस्य, अहं पिता यस्येति विगृह्य बहुव्रीहिसमासे कृते समासावयवयोः समासान्तःपातिनोर्युष्मदस्मदोः सर्वार्थवाचकत्वेन सर्वनामसंज्ञकत्वादज्ञाताद्यर्थविवक्षायाम्, अव्ययसर्वनाम्नामित्यकच् प्रसज्ज्येत । तस्य स्मैप्रभृतीनामिवाङ्गाधिकारविहितत्वाभावेनाङ्गसंज्ञानपेक्षत्वात् । ततश्च त्वकत्पितृक इत्याद्यनिष्टं प्रसज्ज्येतेति । न्यासकृताऽपि अन्वर्थसंज्ञा-

---

कृण्व्योरेति सूत्रे किमर्थमत्वं विधीयते वलोप एवास्तित्वत्याशङ्क्याऽत्वेऽल्लोपे तस्य स्थानिवत्त्वेन गुणाभावाय तत् । न च वलोपेऽपि न धात्विति गुणनिषेधः सिद्ध इति वाच्यम् । तत्प्रत्याख्यानपक्षे गुणप्राप्तेरित्युक्तम् । अनेन सूत्रमतात् प्रत्याख्यानवादिमतं प्रबलमिति प्रत्याख्यानवादिसंमतलक्ष्यमेव कथञ्चित् सूत्रमतेऽपि साध्यं, न तु विपरीतं सम्भवे । अन्यथा सूत्रमप्रमाणमेवेति च प्रत्याख्यानं सूत्रसंमतमिति च ध्वनितम् । सूत्रकृत्खण्डितप्राचीनऋषिवाक्यानामप्रामाण्यवत सूत्रकारवचःखण्डनप्रवृत्तभाष्यवार्त्तिकवचनैस्तदंशे सूत्रकारवचसोऽप्यप्रामाण्यकल्पनैवोचितेति दिक् ॥

किमिति ॥ बहुव्रीहौ नेत्यस्य द्वेधा व्याख्यानसंभवादिति भावः ॥ उत्तरग्रन्थेति ॥ न्यासकारस्यापि सूत्रलभ्यार्थप्रतिपादने एव तात्पर्यादिति भावः ॥ प्राप्तेरिति ॥ प्राप्तेरभावे निषेधो व्यर्थ एवेति भावः ॥ अत एवेति ॥ अवयवानामुपसर्जनत्वेन सर्वादिबहिर्भावादेवेत्यर्थः ॥ अन्वर्थेति ॥ सर्वेषां नामेत्येवंरूपेत्यर्थः ॥ तस्यार्थ इति ॥ सोऽनुचितोऽन्वर्थसंज्ञया गौणमात्रे तदप्रवृत्तेस्तत्संमतत्वादिति शेषः॥सूत्रेत्यादि॥तन्मतेऽन्वर्थत्वेन वार्त्तिकमते तु वचनेनेत्यर्थः । स्वोक्तार्थे न्यासकृद्ग्रन्थ-

बलादेव संज्ञानिरासे कृतेऽकज् न भविष्यतीत्याशङ्क्य समुदायो हि विशेषे वर्तते, पूर्वपदन्तु सर्वार्थताया अनपेतमेवेत्युक्तम् । तदेतत् सर्वं प्रामादिकमेव । तथाहि । जहत्स्वार्थायां वृत्तौ समासावयवयोरर्थ एव नास्ति । अजहत्स्वार्थायामपि स्वार्थविशिष्टान्यपदार्थवृत्तित्वेनोपसर्जनत्वं स्पष्टमेव । एवञ्च समासान्तःपातिनोर्युष्मदस्मदोः सर्वार्थवाचकत्वेनेत्यादिग्रन्थः, समुदायो हीत्यादिन्यासग्रन्थश्च, पक्षद्वयेऽपि व्याहतः । किञ्चैवम् अतिसर्वायेत्यत्र स्मायादेशो दुर्वारः । अङ्गाधिकारे तदन्तग्रहणात् । त्वदुक्तरीत्या सर्वशब्दस्य सर्वार्थतानपायात् । न हि पूर्वपदे सर्वार्थता उत्तरपदे तु नेति युक्तिमत् । अपि चैवं गौणत्वे सर्वादीनां सर्वार्थवाचकत्वं नास्तीति स्वोक्त्या सह विरोधः स्यादिति यत्किञ्चिदेतत् । यदपि व्याचख्युः । त्वं पिता यस्येत्यादौ विग्रहवाक्ये प्राप्ता संज्ञा निषिद्ध्यते इति । तदपि न । विग्रहवाक्यं हि लौकिकमलौकिकं वा विवक्षितम् । नाद्यः । प्रक्रियावाक्येऽयं निषेधो, न तु लौकिक इति कैयटग्रन्थविरोधात् । प्रकृतसन्दर्भगतपूर्वापरस्वग्रन्थविरोधाच्च । न द्वितीयः । तस्य, युष्मद्सु पितृसु इत्याकारकत्वेन, त्वं पितेत्याकारकत्वायोगात् । यदपि व्याचख्युः । नन्वतिसर्वादौ संज्ञा न प्रवर्तते, त्वत्कापितृकादौ तु प्रवर्तत इत्यत्र किं विनिगमकं, तत्राह ॥अनङ्गकार्यत्वेनेति॥ अङ्गशब्दः समुदायपरः । तेनातिसर्व इत्यत्राङ्गस्य संज्ञापेक्षिता, सर्वनाम्नोऽङ्गात् स्मायादिविधानादवयवमात्रस्य सत्यपि सर्वनामत्वे दोषाभावात् । समुदाये च समुदायार्थं प्रति सर्वादेरुपसर्जन-

---

संवादमाह ॥ न्यासकृताऽपीति॥ अनपेतमेवेति ॥ समुदाये एकार्थीभावाङ्गीकारेण समुदायस्यान्यपदार्थोपसर्जनत्वेऽप्यवयवस्य तत्त्वे मानाभाव इत्यभिमानः ॥ व्याहत इति॥अजहत्स्वार्थायामपि अवयवार्थस्यान्यपदार्थविशेषणतयैवोपस्थित्योपसर्जनत्वाक्षतेरितरार्थविशेषणत्वेनोपस्थितिविषयत्वस्यैवोपसर्जनत्वपदार्थत्वादिति भावः ॥ सर्वशब्दस्येति ॥ उत्तरपदभूतस्यापीत्यर्थः ॥ युक्तिमदिति ॥ न चोत्तरपदे लक्षणा, पूर्वपदं तात्पर्यग्रहकमिति मते तद्युक्तिमदिति वाच्यम् । तत्र मते हि पूर्वपदं निरर्थकं स्वार्थप्रतिपादकं वा ? । नाद्यः । नैरर्थक्येन सर्वार्थकत्वाभावादेवाप्राप्तेः । नान्त्यः । पूर्वपदार्थे विशेषणान्वयापत्तेः । विनिगमनाविरहेण पदद्वयेऽपि लक्षणौचित्याच्च । एकार्थीभाववादिभिस्तथा वक्तुमशक्यत्वाच्च । एवञ्च तद्घटकावयवानां सर्वनामत्वाभाव एवोचित इति दिक् ॥ स्वोक्त्येति ॥ एतत्प्रकरणस्थयेत्यर्थः ॥स्वग्रन्थेति॥ तैरप्यलौकिक एव निषेधस्यो-

त्वात् तदन्तस्य संज्ञा न भवतीति युक्तम्। इह तु अवयवमात्रस्य सा चिकीर्षिता, न समुदायस्य। अवयवश्च स्वार्थमात्रप्रधान इति स्यात् प्रसङ्ग इति वैषम्यमस्तीत्याशय इति। तदपि न। अङ्गाधिकारे तदन्तविधेः सर्वसंमतत्वेनाऽवयवमात्रे सत्यपि सर्वनामत्वे दोषो नास्ति। कृत्यर्थाहतत्वात्। अङ्गाधिकारपरिभाषया स्मै स्याद् इति स्वग्रन्थविरोधाच्च। अथायमाशयः। प्राक् प्रवृत्तापि संज्ञा अर्थान्तरोपसंक्रमे सति गतेति। तर्हि अकजपि गच्छतु। ननु कार्यकालपक्षे स्मायाद्यर्थं पुनः संज्ञाऽपेक्षिता, सा च दुर्लभेत्याशय इति चेत्। अस्त्येवम्। न त्वसौ प्रकृतग्रन्थार्थः। न्यासग्रन्थविसंवादेन, इति न्यासकृन्मतमिति वाक्यशेषविरोधात्। न्यासग्रन्थस्त्वनुपदमेवोदाहरिष्यते। यदपि व्याचख्युः। अङ्गमप्रधानं बाध्यं तद्विरुद्धमनङ्गं बाधकमित्यर्थः। तथाच कप्रत्ययापवादत्वादकच् स्यादित्यर्थ इति। तदपि क्लिष्टं व्यर्थं च। न्यासग्रन्थासंमतं च। तथाहि। त्वत्कपितृको मत्कपितृक इति वृत्तिग्रन्थं व्याख्याय न्यासकार उज्जग्राह। ननु च अन्वर्थसंज्ञाकरणादेवात्र संज्ञानिरासे कृतेऽकच् न भविष्यति। न ह्यत्र सर्वार्थता संभवति। विशेषविषयत्वात्। नैतदस्ति। समुदायो हि विशेषे वर्तते। पूर्वपदं तु सर्वार्थताया अनपेतमेव। भवतु तर्हि अनयोरनन्तरयोरेतत्सूत्रविषयता। प्रियविश्वायेत्यादेस्तु नोपपद्यते। न हि प्रियविश्वादयः सर्वेषां नामानि। नाऽपि तदवयवभूतानां विश्वादिशब्दानां किञ्चित् सर्वनामकार्यमुपपद्यते। स्मैप्रभृतीनामङ्गकार्यत्वात्। विश्वादिशब्दानामनङ्गत्वात्। एवं मन्यते। त्वत्कपितृको मत्कपितृक इत्यत्राकच्मा भूद् इत्येतदर्थं तावदेतदारब्धव्य-

---

केरिति भावः॥ अर्थान्तरोपसंक्रमे सति गतेति॥ तेनातिसर्वायेत्यादौ न दोषः। पुनः संज्ञा तु दुर्लभा। संज्ञोपसर्जनानां निषेधात्। पाठात् पर्युदासेन तदन्तग्रहणेनापि न संज्ञा। अर्थान्तरसंक्रमात् पूर्वं तु स्मैभावस्य न प्रवृत्तिः। अकच्प्रवृत्तिस्तु ततः प्रागस्त्येवेति तन्निवृत्तये इदं सूत्रमित्यभिमानः॥ गच्छत्विति॥ निमित्तापायपरिभाषयेति भावः॥ दुर्लभेति॥ उपसर्जननिषेधादिति भावः॥ इत्यर्थ इति॥ अनङ्गकार्यत्वेनेत्यस्यार्थ इति भावः॥ क्लिष्टमिति॥ तत्त्वं तु स्पष्टमेव। न्यासग्रन्थासंमतिरुपपादयन्ननङ्गकार्यत्वेनेत्यस्य वैयर्थ्यमुपपादयति॥ तथाहीति॥ विशेषविषयत्वादिति॥ अन्यपदार्थविशेषणत्वादित्यर्थः॥ समुदायो हीति॥ तस्यैव तद्विशेषणत्वमित्यभिमानः॥ अनन्तरयोरिति॥ त्वत्क-

म्। प्रियविश्वायेत्यादावपि विस्पष्टार्थं भविष्यतीति। अनेन हि न्यास-ग्रन्थेनाङ्गसंज्ञानपेक्षत्वमेवार्थो लभ्यते। स च स्वोत्प्रेक्षितव्याख्यायं दूरोत्सारित एव। यदपि व्याचख्युः। यद्यपि सूत्रवार्त्तिककृतोरप्येतन्मतं तथापि न्यासकृता विदितत्वाद् न्यासकृन्मतमित्युक्तमिति। तदपि स्थवीयः। वार्तिककृताऽस्यार्थस्यास्पृष्टत्वात्। न्यासकृता समासे कृते सतीत्यादि वदता त्वदुक्तार्थस्य दूरत्यक्तत्वेन तद्विदितत्वाभावाच्च॥ यदप्याहुः। न्यासकृच्छब्देन सूत्रकार एव विवक्षित इत्यादि। तदपि न। सूत्रकारमते बहुव्रीहावित्यादिपूर्वग्रन्थेन सह विरोधात्। भाष्यकारमते त्विति—ग्रन्थेन तस्य विच्छिन्नत्वाच्च। तस्मादिह प्राचः प्रक्रियाग्रन्थस्तद्व्याख्या-ग्रन्थाश्चापातरमणीया एवेत्यास्तां तावत्। यदि तु प्रक्रियाग्रन्थोऽपि कथञ्चिद्भाष्याविरोधेन व्याख्येय इत्याग्रहस्तर्हीत्थं व्याख्यायताम्। ननु प्रियविश्वायेति गौणतया गतार्थम्। अतो निष्कर्षमाह। सूत्रकारमत इति। बहुव्रीहाविति। चिकीर्षिते सतीति शेषः। गौणत्वमात्र इति। मात्रशब्दोऽवधारणे। गौणत्वे एव, न तु ततः प्राक्। तथाच सूत्रं प्रत्याख्यातामिति भावः। न्यासकृन्मतस्य तु अतिफल्गुत्वात् स्वरूपव्याक्रियैव पराक्रियेत्याशयेनाह। त्वत्कपितृक इत्यादि। एतच्च प्राचीनतत्तद्ग्रन्थपरिशीलनशालिभिर्विभावनीयम्। प्रकृतमनुसरामः॥ संज्ञाकार्यमिति॥ सर्वनामसंज्ञाप्रयुक्तं स्मायादिकमित्यर्थः॥अन्तर्गणकार्यमिति॥अद्ड्डतरादिभ्यः, त्यदादीनामः, तदोः सस्सावित्यादिकमित्यर्थः॥ तृतीयासमासार्थेति॥ इह पूर्वसदृशेति विहितः समासो गृह्यते, प्रतिपदोक्तत्वात्। न तु कर्तृकरणे कृतेति। तेन त्वयका कृतमित्यत्र निषेधो न॥ समुदायस्येति॥ तत्रैव द्वन्द्वशब्दस्य मुख्यत्वान्न तु द्वन्द्वे यानि सर्वादीनीति सम्बन्धः। कारकाणां क्रिययैवा-

---

पितृकमत्कपितृकयोरित्यर्थः॥ अङ्गसंज्ञानपेक्षत्वमेवार्थ इति॥ एवञ्चानुपदोक्ते यदपीति पक्षे कप्रत्ययापवादत्वस्य अकचि प्रसिद्धत्वाद् एवं वक्तरीत्या तदुक्तिर्व्यर्थेति बोध्यम्॥ इत्यादि वदतेति॥ वृत्तिग्रन्थव्याख्यावसरे इति शेषः॥ प्रतिपदोक्तत्वादिति॥ यदन्तत्वमादाय सर्वनामत्वप्राप्तिस्तमुद्धार्य विहितत्वाद् वाक्यमपि तत्संबन्ध्येव, प्रत्यासत्तेरितिभावः। तेन करोतिद्वारा सामर्थ्ये, मासेन कृताय पूर्वस्मै मासपूर्वस्मै इति समासे तत्संबन्धिनि वाक्ये च न। तत्र वाक्यस्य प्रतिपदोक्तसमाससम्बन्धिन एव ग्रहणे फलान्तरमप्याह॥ त्वयकेति॥ तृतीयासमासमात्रस्य ग्रहणे हि तदर्थे वाक्ये यत्रकापि स्थितस्य सर्वादेः

ऽन्वयात्। न च द्वन्द्वे विद्यमानानि यानीति सम्बन्धः। विद्यतिक्रियाध्याहारे गौरवात्। निषेद्धयाया भवतिक्रियाया एव प्राधान्येन तदन्वयस्यैव न्याय्यत्वाच्च। किञ्च, त्यदादीनां द्वन्द्वो नास्ति। एकशेषेण बाधितत्वात्। ततः प्राचीनास्त्वदन्ताः। तत्र काकचोर्न विशेषः। न च दक्षिणोत्तरपूर्वाणामित्यत्रेष्टमपि पुंवद्भावं निषेद्धुमिदं किं न स्यादिति वाच्यम्। सर्वनाम्नो वृत्तिमात्र इति मात्रग्रहणं हि क्वचित् सर्वनामत्वेन दृष्टानां संप्रति संज्ञाभावेऽपि पुंवद्भावार्थम्। अत एव दक्षिणपूर्वायै इत्यत्र संज्ञाभावेऽपि पुंवद्भावः। तस्माद् न्यायबलात् फलबलाच्च समुदायग्रहणमेवोचितम्। यद्यपि त्वच्छब्दस्तान्त इति पक्षेऽवयवनिषेधेऽपि फलं सुवचम्। तथापि शास्त्रस्याऽल्पविषयता स्याद्, न्यायश्च विरुद्ध्येतेति भावः॥ सुदूप्रसङ्ग इति॥

संज्ञा नेत्यर्थेऽत्रापि स्यादिति भावः॥ न्याय्यत्वाच्चेति॥ किञ्चावयवमात्रनिषेधे प्रयोजनं सर्वनामाव्ययसंज्ञायामिति येन विधिरिति सूत्रस्थभाष्यप्रामाण्येन तदन्तस्य संज्ञायां वर्णाश्रमेतराणामिति भाष्यप्रयोगानुपपत्तिः। न ह्यत्र सर्वादेर्वाचकत्वं नास्तीति वक्तुं शक्यम्। मानाभावात्। लोकव्युत्पत्तिसिद्धस्य तस्यानेन निषेद्धुमशक्यत्वात्। नाऽपि तस्य सर्वादिपाठो निषिद्धत इति युक्तम्। तस्याऽप्रकान्तत्वादविधेयत्वाच्च। न च निषेधवैयर्थ्यम्। अवयवकुत्सावबोधकाकज्व्यावृत्त्या चारितार्थ्यात्। तदेव ध्वनयन्नाह॥ फलबलाच्चेति॥ फलं सुवचमिति॥तथा दक्षिणोत्तरपूर्वकाणामित्यादाववयवनिषेधेन कप्रत्यये समुदायसंज्ञाभावोऽपि फलम्। द्वन्द्वावयवमात्रे सुन्दरादिविशेषणान्वयाभाववत् कुत्सादिविवक्षाया अभावः। समुदाये तद्विवक्षायां तु समुदायोत्तरप्रत्ययेन तदुक्तेर्नावयवात्तदुत्पत्तिरिति चिन्त्यमेतत्। समुदायनिषेधे तु द्वन्द्वस्य संज्ञिनोऽधिकरणत्वविवक्षया सप्तमी बोद्धव्या। यद्वा इयं सप्तमी प्रथमार्थे। अकच्स्वरौ तु कर्तव्यौ प्रत्ययं मुक्तसंशयाविति भाष्योक्तैतत्प्रकरणविषयस्मृत्यन्तरेण, तद्विषये, न बहुव्रीहावित्येतत्साहचर्येण वा एतत्प्रकरणस्थसप्तमीनिर्देशानां तदर्थकत्वौचित्यात्। किञ्च, विभाषा जसीत्यनेन फलाभावादवयवनिषेधाभावे तत्साहचर्येणार्थाधिकारानुरोधेन च, द्वन्द्वे चेत्यस्याप्यवयवनिषेधकत्वाभावः। एतेन सप्तमीनिर्देशसामर्थ्याद् बहुलक्ष्यसंस्कारानुरोधाच्च विद्यमानानीत्यध्याहारेण समुदायस्यावयवानां चायं निषेधः। तत्र समुदायस्य व्यपदेशिवद्भावेन निषेधः। आधाराधेयभावेऽपि व्यपदेशिवद्भावस्यानद्यतने लङ्, तुल्यास्य, प्रत्ययस्थादित्यादिसूत्रस्थभाष्यादौ स्पष्टत्वात्। तत्फलं च वर्णाश्रमेतराणामित्यादाववयवसर्वनामत्वप्रयुक्तोऽपि नाकजित्यपास्तम्। इतरकशब्देन समासेऽतिभवकानित्यादाविव तच्छ्रवणस्य दुर्वारत्वेन तन्निषेधे फलाभावाच्चेति दिक्॥

वर्णाश्रमेतराणामित्यादाविति भावः । न च निषेधसामर्थ्यम् । अनाङ्ङस्य व्रतसिलोदर्व्यादृत्त्या चारितार्थत्वात् ॥ जसाधारामिति ॥ यद्यपि शीभावेन जस् अपहियते, तथापि औपचारिकमाधारत्वं बोद्धव्यम् । यद्वा। जसः इः, जसिः,तस्मिन् । सौत्रः सप्तम्या लुक्, इत्यर्थतो व्याचष्टे ॥ जसाधारमिति ॥

जराया जरसन्यतरस्याम् ॥ विभक्ताविति ॥ एतच्च, अष्टन आ विभक्तावित्यतोऽनुवर्तते । तेन जराया इदं जारमित्यादौ नातिव्याप्तिरिति भावः ॥ पदेति ॥ पदमङ्गं च विशेष्यम् । विशेषणेन च तदन्तविधिरिति भावः ॥ तदनुसारिभिरिति ॥ इनातोः पूर्वविप्रतिषेधे एकसूत्रोपात्तत्वात् स्यादेशोऽपि ग्रहीतुमुचित इति तेषामाशयः । अत एव, वीतजन्मजरसः परं शुचि ब्रह्मणः पदमुपैतुमिच्छतामिति भारविप्रयोगम् असमञ्जसमिति मत्वा, वीतजन्मरजस इति पठनीयमिति तैरुक्तम् ॥ एतच्चेति ॥ भाष्यकृता हि, टाङसि इति सूत्रे इनातौ प्रत्याख्याय नादेशमदादेशं च विधाय नादेशे परे एत्वं योगविभागेन साधितम् । बहुवचने झल्येत् । ओसि च । तत, आङि । आङि च परेऽत एत्वं स्यात् । रामेण । तत, आपः संबुद्धौ च एकारः स्यात् संबुद्धौ आङि ओसि च । न चैवमनेनेत्यत्र हलि लोपः स्यादिति वाच्यम् । अनादेशस्य नकारे परे विशिष्य विधानात् । तथा हि । अ नापि । नकारे आपि च परेऽन् स्यादित्यर्थः । सूत्रे, अ इति नान्तस्य नपुंसकनिर्देशः । न च ङसेरदादेशे कृते पररूपं स्यादिति वाच्यम् । अकारोच्चारणसामर्थ्यादीर्घसंभवादिति । तथाच, जराया जरसन्यतरस्यामिति सूत्रे उक्तम् । गोनर्दीयस्त्वाह । अतिजरैरिति भवितव्यं सन्निपातपरिभाषयेति । एवञ्च पूर्वविप्रतिषेधेनेत्यादि सर्वं भाष्यविरुद्धमित्यर्थः ॥

पद्दन्नो ॥ अत्र शस्प्रभृतयो निमित्ततयोपात्ताः । ते च पदाद्यादेशाऽनुरूपान् प्रकृतिविशेषानाक्षिपन्तीत्याह ॥पाददन्तेति॥ यद्यपि,शीर्षश्छन्दसि

व्यावृत्त्येति ॥ समुदायात् प्राप्तस्येति शेषः ॥

यद्यपीति ॥ जसीत्याधारसप्तमीति भावः ॥ जस इरिति ॥ इकारेण ईकारग्रहणं बोद्धव्यम् ॥

प्रत्याख्यायेति ॥ प्रत्याख्यानेन चेदं ध्वन्यते । वक्ष्यमाणक्लेशपरिहारार्थ एवकारो, न तु फलान्तरेऽभिनिवेष्टव्यमिति । आदादेशे त्वदिति च्छेद एव सूत्रतात्पर्यमिति ॥ ते चेति ॥ ये निमित्ततयोपात्तास्ते शस्प्रभृतय इत्यर्थः ॥ अनुरूपानिति ॥ स्वार्थबोधनसमर्थान् स्वसदृशवर्णवतश्चेत्यर्थः । वस्तुतो, वा शोकष्यञि-

इत्यतोऽत्र च्छन्दसीत्यनुवर्तते तथाऽपि भाषायामपि क्वचिद्भवति, मास-श्छन्दसीति वार्तिके छन्दोग्रहणाज्ज्ञाप्यकादिति वक्ष्यते ॥ प्रामादिकमिति ॥ तथाहि । आस्नो वृकस्य वर्तिकामभीके इति मन्त्रे मुखादित्यर्थः, औचित्यात् । वृकस्य चिद्वर्तिकामन्तरा स्याद् इति मन्त्रान्तरसंवादाच्च । एवं हव्या जुह्वान आसनि । आसन्यं प्राणमूचूरित्यादावपि । व्याख्यातं च तथैव वेदभाष्येषु । अत एव हरदत्तेनापि काशिकायाः प्रामादिकत्वमाविष्कृतमिति ध्येयम् ॥

अल्लोपोऽनः ॥ अत्र प्राञ्चः । अन्नन्तस्य भस्याङ्गस्याकारस्य लोपः स्यादिति । तथा सति तक्ष्णा इत्यादौ तकाराकारस्यापि लोपः स्यात् । भस्याङ्गस्यानोऽकारस्येति व्याख्याने तु, अनसा मनसा इत्यादौ स्यात् । तन्त्रावृत्त्यादिनाऽनन्तस्य भस्यानोऽकारस्येति व्याख्यानेऽपि अनस्तक्ष्णेत्यादौ अतिव्याप्तिरेवातो व्याचष्टे ॥ अङ्गावयव इत्यादि ॥ भस्येत्यनेनाक्षिप्तः प्रत्ययविशेषोऽङ्गं चेति द्वयमनो विशेषणम् । अन् तु अकारस्य । अतो नोक्तदोष इति भावः । एतच्च, ष्यङः संप्रसारणमिति सूत्रे भाष्ये स्पष्टम् ॥

तिवद् व्यवस्थार्थमेवेति बोद्धव्यम् ॥ अनुवर्त्तते इति ॥ अस्येति प्राञ्च इति शेषः ॥ ज्ञापकादिति ॥ तन्निवृत्तेरिति भावः । अत एव भाष्ये तदनुवृत्तिर्नोक्ता ॥

तथा सतीति ॥ प्राचीनसंमतव्याख्यादरे इत्यर्थः ॥ भस्येत्यनेनेति ॥ अङ्गस्येत्येतत्सहितेनेत्यर्थः । एतेन भत्वस्य वृषणोऽप्रत्ययवस्वश्वशब्दयोरपि विधानात्तेन न प्रत्ययाक्षेप इत्यपास्तम् ॥ अङ्गं चेति ॥ अधिकारलब्धमिति भावः । ननु भत्वस्य तत्सूत्रे, यस्मात् प्रत्ययविधिरित्यनुवृत्त्याऽङ्गनिष्ठत्वेन तेनाङ्गनिष्ठयजादिपरत्वाक्षेपेण तदवयवस्य तत्त्वालाभः । किञ्चानो विशेषणेऽपि विधौ परिभाषोपतिष्ठते, नानुवादे इति निर्दिष्टपरिभाषानुपस्थितेरनस्तक्ष्णेत्यादौ दोषो दुर्वार इतिचेत्तत्राह ॥ एतच्चेति ॥ तथाच भाष्यम् । एवं तर्हि कार्यकालं संज्ञापरिभाषम् । यत्र कार्यं तत्रोपस्थितमिदं द्रष्टव्यं, भस्येत्युपस्थितमिदं भवति, यच्चि भमिति । तत्र यजादिपरतयाऽन्कारं विशेषयिष्यामः, अना अकारम् । यजादिस्वादिपरस्यानोऽकारस्येति । तस्यायं भावः । कार्यकालपक्षे भस्येति श्रुते भपदार्थनिर्णायां यच्चि भमित्युपस्थितेन शक्तिग्रहे वृत्ते एतद्वाक्यार्थबोधकाले लक्ष्यानुरोधेन तन्त्रादिन्यायाश्रयणाद् यचीत्यस्यानविशेषणतायाऽपि । विधौ परिभाषेति न्यायस्तु इको गुणवृद्धी, अचश्चेति व्यतिरिक्ते नास्त्येव । उदात्तस्वरितयोर्यण इत्यादावुदात्तस्वरितस्थानिकयण इत्यर्थस्येष्टत्वादिति । एतच्च स्त्रीप्रत्यये इत्वप्रकरणे निरूपयिष्यामः । यदि तु अदमुयङित्यर्थमनन्त्यविकारे इति परिभाषाऽऽश्रयणीया तयैवानस्तक्ष्णेत्यादौ व्यावृत्तिः । अत्र, सान्तमहत इत्यादौ चानेकक्लिष्टकल्पना

रषाभ्याम् ॥ पद इतीयतैव सामर्थ्यादेकपदत्वे लब्धेऽपि समानग्रहणं यत् समानमेव अखण्डमिति यावत्, तत्र यथा स्यात् । तेन समासे न भवति । रामनाम ॥ यूष्ण इति ॥ यूषो मण्डः । मुद्गामलकयूषस्तु भेदी दीपनपाचनः, इति दर्शनात् ॥ इति पक्षे त्विति ॥ एतेन पञ्चमीसमासस्य पाक्षिकतां ध्वनयति । तथाहि । भाष्ये, बेभिदिता, माथितिकः, अपीपचन्निति प्रयोजनत्रयमुक्तम् । तच्चान्यथा सिद्धम् । एकाच उपदेशे इत्यत्र विहितविशेषणादेव बेभिदितेत्यत्र इण्निषेधो न । मथितं पण्यमस्येति विग्रहे ठकि ठस्येकादेशे यस्येति चेत्यल्लोपे, इसुसुक्तान्तात् क इति कादेशस्तु न भविष्यति । ठस्याभावात् । न च स्थानिवद्भावेन ठत्वमल्विधित्वात् । ठ-

---

ऽपेक्षया परिभाषास्वीकार एवोचितः । भाष्यन्तु वार्त्तिकोक्तफलानामन्यथासिद्धिप्रदर्शनमात्रपरम् । अत एव, यान्येतस्याः परिभाषायाः प्रयोजनानि तदर्थमेषा परिभाषा कर्तव्येति भाष्ये उपसंहृतम् । यत्तु, न संप्रसारण इति सूत्रे नैतस्याः परिभाषायाः सन्ति प्रयोजनानीति भाष्यं, तत्तु न संप्रसारण इत्यादेरेव ज्ञापकात् प्रयोजनालपत्वसूचकमित्युच्यते । तदाऽस्तु अङ्गविशेषणमेव तदित्याहुः ॥ सामर्थ्यादिति ॥ निमित्तनिमित्तिनोरपदस्थयोरसम्भवादिति भावः ॥ अखण्डमिति ॥ तत्त्वं च निमित्तानधिकरणनिमित्तिमत्पदाघटितत्वम् । तेन मातृभोगीण इत्यत्र णत्वसिद्धिः । केवलभोगीनेत्यस्य प्रत्ययमात्रस्य वा तत्त्वाभावात् । अत एवात्मनविश्वजनेति सूत्रस्थमाचार्यादणत्वं चेति चरितार्थम् । सुपर्वणेत्यादिसिद्धये, निमित्तानधिकरणेति । पदं चात्र लोके विभक्तीतरानपेक्षतयाऽर्थबोधकत्वेन दृष्टम् । तेन गन्धर्वगानमित्यादौ सुबुत्पत्तेः प्राक् समासेऽषि णत्वं न । क्षुभ्नादिषु नृनमनशब्दस्तु संज्ञाभूतोऽखण्ड इति तस्य ऋवर्णात् परस्य णत्वे ज्ञापकता भाष्योक्ता नासङ्गतेत्याहुः ॥ मण्ड इति ॥ तद्विशेष इत्यर्थः ॥ बेभिदितेति ॥ बेभिद्यत्रेर्यङन्तात्तृचि अल्लोपयलोपयोः, एकाच उपदेश इति निषेधादिण् न स्यात् । पञ्चमीसमासे त्वल्लोपस्य स्थानिवत्त्वान्निषेधाप्रवृत्तिरिति भावः । एवमितरयोः कादेशजुसोरभावो बोध्यः ॥ विहितविशेषणेति ॥ एवञ्च स्थानिवत्त्वं विनाऽपि तदप्रवृत्तिः सिद्धेति भावः । विहितविशेषणत्वं चास्यैकाचो द्वे इत्यत्र भाष्ये ध्वनितम् । तत्र हि यङ्लोपे बेभिदितेत्यत्र यङन्तात्तृचि इट्प्रतिषेधमाशङ्क्यैकाचोऽङ्गादिति व्याख्यानेन परिहृतम् । तद्भाष्यस्य यथाश्रुतत्वे बिभित्सतीत्यादौ दोषवारणायोपदेशग्रहणस्यैकाजंशेऽपि संबन्धे बेभिदितेत्यादावपि परिहारासंभवेन तस्य विहितविशेषणत्वे तात्पर्यमावश्यकम् । प्रत्ययविधानाऽवधेरेव प्रायेणाङ्गत्वादङ्गादित्यननेनेदं सूचितम् । विहितविशेषणे च बिभित्सतीत्यादावदोषेणैकाजंशे उपदेशग्रहणासंबन्ध इति तदाशयः ॥ न भविष्यतीति ॥ स्थानिवत्त्वं विनाऽपीति शेषः ॥ अल्विधित्वादिति ॥ ठस्येक इत्यत्र स्थानिनि

स्येक इत्यत्र हि स्थान्यादेशयोरकार उच्चारणार्थः । अपीपचपन्नित्यपि णिलोपस्य चङन्त्यकारयोरेकादेशस्य च स्थानिवद्भावं विनापि सिद्धम् । विदिसाहचर्यादभ्यस्तादपि लङ एव झेर्जुस्विधानात् । न च सिचा साहचर्याद् लुङ एव किं न स्यादिति वाच्यम् । पूर्वसाहचर्यात् परसाहचर्यस्य बलीयस्त्वादिति दिक् ॥ पूर्वत्रासिद्धेनेति ॥ एतच्च न्यायसिद्धमित्यवोचाम । त्रिपाद्या असिद्धत्वेन तत्रत्ये कार्ये कर्तव्ये अचः परस्मिन्नित्यतिदेशस्याऽप्रवृत्तेः ॥ तस्येति ॥ तस्य पूर्वत्रासिद्धे इत्यस्य । तथाच स्थलत्रये स्थानिवद्भावो वक्तव्य इत्यर्थः । संयोगादिलोपे चक्रयत्र । लत्वे निगाल्यते ।

प्रत्ययेषु च सर्वत्राकारो न विवक्षितः, आदेश एव तु विवक्षितः । अन्यथा निषादकर्षूशब्दादोर्देश इति ठञि व्यञ्जनमात्रस्य व्यञ्जनरूपकादेशे कशब्दस्य लाक्षणिकत्वात्, केण इति ह्रस्वानापत्तिरिति भावः ॥ स्थान्यादेशयोरिति ॥ इकादेशस्थानिभूतप्रत्यये आदेशविधायके सूत्रे चेत्यर्थः । स्पष्टं चेदं, ठस्येक इत्यत्र भाष्यकैयटयोः । इदमुपलक्षणम् । सन्निपातपरिभाषयापि कादेशवारणं बोध्यम् । स्पष्टं चेदं, ठक्छसोश्चेति वार्तिकभाष्ये ॥ बलीयस्त्वादिति ॥ एतच्च, यस्य विभाषा, वित्तो भोग इति सूत्रस्थकैयटे स्पष्टम् । एतत्सर्वमपरविधाविति तु वक्तव्यमिति वार्त्तिकस्थकैयटानुरोधेन ॥ दिगिति ॥ दिगर्थस्तु एतदर्थं पञ्चमीसमासस्यावश्यकत्वम् । तथा हि । परसाहचर्यस्य बलवत्त्वे मानाभावः । विप्रतिषेधसूत्रे कार्यशब्देन शास्त्रीयस्यैव ग्रहीतुमौचित्येनात्र तदप्राप्तेः ।

नित्यः परयणादेशः परश्चासौ व्यवस्थया ।

युगपत्संभवो नास्ति बहिरङ्गेण सिध्यति, इत्यचः परस्मिन्नितिसूत्रस्थभाष्योक्तरीत्या पूर्वसाहचर्यस्यान्तरङ्गत्वेन तस्यैव ग्रहीतुमौचित्याच्च । विभाषा गमहनविदविशामित्यत्र लुग्विकरणपरिभाषानुग्रहाय परसाहचर्याश्रयणं, नुदविदोन्दत्रेत्यत्राप्यन्तरङ्गपरिभाषानित्यत्वाद् व्याख्यानेन परसाहचर्याश्रयणमिति बोध्यम् । प्रत्यैषिषन्नित्यादौ लङि, उभे अभ्यस्तमिति सूत्रस्थभाष्यसंमते एवमपि दोषाच्च । पूर्वोत्तरसाहचर्येण भावरूपादेशानपहृतविकरणकाभ्यस्तस्यैव ग्रहणमित्यप्यतिक्लिष्टम् । ततो वरं पञ्चमीसमास एव । अपरविधाविति तु वक्तव्यमिति न्यासान्तरेऽपि पञ्चमीसमासो वक्तुं शक्यः । न्यासान्तरं तु स्वविधेरपि संग्रहार्थेति स्पष्टमेव । अतिप्रसङ्गस्त्वनित्यत्वेन परिहरणीय इति ॥ चक्रयत्रेति ॥ तक्षिरक्षिभ्यां यन्ताभ्यां क्विपि लोपाभावोऽपि फलम् ॥ निगाल्यते इति ॥ न चात्र णिलोपात् पूर्वं लत्वम् । सपादसप्ताध्यायीस्थकार्यस्य प्रवृत्तियोग्यतया तदप्रवृत्तेः । न च स्थानिवत्त्वमल्विधित्वात् । प्रत्ययलक्षणं तु नित्यमार्थमिति भावः । अत्र बहिरङ्गासिद्धत्वं न । नाजानन्तर्य इति तन्निषेधात् । त्रिपाद्यां तदप्रवृत्तेरेव विसर्जनीयसूत्रस्थभाष्यसंमतत्वाच्चेत्यन्यत्र प्रपञ्चितम् । एवं, प्लायत इत्यप्ययणा-

णत्वे माषवपनी । इह यस्येति चेति अल्लोपस्य स्थानिवत्त्वेन नकारस्य प्रातिपदिकान्तत्वाभावाण्णत्वं न । यत्त्वाहुः । कथञ्चित् स्थानिवत्त्वाभावेऽपि यूष्ण इत्यादौ, रषाभ्यामित्यस्य नोपयोगः । ष्टुत्वेन सिद्धेः । तथाच षग्रहणमुत्तरार्थमिति आकरे स्थितम् ।ततश्च रभसवादेनैतदुपन्यस्तमिति । स एवाऽयं रभसवादः । तथाहि । उत्तरार्थतयाऽपीह षग्रहणं स्थितम् । ततश्च यूष्णः पुष्णातीत्यादौ रषाभ्यामिति णत्वस्य प्रवृत्तिः केन वार्यताम् । ष्टुत्वेनेति चेन्न । तस्यासिद्धत्वात् । न च वचनप्रामाण्यात् सिद्धत्वम् । पुष्टिरित्यादौ चरितार्थत्वात् । नस्य षयोगे ण इत्यंशोऽचरितार्थ इतिचेन्न । तस्य पृथगनुक्तेः । इह षात् परस्येत्युक्तिरचरितार्थेत्यस्यापि तुल्यत्वाच्च । आकरे हि इह षग्रहणं विना लक्ष्यासिद्धिर्नास्ति इत्येवाभिप्रेतं, न तु पुष्णातीत्यादौ रषाभ्यामित्यस्याप्रवृत्तिरिति दिक् ॥

नलोपः प्रातिपदिकान्तस्य ॥ लुप्तषष्ठीके इति ॥ सौत्रत्वान्न सुः । षष्ठीतत्पुरुषयोः पूर्वपदे सापेक्षत्वेन समासासंभवात् । प्रातिपदिकस्य पदविशेषणत्वाच्चेति भावः ॥ तदन्तस्येति ॥ षष्ठीतत्पुरुषः । तस्यान्तो यो नकारस्तस्येत्यर्थः । उक्तं च हरदत्तेन—

विशेष्यमन्तस्येत्यस्य नेत्येतदविभक्तिकम् ।
तथैव प्रातिपदिकेत्येतत् पदविशेषणम्, इति ॥

यत्तु प्राचोक्तम् । प्रातिपदिकान्तस्य पदान्तस्य नस्येति । यच्च व्याख्यातम् । अन्तस्येत्युभाभ्यां संबद्ध्यते इति । तद् गौरवग्रस्तम् । अन्तस्येत्यस्याप्रवृत्तिप्रसङ्गात् । व्यधिकरणषष्ठीद्वयापत्तेश्च । यदि तु अभेदेनैव संबन्धेन प्रातिपदिकेनेव नेत्यनेनापि पदं विशेष्यते तदा विशेषणेन तदन्तविधौ सौत्रमन्तग्रहणं शक्यमकर्तुम् ॥

वित्यस्योपसर्गविशेषणत्वे फलम् ॥ माषवपनीति ॥ इह ङीबुत्पत्तेः प्राक् समासे ङीपि अल्लोपे समासरूपप्रातिपदिकान्तत्वाण्णत्वं प्राप्तम् । पूर्वपदाक्षिप्तसमासरूपप्रातिपदिकान्तस्य तेन णत्वविधानात्तस्यापि पूर्वपरोभयसापेक्षत्वेन समासत्वज्ञानसापेक्षत्वेन च समत्वात् त्रिपादीस्थत्वाच्च बहिरङ्गासिद्धत्वाशङ्का नात्रेति बोध्यम् ॥ अप्रवृत्तिरिति ॥ अभिप्रेतेति शेषः ॥

सापेक्षत्वेनेति ॥ नलोप इत्येतद्विषयमिदम् । अन्त्ये आह ॥ पदविशेषणत्वाच्चेति ॥ व्यधिकरणषष्ठीति ॥ प्रातिपदिकस्य पदस्येत्यनयोः परस्परानान्वितयोरन्तेनान्वयादिति भावः ॥ अभेदेनैवेति ॥ सम्बन्धान्तरासत्त्वेऽपि विशेष्यविशेषणभावसम्बधेनेत्यर्थः ॥ शक्यमकर्तुमिति ॥ पदस्येत्यस्य क्वचिद्वैयधिकरण्येना-

विभाषा ङिश्योः ॥ शीति नपुंसकाच्चेति विहितो, न तु जश्शसोः शिः । तस्मिन् भत्वासंभवात् । भस्येत्यनेनासर्वनामस्थानस्यैव यजादेरा-क्षेपात्तदेतदाह ॥ असर्वनामस्थानेति ॥ अत एवेति ॥ दोषणीति प्रयोगात् । यद्यपि समाहारद्वन्द्वस्य एकशेषे कृतेऽपि भाष्यं सुयोजं, तथाऽपि ककुदित्यस्य पृथक्पदत्वं न्याय्यम् । अन्यथा ककुद एकत्वं बाहोर्द्वित्वं च न लभ्येतेति भावः । तमुपाद्रवदुद्यम्य दक्षिणं दोर्निशाचर इति रघुः । तत्र दक्षिणं दोरिति उद्यम्येत्यनेन कर्मतया संबद्ध्यते ॥ दोषं तस्येति ॥ दोषं तस्य तथाविधस्य भजतश्चापस्य गृह्णन् गुणमिति श्रीहर्षप्रयोगः । तत्र दोषं हस्तं दूषणं च भजतश्चापस्य गुणं मौर्वीमतिशयं च गृह्णन् इति संबन्धः । अमरव्याख्यातारस्तु । दोष्शब्दं स्त्रियामपि स्वीकृत्य भागुरिमतेन टापि दोषेत्युक्त्वा, दोर्दोषा च भुजो बाहुः पाणिर्हस्तः करस्तथेति धनञ्जयनिघण्टुमुदाजह्रुः ॥ द्वयोरह्नोर्भव इति ॥ तद्धितार्थेति समासः । कालाट्ठञ् । द्विगोर्लुनपत्य इति लुक् । राजाहःसखिभ्य इति टच् । अह्नोऽह्न एतेभ्य इत्यह्नादेशः ॥ अह्नः साय इति ॥ स्यतेर्घञि अवसानवचनः सायशब्दः । संख्याविसायेति ज्ञापकादेकदेशिसमासः ॥ इत्यदन्ताः ॥

हाहानिति ॥ गन्धर्वविशेषवाचकमव्युत्पन्नं प्रातिपादिकमिदम् । कौमारास्तु– जहातीति हाहा इति क्रियाशब्दं वदन्तो विश्वपावद्रूपमाहुः । तन्मते प्रत्युदाहरणं तु, अकारो वासुदेवः स्यात् तेन सह वर्तन्त इति साः । तान् सान् इति बोद्धव्यम् ॥ इत्यादन्ताः ॥

आङो नाऽस्त्रियाम् ॥ पुंसीति तु नोक्तम् । अमुना कुलेनेत्यत्र यथा स्यात् । न च नुमा रूपसिद्धिः । मुत्वस्यासिद्धत्वादिकोऽचीति नुमोऽप्राप्तेः ।

ऽन्वयेऽस्य तात्पर्यग्राहकत्वं भाष्ये उक्तं, तत्तु लक्ष्यानुसारिव्याख्यानादेव ज्ञापकं विनाऽपि सिद्धमित्यभिमानः ॥ भत्वासम्भवादिति ॥ सर्वनामस्थानत्वेनेति भावः ॥ समाहारद्वन्द्वस्येति ॥ प्राण्यङ्गत्वात् कृतसमाहारद्वन्द्वस्य ककुद्दोःशब्दस्येत्यर्थः ॥ सुयोजम् ॥ दोःशब्दस्य पुंस्त्वेऽपि सुनिर्वाहम् ॥ न्याय्यम् ॥ अल्पाच्तरत्वेन दोःशब्दस्य द्वन्द्वे पूर्वनिपातापत्तेः । किञ्च, तदन्ते आदेशो दुर्लभः । विशेष्यासन्निधानादिति भावः ॥ ककुद एकत्वमिति ॥ प्रकरणाच्छ्रुतौ तथार्थकमेवेदमिति भावः । दक्षिणं तमुद्यम्य दोर्नामा निशाचर इत्यन्वयभ्रमवारणायाह ॥ तत्रेति ॥ एकदेशिसमास इति ॥ तत्पुरुषत्वे तु कर्मधारय इति बोद्धव्यम् ॥ जहातीति ॥ हा इति शोकव्यञ्जकशब्दमित्यादिः ॥

नादेशे तु नासिद्धत्वं, न मु ने इति निषेधात्। नच, न मु ने इति निषेधो नुम्यप्यस्तु, ने इत्यकारस्योच्चारणार्थत्वादिति वाच्यम्। अमुष्मै कुलायेत्याद्यसिद्ध्यापत्तेः॥

अच्च घेः॥ इदुद्भ्यामिति, ङेरिति, औदिति च पदत्रयमनुवर्तत इत्याऽऽशयेन व्याचष्टे– इदुद्भ्यामुत्तरस्येत्यादिना॥ घेरुत्तरस्येति तु नोक्तम्। सूत्रे घेरित्यस्य षष्ठ्यन्तत्वात्। तन्त्रावृत्त्यादौ च प्रमाणाभावात्। ओदिति पूर्वसूत्रे इदुद्भ्यामुत्तरस्य ङेरिति क्लृप्तसंबन्धस्य त्यागायोगात्॥ औत् स्यादिति॥ अत्र व्याचख्युः। औतस्तित्त्वं स्वरितार्थम्। न विभक्ताविती-त्त्वनिषेधस्तु न भवति। अनित्यत्वात्। अदित्यत्वं च, इदमस्यमुरिति थमो मकारस्येत्संज्ञापरित्राणार्थादुदित्करणाल्लभ्यत इति तत्रैवोक्तमिति। तच्चिन्त्यम्। न विभक्ताविति सूत्रे ङेरौतस्तकार उच्चारणार्थो, नेत्संज्ञ इति स्वयमेवोक्तत्वेन पूर्वापरविरोधात्। युक्तं चोच्चारणार्थत्वं, न तु स्वरितार्थत्वम्। स्तीर्णे बर्हिषि समिधाने अग्नावित्यादौ स्वरितत्वादर्शना॰। आदिति तपरत्वं

नुम्यप्यस्त्विति॥ अयं भावः॥ तन्त्रेण नाभावे नकारे च कार्ये तं प्रति अन्यं प्रति च कृते च कार्यान्तरं प्रति मुभावो नासिद्ध इति तदर्थः। एतेन मुत्वस्याऽसिद्धत्वेनादेशे गुणे नुमादेरप्राप्तिरिति परास्तम्। नुम्येवास्त्विति पाठे एवकारोऽप्यर्थः॥ उच्चारणार्थत्वादिति॥ तन्त्रेणोच्चरिते द्वितीये नेशब्दे इत्यर्थः॥ अमुष्मै इति॥ न मु न इति सूत्रविषये पूर्वं विभक्तिनिमित्तकार्याप्रवृत्तौ मुत्वे तस्य नकारविषये कमपि प्रत्यसिद्धत्वाभावेन विभक्त्यादेशं प्रत्यसिद्धत्वेऽपि वास्य स्मैभावात् परत्वेन नुमापत्तेः। आदिना अमू कुले अमुयोरिति तयोरेत्वस्याप्रवृत्तौ मुत्वे नुमि चानिष्टं स्पष्टमेव। न मु टादेश इति वार्तिकस्वारस्येन नादेश इत्येव तदर्थ उचित इत्यपि बोध्यम्॥

नेत्संज्ञ इति॥ इयमपि तदुक्तिश्चिन्त्या। तस्य लोप इति सूत्रभाष्ये उच्चारणार्थानामपीत्संज्ञकत्वस्य स्पष्टमुक्तत्वात्॥ स्वरितत्वादर्शनादिति॥ नन्वौतः स्वरितत्वेऽपि नाग्नावित्यत्र स्वरितश्रवणमग्निशब्दस्यान्तोदात्तत्वेनैकादेश उदात्तेनेत्यनेनोदात्तत्वादिति चेन्न। वृत्तावनुदात्तस्येत्यस्य तत्रानुवर्त्तितत्वात्। शेषनिघातेनौकारस्वरितत्वमादायाग्निशब्दस्य सर्वानुदात्तत्वाच्च। स्वरितस्य तु नोदात्तपदेन ग्रहणमुदात्तस्वरितयोरित्यादौ स्वरितग्रहणात्। उच्चारणार्थानामित्संज्ञकत्वेऽपि प्रत्ययाप्रत्ययथोरित्येव सिद्धे पुनस्तिति प्रत्ययग्रहणं कर्तव्यमिति वार्त्तिकेनौपदेशिकप्रत्ययत्ववत्येव तत्प्रवृत्त्या नात्र स्वरितत्वप्रवृत्तिरिति तत्त्वम्। आदेशेषु दकारस्थानिकचर्त्वनिष्पन्नतकारस्य सत्त्वेन दित्वात्तदप्राप्तेः। उच्चारणार्थ इत्यस्य च वर्णान्तरोच्चारणे मुखस्य क्लेशवारणार्थो, न त्वन्यफलार्थ इत्यर्थः।

तु बुद्धावित्यादावत्वे कृते स्त्रियां टाब् मा भूद् इत्येतदर्थमित्याहुः । तदपि चिन्त्यम् । तपरग्रहणाद्धि टापा सह दीर्घो मा भूत्, टाप् तु स्यादेवालक्षणद्वयबाधे मानाभावात् । अत एव कृन्मेजन्त इति सूत्रभाष्यवार्त्तिकयोर्विवरणे च सन्निपातपरिभाषया टाब् नेत्युक्तम् । टापा व्यवधाने हि आनन्तर्यविघातः स्यादिति । तस्माद् औत इव अतोऽपि तपरकरणमुच्चारणार्थमेवेत्यऽवधेयम् ॥

अनङ् सौ ॥ सोर्डेत्येव सिद्धे अनङ्विधानमन्यतोऽपि स्यादितिज्ञापनार्थम् ॥ तेन संबुद्धौ अनङ् सिद्ध्यतीति प्राञ्चः । तच्चिन्त्यम् । सोर्डेत्युक्ते हि, ऋदुशनेत्युत्तरसूत्रेणापि डा स्यात् । ततश्च उशनेत्यत्र, सर्वनामस्थाने चासंबुद्धाविति दीर्घः स्यात् । पुरुदंसेत्यत्र सान्तमहत इति दीर्घः स्यात् । यद्वा । संज्ञापूर्वको विधिरनित्य इति वा अङ्गवृत्तपरिभाषया वा समाधानं बोद्धव्यम् ॥

हल्ङ्याब्भ्यो ॥ दीर्घादित्येतद् ङ्याप्योरेव विशेषणं, न तु हलोऽसंभवादित्याह ॥ दीर्घादिति ॥ परमिति ॥ न त्विदं विहितविशेषणम् । या, सा, का, इत्यादावव्याप्तेः । न च तत्र हलन्ताद्विहितत्वेन निर्वाहः । यः स इत्यादावतिव्याप्तेः । कर्तेत्यादावव्याप्तेश्चेति भावः ॥ हलिति ॥ तस्य च सुतिसीत्येवंरूपत्वमेकदेशविकृतन्यायेन बोद्धव्यम् ॥ लुप्यत इति ॥ यद्यपीह, लोपो व्योरित्यतो लोप इत्यनुवर्तते । तच्च तत्र भावसाधनं, तथाऽपीह कर्मसाधनम् । हलिति प्रथमान्तेन सामानाधिकरण्यादिति भावः ।

अत एव भाष्ये औकारं डितमाश्रित्यादिति प्रत्याख्यातम् । न हि तदा तित्त्वमस्ति । न च डित्त्वे विंशतौ तिलोपापत्तिः । भाष्यप्रामाण्येन तस्य सप्तम्यामनभिधानादिति दिक् ॥ अदिति ॥ अस्य यदपीत्यादिः ॥ दीर्घो मा भूदिति ॥ भिन्नकालव्यावृत्त्यर्थत्वात्तपरत्वस्येति भावः । न च, ङ्योर्विदर्थस्येति प्रकरणेन समासबाध इवानेन टापोऽपि बाध इति वाच्यम् । प्रतिपदविधाना षष्ठी न समस्यत इति वार्त्तिकानुरोधेन तत्र तथा कल्पनेऽपीह तथा कल्पने मानाभावात् ॥ अनङ् सिद्ध्यतीति ॥ वैकल्पिकत्वमात्रं तु वाचनिकमिति तद्भावः । संज्ञापूर्वक इत्यस्य भाष्यास्पृष्टत्वादाह ॥ अङ्गवृत्तेति ॥ इयमगतिकगतिः । सोर्डेति न्यासे लाघवभावश्च, डित्त्वसामर्थ्याट्टिलोपकल्पने गौरवं च । तस्मादुशनसोऽनङ् तद्वैकल्पिकत्वं च चिन्त्यमेव । भाष्यानुक्तत्वादिति प्रामाणिकाः ॥ चेतीति ॥ तस्मादित्युत्तरस्येति जाग्रति विहितविशेषणासम्भवश्च-शब्दार्थः ॥ एकदेशविकृतन्यायेनेति ॥ स्थानिधत्त्वस्योपलक्षणमिदम् । अङ्गाधिकविकारेण प्रत्यभिज्ञाभावाच्छिन्नपुच्छश्वदृष्टान्तमूलकन्यायस्यात्राप्राप्तेरिति बोद्धव्यम् ॥ प्रथमान्तेनेति ॥ यद्यपि

दीर्घग्रहणं किम् । अतिखट्वः । निष्कौशाम्बिः । ननु इह समस्तस्य ङ्याबन्तत्वं नास्ति । नच स्त्रीप्रत्यये तदादिनियमो नास्तीति वाच्यम् । अनुपसर्जने हि तथा । इह तूपसर्जनत्वात् तदादिनियमोऽस्त्येव । सत्यम् । तथाऽपि उत्तरपदस्य ङ्याबन्तत्वेन सोस्ततः परत्वानपायात् । न हीदं विहितविशेषणमित्यवोचाम । अत एव बहुश्रेयसीत्यत्र सुलोपः । स्यादेतत् । गङ्गीयतेः क्विप् । गङ्गीः । इहेकारस्य स्थानिवद्भावेनाप्त्वादीर्घत्वाच्चातिव्याप्तिरितिचेत् सत्यम् । ङी ई, आ आप् इति प्रश्लिष्य दीर्घग्रहणस्य प्रत्याख्यानान्न कश्चिद्दोषः । सुतिसीति किम् । भेत्ता तासेस्तकारस्य लोपो मा भूत् । न चैवमपि अभैत्सीद् इत्यादौ सिचो लोपापत्तिः । सुतिभ्यां साहचर्येण विभक्तेरेव ग्रहणात् । अपृक्तं किम् । भिनत्ति छिनत्तीति प्रत्युदाहरन्ति । तच्चिन्त्यम् । विशिष्टस्यालत्वात् । सुतिसीनां हलिति क्लिष्टं व्याख्यायातिप्रसङ्गापादनस्यानुचितत्वात् । यदप्याहुः । सुरां सुनोतीति सुरासुत् । तमाचष्टे सुरासयति । ततः क्विप् । सुराः । सुरासौ । सुरासः । इह सुनोतेरवयवस्य सस्य लोपं व्यावर्तयितुम् । अपृक्तग्रहणमिति । तदपि न । परस्परसाहचर्येण सुतिसीनां विभक्तीनामेव ग्रहणात् । अन्यथा सिचो लोपापत्तेरुक्तत्वात् । प्रत्ययाप्रत्ययय्योः प्रत्ययस्यैव

तस्मादित्युत्तरस्येत्युक्तेः षष्ठ्यन्तताऽपि सम्भवति, तथापि बहुषु पदेषु विभक्तिविपरिणामकल्पनापेक्षयाऽऽगन्तुकलोपशब्दे एवार्थान्तरकल्पनमुचितमिति भावः । ननु सुतिसीति प्रत्ययैर्यस्मात् स विहितस्तदादेरित्युपस्थित्या तस्य हल्ङ्याब्भ्य इति विशेषणमिति हल्ङ्याबन्तात्तदादेः परस्येत्यर्थेन प्रकृत्याक्षेपादुपसर्जनस्त्रीप्रत्यये तदादिनियमसत्त्वाच्च प्रकृतेङ्याबन्तत्वाभावेन नात्र दोष इत्यत आह ॥ अत एवेति ॥ एतत्सिद्ध्यर्थं, येन विधिरिति परिभाषया शब्दरूपं विशेष्यमादाय तदन्तविधौ ततः प्रत्ययग्रहणपरिभाषयोक्तं विशेष्यमादाय पुनस्तदन्तविधौ टिड्ढाणञिति सूत्रेऽणन्तान्तादितिवद् ङ्याबन्तान्तादित्यर्थस्यावश्यकत्वेनात्र दोषः । मालेत्यादौ तु व्यपदेशिवद्भावेन सिद्धिरिति भावः । श्रविष्ठासु जातः श्रविष्ठ इत्यादौ तद्धितलुकि स्त्रीप्रत्ययलुकि च प्रत्ययलक्षणेन टाबन्तत्वादतिव्याप्तिवारणार्थं दीर्घग्रहणमित्यपि बोध्यम् ॥ अतिव्याप्तिरिति ॥ अस्य स्त्री ई देवदत्तस्य ई देवदत्तेरित्यादावपि सेति बोद्धव्यम् ॥ प्रत्याख्यानादिति ॥ दीर्घग्रहणेन उपस्थितत्व[illegible]स्यैव दीर्घस्य ग्रहणाद्वेत्यपि बोद्धव्यम् ॥ सुरासयतीति ॥ न च णौ चङीति सूत्रस्थभाष्यप्रामाण्येन इदुदुपधेभ्यो णिजास्तीति सिद्धान्तात् कथमत्र णिजिति वाच्यम् । तद्भाष्यस्य तेषां लुङि प्रयोगाभाव-

ग्रहणाच्च। हल् किम्। बिभेद। ननु प्रथमहल्ग्रहणं व्यर्थम्। हलन्तात् परस्य संयोगान्तलोपसंभवात्। अत्राहुः—

संयोगान्तस्य लोपे हि नलोपादिर्न सिद्ध्यति।
रात्तु तेनैव लोपः स्याद्धलस्तस्माद्विधीयते॥

तथा हि। सस्वेत्यत्र नलोपो न स्यात् संयोगान्तलोपस्यासिद्धत्वात्। स्यादेतत्। संयोगान्तलोपो नासिद्धः। न ङिसंबुद्ध्योरिति सूत्रे संबुद्धिग्रहणाज्ज्ञापकात्। न चैवं गोमानित्यादावपि नलोपापत्तिः। ज्ञापकस्य विशेषविषयत्वात्। यत्र हि नकारविभक्त्योरानन्तर्यं तत्रैव सिद्धत्वं व्याख्यानात्। यत्त्वाहुः। हे ब्रह्मन्निति नपुंसकार्थत्वाद् नैतज्ज्ञापकमिति। तन्न। लुका लुप्ते प्रत्ययलक्षणाभावेन संबुद्धौ वा नपुंसकानामित्यस्यावश्यकतया च संबुद्धिग्रहणस्य नपुंसकविषयत्वासंभवेन उक्तज्ञापकस्य सुस्थत्वात्। तस्मान्नलोपो न प्रयोजनमिति चेत्। इह तर्हि अभिनोऽत्रेत्यत्र रोरुत्वं न स्यात्। तदिदमुक्तं, नलोपादिरिति। तथा अबिभर्भवान् इत्यत्र तिलोपो न स्यात्। रात्सस्येति नियमात्। अत्रेदमवधेयम्। ङ्याब्ग्रहणं सोरेव विशेषणं, न तु तिस्योः। व्याख्यानात्। अस्मिन्नेव सूत्रे द्विहलपृक्तग्रहणं तिस्योश्च ग्रहणं न कर्त्तव्यं भवतीति भाष्यं चेह प्रमाणम्। यदि हि ङ्याब्ग्रहणं तिस्योरपि विशेषणं स्यात् तर्हि कथं तिस्योर्ग्रहणस्याकर्तव्यतां ब्रूयात्। यत्तु ङ्याब्भ्यां तिस्योरसंभव एवेति। तत्र ङ्यन्तादसंभव इति

कल्पनेनोपपत्तेः सर्वथा तदभावकल्पनमप्रामाणिकमित्यभिमानात्॥ग्रहणाच्चेति॥ सावनुनासिकोकारपाठाच्चेत्यपि बोध्यम्। एवञ्चापृक्तग्रहणं चिन्त्यप्रयोजनम्। वस्तुतो गङ्गीः सुरा इत्यादेरभिधाने दृढं मानं चिन्त्यम्॥ विभक्त्योरानन्तर्यमिति॥ एवञ्च विभक्तिसंयोगान्तलोपस्य सिद्धत्वं ज्ञाप्यत इति तात्पर्यम्। गोमानित्यादौ लक्ष्यभेदाद् वारं वारं संयोगान्तलोपः॥नपुंसकार्थत्वादिति॥ स्वमोरिति हि तत्र लुगिति तत्र नलोपनिषेधायावश्यकत्वादिति भावः॥ लुका लुप्ते इति॥ ङिसम्बुद्ध्योरिति सप्तमीति भावः॥ आवश्यकतया चेति॥ ङिसंबुद्ध्योरित्यस्य षष्ठ्यन्तत्वपक्षेऽपि विकल्पार्थमावश्यकतया चेत्यर्थः। यद्यपि, वा नपुंसकानामित्येव भाष्ये पठितं, सम्बुद्धिग्रहणं च सूत्रादेव सम्बध्यत इति तदर्थं तच्चरितार्थम्। तथाऽप्यत्र पाठेनोक्तार्थज्ञापकताऽपि। सम्बुद्धिग्रहणं भाष्ये प्रत्याख्यातमिति तु न भ्रमितव्यम्। सूत्रस्थङिग्रहणस्य ङिसम्बुद्ध्योरनुत्तरेतिवार्त्तिकस्थसम्बुद्धिग्रहणस्य च प्रत्याख्यानेऽपि सूत्रस्थस्याप्रत्याख्यानादिति भावः॥ भाष्यमिति॥ यदि पुनरयमपृक्तलोपः संयोगान्तलोपो विज्ञायेतेत्युपक्रम्य तद्धाप्यं

सत्यम् । आबन्तात्तु आचारक्विबन्ताल्लङस्तिप्सिपौ स्त एव । अगङ्गात्, अगङ्गाः इति यथा । न च शपा व्यवधानम् । एकादेशस्य पूर्वान्तत्वेन ग्रहणात् । न च स्थानिवद्भावः । अपूर्वविधित्वात् । अत्रायं निष्कर्षः । ङ्याप्सोरित्येव सूत्रमुचितम् । न च सुराः सुरासौ इत्यादौ धातोः सकारेऽतिप्रसङ्गः । ङ्याब्भ्यां साहचर्यात् । प्रत्ययाप्रत्ययोरिति परिभाषया च प्रत्ययस्यैव सोर्ग्रहणात् । राजेत्यादौ नलोपस्तु, न ङिसंबुद्ध्यरिति ज्ञापकेन साधित एव । किञ्चाभिनोऽत्रेति उत्वमपि सूपपादम् । संयोगान्तलोपो रोरुत्वे इति सिद्धकाण्डे पाठात् । हरिवो मेदिनं त्वेति यथा । अबिभर्भवान् इत्यत्रापि न दोषः । रात्सस्येत्यत्र तकारस्यापि श्लेषेण त्सस्येति च्छेदात् । ननु उखास्रादित्यादौ संयोगादिलोपः स्यादितिचेन्न । दत्वे कृते तदप्राप्तेः असिद्धं दत्वमिति चेन्न । सिद्धकाण्डे वस्वादिषु दत्वमिति पाठात् । नन्वऽपदान्तत्वाद् दत्वं न स्यादितिचेन्न । सावपि पदं भवतीति पक्षाश्रयणात् । तद्बीजन्तु असर्वनामस्थाने यचीति च्छित्वा यजादौ सर्वनामस्थाने पदं नेति व्याख्यानम् । न चैवं राजेत्यादौ नलोपे कृते सो रुत्वविसर्गौ स्यातामिति वाच्यम् । इतोऽदिति सिद्धे पथिमथीत्याकारविधानेन प्रथमं सुलोपस्य ज्ञापनाद् । ननु नैतज्ज्ञापकं, संबुद्धौ चरितार्थत्वात् । हे पन्थाः,मन्थाः,

---

प्रवृत्तम् ॥ पूर्वान्तत्वेनेति ॥ न चैवं बुद्धावित्यादौ सन्निपातपरिभाषया टाब्नेति भाष्यविरोध इति वाच्यम् । दीर्घप्रवृत्युत्तरमन्तादिवद्भावप्रवृत्तावपि टाबुत्पत्तिकालिकानन्तर्यविघातस्य तेन वारयितुमशक्यत्वात् । अशास्त्रीयत्वात् संनिपातस्यान्तवद्भावेनातिदेष्टुमशक्यत्वाच्च । अत्राबन्तास्त्विति तुनाऽरुचिर्बोधिता । पञ्चमीसमासाश्रयणे स्थानिवद्भावोऽस्ति । अस्याभिधाने च न दृढं मानम् । आबन्तेभ्य आचारक्विबेव नास्ति । आतो धातोरिति सूत्रस्थभाष्यप्रामाण्यात् । तत्र वार्त्तिककृता आतोऽनाप इत्युक्तमिति तद्बीजम् । आचारक्विबन्ताद्यङ्लुक् तु नाऽस्त्येव । तेन कस्य स्त्री की, कीशब्दादिभ्य आचाराक्विबन्तेभ्यो यङ्लुकि लङि अचेकेदित्यादौ ङ्यन्तादपि संभव इत्यपास्तम् ॥ ईकाररूपत्वाभावाच्च ॥ उत्वमपीति ॥ अपिना पूर्वरूपम् ॥ रोरुत्वे इति ॥ कर्त्तव्ये कृते चेति शेषः । न मु ने इतिवत् ॥ हरिव इति ॥ हरिशब्दान्मतुपि, छन्दसीर इति वत्त्वे नुमि संयोगान्तलोपे मतुवसोरिति रुत्वे उत्वे गुणः ॥ छेदादिति ॥ कीर्त्तयतेः क्विच्विचावेव न स्तो, वृतेर्यङ्लुकि लङि ईडभावे तिप्सिपोः प्रयोग एव नास्ति । यथालक्षणमप्रयुक्ते इत्यत्रैव भाष्योक्तेः । अप्रयुक्ते लक्षणप्रवृत्त्यभावस्यैव योग्यतेत्यर्थः । प्रयुक्तानामिदमन्वाख्यानमिति सिद्धान्तात् ॥ नेति व्याख्यानमिति ॥ उपपादितं चेदं रामशब्दान्ते ॥ नलोपे कृते इति ॥ संयोगान्तलोपस्यासिद्धत्वादिति भावः ॥

ऋभुक्षाः । तत्र हि दीर्घोऽसंबुद्धाविति पर्युदस्तः । नलोपश्च निषिद्ध इतिचेत्, एवं तर्हि नलोपात् प्राक् संयोगान्तलोप इत्यर्थे, न ङिसंबुद्ध्योरिति सूत्रमेव ज्ञापकमस्तु । तथाहि ङिसंबुद्ध्योरिति षष्ठी, न तु सप्तमी ङेर्लुका लुप्ततया प्रत्ययलक्षणाभावात् । ङ्यन्तस्य च प्रातिपदिकस्येति सामानाधिकरण्येन अन्वयः । न च प्रथमं संयोगान्तलोपं विना संबुद्ध्यन्तं प्रातिपदिकं लभ्यते, तस्माद्, ङ्यापः सोरिति न्यासे न किञ्चिद् बाधकम् । यदि तु, वस्वादिषु दत्वमिति वार्तिकं प्रत्याख्यायते, अधातुग्रहणेनैवोखास्रादित्यादौ दीर्घाभावसिद्धेः । तर्हि, हल्ङ्याप्सोरिति सूत्रमस्तु । यत्तु यथाश्रुतं सूत्रं प्राचा व्याख्यातम्, ङ्यन्तादाबन्ताद् दीर्घाच्चेति । तत्र । ङ्यापौ हि दीर्घौ न तु तदन्तमपि । न च दीर्घाद् ङ्यन्तादित्यादेर्दीर्घो यो ङी

नलोपात् प्रागिति ॥ विभक्तिसंयोगान्तलोपस्य नलोपविषये सिद्धत्वाभावज्ञापनद्वारेति शेषः । एतेन राजैधते चक्रुश्चत्र राजाच्छत्रमित्यादौ वृद्धियणतुगादिकं न स्यात् संयोगान्तलोपस्यासिद्धत्वात् । किञ्च, कर्त्रेत्यादावेकमेव यणाशासं पूर्वपरविषयभेदाद्भिन्नमिति शब्दपरविप्रतिषेधात् परयणादेश इत्यवः परस्मिन्नित्यत्र भाष्यकैयटयोः स्पष्टम् । विषयगतपौर्वापर्यस्य लक्षणे आरोप इति तदाशयः । तेन धीमानित्यादौ सुविषयसंयोगान्तलोपशास्त्रस्य नलोपविषये तत्र पूर्वस्मिन्नसिद्धत्वेन नलोपो न स्यादित्यपास्तम् । सावपि पदमिति पक्षे तु अदोषाच्च । आरोपे मानाभावाच्च ॥ षष्ठीति ॥ अत एव ङौ नलोपनिषेधः सार्थकः । तदाह ॥ ङेरिति ॥ न च, न लुमतेति निषेधानित्यत्वान्न दोषः । तदपेक्षया षष्ठ्यन्ततया व्याख्यानस्यैव लघुत्वात् ॥ संबुद्ध्यन्तेति ॥ संबुद्ध्यन्तप्रातिपदिकान्तस्य लोपो नेत्यर्थः ॥ इति सूत्रमस्त्विति ॥ अत एव, सुपीरित्यादिसिद्धिः । अन्यथा पदान्ते संयोगादिलोपस्य संयोगान्तलोपापवादत्वात्तत्प्रवृत्तौ वोरिति दीर्घो न स्यात् । तिप्यनस्तेः, सिपि धातोरिति सूत्राभ्यां धातुसंबन्धिपदान्तसस्य दत्वरुत्वविधायकाभ्यां कसाहचर्येण च प्रकृतिप्रत्ययसंबन्धिवर्णसंयोगमाश्रित्य सस्य पदान्ते संयोगादिलोपाप्रवृत्तिकल्पने तु न किञ्चिल्लाघवम् । किञ्च न ङिसंबुद्ध्योरिति सप्तम्येव युक्ता । ङिग्रहणाच्च न लुमतेत्यस्यैतद्विषयेऽनित्यत्वमेतन्मूलकमेव, वा नपुंसकानामिति वार्त्तिकम् । एवञ्च ब्रह्मभ्रूणवृत्रेत्यर्थं संबुद्धिग्रहणस्यावश्यकत्वेन ज्ञापकासंभवः । अपूर्ववचनकरणेन सिद्धप्रत्याख्यानं तु न युक्तम् । इदमेवाभिप्रेत्य सूत्रशेषे भाष्ये, तस्मादशक्यो हलपृक्तलोपः संयोगान्तलोपो विज्ञातुम् । न चेद्विज्ञायते द्विहलपृक्तग्रहणं तिस्योश्च ग्रहणं कर्त्तव्यमित्युक्तम् ॥ इति सूत्रमित्युपलक्षणम् । हल्ङ्याप्सुतिसि हलिति सूत्रमस्त्वित्याशयात् । अत एवाबिभाराज्यमित्यादौ, दूलोप इति दीर्घसिद्धिरिति दिक् ॥ दीर्घाच्चेति ॥ हलन्तादित्यपेक्षयाकार इति तद्व्याख्यातारः ॥ न तु तदन्तमपीति ॥ तस्याज्झल्समुदायरूपत्वादिति

तदन्तादित्यादिरर्थो लभ्यते । दीर्घादिति पञ्चम्या अनन्वयात् । समासे उपसर्जनयोऽर्थापोर्विशेषणायोगात् । उक्तं हि भाष्ये । सविशेषणानां वृत्तिर्न, वृत्तस्य वा विशेषणयोगो नेति । एतेन, अनदीसंज्ञं ह्रस्वम् इउवर्णान्तमित्यपि प्राचो वृत्तिः प्रत्युक्ता ॥

सख्युरसंबुद्धौ ॥ इहेतोऽत्सर्वनामस्थाने इत्यतः सर्वनामस्थाने इत्यनुवर्तते । तदसंबुद्धावित्यनेन विशेष्यते । गोतो णिदिति सूत्राण्णिदित्यनुवृत्तम् । तत्सामानाधिकरण्येन सप्तम्याः प्रथमा कल्प्यत इत्याह ॥ संबुद्धिवर्जे सर्वनामस्थानमिति ॥ सख्युरसंबुद्धिरित्येव तु सूत्रं युक्तम् ॥

ख्यत्यात् परस्य ॥ कृतयणादेशयोः खिखीशब्दयोरकरणं ख्येति । एवं तितीशब्दयोस्त्येति । उभयत्राप्यकार उच्चारणार्थः । न तु मुख्यापत्यादिशब्दैकदेशानुकरणमिदं । सख्युर्यः । पत्युर्नः । संख्यायाः संवत्सरसंख्यस्य च । आपत्यस्य च तद्धिते इत्यादिनिर्देशादित्यभिप्रेत्याह ॥ खितिशब्दाभ्यां त्यादि ॥ परस्येति ग्रहणमेकः पूर्वपरयोरित्यधिकारनिवृत्त्यर्थम् ॥

औत् ॥ एतच्च नदीसंज्ञकेषु, इदुद्भ्यामिति पूर्वसूत्रेण बाध्यते । घिसंज्ञकेषु, अच्च घेरित्युत्तरसूत्रेण । तस्मात् संज्ञाद्वयशून्योऽस्य विषयः । न च तादृश उकारोऽस्ति । अत आह ॥ उकारेति ॥ यत्तु प्राचा, घिनदीसंज्ञावर्जिताभ्यामिदुद्भ्यां परस्येत्युक्तम् । तन्न । तादृशोकारस्याप्रसिद्धेः ॥ समुदायस्येति ॥ न च पर्युदासेऽपि पर्युदस्यमानसमर्पके सखिशब्दे तदन्तग्राहकत्वं शङ्क्यम् । विशेष्यासन्निधानात् । यत्त्विह ग्रहणवतेत्याद्युपन्यस्तं हरदत्तेन । यच्च ख्यत्यात्सूत्रे कैयटेन । तन्न । तस्य प्रत्ययविधिविषयत्वात् । गौणत्वेऽपीति । अस्थ्याद्यनङ्वदिति भावः । तथा च येन विधिरिति सूत्रे परमसखायाविति बहुव्रीहिः । तत्पुरुषे हि टचा भाव्यमिति कैयटः ।

भावः ॥ प्रत्युक्तेति ॥ इउवर्णान्तस्य ह्रस्वत्वासंभवादिउवर्णयोरेकदेशत्वेन तद्विशेषणासंभवाच्चेति भावः ॥

युक्तमिति ॥ अनङ सावित्यत्र विभक्तिविपरिणामः कार्यः । सर्वनामस्थाने इत्यस्य गोतो णिदित्यत्र प्रथमान्तताया: कल्पितत्वात्र तन्निवृत्तिरित्यभिमानः ॥

विशेष्यासंनिधानादिति ॥ शब्दस्वरूपं विशेष्यं त्वव्यावर्तकम् । किञ्च सत्यपि विशेष्ये सखिशब्दभिन्नान्तस्येत्येव स्यान्न तु सख्यन्तभिन्नस्येति । नञ्तत्पर्युदासापत्तेश्चान्यत्रान्वयायोगादिति भावः ॥ तस्य प्रत्ययविधीति ॥ एव-

तथा, द्वितीया श्रितेति सूत्रे सोमसखेति प्रतीकमुपादाय बहुव्रीहित्वात् समासान्त इति कैयटः । मिदचोऽन्त्यादिति सूत्रे तृज्वत्क्रोष्टुः, स्त्रियां चेति सूत्रे च भाष्यकैयटयोः ख्याधातौ माधवग्रन्थे च स्फुटमेतत् । अनुशुक्षो वरुण इन्द्रसखा । आग्नेया हि मरुत्सखा । तीव्रं सोमं पिबति गौरसखायम् इत्यादिप्रयोगाश्चैवमेव सङ्गच्छन्ते । तत्र बहुव्रीहिप्रयुक्तस्य पूर्वपदप्रकृतिस्वरस्य दर्शनेन गौणत्वात् । एतेन घिसंज्ञासूत्रे शोभनः सखा यस्य सुसखिरित्युदाहरन्तौ हरदत्तन्यासकारौ तदनुगामिनश्चान्ये उपेक्ष्याः ॥

पतिः समास एव ॥ एवकार इष्टतोऽवधारणार्थः । अन्यथा हि समासे पतिरेवेति संभाव्येत । धात्वादेरित्यादिज्ञापकानुसरणे च प्रतिपत्तिगौरवं स्यात् । अथ कथं, सीतायाः पतये नमः । पराशरश्च । नष्टे मृते प्रव्रजिते क्लीबे च पतिते पताविति । उच्यते । पतिरित्याख्यातः पतिः । णौ टिलोपे, अच इरित्यौणादिक इः । अयं पतिशब्दः, पतिः समास एवेत्यत्र न गृह्यते । लाक्षणिकत्वात् । एतेन, कृष्णस्य सखिरर्जुन इति भारतं, सखिना वानरेन्द्रेणेति रामायणं च व्याख्यातम् ॥

बहुगण ॥ बहुगणौ प्रातिपदिके संख्यावाचके गृह्येते । न तु संघवैपुल्यवाचके अपि । संख्यायते अनयेति अन्वर्थसंज्ञाविधानात् । अत एव डतिरपि तद्धित एव गृह्यते । वतुना साहचर्याच्च । न तु पातेर्डतिः ॥

षड्भ्यो लुक् ॥ षड्भ्यः परयोरिति ॥ बहुवचननिर्देशोऽर्थप्राधान्यसूचनार्थः । षडर्थगतसंख्याभिधायिनोरिति फलितोऽर्थः ॥

अ हरदत्तानुरोधेनेदं सर्वमिति भावः ॥ तथा द्वितीयेति ॥ तत्पुरुषविषये बहुव्रीहिर्नेति उपक्रम्योभयं खल्वपीष्यते सोमसखं गवांसख इति भाष्यम् । अन्त्ये, षष्ठ्या आक्रोश इत्यलुक् ॥ संख्यावाचके इति ॥ ड्यादिसंख्याव्यापकधर्मविशेषवाचके इत्यर्थः । न तु बहुत्वं संख्या । नियतविषयपरिच्छेदहेतुत्वरूपसंख्यात्वस्य तत्राभावात् । अत एव भाष्ये यदयमसंख्यां संख्येत्याहेत्युक्तम् ॥ संख्यायते अनयेति ॥ साक्षाद् व्याप्यसंख्याद्वारा वेत्यर्थः ॥ अत एव – बहुगणसाहचर्येण संख्यासंबन्ध्यर्थप्रतिपादकस्य ग्रहणादेव ॥ बहुवचनेति ॥ अन्यथा, षष इत्येव वदेत् ॥ अर्थप्राधान्येति ॥ षट्शब्देन षट्संज्ञकः शब्दस्तदर्थसंख्याश्रयश्चेत्युभयमपि विवक्षितम् । तेषां बहुत्वादिदं बहुवचनम् । तत्रार्थात् परत्वं स्वगतसंख्याप्रतिपादकत्वरूपं गौणम् । तदाह ॥ षडर्थेति ॥ तेन गौणे न । इदं प्राचामनुरोधेन षड्भ्य इति बहुवचनं तिसृभ्य इतिवत् । षट्संज्ञकानां बहुत्वाच्च । न हि सर्वत्र

प्रत्ययलोपे ॥ स्थानिवत्सूत्रेण सिद्धे नियमार्थमिदम् । प्रत्ययस्यासाधारणं यत्र रूपं प्रयोजकं तदेव कार्यं प्रत्ययलोपे सति भवति । न तु प्रत्ययाप्रत्ययसाधारणमिति । तेन शोभना दृषदोऽस्य सुदृषत् प्रासाद इत्यञ्प्रत्ययलोपे दीर्घो न । यद्वा, यत्र प्रत्ययः प्राधान्येनाश्रीयते तत्राल्विधित्वेऽपि विध्यर्थमिदम् । तेन अतृणेडित्यत्र हलादौ पिति सार्वधातुके विहित इम् लुप्तेऽपि तस्मिन् भवति । वर्णाश्रये नास्ति प्रत्ययलक्षणमिति तु वर्णप्राधान्यविषयकम् । तेन गवे हितं गोहितमित्यत्र अत्र न ॥ अस्मादिति ॥ अत्र प्राचा अव्ययेत्यपि पठितं, तत्तु अव्ययानां प्रायेण निर्लिङ्गत्वाद् अव्ययीभावस्य क्लीबत्वेऽपि लिङ्गान्तराभावाच्चोपेक्षितम् ॥ वस्तुतस्त्विति ॥

जातिनिर्देश एवोचितः । आचार्यशैली वा । षष्शब्दस्य बहुवचनान्तस्यैव संज्ञात्वाच्च । तस्मादिदं विहितविशेषणम् । परमपञ्चादीनामपि संख्याप्रकारकसंख्येयविशेष्यकबोधजनकत्वेन संख्यावाचितया षट्त्वमस्त्येव । लोके गणनायां प्रसिद्धानामेव ग्रहणमित्यत्र न मानम् । उपसर्जने तु अतिक्रान्ताद्यर्थप्राधान्यं, न तु संख्याया इति न दोषः । स्पष्टं चेदं सर्वादीनीति सूत्रे भाष्ये इति तत्त्वम् ॥ सिद्धे इति ॥ तृणह इति सूत्रेऽचि नेत्यनुवृत्त्या तृणहानीत्यादिव्याहृतौ हलीत्यननुवृत्त्या अतृणेडित्यस्य सिद्धिः । शास इत् । आङि । अजादौ किङति चेदङ्ग्रहणं वेति नियमेनाजादिव्यावृत्तौ तत्र हलग्रहणाकरणेन मित्रशीरित्यस्य सिद्धिरन्यत्रापीति भावः ॥ प्रत्ययस्यासाधारणमिति ॥ इदं द्वितीयप्रत्ययग्रहणेन लभ्यते । यत्र प्रत्ययस्य विशेष्यत्वं तत्रैवेति नियमस्तु न । राजेत्यादौ पदत्वानापत्तेः ॥ दीर्घो नेति ॥ असो लुकः स्थानिवत्त्वेनासन्तत्वेऽपीति शेषः । न चानुसाहचर्याच्छ्रूयमाणासन्त एव दीर्घ इति वाच्यम् । तदनित्यत्वस्याप्यनेन ज्ञापनात् ॥ प्राधान्येनेति ॥ तत्त्वं च वर्णाविशेषणत्वरूपम् । एतच्च स्थानिवादित्यनुवृत्त्यैव सिद्धे प्रत्ययलक्षणमित्येतत्सामर्थ्याल्लुब्धम् ॥ इमिति ॥ मित्रशीरित्यादौ हलादौ किङति विधीयमानमित्वं च सिद्ध्यतीत्यपि बोद्धव्यम् ॥ वर्णप्राधान्येति ॥ वर्णस्य तत्त्वं च प्रत्ययनिरूपितविशेष्यत्वमितरविशेषणत्वं च । अण् योऽकार इत्याद्यर्थके, टिड्ढाणञित्यादौ, इको यणचीत्यादौ च । तत्रान्त्यमुदाहरति ॥ तेनेति ॥ आद्योदाहरणं तु चित्रायां जाता चित्रेत्यादावण् योऽकारस्तदन्तादिति विहितो ङीब् नेति बोद्धव्यम् । न च गोहितमित्यत्र, न लुमतेति निषेधः । लुप्तप्रत्ययनिमित्तकाङ्क्षोद्देश्यककार्य एव तेन निषेधात् । अत एवोत्कामेत्यादौ क्रमः परस्मैपदेष्विति दीर्घसिद्धिः । पञ्चन्प्रत्ययनिरूपिताङ्गस्य तेन दीर्घविधानात् । तस्मिन्निति न्यासेऽपि लुक्स्थानिभूतप्रत्ययाव्यवहितपूर्वत्वं ज्ञेयकार्ये एव प्रवृत्तिरिति बोद्धव्यम् । यद्वेत्यादिनोक्तो वार्त्तिककृत्संमतः पक्षस्तत्फलानामन्यथासिद्धा भाष्यकृता दूषयित्वा नियमार्थत्वपक्ष उक्त इति दिक् ॥

प्रायेणेति ॥ विभक्तिप्रतिरूपकाणां लिङ्गयोगेऽपि स्त्रिषु सारूप्याभाव इत्याशयः ॥

अर्थप्राधान्यबोधकस्य बहुवचनस्याभावाद् गौणत्वेऽपि त्रयादेशो न्याय्यः। अस्मादृशब्द इति भावः ॥ अकारो वक्तव्य इति ॥ तथा च बहुत्वाभावे औडुलोमिशब्द इकारान्तः। बहुत्वे तु अकारान्त उडुलोमशब्दोऽन्य एव। तस्य च इकारान्तेषु व्युत्पादनं प्रासङ्गिकमिति भावः। तथा चौडुलोमि शब्दस्य इदन्तस्य बहुत्वे अदन्तत्वमिति न भ्रमितव्यम् ॥ इति इदन्ताः ॥

किदिति ॥ तेन, आतो लोप इटि चेत्यालोप इति भावः ॥ ययीपप्रादय इति ॥ यत्तु प्राचोक्तम्, एवं देवयज्यातिलक्ष्म्यादय इति। तन्न। देवान् यजत इति विग्रहे इन्नित्यौणादिकसूत्रेण ह्रस्वान्तस्यैव देवयजिशब्दस्य उज्ज्वलदत्तादिभिः साधितत्वात्। अन्यो द्विजान् देवयजीन्निहन्म इति भट्टिप्रयोगस्य ह्रस्वविषयकतयैव व्याख्यातत्वात्। न च यजेर्दीर्घ ईप्रत्ययः प्रतिपदोक्तोऽस्ति। बहुलग्रहणात् कल्प्यत इति चेद् भवेदेवं यद्यनन्यथासिद्धं कल्पकमुपलभ्येत। वेदेऽपि ह्रस्व एव प्रयुज्यते। आयजिं त्वा मनवे जातवेदसे इति। अतिलक्ष्मीशब्दस्य तु नदीत्वाद्ङ्ये आडागमे नुटि आमि च कृते महदेव वैलक्षण्यमिति न वातप्रमीसाम्यम्। एतच्च मूले एव स्पष्टीभविष्यति ॥ किबन्तेति ॥ एतच्च, माङ् माने शब्दे चेति धातौ माधवग्रन्थे स्पष्टम् ॥ बहुश्रेयसीति ॥ ईयसश्चेति न कप्। नाप्युपसर्जनह्रस्वः। ईयसो बहुव्रीहेर्नेति निषेधात् ॥

अर्थप्राधान्यबोधकस्येति॥ अर्थप्राधान्य एव प्रवृत्तिबोधकस्येत्यर्थः। बहुवचनस्येत्युपलक्षम्। तद्बोधकाभावादित्यत्र तात्पर्यम्। गौणमुख्यन्यायस्तु पदकार्ये एव न प्रातिपदिककार्ये। किञ्चाप्रसिद्धत्वरूपस्य वा गौणलाक्षणिकत्वरूपस्य वा गौणत्वस्य तत्र ग्रहणम्। न चायं तथा। इतरविशेषणत्वेन उपसर्जनत्वं तु न गौणत्वम्। अत एव, प्रियतिसेत्यादौ तिस्रादयो भाष्यकृतोदाहृताः ॥ गौणत्वेऽपीति ॥ उपसर्जनत्वेऽपीत्यर्थः। न भ्रमितव्यमिति ॥ एतद्भ्रमनिवृत्त्यर्थमेवाग्रास्य व्युत्पादनमिति भावः ॥ इतीदन्ताः ॥

ह्रस्वविषयकतयैवेति ॥ जयमङ्गलायामिति शेषः ॥ माङ् माने इति ॥ घुमास्थेतीत्वविधायकसूत्रस्थमवकारादाविति वार्तिकं भाष्ये प्रत्याख्यातमिति ईत्वं सुलभम्। शंस्थाशब्दे तु भाष्यप्रयोगादेवेत्वाभावः। ततो विजेवेत्यन्ये। न च तेनेत्वेऽपि तस्यासिद्धत्वात् कथं यणिति वाच्यम्। कावीत्वं विभक्तौ यणादेश इति व्याश्रयत्वादिति बोध्यम् ॥ न कविति ॥ समासान्तविधौ लिङ्गविशिष्टपरिभाषाभावस्य, ङ्याप्प्रातिपदिकादिति सूत्रे भाष्ये उक्तावप्यस्य तन्निषेधकत्वेनाप्रवृत्तिरस्त्येव। गोस्त्रियोरिति सूत्रे बहुश्रेयसीति भाष्योदाहरणानन्तरस्येत्यं न्यायं बाधित्वा, नद्यृतश्चेत्यस्याप्ययं निषेध इति भावः ॥

यू स्त्र्याख्यौ ॥ ईदूदन्ताविति ॥ इह वर्णयोरेव संज्ञित्वे पक्षोऽस्ति। आच्छीनद्योरिति सूत्रस्वरसात् । तयोस्त्र्याख्यत्वं तु ङ्यादिषु स्वतः क्वचित् स्त्रीवाचकवर्णसमुदाये घटकत्वेन प्रवेशात् । शक्तिपर्याप्त्यधिकरणत्वस्याविवक्षितत्वात् । तेन मद्यन्तादित्यादिव्यवहारो न विरुद्ध्यते । एवं घिसंज्ञायामपि इउवर्णौ तदन्तं वा घिसंज्ञि इति पक्षद्वयं बोद्धव्यम् । वर्णसंज्ञापक्षे असखीत्यस्य सखिभिन्नस्यावयव इत्यर्थो, न तु सखिशब्दावयवं वर्जयित्वेति । तेनातिसखिनेत्यादि निर्बाधमित्यवधेयम् ॥ पूर्वमिति ॥ वृत्तेः प्रागित्यर्थः ॥ वक्तव्यामिति ॥ संज्ञाया यथोद्देशप्रवृत्तौ न्यायसिद्धमिदं, कार्यकालत्वे तु वाचनिकम् ॥

आचि श्नु ॥ इह ण्वोरिति धातोरेव विशेषणं, न तु श्नुभ्रुवोरव्यभिचाराद् इत्याह ॥ इवर्णोवर्णान्तधातोरिति ॥ श्नुप्रभृतीनामिवर्णोवर्णयोरिति व्याख्याने तु इयङुवङोर्ङित्त्वं व्यर्थं वैयधिकरण्यं च दोषः । क्षिपति, अद्युतत्, दिदिवतुः, ऊयतुरित्यादौ चातिव्याप्तिः । तद्वारणाय इवर्णोवर्ण-

---

ङ्यादिष्विति ॥ बहुवचनं प्रयोगभेदाभिप्रायेण ॥ शक्तीति ॥ स्त्रीत्वनिरूपितशक्तीत्यर्थः । तेन लक्ष्म्यादिशब्दसंग्रहः । तदन्तसंज्ञापक्षे तु, शीनद्योरित्यादौ नदीशब्दस्य तदवयवे लक्षणा । मद्यन्तादित्याद्यप्यतिलक्ष्म्याद्यर्थमावश्यकम् । लक्ष्मीशब्दे व्यपदेशिवद्भावेन तत्त्वं बोद्धव्यम् ॥ इउवर्णाविति ॥ अत एव घ्यन्तादजाद्यन्तं विप्रतिषेधेनेति सङ्गच्छते ॥ न त्वित्यादि ॥ इदं हरदत्तानुरोधेन ॥ न्यायसिद्धमिति ॥ अन्तरङ्गत्वात् पूर्वं प्रवृत्तनद्यन्ततयैव समुदाये तत्संज्ञत्वात् । कार्यसिद्धिरिति भावः ॥ वाचनिकमिति ॥ स्त्रीत्वविशिष्टार्थमात्रबोधकस्यैव संज्ञेत्यभिमानेनेदम् । जहत्स्वार्थावृत्तित्वाभिमानेन वा । भाष्यकृता त्वजहत्स्वार्थायामवयवस्य नित्यस्त्रीत्वविशिष्टार्थबोधजनकत्वेन तस्य संज्ञायां, कुमार्यै ब्राह्मणाय खरकुट्यै ब्राह्मणायेत्यादौ किलुब्विषये आनुपूर्व्यैक्येन भेदाग्रहात् समासे नद्यन्तत्वात् कार्यसिद्धिमाश्रित्य प्रत्याख्यातमिदम् । अवयवस्त्रीविषयत्वात् सिद्धमिति तन्मात्रबोधकत्वनिवेशे न मानम् । यौगिकेषूत्तरपदे जहत्स्वार्थत्वाभावश्चेति तदाशयः । अवयवशब्देनात्र वृत्तिप्रकृतिभूतशब्दग्रहणम्।अत एव क्यङाद्यन्ते न दोषः।तत्रापीच्छाविशेषणतया कुमारीशब्दादेर्नित्यस्त्रीलिङ्गार्थबोधकत्वात् ॥

श्नुप्रभृतीनामिति ॥ तदन्ताङ्गानामित्यर्थः ॥ दोष इति ॥ सामानाधिकरण्ये विशेषणविशेष्यभावमात्रम् । वैयधिकरण्ये तु भेदसंबन्धः, स चेति गौरवं दोष इत्यर्थः ॥ दिदिवतुरिति ॥ अत्र यणापत्तिस्तत्रापि तद्रीत्या वैयधिकरण्यात्। यदि यणादिविधौ सामानाधिकरण्यमेव तदेयङ एवापत्तिः । न चैषु लोपेन निर्वाहः ॥ प्रत्ययनिमित्तेयङादेरसिद्धत्वात् । अनित्यत्वात्तदभावेऽप्याह ॥ ऊयतुरिति ॥

योरुपरत्वेन विशषणे तु क्लिष्टतेति भावः ॥ आन्तरतम्यादिति ॥ स्थानत इति भावः ॥

एरनेकाचः ॥ अचि श्नुधात्विति सूत्रे द्वन्द्वनिर्देशेऽपि धातुनेह सम्बद्ध्यते । न तु श्नुभ्रुवौ । तयोरिवर्णासम्भवात् । धातुग्रहणं चाङ्गस्य उः योर्विशेषणं, संयोगस्य चाङ्गस्य चेति व्याचष्टे ॥ धात्ववयवसंयोगेत्यादि ॥ तत्र धातुना संयोगस्य विशेषणादिह यण् । उन्न्यौ, उन्न्यः । अङ्ग विशेषणन्तु, हरिम्, हरी, हरीन् इत्यादिसिद्धये । यदि हि धातुनाऽङ्गं न विशेष्येत तर्हि इहापि प्रद्ध्यं, प्रद्धय इत्यादाविव पूर्वरूपं पूर्वसवर्णदीर्घं च बाधित्वा यण् स्यात् । धात्ववयवसंयोगपूर्वको न भवति य इवर्णस्तदन्तत्वादङ्गस्य ॥ वृश्चिकशब्दस्येति ॥ भाष्यकृता हि बुद्धिपरिकल्पितमपायमाश्रित्य, भीत्रार्थानामिति सूत्रं प्रत्याख्यातम् । ततश्च सम्बन्धमात्रविवक्षायां षष्ठ्येवेति भावः । सूत्रमतेऽप्याह ॥ वृश्चिकसम्बन्धिनीति ॥ अल्लोपयलोपाविति ॥ न च परत्वाद्वेरपृक्तस्येति स्यादिति वाच्यम् । वेरपृक्तलोपाद्वलिलोपः पूर्वविप्रतिषेधेनेति वार्त्तिककारोक्तेः ॥ क्नौ लुप्तमिति ॥ नपुंसके भावे

क्लिष्टतेति ॥ अजादिप्रत्ययस्याङ्गांशे उत्थिताकाङ्क्षत्वादिति भावः ॥ उभयोर्विशेषणमिति ॥ व्याख्यानाल्लक्ष्यानुरोधाच्चैकदेशान्वयेऽपि सौत्रत्वाद् वृत्तिरिति भावः ॥ उन्नधाविति ॥ अत एव स्वरपूर्वा पदपूर्वा चोपधा यस्येवर्णस्य तस्य यणित्यर्थकं स्वरपदपूर्वोपधस्येति वार्त्तिकं सङ्गच्छते । उक्तोपायेन प्रत्याख्यातमित्यन्यत् ॥ तदन्तत्वादिति ॥ न च धात्ववयवसंयोगपूर्वत्वस्य धात्ववयवेकार एव संभवेन संयोगवद्विप्रयोगस्यापि विशेषावगतिहेतुत्वेन तद्विन्नस्यापि धात्ववयवस्यैव ग्रहणान्न दोष इति वाच्यम् । तन्त्रीरित्यादौ धात्ववयवसंयोगपूर्वस्याधात्ववयवस्यापि संभवात् । परिमाणाख्यायामिति सूत्रे भाष्ये अजपावपि संज्ञायामेव यथाजातीयक उत्सर्गस्तज्जातीयकेनापवादेनापि भवितव्यमित्युक्तम् । तन्मूलकेन, उत्सर्गसमानदेशा अपवादा इति न्यायेन तु न निर्वाहः । अङ्गांशे तदसंबन्धे हरिमित्यादावपि तत्प्राप्त्या तेन येन नाप्राप्त्यभावेन तदपवादत्वस्यैवाभावात् । यद्यपि प्रत्यासत्त्या, इको गुणवृद्धी इति निर्देशोपष्टब्धया धात्ववयवसंयोगपूर्वभिन्नस्य धात्ववयवस्यैव ग्रहणमिति हरिमित्यादौ न दोषस्तथाऽपि स्पष्टप्रतिपत्तये आवृत्तिरेवाश्रितेति दिक् ॥ सूत्रमतेऽपीति ॥ भीत्रेति सूत्रं षष्ठीबाधनार्थमिति वैतण्डिकतया ये वदन्ति तत्सिद्धसूत्रमतेऽपीत्यर्थः । वस्तुतो भयहेतुरित्युक्त्याऽस्य तृतीयाबाधकत्वं बोद्धम् ॥ न च परत्वादिति ॥ एवञ्च यलोपो दुर्लभ इति भावः ॥ वार्त्तिककारोक्तेरिति ॥ लोपो व्योरिति सूत्रे क्नावुपसंख्यानमिति वार्त्तिकम् । तस्यापूर्वत्वापेक्षया क्नौ यथा लोपे दुर्लभ इष्टसिद्धिर्भवति तथा

क्तः । कौ लोप इत्यर्थः । इदं सर्वं, कुमारीमिच्छन् कुमारीत्यत्रापि बोद्धव्यम् ॥ अनन्यतयेति ॥ गौणत्वेऽपि अनङ्गणित्त्वयोः प्रवृत्तेरुक्तत्वाच्चेति बोद्धव्यम् ॥ दीर्घस्यापीति ॥ एतदर्थं कृतयणादेशनिर्देश इति भावः । नन्वतिसखेः, भूपतेः इत्यत्र गुणविषये व्यावर्तयितुं यणा निर्देश इतिचेत् । अस्त्येवम् । तथाऽपि दीर्घे प्रवृत्तेर्दुर्वारत्वात् । न हि ह्रस्वेषु भाव्यं, न दीर्घेष्वित्यत्र प्रमाणमस्ति । सौत्रस्य विकृतनिर्देशस्येाव्याप्त्यतिव्याप्त्युभयवारकत्वेन तत्सारवत्त्वलाभेन तथैवौचित्यात् । भाष्यारूढत्वाच्च । यत्तु प्राचा, वेति केचिदित्युक्त्वा सख्युः सख्य इत्याद्युक्तम् । यच्च तद्व्याख्यातृभिरुभयमऽप्येतद्भाष्ये स्थितमित्युक्तम् । यच्चात्रोपष्टम्भार्थं प्रसादकृता—

सख्युः पत्युः प्रसिद्ध्यै यत् ख्यत्यादित्याह पाणिनिः ।
साधारणं तन्मन्वानाः सुख्युः सुत्युः सुखीः सुतीः ॥
सुखीयतिसुतीयत्योर्यौ किबन्तौ तयोर्विदुः ।
निष्ठादेशस्य [illegible] रादिकम् ॥

सुख्य इत्यादि साध्वेतदुभयं भाष्यगौरवात्, इति विचारचिन्तामणिस्थश्लोकोपन्यसनं कृतं तदेतत् सकलं भाष्यकैयटपर्यालोचनमूलकमिति कृतबुद्धय एव विदाङ्कुर्वन्तु ॥ शुष्किय इति ॥ यत्तु शुष्क्युः, पक्व्युः, शुष्क्यः, पक्व्य इत्युदाजह्रुः । भाष्ये स्थितमिति चोपसंजह्रुः । तदतिरभसात् ॥ इति ईदन्ताः ॥

तृज्वत् क्रोष्टुः ॥ क्रुश, आह्वाने । अस्मात् सितनीति तुन् प्रत्यये क्रोष्टुशब्दस्तृचि तु क्रोष्टृशब्दः । द्वावपि सृगालवाचिनौ । तत्राविशेषेण द्वयोः प्रयोगे प्राप्ते सर्वनामस्थाने स्त्रियां च तृजन्त एव । तृतीयादावचि

वक्तव्यमित्यर्थः । सा च पूर्वविप्रतिषेधेनेत्याशयेनैवमुक्तमिति बोद्धव्यम् ॥ गौणत्वेऽपीति ॥ च्छ्यर्थरूपार्थे प्रत्युपसर्जनत्वेऽपीति ॥ कृतयणेति ॥ अन्यथा क्षितेः परस्येत्येव वदेदिति भावः ॥ गुणविषये इति ॥ प्रकृतिप्रत्ययापेक्षगुणापेक्षया तदवयवमात्रापेक्षस्यान्तरङ्गत्वेन ततः पूर्वं प्रवृत्तिः स्यादिति भावः ॥ दुर्वारत्वादिति ॥ तदर्थं कृतस्याऽन्यसंग्राहकत्वेऽपि बाधकाभावादिति भावः ॥ विकृतनिर्देशस्येति ॥ यकारान्तानुकरणनिर्देशस्येत्यर्थः । अकारस्त्वुच्चारणार्थ इति भावः ॥ [illegible]रणमिति ॥ ह्रस्वदीर्घसाधारणमित्यर्थः ॥ विदांकुर्वन्त्विति ॥ भाष्येऽस्याऽर्थस्याऽ[illegible]त्वादिति भावः ॥ अतिरभसादिति ॥ संयोगपूर्वकत्वेन यणो दुर्लभत्वादिति भावः । इयङ्यतो लोपस्याभीयासिद्धत्वं तु न, व्याश्रयत्वात् ॥ इतीदन्ताः ॥

उभयमन्यत्र तु तुञन्त एवेति नियमार्थं त्रिसूत्री आरभ्यते । क्रोष्टुरिति तुञन्तात् प्रथमा । तृज्वदिति तृतीयान्ताद्वतिः । निमित्तव्यपदेशतादात्म्य-शास्त्रकार्यरूपविषयकत्वेनातिदेशस्य षड्विधत्वेऽपि प्राधान्यादिह रूपमेवा-ऽतिदिश्यते । तच्च न पचादेर्यस्य कस्यचित्, किन्तु कुशेरेव । उपस्थि-त्वादर्थत आन्तर्याच्चेत्यभिप्रेत्य फलितमाह ॥ क्रोष्टुशब्दस्थाने इति ॥ नियमार्थमिति ॥ अन्येषां संज्ञाशब्दानां मा भूदित्येतदर्थमित्यर्थः ॥ क्रोष्टे-ति ॥ अनङ् । हल्ङ्यादिलोपात् परत्वादुपधादीर्घः । स च सर्वनामस्थाने चेत्यनेन यद्यपि लभ्यते, तथापि परत्वादप्तृन्नित्येव न्याय्यः । कृतेऽप्यन-ङि एकदेशविकृतस्यानन्यत्वेन तृच्त्वात् । अन्यथा गुणे कृतेऽपि दीर्घो न स्यादिति भावः ॥

रात्सस्य ॥ इह तकारोऽपि प्रश्लिष्यत इति पक्षान्तरम् । तेन हल्-ङ्यादिसूत्रस्थाने ङ्याप्सोरिति निष्कर्षे अबिभर्भवानित्यादि सिद्ध्य-ति । अजर्घर्त् इत्यत्र तु चर्त्वस्यासिद्धत्वात् तलोपो न । ननु कीर्तयतेः क्विपि कीर्त् इह स्यादिति चेन्न । यथालक्षणमप्रयुक्ते इति भाष्यम् । एतेना-

---

नियमार्थमिति ॥ फलतः प्रयोगनियमार्थमित्यर्थः ॥ तृतीयान्तादिति ॥ तृज-न्तेन तुल्यं रूपं लभत इत्यर्थः ॥ निमित्तेत्यादि ॥ पूर्ववत्सन आद्यन्तवत् सुबामन्त्रिते परावङ्वदित्याद्यत्रयस्योदाहरणम् । तत्र तृजन्तत्वरूपनिमित्तस्य तदव्यवहारस्य वाऽतिदेशे आहत्य तृच्शब्दं समुच्चार्य विहितकार्यस्यैवापत्तौ जसि गुणा-ऽवादेशयोस्तृजन्तोद्देश्यकोऽप्तृन्निति दीर्घ एव स्यात् । स्वौजसादिषु चानङुणौ न स्याताम् । न चोत्तरसूत्रद्वयेन सामर्थ्यादप्तृन्नित्यत्र क्रोष्टुग्रहणेनैव सिद्धावा-द्येनापि सामर्थ्यात् कार्यमात्रप्रवृत्तिरिति वाच्यम् । तत्सामर्थ्येन रूपातिदेशस्यैव ज्ञापयितुं युक्तत्वात् । तादात्म्यातिदेशस्त्वसंभवी । सह प्रयोगाभावात् । शास्त्रकार्या-ऽतिदेशोऽपि न । तुञन्तस्याद्युदात्ततया तृज्वद्भावेनोकारस्य रेफरूपयणादेशेऽपि तस्योदात्तस्थानिकयणोभावेनोदात्तयणो हल्पूर्वादिति स्वरानापत्तेः । अथातिदेश-स्त्वसम्भवी । तयोरैक्यस्य स्वत एव सत्त्वाच्च ॥ षड्विधत्वेऽपीति ॥ अर्थातिदेशा-ऽसम्भवं मत्वेदम् । युक्त्यन्तरमाह ॥ प्राधान्यादिति ॥ रूपमिति ॥ तच्च तृज्वदित्यत्र ऋकारस्योपस्थित्या तद्विशिष्टं क्रोष्टृ इति । तच्च तृज्वदिति चकारोच्चारण-सामर्थ्यादन्तोदात्तस्वरविशिष्टमिति ऋकारस्योदात्तत्वादुदात्तयण इत्यादिस्वर-सिद्धिरिति बोध्यम् ॥ संज्ञाशब्दानामिति ॥ उणादिव्युत्पन्नानामिति शेषः । अतो धातृशब्दस्य दीर्घो भवत्येव ॥ परत्वादिति ॥ इदमग्रिमं च कार्यैक्येऽसंभवाभावे विप्रतिषेध इत्यभिमानेन । यद्वा परत्वादुत्कृष्टत्वाद् विशेषविहितत्वेन दीर्घो-पस्थितिकत्वादित्यर्थः ॥ निष्कर्षे इति ॥ अस्य पूर्वपक्षिण इति शेषः ॥ यथालक्षण-

ऽवर्वर्त् इति व्याख्यातम् ॥ परत्वादिति ॥ न च नुप्तित्य इति वाच्यम् । तृज्वद्भावे कृते सन्निपातपरिभाषया नुटो दुर्लभत्वादिति भावः ॥ नुमचिरेति ॥ ननु रेण स्वविषये प्राप्तं सर्वं बाध्यम् । बाद्धयसामान्यचिन्ताश्रयणात् । तथाच वक्ष्यते, गुणदीर्घोत्वानामपवाद इति ॥ एवञ्चाविशेषाद् नुडप्यनेन बाद्धयः । तत्कथं विप्रतिषेधः । उत्सर्गापवादयोस्तदयोगादिति चेत् सत्यम् । अत एव तदंशे विप्रतिषेधं दूषयित्वा, न तिसृचतर इति ज्ञापकाद् नुडिति भाष्यकृतोक्तमिति सन्तोष्टव्यम् ॥ इत्युदन्ताः ॥

हूहूरिति ॥ अव्युत्पन्ना संज्ञेयम् ॥ अतिचमूशब्दे त्विति ॥ प्रथमालिङ्गग्रहणं चेत्युक्तेः । तथाच, एवमतिचम्वादय इति प्राचो ग्रन्थो भाष्यविरुद्ध इति भावः ॥

वर्षाभ्वश्च ॥ वर्षाभूशब्दस्य नित्यस्त्रीत्वात् स्त्रीलिङ्गप्रकरण एव एतत्सूत्रं वक्तुं युक्तम् । पुँल्लिङ्गे तु क्रियाशब्दाभिप्रायेण कथञ्चिद्योज्यमिति व्याचख्युः । तद्भसात् । दर्दुरे हि पुँल्लिङ्गोऽयम् । भेके मण्डूकवर्षाभूशालूरप्लवददुरा इत्यमरोक्तेः । भिन्नलिङ्गानां न द्वन्द्व इति तेन परिभाषितत्वात् । भेक्यां तर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमान् इति यादवकोशाच्च । दर्दुरेषणीति पाठान्तरम् । षणीति पुँल्लिङ्गस्य प्राचां संज्ञा ॥ दम्भतीति ॥ दभी ग्रन्थे, तुदादिः ॥ व्युत्पादित इति ॥ यद्यप्युज्ज्वलदत्तेन दम्फूरिति पवर्गद्वितीयं पठित्वा दम्फेर्नलोपाभावो निपात्यते इति व्याख्यातं, तथाऽपि वृत्त्यन्तरेषु दभी ग्रन्थ इत्यस्माद् डप्रत्यये नुमागमो निपात्यत इत्युक्तम् । एतच्च माधवग्रन्थे स्पष्टम् । दशपादीवृत्तौ तु दर्भणं दम्भूः । नुमागमोऽनु-

---

मिति ॥ अप्रयुक्ते लक्षणाभावस्य योग्यतेत्यर्थः ॥ बाध्यसामान्यचिन्तेति ॥ सा च तृज्वत्सूत्रे भाष्ये स्पष्टा । एवञ्चाचि र इति सूत्रस्थमचि रादेशे जस्युपसंख्यानं गुणपरत्वादिति वार्तिकं बाध्यविशेषचिन्ताभिमानेन प्रवृत्तमिति भावः । एतेन तद्वार्त्तिकबलाज्जसोऽन्यत्र प्रियतिसरमित्यादौ गुणं कल्पयन्तः परास्ताः । तृज्वत्सूत्रस्थभाष्यविरोधात् । मपर्यन्तस्येति सूत्रस्थप्रियतिस्रावित्यादिभाष्यविरोधाच्च ॥ अनेन– रेण ॥ विप्रतिषेध इति ॥ अचि रेणेत्यर्थः ॥ दूषयित्वेति ॥ यद्यपि, न तिसृचिति ज्ञापकेन तदपवादत्वाभावकल्पनया विप्रतिषेध उपपद्यते । तथापि ज्ञापकानुसरणस्यावश्यकत्वेनैव तं दूषयित्वेत्यर्थः । इदं, तृज्वत्सूत्रे भाष्ये ॥ सन्तोष्टव्यमिति ॥ अतिक्षोदस्तदंशे वार्त्तिके न कार्य इति भावः ॥

दशपादीति ॥ अत्रारुचिबीजं तु नुम्निपातनं व्यर्थम् । न च परसवर्णाभावार्थमुभयनिपातनम् । नुम्येव निपात्येऽनुस्वारनिपातनसामर्थ्येनैव तदभावसिद्धेरि-

स्वारश्च नि[illegible]त्यते इत्युक्तम् । अयमूकारो न धातोरित्युवङोऽप्रसङ्गादिको [illegible]णचीति यण् । स चाऽमि पूर्वः, प्रथमयोः पूर्वसवर्ण इत्याभ्यां बाध्यत इत्याशयेनोदाहरति ॥ दृम्भूमित्यादि ॥ न चेह, दृन्करेति यण् शङ्क्यः । तत्र अर्थवत एव ग्रहणात् । अस्य तु दृन्शब्दस्य भूशब्दस्य च अनर्थकत्वादिति भावः । एवञ्चायं हूहूवदिति फलितम् । श्रीपतिमतेनाह ॥ दृञिति ॥ माधवस्तु, अन्दृदृम्भू इत्यादिसूत्रेण दृढशब्दे उपपदे कूप्रत्ययः । उपपदस्य दृन्नादेशश्च निपात्यत इत्याह ॥ दृन्भूरिति ॥ तरुः, सर्पजातिभेद इति केचित् । कपिरित्यन्ये ॥ दृन्करेति ॥ अत्र दृञिति नान्तपाठो मुख्यः । मान्तपाठोऽपि केषाञ्चित् ॥ वक्तव्य इति ॥ वर्षाभ्वश्चेति चकारोऽनुक्तसमुच्चयार्थः । अनुक्तं च [illegible]र्णेयमिति भावः । तथाच, वर्षाभ्वश्चेति वार्त्तिकं व्याख्याय भाष्यकार आह । अत्यल्पमिदमुच्यते । वर्षाभ्वदृन्कारपुनःपूर्वस्य भुव इति [illegible]व्यमिति । वामनेन तु दृन्शब्दो न पठित एव । एवं स्थिते यत् प्राचा, दृक्कारेति पठितं, यच्च तत्पौत्रेण— महाभाष्यकारवचनमर्थतोऽनुवदति इत्युक्तम् । यच्चान्यैर्वार्त्तिकेन पूरितमर्थमुदाहरतीत्यवतारितं, तत् सर्वं र[illegible]क्तत्वेन । न च भाष्येऽपि दृगित्येव पाठ इति भ्रमितव्यम् । अन्दृदृम्भू इति निपातित इति माधवग्रन्थेन कैयटादिग्रन्थैश्च विरोधापत्तेरिति यत्किञ्चिदेतत् ॥ दीर्घपाठे इति ॥ अयं च भाष्यवृत्त्यादिबहुग्रन्थसंमतः पाठः । अनुस्मृतौ तु ह्रस्वः पठ्यते । यत्तु तद्दीक्षितावुक्तम् । एकदेशविकृतस्यानन्यत्वात् कारपूर्वस्यापि सिद्धमिति । तन्न । तथाप्यणप्रत्ययविशिष्टस्यान्यत्वात् । न ह्यणप्रत्ययोऽपि विकारः । तस्माद् ह्रस्वपाठे कारपूर्वकस्य उवङेव । तथा दीर्घपाठे करपूर्वस्य उवाङिति विवेकः ॥ स्वयम्भूशब्दवदिति ॥ प्राचा तु दृग्भूकाराभूशब्दौ वर्षाभूशब्दवदुदाहृतौ । तन्निर्मूलत्वादुपेक्ष्यमिति भावः ॥ इत्यूदन्ताः ॥

ति । एवं चायमूकारो न धातोरित्युवङोऽप्रसङ्गादणा भाव्यमिति दृन्पूर्वकभूशब्देन सह न रूपविशेष इति माधवश्चिन्त्यः ॥ निपात्यत इति ॥ एकदेशस्य पूर्वान्तत्वेन भूत्वमिति भावः ॥ वार्त्तिकमिति ॥ एतेन भाष्ये पूर्वग्रहणं व्यवहितेऽपि प्रवृत्त्यर्थमिति वर्षोद्भूरित्यादावपि यणिति परास्तम् । [illegible]नुरोधेन पूर्वग्रहणस्य परिभाषाप्राप्तार्थानुवादत्वौचित्यात् ॥ उपेक्ष्यमिति ॥ कापूरित्यत्र कारशब्दः करोतेर्ण्यन्ताद्विदायकि निष्पन्नो बन्धनगृहवाचकः । तस्य

नृ च ॥ इह छन्दस्युभयथेति सूत्रादुभयथेत्यनुवर्तते । छन्दसीति तु निवृत्तम् । तेन, चिन्ताजर्जरचेतसं बत नृणां का नाम शान्तेः कथा, नृणामेको गम्यस्त्वमसीत्यादिप्रयोगाः सङ्गच्छन्ते । केचित्तु छन्दसीत्यनुवर्तयन्ति । तदयुक्तम् । वर्सूत्रेणैव सिद्धे, नृ चेति सूत्रस्य वैयर्थ्यापत्तेः । यदपि पूर्वसूत्रे निवृचतसृ इत्यनुवर्तयन्ति । तदप्ययुक्तम् । अविशेषेण विकल्पदर्शनात् । तथाच, धाता धातृणामिति मन्त्रे तैत्तिरीयैर्ह्रस्वः पठ्यते । बह्वृचैस्तु दीर्घ इति दिक् ॥ इत्यृदन्ताः ॥

ओतो णिदिति वाच्यमिति ॥ गोत इत्यपहाय, ओत इति वाच्यमित्यर्थः । तथाच गामित्यत्र परत्वाद् वृद्धौ सत्यामात्वं न स्यादित्याशङ्क्य निरवकाशतया आत्वेन वृद्धिर्बाध्यत इति औतोऽम्शसोरिति सूत्रे भाष्यकृतोक्तम् । कैयटोऽपि तत्रेत्थमाह । ओत इति सूत्रे पाठ्यम् । गोत इत्योकारोपलक्षणतया वा व्याख्येयमिति । वृत्त्यादिग्रन्थेष्वप्येवमेव स्थितम् ॥ स्मृतौरिति ॥ यत्त्वाहुः । गोशब्देन औणादिकेन सादृश्याद् द्योशब्द एव लक्ष्यते । न त्वोकारान्तमात्रम् । तेन स्मृतौः स्मृतवौ स्मृतव इत्येव भवतीति । तद्भाष्यविरुद्धम् । गोद्योभ्यामेव परस्य णित्त्वाभ्युपगमे औतोऽम्शसोरित्यात्वस्य स्मृतामित्यादिरवकाशः स्यात् । तथा च गामित्यत्र परत्वाद् वृद्धेर्दुर्वारतया उदाहृतभाष्योक्तमात्वस्य निरवकाशत्वं बाधकत्वं च न सङ्गच्छेतेति दिक् ॥ इत्योदन्ताः ॥

रायो हलि ॥ अर्थैरैश्वर्यवद्भिरपीत्यमरात् पुंस्त्वम् । संराया भूयसा सृजेत्यादिप्रयोगाच्च । रा यि छान्दस इति भाष्यम् । तच्च क्यजन्तस्य रैशब्दस्य छान्दसत्वपरं, न तु केवलस्यापीति, वाऽन्तो यीति सूत्रे कैयटः ।

टापा सहैकादेशस्य पूर्वान्तत्वेऽपि वार्तिके ग्रहणं न । प्रसिद्धत्वेन ह्रस्वपाठैकवाक्यतया च ह्रस्तवाचकस्यैव ग्रहणादिति भावः ॥

इत्यपहायेति ॥ एतदवयवगकारमपहायेत्यर्थः ॥ इत्योकारोपलक्षणतयेति ॥ तपरकरणेन गस्याविवक्षितत्वलाभादिति भावः ॥ निरवकाशत्वं चेति ॥ चो हेतौ । यतो ह्रस्वात्वयोरपि बाधकत्वमित्युक्तं न सङ्गच्छेतेत्यर्थः ॥ अमरात् पुंस्त्वमिति ॥ भिन्नलिङ्गानां न द्वन्द्व इति तेन परिभाषणादिति भावः ॥ भाष्यमिति ॥ स्थानेऽन्तरतमसूत्रे इति भावः ॥ क्यजन्तस्येति ॥ राः– रैशब्दो, यि यकारादिप्रत्ययात्, छान्दस इति भाष्याक्षरार्थः । यकारेण यकारादिः प्रत्ययो लक्ष्यते । इकार उच्चारणार्थः । प्रायेण सिद्धान्तेषु एव पाठः । तदा यादौ प्रत्यये

केवलोऽपि च्छान्दस इति पक्षान्तरं स एवाह ॥ इत्यैदन्ताः ॥

ग्लौर्मृगाङ्कः कलानिधिरित्यमरः॥ एवं जनानवतीति जनौः। ज्वरत्वर-त्यूद्। एत्येधतीति वृद्धिः। जनावौ जनाव इत्यादि॥ इत्यजन्ताः पुँल्लिङ्गाः॥

रमेति ॥ लिङ्गविशिष्टपरिभाषया प्रातिपदिकत्वात् स्वादयः। यत्तु आबन्तत्वादिति। यच्च व्याचख्युः। प्रत्ययान्तत्वादप्रातिपदिकत्वेऽपि पृथग् ङ्याप्रहणादित्यर्थ इति। तन्न। ङ्याप्रातिपदिकाधिकारार्थताया: प्रागेवोक्त-त्वात् ॥ एङ्हस्वादिति ॥ परत्वात् प्रतिपदोक्तत्वाच्च सम्बुद्धौ चेत्येत्वे कृते हल्ङ्यादिलोपो न प्राप्नोति। स्थानिवद्भावादाप्त्वेऽप्याकाररूपत्वाभावात्। आआदित्याकारं प्रश्लिष्य दीर्घग्रहणप्रत्याख्यानात्। यथाश्रुतेऽपि एङ्-स्वादिति लोपस्यैव परत्वेन न्याय्यत्वादिति भावः ॥

याडापः ॥ यद्यपि यडित्येवोचितम्। न चातो गुण इति पररूपा-पत्तिः। अकारोच्चारणसामर्थ्येनैव तद्बाधात्। तथाऽप्युच्चारणार्थोऽकार इति सम्भाव्येत। अतः स्पष्टार्थं याट् कृतः॥ वृद्धिरेचीति ॥ यत्तु प्राचा आट्श्चे-त्युदाहृतः। तन्न। याट्स्याटोष्टकारस्य समुदायानुबन्धत्वेनेहाटोऽभावात् ॥

इत्यर्थ इति भावः ॥ न त्विति ॥ अत एव रायामिच्छतीति विग्रहप्रदर्शनपरभाष्यं सङ्गच्छते। न हि विग्रहश्छन्दः। अत एव, रायि आशा राय्याशा इत्यचः पर-स्मिन्नित्यत्र भाष्ये प्रयुक्तमिति भावः॥ पक्षान्तरमिति ॥ अत्रारुचिबीजं स्पष्टमेव ॥ इत्यजन्ताः पुँल्लिङ्गाः ॥

लिङ्गविशिष्टेति ॥ तया परिभाषया प्रातिपदिकत्वतद्व्याप्यधर्माणां विशिष्ट बोधनेन तया प्रातिपदिकत्वादित्यर्थः। ध्वनितं चेदं, बहुव्रीहेरूधस इत्यत्र भाष्ये ॥ परत्वादिति ॥ असंबुद्धौ हल्ङ्यादिलोपश्चरितार्थः। कृते लोपे एत्वं सा-ऽवकाशमित्यभिमानः। ननु सत्यपि संभवे बाधनमिति न्यायविरोधोऽत आह॥ प्रातिपदोक्तत्वाच्चेति ॥ अपवादत्वाच्चेत्यर्थः ॥ यथाश्रुतेऽपीति ॥ आकारप्रश्लेषा-ऽभावेऽपीत्यर्थः ॥ परत्वेनेति ॥ यौगपद्यसंभवेऽपि विप्रतिषेध इत्यभिमानेनेदम्। आटश्चेत्युदाहृतमिति। समुदायावयवयोः संनिधानेऽनुबन्ध उभयोपकारकः। न चायमनर्थकः। आटोऽर्थवतः क्वाप्यभावादिति तदाशयः ॥ इहाटोऽभाव इति ॥ अयं भावः। निर्देशेषु प्रायोगिकरूपासम्भवादौपदेशिकरूपग्रहणमिति घसंज्ञासूत्रे भाष्ये स्पष्टम्। उपदेशे च तेषामित्संज्ञकत्वादुपदिष्टानामेव प्रदेशेषु [illegible] नामिति टंक रेत्संज्ञकाकारस्येत्यादिक्रमेणार्थः। ककवतु निष्ठेति सूत्रे भाष्ये स्फुटमेतत्। पाणिनेश्च तत्र विशिष्टोपदेशे तात्पर्यं तस्य कौत्संज्ञकेन तस्यैव टित्त्वादिव्यवहारो, नावयस्य तदुपदेशे तात्पर्यभावाद्

सर्वनाम्नः स्याड्ढ्रस्वश्च ॥ दीर्घोच्चारणं प्राग्वत् । अत्र वदन्ति । सर्वनाम्नोऽसुङ् चेत्येव सूत्र्यताम् । एवञ्च याटि परे ङित्त्वादन्त्यादेशे असुङि सर्वस्या इत्यादि सिद्धम् । स्याट्करणे ह्रस्वविधाने च प्रयोजनं चिन्त्यमिति । अत्रेयं चिन्ता । असुङ् चेत्युक्तेऽसुष्यै इत्यादि न सिद्ध्येदिति । वस्तुतस्तु, आमि सर्वनाम्नः सुड् याटो ह्रस्वश्चेति सूत्रयितुं युक्तम् । न चैवं याट एव ह्रस्वापत्तिः। दीर्घोच्चारणसामर्थ्यात् । ह्रस्वोच्चारणेऽप्यकारसामर्थ्यादेवातो गुणस्य वारयितुं शक्यत्वादित्यवधेयम् ॥

विभाषा ॥ गौणत्वादप्राप्ते विभाषेयम् । यत्त्वाहुः। न बहुव्रीहाविति निषेधे प्राप्त इति । तदापाततः । तस्यालौकिकप्राक्रियावाक्यान्तर्तसर्वादिविषयत्वात् । अस्य च समासाविषयत्वात् ॥ योत्तरेति ॥ यत्त्वाहुः । या पूर्वा सोत्तराऽस्या उत्तरपूर्वेति । तद्भ्रमसात् । पूर्वनिपातवैपरीत्यापत्तेः ॥

एतेनौपदेशिकस्याऽपरत्वाभावेन न वृद्धिप्राप्तिः । नेष्यते च तत्र वृद्धिः । प्रयोगेतु नाडित्याटश्चेत्यसङ्गतमित्यपास्तामिति ॥

याटि परे इति ॥ अन्तरङ्गत्वात् पूर्वं याडिति भावः ॥ न सिद्ध्येदिति ॥ इत्याद्येव न सिद्ध्येदित्यर्थः । पूर्वमसुङि असान्तत्वाभावेन मुत्वानापतिः । पूर्वं मुत्वे त्वासिद्धिः स्पष्टैव । एवञ्चामुमुयङित्यादिवद् व्याख्याभेदेन रूपद्वयमिहापि स्यात् । मुत्वपक्षे आप्स्थानिकत्वेनासुङः प्रत्ययतया तदवयवत्वेन षत्वसिद्धिः । एवञ्च तत्रासान्तस्येत्यर्थ इत्यत्र स्याड्ग्रहणमपि ज्ञापकमिति भावः । परे तु– संज्ञाकृतबहिरङ्गत्वस्यानाश्रयणेन नित्यत्वादसुङि रूपासिद्धिः । न च चेन याडपि विधेयोऽसुङ्चेति न्यासे इति वाच्यम् । विभाषा द्वितीयेति सूत्रेण विनिगमकाभावादुभयोरपि विकल्पे द्वितीयायै इत्याद्यसिद्धापत्तेः । किञ्चासुङो याडपवादत्वेन तद्विषये याट् दुर्लभः । अचि रादेशान्नुट् पूर्वविप्रतिषेधेनेत्यसङ्गतम् । रादेशस्य बाध्यसामान्यचिन्तया सर्वापवादत्वेन नुडपवादत्वादित्याशङ्क्य, न तिसृचतसृभिति दीर्घत्वनिषेधाद्रादेशो नुटं न बाधत इति भाष्ये उक्तं तृज्वत्सूत्रे । तस्माद्विषयभेदेऽपि येन नाप्राप्तिन्यायेन बाधकत्वमिष्यत एव । यद्यप्यस्याङादेशेन सिद्धति तथाप्यवङ्सूत्रस्थभाष्यरीत्याऽऽन्तरतम्येन कदाचित् तत्त्वे, एकादेश उदात्तेनेत्यनेन विभक्तेरुदात्तत्वापत्तिरित्याहुः ॥ सामर्थ्यादेवेति ॥ उच्चारणार्थत्वं तु न, व्याख्यानादितिभावः । त्रेस्त्रय इत्यत्रापीत्यस्य मण्डूकानुवृत्तिरिति बोध्यम् ॥

वैपरीत्यापत्तेरिति ॥ अयं भावः । वाक्ये यत्तच्छब्दाभ्यामुद्देश्यविधेयत्वं प्रतीयते । योत्तरात्वप्रकारकज्ञानविशेष्या सा प्रसिद्धपूर्वा यस्या इत्यर्थात् । तत्रोत्तरापदस्य ज्ञानविशेष्यपर्यन्तलक्षकतया गुणवाचकत्वेन पूर्वनिपातः । उत्तरस्यां पूर्वात्वप्रकारकज्ञानविशेष्यत्वं तु न विधेयं, पूर्वापदस्य पूर्वनिपातापत्तेः । न विधौ परः शब्दार्थ इति विधेयबोधके लक्षणानौचित्याच्च । त्वदुक्तविग्रहे तु

तीयस्येति ॥ इदं हि पुन्नपुंसकयोरावश्यकम् । अनेनैव सिद्धौ, विभाषा द्वितीयातृतीयेति सूत्रं न कर्तव्यमिति भावः ॥

अम्बार्थनद्योः ॥ अत्र वार्तिकम् । मातुर्मातच् पुत्रार्थमर्हते इति । मातृशब्दस्य सम्बुद्धौ मातजादेशो भवति मात्रा पुत्रस्य श्लाघ्यत्वे द्योत्ये । गार्गी माताऽस्य गार्गीमातृकः । तस्य सम्बोधनं, हे गार्गीमात । नवृतश्चेति समासान्तस्यापवादोऽयम् । यत्र तु श्लाघ्यत्वं न द्योत्यं, किन्तु स्वरूपकथनमात्रं, तत्र कवेव । गार्गीमातृक ॥ आबन्तं यदङ्गमिति ॥ यत्तु, याडाप इति सूत्रं व्याचक्षाणैरुक्तम् । अतिखट्वायेत्यत्र लाक्षणिकत्वान्न याट् । एवमतिसर्वायेत्यत्र न स्याडिति । तदभसात् । न ह्यतिदेशस्य विषये लक्षणप्रतिपदोक्तपरिभाषा प्रवर्तते । अतिदेशवैयर्थ्यापत्तेः । तेन याट् दुर्वारः । स्याट्स्तु प्रसङ्ग एव नास्ति । संज्ञोपसर्जनयोः पाठात् पर्युदासात् ॥ केचित्त्विति ॥ परिशिष्टकारादयः ॥

ङिति ह्रस्वश्च ॥ अप्राप्तविभाषेयम् । ह्रस्वयोरप्राप्तावितरयोस्तु नेयुङुवङ्स्थानाविति निषेधे प्राप्ते आरम्भात् । इहेयङुवङ्स्थानौ स्त्रीशब्द-

---

पूर्वापदस्य यच्छब्दसमभिव्याहारेणोद्देश्यसमर्पिकतया तस्यैव लाक्षणिकत्वेन गुणवचनतया पूर्वनिपातापत्तिरिति ॥ न कर्तव्यमिति ॥ स्पष्टं चेदं भाष्ये । तृतीयाशब्दसाचर्येण सहायवाचिद्वितीयाशब्दस्य न ग्रहणम् । भागार्थे विधीयमानस्यानो भक्तेर्विशेष्यत्वेन न स्त्रीत्वमनभिधानात् । एतेन तत्र लाक्षणिकत्वाद् वार्तिकाप्रवृत्ताविदमावश्यकम् । अत्र सूत्रे न सा परिभाषा प्रवर्तते । प्रतिपदोक्तस्याभावात् । न च महाविभाषयाऽनभावे वार्तिकप्रवृत्त्या रूपद्वयं सिद्धम् । अनो नित्यत्वाङ्गीकारात् । आद्युदात्तस्य तथापि रूपद्वयासिद्धेश्चेति परास्तमिति भावः ॥

अत्रोपसंख्यानादाह ॥ संबुद्धाविति ॥ अर्हन्तं पुत्रमभिधातुं यो मातृशब्दः प्रयुज्यते तस्येत्यर्थः । सापेक्षत्वेऽप्यत एव निपातनात् समासः । अर्हत्त्वं च पुत्रस्य मातृद्वारकमेव । तदाह ॥ मात्रा पुत्रस्येति ॥ अपवाद इति ॥ यदीदं न स्यात्तदा प्राप्नोतीति भावः ॥ वैयर्थ्यापत्तेरिति ॥ नन्वाकारोऽयं लाक्षणिक इति तदाशयः । न च खट्वायै इत्यत्रापि याडनापत्तिः । सूत्रं तु निशायै इत्यत्र चरितार्थमिति वाच्यम् । यस्य रूपस्य लक्षणप्रवृत्तिं विना न संभवस्तस्यैव लाक्षणिकस्य परिभाषाविषयत्वात् । नचेह तथा । एकादेशतः प्रागपि तदूपसत्त्वादिति चेन्न । वर्णग्रहणे तदप्रवृत्तेस्तैरप्युक्तत्वेन तद्विरोधादित्यभिप्रायः ॥

ह्रस्वयोरप्राप्ताविति ॥ अत एव, यू स्त्र्याख्याविति सूत्रे ह्रस्वघटितत्वात्ङे नेति निवृत्तमित्युक्तं भाष्ये ॥ निषेधे प्राप्ते इति ॥ भावतात्पर्यकतालाघवाभ्यां [illegible] अप्राप्तविभाषात्वमेवोचितमिति भावः ॥

भिन्नौ नित्यस्त्रीलिङ्गाविति त्रीणि ईदूतोर्विशेषणानि, ह्रस्वयोस्तु स्त्रियामित्येव, न तु नित्यस्त्रीत्वपर्यन्तम् । अन्यथा इष्वशनिप्रभृतीनामुभयलिङ्गानां पटु-मृदुप्रभृतीनां सर्वलिङ्गानां च स्त्रीत्वेऽपि नदीत्वं न स्यात् । कैयटरीत्या नित्यस्त्रीत्वाभावात् । हरदत्तमतेऽपि ह्रस्वांशे नित्यग्रहणव्यावर्त्यालाभाच्च । अत एव आख्याग्रहणमपहाय स्त्रीशब्दमात्रं निष्कृष्य सम्बद्ध्यते । तदे-तदाह ॥ ह्रस्वौ च इउवर्णौ स्त्रियामिति ॥ औत्वे प्राप्त इति ॥ परत्वादिति भावः । यत्तु प्राचा औदिति सूत्रे घिनदीसंज्ञावर्जिताभ्यामिति व्याख्यात-म् । नासावक्षरार्थः । किन्तु पूर्वोत्तरसूत्रद्वयलभ्यः । एवञ्च इदुद्भ्यामिति सूत्रानुपन्यसनं प्राचः प्रामादिकमेव ॥

अचि र ऋतः ॥ गुणदीर्घोत्वानामिति ॥ तिस्रस्तिष्ठन्तीत्यत्र, ऋतो ङीति गुणस्य तिस्रः पश्येत्यत्र प्रथमयोरिति पूर्वसवर्णदीर्घस्य प्रियतिस्र आगतः प्रियतिस्रः स्वमित्यत्र ऋत उदित्युत्त्वस्य रत्वमपवाद इत्यर्थः।बाध्य-सामान्यचिन्तायां स्वविषये प्राप्तस्य सर्वस्य बाधादिति भावः । विशेष-चिन्तायां तु, मध्येऽपवादा इति न्यायेन दीर्घोत्त्वयोरेव बाधः स्यान्न तु गुण-स्य । सामान्यविशेषपक्षौ च जातिव्यक्तिपक्षवल्लक्ष्यानुरोधाद् व्यवस्थितौ इति कैयटादौ स्पष्टम् । यत्तु व्याचख्युः । अपवादशब्दो बाधकत्वोपलक्षकः

ह्रस्वयोस्तु स्त्रियामित्येवेति॥इष्वादिष्वप्राप्तिमाशङ्क्य,ङिति ह्रस्वश्चेत्यत्र नित्यस्त्री-लिङ्गावित्येवंविधो नियमो नाश्रीयते इति कैयटोक्तिरुपक्रमानुरोधाद् ह्रस्वांशमात्र-विषया । यू स्त्र्याख्यावितिसूत्रेऽत्रत्ये यकुवङ्स्थानावित्यंशस्य निषेधपरतया भाष्ये व्याख्यानेन निषेधस्य प्राप्तिपूर्वकतया तत्र नित्यस्त्रीलिङ्गावित्यस्यावश्यकत्वाच्चेति भावः।तदाह॥अन्यथेति॥कैयटरीत्येति स्त्रीविषयावेव यौनित्यमितिभाष्यस्वारस्येन लिङ्गान्तरविशिष्टार्थानभिधायकत्वरूपस्य नित्यस्त्रीत्वस्य तेनोक्तेरिति भावः॥हर-दत्तमतेऽपीति ॥ पूर्वभाष्ये एवो भिन्नक्रमः । नित्यमेव यौ स्त्रीविषयावित्यन्वयः । नित्यमेवेत्यस्य पदान्तरं विनाऽपीत्यर्थ इति वृत्त्याशयं व्याचष्टे । इष्वादीनां च शब्दार्थ एव स्त्रीत्वमिति । तेषां पदान्तरं विनापि स्त्रियां वर्तमानत्वेन व्यावर्त्या-भाव इति भावः॥ आख्याग्रहणमपहायेति ॥नित्यत्वार्थकमपहायेत्यर्थः ॥ स्त्रीशब्द-मात्रमिति ॥ स्त्र्याख्यपदं स्त्रीबोधकावित्येतन्मात्रार्थकं निष्कृष्य पूर्वोक्तार्थमपहाय सम्बद्ध्यत इत्यर्थः ॥ परत्वादिति ॥ ङेरामपेक्षयेत्यादिः ॥

तिस्रस्तिष्ठन्तीति ॥ इदं प्रियतिस्रावित्यादेर्भपर्यन्तस्यैति भाष्योदाहृतस्योप-लक्षणम् ॥ बाध्यसामान्येति ॥ इदं च तृज्वत् क्रोष्टुरित्यत्र भाष्ये स्पष्टम् ॥ बाध इति ॥ अनन्तरस्येति न्यायाश्रयणे उत्त्वस्यैव बाधः स्यादिति बोध्यम् । ननु यत्रा-ऽनेकविधिं प्रति येन नाप्राप्त्याऽपवादत्वं प्राप्तं तत्र व्यवस्थापका, मध्येऽपवादा

पूर्वविप्रतिषेधेन गुणमपि बाधत इत्याशय इति । तन्निर्मूलं, क्लिष्टं च । यदपि प्रसादकृतोक्तम् । गुणस्य पूर्वविप्रतिषेधेनेतरयोः पराविप्रतिषेधेन बाधक इत्यर्थ इति । तन्न । रविधेरचरितार्थत्वात् । न च टौसोश्चरितार्थता । यणा गतार्थत्वात् ॥ त्रिचतुरोर्विशेषणादिति ॥ श्रुतत्वाद्धि त्रिचतुरोरित्यस्यैव स्त्रियामिति विशेषणं, नाङ्गस्येति भावः ॥ प्रियत्रिरिति॥अत्र व्याचक्षते । स्त्रिया अन्यपदार्थत्वेन बहुव्रीहिरूपमङ्गं तत्र वर्तते । त्रिशब्दस्तु पुन्नपुंसकयोरेवेति तिस्रादेशो नेत्यादि । अत्रेदं वक्तव्यम् । जहत्स्वार्थायां त्रिशब्दोऽनर्थकः । अजहत्स्वार्थायां तु स्त्रियां वर्तत एव । तत्कथं पुन्नपुंसकवृत्तिता सङ्गच्छतामिति । अत्रेदं तत्त्वम् । जहत्स्वार्थैव वृत्तिरिहाभिमता । लक्ष्याऽनुरोधात् । तेनाङ्गं स्त्रियामिति सम्यगेव । त्रिशब्दस्य पुन्नपुंसकवाचिता तु भूतपूर्वगत्या । उत्तरपदार्थप्रधानस्तत्पुरुष इत्यादिसिद्धान्तप्रवादस्यैवमेव निर्वाह्यत्वात् । एवं प्रियतिसा पुमानित्यत्र स्त्रियां वृत्तिरपि भूतपूर्वगत्यैव । अजहत्स्वार्थापक्षे तु स्त्रीनिष्ठसंख्यासमर्पकयोस्त्रिचतुरोरिति विवक्षितोऽर्थः । प्रत्ययोत्तरपदयोश्चेत्येतत्सूत्रगतभाष्यग्रन्थसन्दर्भश्चेह प्रमाण-

---

इत्यादिन्यायाः । प्रकृते च रभावस्य न केनापि येन नाप्राप्तिरिति चेन्न। किमिदं येन नाप्राप्तिन्यायेन पूर्वसवर्णदीर्घापवादतया प्रथमाद्वितीयामात्रविषयमुत, ऋत उदित्यपवादतया पञ्चमीषष्ठीमात्रविषयमुत ऋतो ङीति गुणापवादतया सर्वनामस्थानङिमात्रविषयमिति संशये व्यवस्थाकाङ्क्षया तन्न्यायप्रवृत्तेः सूपपादत्वात् ॥ तन्निर्मूलमिति ॥ जसि रादेशो वक्तव्यो गुणपरत्वादित्येतत्सूत्रस्थं वार्त्तिकं मूलमिति न वाच्यम् । बाह्यसामान्यचिन्तामाश्रित्य तत्प्रत्याख्यानस्य तृज्वत्सूत्रे भाष्ये ध्वनितत्वेन तस्य दृढमूलत्वाभावात् । बाह्यसामान्यचिन्ताश्रयणे एव तस्य मूलत्वौचित्याच्च । तदाह ॥ क्लिष्टं चेति ॥ नाङ्गस्येति ॥ तस्याश्रुतत्वात् ॥ स्त्रियां वर्त्तत एवेति ॥ अजहत्स्वार्थायामन्यपदार्थस्य त्रिशब्देनाप्युक्ततया तस्य स्त्रियां वृत्तिः । न चेदं स्त्रीत्वं पदान्तरसापेक्षतया बहिरङ्गमिति वाच्यम् । त्रिशब्देन सर्वत्र स्त्रीरूपार्थप्रतिपादने तात्पर्यग्राहकस्यापेक्षिततयाऽन्तरङ्गाभावादिति भावः ॥ तत्कथमिति ॥ स्त्रियां तत्र च वृत्तिरिति पुन्नपुंसकयोरेवेति त्वदुक्तं विरुद्धमिति भावः ॥ अजहत्स्वार्थापक्षे त्विति ॥ तुनोक्तार्थेऽरुचिर्ध्वनिता । तद्बीजं तु रूढेरविरोधित्वे जहत्स्वार्थावृत्तेरभावः । किञ्च जहत्स्वार्थाऽजहत्स्वार्थशब्दयोरवयवानां वाक्यदृष्टस्वार्थत्यागतदभावावित्येवार्थः । तत्रान्त्ये स्वार्थपुमादिवृत्तेः कथमन्यपदार्थस्त्रियां वृत्तिः । न चान्यपदार्थस्य समुदायशक्यत्वेऽपि समुदायघटकत्वेनावयवस्यापि स शक्य इत्याशयस्तर्हि जहत्स्वार्थत्वेऽपि तुल्यम् । तत्रापि पक्षेऽन्यपदार्थस्य समुदायशक्यत्वात् । यदि स्त्रीवाचकतापर्याप्त्यधि-

म् ॥ अनित्यत्वादिति ॥ इकोऽचीत्यज्ग्रहणं चेह लिङ्गम् । तद्धि सम्बुद्धौ नुमं वारयितुं कृतम्। भ्यामादिषु सत्यपि नुमि तल्लोपसम्भवात्। सम्बुद्धिश्च लुका लुप्तेति प्रत्ययलक्षणेन नुमः प्राप्तिर्वाच्या । प्रत्ययलक्षणं च, न लुमतेति निषेधस्यानित्यतां विना दुर्लभमित्याकरे स्पष्टम् । न चेदमनित्यं सम्बुद्धिगुणमात्रविषयकमित्यभिनिवेष्टव्यम् । लक्ष्यानुरोधेनान्यत्रापि क्वचित्तदभ्युपगमे बाधकाभावात् । तथाच प्रियतिस्रृ प्रियत्रि इति रूपद्वयमपि उक्तरीत्यैव कैयटेन समर्थितम् ॥पूर्वविप्रतिषेधेनेति॥ न चात्र प्रमाणाभावः। प्रियतिस्रृणि इत्यादिभाष्योदाहरणस्यैव तत्र प्रमाणत्वात्॥द्वेरत्वे सत्याविति॥ विभक्तिसंनिपातकृतमपि त्यदाद्यत्वं टापो निमित्तम्। संनिपातपरिभाषाया अनित्यत्वान्न यासयोरिति ज्ञापकाच्चेति भावः ॥ इयादेश इति ॥ अजादौ य इयादेशो विहितः स उपसर्जनत्वे पुंसि विद्यमानस्य स्त्रीशब्दस्यौसादिषु चतुर्ष्वेव, न त्वन्यत्र । गुणनाभावादिभिः पूर्वोक्तैर्बाधितत्वादित्यर्थः ॥

नेयङुवङ्स्थानावस्त्री॥तिष्ठतो ययोरिति स्थानौ। अधिकरणे ल्युट्। इयङुवङोः स्थानाविति षष्ठीसमासः । फलितार्थमाह ॥ इयङुवङोः स्थितिर्ययोरिति ॥ यत्रेयङुवङौ निष्पद्येते तत्रैवायं निषेधः । यत्र त्वपवादेन बाध्येते तत्र न निषेध इत्येतदर्थं स्थानग्रहणम् ॥

करणत्वविवक्षेत्युच्यते तदा अजहत्स्वार्थत्वेऽपि तुल्यमिति ॥तल्लोपसम्भवादिति॥ पञ्चत्रपुभ्य इत्यादौ सुमुदायभक्तो नुम् नावयवस्येगन्तत्वविघातक इतीगन्तोत्तरपदद्विगुत्वप्रयुक्तपूर्वपदप्रकृतिस्वरोऽन्तरङ्गत्वान्नुमः पूर्वमेव स्वरप्रवृत्तेश्च। अकृतव्यूहपरिभाषा त्वनित्या । अतिराभ्यामित्यत्रापि नुमं बाधित्वा परत्वादात्वं वृद्धौत्वेत्यत्र वृद्धिशब्दविहितवृद्धेरेव ग्रहणान्न पूर्वविप्रतिषेधेन नुमिति शङ्क्यम् । प्रियतिस्रृभ्यामित्यादावपि नुमः परत्वात्तिस्रादेश एव । एतेन निर्दिश्यमानस्त्रिशब्दस्य व्यवहितत्वादादेशो न स्यादित्यपास्तम् । शुचीनामित्यादौ,नुमचि रेति पूर्वविप्रतिषेधेन सकृद्गतिन्यायेन नुमोऽप्राप्त्या तत्रेन्हन्त्रिति नियमाद्दीर्घो न स्यादिति न शङ्क्यम् । बहुभिः कुलैरित्यत्र नुमि षट्त्वेऽपि झल्युपोत्तममित्यस्य प्राप्त्या तदभावेऽपि बहुशब्दस्यान्तोदात्ततया न स्वरे विशेषः । न चोत्तरार्थम् । तत्रैव कर्तुं युक्तत्वादित्यन्यत्र विस्तरः ॥ प्रियतिस्रृ इति ॥ तथैव भाष्ये उदाहृतत्वेनानङि न लुमतेति निषेध एवेति बोद्धव्यम् । अनित्यत्वे प्रमाणमाह ॥ न यासेति ॥ चो हेतौ ॥

षष्ठीसमास इति ॥ इयङादिस्थित्यधिकरणत्वेन क्वचिद् दृष्टावित्यर्थः । तेन, हे श्रीरित्यादौ निषेधसिद्धिः ॥

चाम्मि ॥ यद्यपि प्रकृतो निषेधोऽनेन विकल्प्यत इति प्राञ्चः । तथाऽपि निषेधविकल्पे विधिविकल्प एव फलति । तथाच लाघवात् स एव सूत्रार्थ उचित इत्याशयेनाह ॥ वा नदीसंज्ञौ स्त इति ॥ ङिति ह्रस्वश्चेति सूत्रेऽप्येवमेव ॥ कथं तर्हीति ॥ उवङ्स्थानत्वेन नदीत्वाभावाद् ह्रस्वोऽनुपपन्न इत्याक्षेपः ॥ बहव इति ॥ केचित्तु, वामीत्यतो वाग्रहणमिहापकृष्य व्यवस्थितविभाषां चाश्रित्य समादधुः । तन्मन्दम् । तथा सतीह नञ्ग्रहणस्य वामीत्युत्तरसूत्रस्य च वैयर्थ्यापत्तेः । अन्ये तु सामान्ये नपुंसकमिति कथञ्चित् समादधुः ॥

न षट् ॥ स्त्रियां यदुक्तं तन्न भवतीति व्याख्यानाद् अनन्तरो ङीविव व्यवहितष्टापि निषिद्धस्यत इत्याशयेनाह ॥ङीप्टापौ नेति॥ राः पुंवदिति ॥ रैशब्दस्य स्त्रीलिङ्गतायां अपि स्मरणादिति भावः । तथाच क्षीरस्वामी । रात्येनं राः, स्त्रीत्येके इति । स्त्रियां नौस्तरणिस्तरिरित्यमरः ॥ ॥ इत्यजन्ताः स्त्रीलिङ्गाः ॥ ॥

अतोऽम् ॥ स्वमोरिति ॥ अमोऽम्विधानं लुग्बाधनार्थम् ॥ अम् स्यादिति ॥ एतच्च प्राचामनुरोधाद् व्याख्यातम् । संयोगान्तलोपो झल इत्यभिप्रायेण वा । वस्तुतस्तु म् इत्येव पदच्छेदो लाघवात् । तत्र सोर्मे कृते ज्ञानमिति सिद्धम् । द्वितीयैकवचने तु, आदेः परस्येत्यकारस्य मकारे कृतेऽन्त्यस्य मस्य संयोगान्तलोपे सिद्धमिष्टम् । यत्तु वदन्ति । एवं सति, सुपि चेति दीर्घत्वं स्यादिति । तन्न । सन्निपातपरिभाषाविरोधात् । यदपि दीर्घविधौ सा न प्रवर्तत इति । तदपि न । रुधादिभ्यः श्नम्, श्नान्नलोप इति सूत्रयोः, सुपि चेति दीर्घत्वे सन्निपातपरिभाषाप्रवृत्तेर्भाष्यकृता ध्वनितत्वात् कैयटेनोपपादितत्वाच्च । यदप्याहुः । अतिजरसमिति न सिध्योदिति । तद-

---

ह्रस्वोऽनुपपन्न इति ॥ नेयङित्यत्रेयङादिनाङ्गाक्षेपाद् यत्र नदीकार्याश्रयेऽङ्गे बाधकाबाधितेयाङादिसत्ता क्वचित् प्रयोगे दृष्टा तस्य तदवयवस्य च निषेध इति भावः ॥ कथञ्चिदिति ॥ अनेन सीताविरहिणो रामस्य वाक्ये सीताया एव विवक्षितत्वेनेदमप्यप्रयोजकमिति सूचितम् । नञ्घटितमनित्यमिति तु भाष्याऽनुक्तत्वान्न लक्ष्यसंस्कारोपयोगि ॥ इत्यजन्ताः स्त्रीलिङ्गाः ॥

झल इत्याभिप्रायेणेति ॥ एकवाक्यतया झल एव लोप इत्याभिप्रायेणेत्यर्थः ॥ संयोगान्तलोप इति ॥ झल्ग्रहणस्य तत्रापि षेऽपि वाक्यभेदेन सम्बन्धः । तेन च पूर्ववाक्यस्य यण्व्यतिरिक्तेऽझल्यपि क्वचित् प्रवृत्तिरिति भावः ॥ सन्निपातेति

ऽदि न । द्वितीयैकवचने हि, अत्तोऽमिति बाधित्वा परत्वाज्जरसि कृते सन्नि-पातपरिभाषया लुकोऽप्रवृत्तौ रूपसिद्धिः स्पष्टैव । प्रथमैकवचने तु अतिजर-मित्येवेष्यते । सन्निपातपरिभाषया जरसादेशस्याप्रवृत्तेः । अत इति तकार उच्चारणार्थः ॥ भसंज्ञायामिति ॥ सुडनपुंसकस्येति पर्युदासेनासर्वनामस्थाक-त्वादिति भावः ॥

यस्य ॥ इश्च अश्च यं तस्य । तदाह ॥ इवर्णावर्णयोरिति ॥ औङः श्यामिति ॥ विभक्तित्वापेक्षया श्यामिति स्त्रीलिङ्गनिर्देशः ॥

ह्रस्वाकारसन्निपातेन जातस्य तद्विघातकत्वायोगादिति भावः ॥परत्वाज्जरसीति॥ परे तु, जराया इति सूत्रोक्तेनाजरांसीत्यत्र नुम्जरसोः प्राप्तयोर्विप्रतिषेधेन जरस् इति भाष्यप्रामाण्येन पूर्वविप्रतिषेधात् पूर्वं विभक्त्यादेशप्रवृत्तिरधिकविभक्त्य-पेक्षजरसादेशापेक्षया विभक्त्यादेशानामन्तरङ्गत्वाद्धाऽवश्यं वाच्या । अन्यथा शिभावात् पूर्वमेव जरसः प्रवृत्तौ नुमा तस्य विप्रतिषेधविचारासङ्गतिः स्पष्टैव । अत एव टाङसीति सूत्रे कैयटेनोक्तम् । भाष्यकारस्तु सन्निपातपरिभाषया जर-सादेशमनभ्युपयन्नतिजरेणातिजरादिति भाव्यं, न त्वतिजरसिन अतिजरसादिति गौरवमुद्भावितवानिति । भवद्रीत्या परत्वात् पूर्वं जरसादेशे इनाद्यप्राप्त्या तद-भावपक्षे तस्याप्राप्त्या परिभाषया जरसादेशमनभ्युपयन्नित्यस्यासङ्गतिः स्पष्टैवे-त्युच्यते तत्राप्यन्तरङ्गत्वादतोऽमि सति जरसभाव एवोचितः । न च तत्रानाकारा-न्तसन्निपातलक्षणमेवाजादित्वं, किन्तु तदभावेऽपि । एषा तु सन्निपातलक्षण-विधिप्रवृत्तिं विना न यस्य प्रवृत्तियोग्यता तत्रैवेति वाच्यम् । मानाभावात् । टाङसीति सूत्रस्थेनातिजरेणेत्येतद्विषयककैयटेन विरोधाच्च । एवञ्च जराशब्द-विषयं परत्वादिनादीन् बाधित्वा जरसित्यादि मूलमत्र्यमनोरमा च प्राचामनु-सारेणेति । तदाह ॥ एकवचने त्विति ॥ तत्राणीत्यर्थः ॥ अत इतीति ॥ न तु तपरसूत्रप्रवृत्त्यर्थ इत्यर्थः । नपुंसके ह्रस्वावश्यम्भावाद् व्यावर्त्याप्रसिद्धेरिति भावः । ननु तकारस्योच्चारणार्थत्वे मिति च्छेदे सन्निपातपरिभाषया दीर्घवारणं कथमितिचेन्न । यादृशशब्दसन्निपातेन सोरादेशस्तस्य विनाशेनादोषात् । अत एव दाक्षिरित्यादौ अङ्गसंज्ञा अकारान्तप्रकृतिप्रत्ययसन्निपातकृताऽनया परिभाष-याऽलोपस्य निमित्तं न स्यादित्याशङ्क्य अनित्यत्वेन भाष्ये समाहितमतस्तस्य सन्निपातस्य शब्दोपात्तत्वाग्रहाभावात् । भाष्यंकृता तु मादेशे सन्निपातपरिभा-षया सम्बुद्धिलोपाप्राप्तिभियाऽमित्येव च्छेदमङ्गीकृत्यैङ्ह्रस्वादित्यत्र व्यधिकर-णान्वयहलन्तपदानुवृत्तिरूपगौरवं फलमुखत्वान्न दोषावहमित्यनुसृतम् । परिभाष-ानित्यत्वेन तु न समाहितम् । तस्यामतिक्रमत्वात् । किञ्च तस्यानित्यत्वे दीर्घा-प्राप्तिः । इदमपि तत्रैव भाष्ये ध्वनितमित्यलम् ॥

देमविभक्त्यपेक्षयेति ॥ तदुक्तविभक्तिश्रवणेन विभक्तावितिविशेष्यापेक्षयेत्यर्थः ॥

जश्शसोः ॥ जसा साहचर्यात्, शसपि सुबेव गृह्यते । तेनेह न । कुण्डशो ददाति ॥

शि ॥ शीत्यविभक्तिको निर्देशः । महासंज्ञाकरणं पूर्वाचार्यानुरोधात्॥ अन्यतमस्य त्विति ॥ एवञ्च सामान्यादिष्वन्यतमदित्यादिप्रयोगाः प्रामादिका एवेति भावः ॥ सोरमादेशे इति ॥ यत्तु प्राचोक्तम् । स्वमोरमादेशे वा जरसिति । तद्भाष्यविरुद्धम् । एवञ्च अजरसं वर्तते इति, हे अजरसमिति चापशब्द एव । अजरसं पश्येति तु प्रयोगः साधुः । किन्तु अमादेशे कृते जरस् इति प्राच उक्तिरेवासाध्वी । परत्वाज्जरसो न्याय्यत्वात् पूर्वविप्रतिषेधे प्रमाणाभावाच्च ॥

सान्तमहतः संयोगस्य ॥ सान्तेति पृथक्पदं लुप्तषष्ठीकम् । संयोगस्येत्यनेन समानाधिकरणमिति व्याचष्टे ॥ सान्तसंयोगस्येति ॥ उपधाया इति ॥ उपधाग्रहणं पूर्वमात्रोपलक्षणं, पारिभाषिकार्थस्येहासम्भवात् ॥ मासश्छन्दसीति॥मासित्यस्य तकारः स्याद् भादौ प्रत्यये छन्दसीति वाक्यार्थः । माद्भिः शराद्भिर्दुरोदरं तव इत्युदाहरणम् ॥

ह्रस्वो नपुंसके ॥ इह ह्रस्वश्रुत्याऽच इत्युपस्थितम् । तेन प्रातिपदिकस्य विशेषणात् तदन्तविधिरित्याह ॥ अजन्तस्येति ॥ प्रातिपदिकस्याच इति तु न व्याख्यातम् । संभवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वात् ।सुवाग्ब्राह्मणकुलमित्यादौ अतिव्याप्तेश्च ॥ सन्निपातेति ॥ अवर्णमाश्रित्य कृतो यादेशः कथं तल्लोपे निमित्तं स्यात् । एतच्च, एओङ्सूत्रे, इको गुणवृद्धी इति सूत्रे च भाष्ये ध्वनितं, कैयटेन प्रतिपादितं , शब्द-

---

सुबेवेति ॥निरनुबन्धकपरिभाषया तद्धितशसोऽपि ग्रहणमिति न वाच्यम् । येनानुबन्धेन सानुबन्धकत्वं तदनुच्चारणएव तत्प्रवृत्तेः॥अनुरोधादिति॥तेनस्वशास्त्रस्य प्रामाण्यज्ञापन मिति भावः॥तद्भाष्येति॥सन्निपातपरिभाषया विभक्त्यादेशे जरस भावस्यजराया इति सूत्रे भाष्ये स्पष्टमुक्तेरिति भावः॥पश्येति त्विति तुनाऽग्रुचिर्बोधिता । तद्बीजं तूक्तम् ॥ अवर्णमिति ॥ ह्रस्वत्वविशिष्टमवर्णमित्यर्थः । यादेशेऽत इत्यनुवृत्तेस्तत्र यद्यपि कष्टायेति निर्देशप्रापितदीर्घेण ह्रस्वत्वांशो निवर्तितस्तथाप्यवर्णत्वमादेशेऽनुवर्तते । तदपि चेल्लोपेन निवर्तेत तर्हि परिभाषाविरोधः स्पष्ट एवेति भावः ॥ भाष्ये इति ॥ गाधातोः ष्ट्रे गुणेन अकारे आर्धधातुकोपदेशेऽदन्तत्वाभावादतोलोपाभावेऽपि पररूपेण सामगस्य सिद्धौ गापोष्टकःकित्करणं लिङ्गादाकारस्य गुणो नेति व्यर्थं तत्रेग्रहणमिति भाष्ये उक्तम् ॥ कैयटेनेति ॥ सामगायेत्यत्रासति टकः किस्त्वे एकादेशस्य पूर्वान्तत्वेन ग्रहणाद् आकारस्य

कौस्तुभे निष्कर्षे प्रापितमिति तत एवावधार्यम्। एवञ्च याधातौ शुभंयाशब्दस्य क्लीबस्य ङयि शुभंय इति माधवेनोदाहृतं, तन्नादर्तव्यमिति भावः ॥

स्वमोर्नपुंसकात् ॥ अयं लुक् पूर्वविप्रतिषेधेन त्यदाद्यत्वस्य, क्लिमः कादेशस्य च बाधकः। परत्वाद्धि त्यदाद्यत्वेऽमभावेन तं कुलमिति स्यात् ॥ वृद्ध्यौत्वेति ॥ अतिसखीनि कुलानीत्यत्र सख्युरसम्बुद्धाविति णिद्वद्भावाद् वृद्धिः प्राप्ता। वारिणीत्यत्र तु, अच्च घेरित्यौत्वम्। प्रियक्रोष्टूनीत्यादौ तृज्वद्भावः प्राप्तः। ननु नुमनुटोः को विशेषस्तत्राह ॥ नामीति ॥ नुमस्तु अङ्गभक्तत्वात् तस्मिन् सति दीर्घो न स्यादिति भावः ॥

तृतीयादिषु ॥पुंवदिति॥ अर्थान्नुमह्रस्वयोः प्रतिषेधोऽयम् ॥ प्रवृत्तिनिमित्तभेदादिति ॥ पीलुशब्दस्य हि वृक्षत्वव्याप्यजातिर्वृक्षे प्रवृत्तिनिमित्तम्। फले तु फलत्वव्याप्यजातिर्वृक्षविशेषप्रभवत्वं वा । उभयथाऽपि पुन्नपुंसकयोर्नैकं प्रवृत्तिनिमित्तमिति भावः।

अस्थिदधि ॥ अतिदध्नेति॥ दधि अतिक्रान्तेनेत्यर्थः। यत्तु– प्रियदध्नेति। उरःप्रभृतिषु दधिमधुशालीति पाठान्नित्यः कप् प्राप्तः। भाष्यकारप्रयोगादेव प्रियदधिशब्दे न भवतीत्याहुः । तच्चिन्त्यम्। भाष्ये तादृशपाठस्य बहुषु पुस्तकेष्वनुपलम्भात् । स्त्रियान्तु प्रियदध्न्या प्रियदध्न्यै इति केचित्तन्न । सन्निपातपरिभाषया बहिरङ्गपरिभाषया च ङीपोऽप्रवृत्तेः। तस्मात् पुंसीव स्त्रियामपि अतिदध्नेत्यादिकमेव बोद्धव्यम् ॥ सुधिनी इति ॥

धात्ववयवत्वेनातो लोपेः स्यात्। किन्त्वे त्वातो लोप इत्यालोपे धात्वनवयवत्वादप्रवृत्तिरित्याशङ्क्य सन्निपातपरिभाषयाऽकिन्त्वेऽपि, नातो लोप इति तेन प्रतिपादितम् ॥ शब्दकौस्तुभे इति ॥ पूर्वोक्तभावश्च तत्रोक्तः। परे तु व्याप्याऽत्वजातियञादिसन्निपातनिमित्तो दीर्घो न स्वसन्निपातविघातकलोपनिमित्तम् । सन्निपातपरिभाषायाश्च सन्निपातलक्षणविधिप्रवृत्तेः प्राक् तन्निमित्तभूतो यः सन्निपातस्तद्विघातकस्य स्वातिरिक्तस्य स्वयमनिमित्तमित्यर्थ इत्याहुः ॥

पूर्वविप्रतिषेधेनेति ॥ अन्तरङ्गानपीत्यस्योपलक्षणमिदम्। अत्रत्यवार्त्तिकानुरोधेन त्वेतदुक्तम ॥ त्यदादिभ्यश्चेति ॥ वक्तव्यमिति हि तत्र वार्त्तिकम् ॥ तं कुलमिति स्यादिति ॥ द्वितीयैकवचने इति शेषः। प्रथमैकवचने तु सं कुलमिति स्यादिति बोद्धव्यम्। नुमह्रस्वयोरिति ॥ पुंसि विहितस्य भावस्यातिदेश्यस्याभावाद् ह्रस्वनुमोर्निषेधातिदेशसामर्थ्यादव्याप्तिन्यायाश्रयणाच्चेतिभावः। नब्विषयस्यैति स्वरस्य तु न निषेधो भिन्नकर्तृकत्वात् । विषयपदेन नपुंसकत्वाभावेऽपि

परत्वान्नुमा इयङ् बाध्यते ॥ सुधियेति ॥ पुंवत्त्वपक्षे नुमोऽभावादियङ्। बह्व्यः श्रेयस्यो यस्य तद् बहुश्रेयसी कुलम् । अत्र नपुंसकह्रस्वत्वं न। ईयसो बहुव्रीहेर्नेति ह्रस्वमात्रस्य प्रतिषेधादिति श्रीपतिपुरुषोत्तमविश्वरूपा-ऽऽदयः। अन्ये तु उपसर्जनह्रस्व एव निषिद्ध्यते, नपुंसकह्रस्वत्वं तु स्यादेव। बहुश्रेयसि बहुश्रेयसिनी इत्याद्याहुः । स्नुः प्रस्थः सानुरस्त्रियामित्युभय-लिङ्गः सानुशब्दः । तस्य नपुंसकत्वे रूपमाह ॥ स्नूनि सानूनीति ॥ पुंवि शम्भुवत् ॥ प्रियक्रोष्टूनीति ॥ यत्तु प्राचा प्रियक्रोष्ट्रणीत्युक्तम् । तत्पूर्वविप्रतिषेधपरभाष्यवार्त्तिकविरुद्धम् । यत्तु व्याचख्युः । विभाषा तृतीयादिष्व-ऽचीत्येतद्विषयको विप्रतिषेधः । भाष्ये प्रियक्रोष्टुने अरण्यायेत्यस्यैवोदाहृत-त्वादिति । तन्न । उदाहरणस्य सङ्कोचकत्वे मानाभावात् । यदाहुः । न चोदाहरणमादरणीयमिति । किञ्च पूर्वविप्रतिषेधस्य वैकल्पिकतृज्वद्भाव-मात्रविषयकत्वे तत्र तृज्वद्भावग्रहणं व्यर्थमेव स्यात्। प्रियक्रोष्टुनेत्यादेर्विप्रति-षेधं विनापि पक्षे सुसाधत्वात् । न च प्रियक्रोष्ट्रेत्यादिनिवृत्तिस्तत्फलम्।

तत्प्रवृत्त्यङ्गीकाराच्च ॥नुमोऽभावादिति॥ ह्रस्वाभावेन नाभावाच्चेयङिति भावः॥ उपसर्जनह्रस्व एवेति ॥ ईयसो बहुव्रीहौ पुंवदिति हि भाष्ये पठितम् । ईयसः परस्य स्त्रीप्रत्ययस्य बहुव्रीहौ विद्यमानस्य पुंवत् । पुंविषयस्य ईकारस्य यथा न ह्रस्वस्तथाऽस्यापीति तदर्थः । ईयसन्ताद्विहितो यः स्त्रीप्रत्ययस्तदन्तान्तबहु-व्रीहौ पुंवदिति तु नार्थः । बहुव्रीहेः पुंवत्त्वेऽपि उपसर्जनस्य श्रेयसीशब्दस्थ स्त्री-प्रत्ययान्तत्वानपायेन उपसर्जनह्रस्वस्य दुर्वारतापत्तेः । एवञ्च प्रत्यासत्त्या स्त्री-प्रत्ययत्वनिमित्तकगोस्त्रियोरित्यस्यैव तेनाभावातिदेश इति भावः । तदेवार्थतो-ऽत्र पठितम् । न च नेत्येव सिद्धे पुंवद्वचनं व्यर्थम् । वार्त्तिकेषु लाघवगौरववि-चाराभावस्य तत्र तत्र भाष्ये ध्वनितत्वादितिबोद्धव्यम् ॥ इत्याद्याहुरिति ॥ अत्रारुचि-बीजं तु, ईयसश्चेति सूत्रे भाष्ये ईयस उपसर्जनस्त्रीप्रत्ययस्य दीर्घत्वं वक्तव्य-म् । बहुश्रेयसी पुंवद्वचनात् सिद्धमित्युक्तम् । तेनास्य नपुंसकह्रस्वनिवृत्त्यर्थत्वं लभ्यते । अन्यथा वचनेन वचनप्रत्याख्यानासङ्गतिः । मम तु मते नपुंसकह्रस्व-निवृत्त्यर्थमावश्यकं तदिति युज्यते एव तेनास्य प्रत्याख्यानम् । दीर्घत्वं हि प्रत्या-सत्त्योपसर्जनह्रस्वत्वापवादः । सामान्यतो ह्रस्वमात्रापवादत्वे हि प्रत्याख्याना-ऽसङ्गतिरिति दिक् ॥पूर्वविप्रतिषेधपरभाष्ये इति॥ अङ्गाधिकारे तदन्तविधेः सत्त्वेन तदन्तग्रहणेन, यदागमा इति न्यायेन नुम्विशिष्टस्य ग्रहणेऽपि सूत्रे षष्ठीनिर्देशा-भावान्निर्दिश्यमानस्य नुमा व्यवधानमित्यस्याभावेऽपि पूर्वविप्रतिषेधसामर्थ्या-त् सकृद्गतिन्यायेन पुनस्तृज्वत्त्वाभावः । अत्रानयोर्वैगपद्यासम्भवेन विरोध इति भावः ॥ इत्यस्यैवेति ॥ अन्यथा प्रथमोपस्थितसर्वनामस्थानोदाहरणत्यागो न्यि

पुंवद्भावपक्षे तस्य दुर्वारत्वात् । स्वयमपि तथोदाहृतत्वाच्च । न च समाहार-द्विगौ पञ्चक्रोष्टुनेत्यादौ पुंवद्भावाभावात् तत्र तृज्वद्भावनिवृत्तिः फलमिति वाच्यम् । एवमपि भाष्योदाहरणासामञ्जस्यात् । उपलक्षणं तादिति चेत्, हंतैवं प्रियक्रोष्टूनीत्येवोपलक्ष्यतां भाष्योदाहृतप्रातिपदिकांशानुग्रहायेति दिक् ॥

सुल्वेति ॥ पुंवत्त्वपक्षे नुमभावाद्यण् ॥ सलुनेति ॥ ओः सुपीति यणं बाधित्वा परत्वान्नुम् ॥ यदिगन्तमिति ॥ एतच्च, रा दाने इति धातौ अतिरि ब्राह्मणकुलमिति प्रक्रम्य माधवेन स्पष्टीकृतम् । अन्ये तु सुद्योशब्दो भाषितपुंस्कः । स एवेदानीमिगन्तःएकदेशविकृतस्यानन्यत्वात् । अतः पुंवद्भावो भवतीत्याहुः । तथाच रूपमालादौ पुंवद्भाव उदाहृतः । तस्मादेजन्तेषु क्लीबेषु पुंवद्भावो माधवमते नास्ति, मतान्तरे त्वस्ति । अतः प्रद्यवा प्रराया सुनावेत्यादि प्राचोदाहृतमपि नातीव दुष्यति ॥ इत्यजन्ता नपुंसकलिङ्गाः ॥

बीजः स्यादिति भावः ॥ पक्षे — तृज्वत्त्वाभावपक्षे ॥ उदाहृतत्वाच्चेति ॥ न च प्रियक्रोष्टृणे इत्यादिव्यावृत्त्या चारितार्थ्यम । प्रियक्रोष्टृ प इत्यवस्थायां नुम-तृज्वत्त्वयोः प्राप्तयोः परत्वात्तृज्वत्त्वे सकृद्गतिन्यायेन नुमभावसिद्धेः । पुनःप्रसङ्ग-विज्ञानाश्रयेण वचनारम्भापेक्षया सकृद्गतीत्याश्रित्य वचनानारम्भस्यैव लघु-त्वादिति भावः ॥ पुंवद्भावाभावादिति ॥ भाषितपुंस्कत्वाभावादिति भावः ॥ इत्येवेति ॥ इत्यपीत्यर्थः ॥ प्रातिपदिकांशेति ॥ प्रातिपदिकांशस्याप्यनुग्रहायेत्य-र्थः ॥ इति दिगिति ॥ दिगर्थस्तु– यद्यपि चतुर्थ्यन्तोदाहरणपरभाष्यप्रामाण्यात् पुंवत्त्वपक्षेऽनभिधानेन तृज्वत्त्वाभावकल्पना न्याय्या । भाष्यकृता हि सूत्रत्रयस्य प्रत्याख्यानायाश्रितस्य शब्दानां नियतविषयकत्वस्य सूत्रारम्भेऽप्यावश्यकत्व-द्योतनाय पूर्वविप्रतिषेधवार्तिके तदुदाहृतं,तथाऽपि,न चोदाहरणमादरणीयमिति न्यायेन सर्वनामस्थानविषयकताऽप्यस्य न्याय्या । उदाहृतातिरिक्तोदाहरणाभाव इत्येवंपरतया नादरणीयमिति तदर्थ इति बोध्यम् ॥ एकदेशविकृतस्येति ॥ स च न्यायोऽशास्त्रीयस्याप्यतिदेशकोऽशास्त्रीयविकारे चेति, प्राग्दीव्यत इति सूत्रस्थ-भाष्यसम्मतत्वादिति भावः ॥ पुंवद्भाव इति ॥ तेन सुन्दरभार्य इत्यादौ जातनि-वृत्तेरपि इष्टत्वेनात्रापि तेन जातह्रस्वनिवृत्तिः । ननूपजीव्यविरोधेन ह्रस्वानिवृ-त्तिः । अत एव, समासस्येति सूत्रे भाष्ये, यतोऽनाव इत्यनाव इति प्रतिषेधो ह्रस्वरप्राप्तौ व्यञ्जनमविद्यमानवदित्यस्य ज्ञापक उक्तः । नाव्यमित्यादौ आदि-र्नकारो न स्वरयोग्यो, यश्चाकारस्तद्योग्यो नासावादिरित्यनाव इति निषेधोऽन-र्थकः । न चादिरेव नकार उदात्तगुणविशिष्टान्तरतमाज्रूपोऽस्तु । यदन्तस्य यञ्कस्यादिरुदात्तो णकरूपो भवतीति च, यतोऽनाव इत्यस्यार्थ इति वाच्यम् । एवं हि निमित्तभूतयञ्कत्वविनाशादुपजीव्यविरोधेनाद्युदात्ताप्राप्तिरिति तदाशय इति चेन्न । माधवाद्यनुरोधेनास्य ग्रन्थस्य सत्त्वात् ॥ इत्यजन्ता नपुंसकलिङ्गाः ॥

लिडिति ॥ लिह, आस्वादने किप् ॥ लिट्सु लिट्स्विति ॥ दस्य जश्त्वेन डः । तस्य खरि चेति चर्त्वेन टः । तस्यासिद्धत्वात्, डः सीति धुट् । चर्त्वम् । तकारः । न पदान्ताट्टोरिति ष्टुत्वनिषेधः । चयो द्वितीया इति तु नेह प्रवर्तते । चर्त्वस्यासिद्धत्वात् । एतेन ते च प्रत्याहारा एकचत्वारिंशदिति प्राचो ग्रन्थं व्याचक्षाणैर्यदुक्तं लिट्सु लिट्स्विति टठाभ्यां रूपद्वयमिति तत् प्रत्युक्तम् । तथाच प्रातिशाख्येऽपि, ऊष्मोदयं प्रथमं स्पर्शमेके द्वितीयमाहुरपदान्तभाजामिति श्लोकेऽपदान्तेत्यादिविशेषणं सङ्गच्छते॥

दादेर्धातोर्घः ॥ धातोरित्यावर्त्तते । तत्रैकमतिरिच्यमानमुपदेशकालं लक्षयतीत्याशयेनाह ॥ उपदेश इति ॥ आवृत्तिफलं पृच्छति ॥ उपदेशे किमिति ॥ अव्याप्त्यतिव्याप्तिपरिहारः फलमित्याह ॥ अधोगित्यादिना ॥

धुडिति । डः सीतिसूत्रेऽनुवृत्तं पदस्येति व्यधिकरणम् । पदावयवस्य सस्येत्यर्थ इति भावः ॥ एके द्वितीयमिति ॥ अत्रत्यवार्तिककारा इत्यर्थः ॥ अपदान्तभाजमिति ॥ इदमचर्त्वभाजमित्यर्थोपलक्षकम । पदान्ते प्रायो जश्त्वप्राप्त्या चर्त्वं विना चयोऽलाभात् । तथा चेति वदता मूलकृता अस्यार्थस्य सूचनात् । अत एव सुगण्ढ्षष्ठ इत्यादौ भवत्येव । टुगादीनां जश्त्वं प्रत्यसिद्धत्वेन तदप्राप्त्या चर्त्वस्याप्यभावादिति भावः ॥धातोरित्यावर्तत इति॥ इदं प्राचामनुरोधेन । दादेरित्यावर्तते इति युक्तम् । धातोरित्यनेन हि औपदेशिकस्य धातोरित्यर्थेन दामलिहो व्यावृत्तावपि, अधोगिति न संगृह्येत दादेर्दादेरित्यनेनोपदेशकालिकदादेरित्यर्थकेनोभयं सिद्ध्यति । उपदेशकालमित्यस्य तात्कालिकं लक्षयतीत्यर्थः । उपदेशे दादेरिति तु फलितोऽर्थः । वाच्यार्थत्वे षष्ठ्यन्तस्य सप्तम्या विपरिणामोऽपि कर्तव्यः स्यादिति गौरवम् । धातोरित्यस्यैव लक्षणया तथार्थकस्य दादेरित्यनेनोन्वयेऽपि न क्षतिरित्याशयेन तु मूले धातोरित्युक्तम् । अत एव भाष्ये घत्वस्यासिद्धत्वाद् धुगित्यत्र ढत्वं प्राप्नोतीत्याशङ्क्यापवादत्वेन समाधायाथ वा एवं वक्ष्यामि– हो ढोऽदादेरिति, ततो धातोरिति । दादेरिति वर्तते,नेति निवृत्तमित्युक्तम । द्रुहेस्तु, वा द्रुहेत्यनेन ढत्वस्यापि विधानाद् धुडित्यादौ न दोष इति तदाशयः । तत्र धातोरिति सूत्रे भाष्यकृत्कृतदादेरित्यनुवृत्तेः फलान्तराभावेन तदुपदेशवद्दादिलक्षकं सामर्थ्यात् । अर्थाधिकारानुरोधाच्च पूर्वत्र निषेधसमर्पकऽप्येवम् । अत एव नामधातुविषये दामलिडित्यादौ ढत्वधत्वाभावौ सिद्धौ। एवञ्च तदेकवाक्यतयाऽपवादत्वपक्षेऽपि दादिपदस्योपदेशकालिकदादिलक्षकतोचिता । आवृत्त्याश्रयणं तु बालानां स्फुटं तत्प्रतिपत्तय इति बोद्धम्। न चोपदेशे इत्येव कुतो नोक्तम् । गौरवापत्तेः धातोरिति तु तद्धाडित्यादिव्यावृत्तये उत्तरत्रावश्यकम् ॥ अव्याप्तीति ॥ अधोगित्यादौ सा । ननु धातोरवयवो यो दादिरित्यर्थे इदं सिद्धम् । वैयधिकरण्यं च गर्दभयतेरप्रत्यये गर्धबित्यादौ

एकाचो बशो भष् ॥ झलीति निवृत्तमिति ॥ यत्तु प्राचोक्तम् । प्रातिपदिकसंज्ञस्य तु झलि परतः पदान्ते चेति । तत्प्रामादिकमेव । अधोक् अधोग् अजर्घा इत्याद्यसिद्ध्यापत्तेः । प्रातिपदिक[illegible] । तत्र झलो निमित्तत्वानुपयोगाच्च । धुग्भ्यां धुक्षु इत्यादौ पदान्त इत्येव सिद्धेः । यदपि तत्पौत्रेण व्याख्यातम् । झलि परे प्रातिपदिकसंज्ञस्यैवेत्यादि । तदपि निर्मूलं निष्फलं चेत्युपेक्ष्यम् ॥ भष्भाव इति ॥ जश्त्वचर्त्वयोरसिद्धत्वात्ताभ्यां प्रागेवेति भावः ॥ षत्वचर्त्वे इति ॥ चर्त्वस्यासिद्धत्वात् पूर्वं षत्वं, ततश्चर्त्वमिति भावः ॥

वा दुह ॥ दुहेर्दादित्वान्नित्यं प्राप्तेऽन्येषामप्राप्ते उभयत्र विभाषेयम् । ननु दुहादयो दिवादिषु अनेनैव क्रमेण पठ्यन्ते । तत्र, वा दुहादीनामित्येवास्तु । दिवाद्यन्तर्गणस्य पुषादेरन्तर्गणो रधादिस्तदन्तर्गणो दुहादिरस्तु । मैवम् । तथा हि सति यङ्लुकि न स्यात् । निर्दिष्टं यद्गणेन चेति निषेधात् दोधुक् । दोधुट् ॥

इग्यणः ॥ यणः स्थाने इति ॥ विधिप्रदेशेषु सूत्रशाटकवज्झाविसंज्ञाश्रयणमिति भावः ॥

भष्भावायोत्तरसूत्रे आवश्यकम् । दोग्धेति व्यपदेशेत्वसिद्धत्वात् सिद्धम् । स्पष्टं चेदं भाष्येऽत आह ॥ अतिव्यासीति ॥ दामलिडित्यादौ सा । न च प्रागुक्तभाष्योत्तरमधोक्सिद्ध्ये वैयधिकरण्यान्वयपर्यन्तं भाष्यकृतोऽनुधावनं व्यर्थमिति वाच्यम् । दादेरिति वर्तते इत्यस्योक्ताशयमजानत एवमपि धो दादेरित्युच्यते । तत्राऽधोक् न सिद्ध्यतीति शङ्कायामुत्तरसूत्रार्थमपि प्रसङ्गान्निर्णेतुं दादिपदलक्षणायामधोगित्यस्यासाधारणफलत्वाभावं दर्शयितुं च तथोक्तेः । अत एवाग्रे वैयधिकरण्यस्योत्तरार्थमावश्यकत्वोक्त्येहार्थमनावश्यकत्वं भाष्ये ध्वनितं सङ्गच्छत इत्यलम् ॥

तत्प्रामादिकमिति॥धुग्भ्यामित्यादेः पदान्तत्वादेव सिद्धेरिति भावः ॥ उपेक्ष्यमिति ॥ एतेनैकाचो बश इति सूत्रे हस्वादङ्गादित्यतोऽङ्गादित्यनुवर्तते । अङ्गं च द्विविधं– धातुरूपं प्रातिपदिकरूपं च । तत्र धातोः पदान्त एव प्रातिपदिकस्य झलि पदान्ते चेति प्राचामाशय इत्यपास्तम् । स्वरितत्वकल्पनविभक्तिविपरिणामादीनां निर्मूलत्वान्निष्फलत्वाच्च । तद्धाट् तद्धाड्भ्यामित्यादावतिव्याप्तेश्चेति दिक् ॥ निषेधादिति ॥ भष्भावस्तु एकाज्ग्रहणेऽपि अजर्घा इति भाष्योदाहरणेन निषेधाऽनित्यत्वाद्भवतीति भावः । श्तिपाशपेति भाष्यानुक्तत्वादप्रमाणम् । वैचित्र्याय तु तथा नोक्तमित्यन्ये ॥

सूत्रशाटकवदिति॥अस्य सूत्रस्य शाटकं वयेत्यादौ, यदि वातव्यो न शाटको

वाह ऊठ् ॥ वसोः संप्रसारणमित्यतेऽनुवृत्तं संप्रसारणमूठो विशेषणम् । तेन अलोन्त्यस्येति न। यत्तु प्राचा वाशब्दस्येत्वकम् । नासौ सूत्रार्थः, किन्तु कथञ्चित् फलितार्थकथनपरतया नेयम् ॥छन्दस्येवेति॥ छन्दसि सहः । बहश्चेति सूत्रे छन्दसीत्यनुवृत्तेरिति भावः । यत्तु ऊठि कृते सवर्णदीर्घः । भूहः । भूहेत्यादि प्राचोक्तं, तद्भाष्यविरुद्धम् । तथा हि । उद्ग्रहणं मास्तु । संप्रसारणमेव विधीयताम् । तस्य लघूपधगुणे कृते वृद्धिरेचीति वृद्धौ सिद्धं विश्वौह इत्यादि । एवं स्थिते क्रियमाणमूद्ग्रहणं बहिरङ्गपरिभाषां ज्ञापयति । सत्यां हि तस्यां बहिरङ्गस्य सम्प्रसारणस्यासिद्धत्वादन्तरङ्गो गुणो न स्यादिति भाष्ये स्थितम् । नन्वनकारान्तेऽकारान्तोपसर्गे चोपपदे रूपे विशेषः स्यादितिचेन्मैवम् । भाष्यकारोक्तज्ञापकबलेनैव तादृशस्थले क्विप्रत्ययाभावस्य मानादिति कैयटहरदत्तादयः । एतेन वार्यूहः मौह इत्यादिप्रयोगा अपि परास्ताः । अथ वा ऊहतेः क्विप् इत्यवधेयम् ॥

वसुस्रंसु ॥ वसुः प्रत्ययः । तेन तदन्तं ग्राह्यम् । ससजुषो रुरिति सूत्रात् स इत्यनुवर्तते । तच्च वसोरेव विशेषणम् । न तु स्रंसुध्वंस्वोः । अव्यभिचारात् । नाप्यनडुहः । असम्भवादित्यभिप्रेत्याह ॥ सान्तवस्वन्तस्येति ॥ पदान्ते इति ॥ झलीति तु प्राचः प्रमादः । स्रस्तमित्यादावतिव्याप्तेः ॥

सहेः साडः सः ॥ सहेरिति किम् । सह डेन वर्तत इति सडः । यस्य नाम्नि डशब्दोऽस्ति । यथा, मृड इति । सडस्यापत्यं साडिः॥हान्ताः॥

दिव औत् ॥ प्रातिपदिकस्येति ॥ अव्युत्पन्नस्य, दिवेर्डीविरिति

यदि शाटको न वातव्य इति विरोधमाशङ्क्य मन्ये स वातव्यो यस्योतस्य शाटक इत्येषा संज्ञा भवतीति भाष्ये उक्तम् । तथा प्रकृतेऽपि यणः स्थाने स भवति यस्य संप्रसारणशब्देन ज्ञातस्य संप्रसारणसंज्ञा भवतीत्यर्थ इति भावः । तेन दिव उतो न संप्रसारणत्वम् ॥

फलितार्थेति ॥ संप्रसारणपूर्वत्वाभ्यां फलितेत्यर्थः ॥ ऊठि कृते इति ॥ भूवाद्यशब्दे इति शेषः ॥ क्रियमाणमिति ॥ उद्ग्रहणमित्यर्थः ॥ तादृशस्थले इति ॥ भत्वविषये इत्यर्थः । भूवाडित्यादि तु भवत्येव ॥ ऊहतेरिति ॥ एतद् वार्यूह इत्यत्र तद्विश्रयम् ॥

अव्यभिचारादिति ॥ स्रंसुध्वंस्वोर्विच् तु नास्त्यनभिधानादतः संयोगान्तलोपे तत्र व्यभिचार इत्यपास्तम् । अत एव भाष्यकृता सस्येत्यननुवृत्तौ पपिवानित्यत्र दत्वशङ्का कृता, अनुवृत्तौ चानडुद्भ्यामित्यत्रैव दत्वाभावशङ्का कृतेति दिक् ॥

न्यासोहितसूत्रेण व्युत्पन्नस्य वा, न तु दिवु क्रीडायामिति धातोः । निरनुबन्धकग्रहणे न सानुबन्धकस्येति परिभाषया । तेनाक्षद्यूरित्यादौ न भवति। औतस्तकार उच्चारणार्थः ॥ सुवुभ्यामिति ॥ उकारस्य संप्रसारणत्वात् इति दीर्घः प्राप्तः, उदिति तपरस्तात्पर्यान्न भवति । यत्तु प्राचोक्तम् । दिवो वा [illegible] । तदुपेक्षितम् । मुनित्रयानुक्तेर्निष्फलत्वाच्च । द्यामिति रूपं द्योशब्दस्यैवेति बोद्धव्यम् ॥ इति वाऽन्ताः ॥

षट्चतुर्भ्यश्च ॥ बहुवचननिर्देशादर्थप्राधान्यं विवक्षितम् । अर्थोच्चामः परत्वं शब्दद्वारकम् । तेन तदन्तविधौ सत्यपि परमचतुर्णामित्यादावेव भवति न तु बहुव्रीहौ । तदेतद्वक्ष्यति । गौणत्वे तु नुट् नेष्यते इत्यादिना । द्वित्वमिति । अचो रहाभ्यामित्यनेन ॥ रान्ताः ॥

कमला लक्ष्मीः ॥ लान्ताः ॥

मो नो धातोः ॥ पदान्त इति ॥ झलीति तु यद्यपि प्राचाऽनुवर्तितं तथाऽपि काशिकादावभावान्निष्फलत्वाच्चोपेक्ष्यम् ।

न्यासोहितेति ॥ न्यासकृद्धितेत्यर्थः ॥ निरनुबन्धकेति ॥ डिवेः प्रत्ययस्य सानुबन्धकत्वेऽपि तदन्तस्यातथात्वादिति भावः । इदं चात्र सूत्रे भूवादिसूत्रे च भाष्ये स्पष्टम् ॥ उच्चारणार्थ इति ॥ न तु स्वरितार्थः । उच्चारणार्थानामित्संज्ञायामपि प्रत्ययग्रहणमिति वार्तिकेन तदप्रवृत्तिरिति भावः ॥ संप्रसारणत्वादिति ॥ अतद्भावितस्यापि संज्ञेति पक्षे इदम् ॥ शब्दद्वारकमिति ॥ न चैवं तद्वाचकशब्दात् परत्वमेवार्थात् परत्वमित्यायातम् । ततश्च, प्रियपञ्चन् आमित्यत्रापि तद्वाचकपञ्चन्शब्दात् परत्वमस्त्येवेति दोषस्तदवस्थ इति वाच्यम् । एतत्सामर्थ्येन प्रधानीभूतषडर्थवाचकशब्दात् परत्वं विवक्षितमित्यभिमानात् । इदं प्राचामनुरोधेन । द्विवचननिर्देशे गौरवात् समाहारेण सर्वत्र सूत्रेषु निर्देशादर्शनाच्च [illegible] बहुत्वाच्च बहुवचनोपपत्तेः । किञ्च, न षट्स्वस्रादिभ्य इत्यादौ शब्दबाहुल्याभिप्रायेण बहुवचनवत्, तिसृभ्यो जस इत्यादौ प्रयोगबाहुल्याभिप्रायेण तद्वच्चेहापि बहुवचनं वक्तुं युक्तम् । किञ्च, नामीति सूत्रे भाष्ये आमीत्येव सूत्रमस्तु । न च नित्यत्वात् पूर्वं दीर्घे ह्रस्वाश्रयो नुट् न स्यात् । ह्रस्वान्तादनुडित्येतत्सामर्थ्येन भूतपूर्वगत्या ह्रस्वान्तत्वमादाय तत्प्रवृत्तेः । न च नृणामित्यत्र चारितार्थ्यम् । नैकमुदाहरणं योगारम्भं प्रयोजयति । नृबद्यापि इत्येव ब्रूयात् । न च तिसृणामित्यत्र चारितार्थ्यम् । षड्भित्यत्र त्रेरित्यनुवृत्त्या सिद्धेरित्युक्तत्वात् । गौणेऽस्यात्रवृत्तौ प्रियचतसृणामित्यत्र चारितार्थ्येन भाष्यासङ्गतेः । ऋबद्यापि इति न्यासे तु न भाष्यतात्पर्यम् । त्रिशब्दावृत्तिपरभाष्यासङ्गतेः । नैकमुदाहरणमित्यस्यासङ्गतेश्च । गौणे नुटोऽप्रवृत्तिसाधकभाष्यान्तराभावाच्च । न चैवं,

किमः कः ॥ ननु इम इत्येव सूत्र्यताम् । त्यदादीनामिमः अः स्यादिति व्याख्यास्यते । किंशब्दश्च द्वेः प्राक् पठिष्यते । नानर्थक इति निषेधादारम्भसामर्थ्याच्चालोऽन्त्यविधिर्न भविष्यति । तत् किं कादेशेनेत्याशङ्क्याह॥ अकच्सहितस्यापीति ॥ टेरत्वे कक इति स्यात् । कतिहोरित्याद्यर्थं च किम इत्यवश्यं वक्तव्यमिति भावः । नन्वेवं गणकार्यत्वाभावादुपसर्जनत्वेऽपि स्यात् । मैवम् । त्यदादीनामित्यनुवर्त्य वचनविपरिणामेन त्यदादेः किम इति व्याख्यानादनुवृत्तिसामर्थ्याच्चेह सूत्रे द्विपर्यन्ता इति नियमस्य त्यागात् ॥ उत्सर्ग इति ॥ तेन, तदोः सः सावितिसूत्रेऽनन्त्ययोरिति किम् । हे स इति भाष्यं, भो अच्युत इति च न विरुद्ध्यत इति भावः । नास्तीत्यत्र मूलं तु प्रचुरप्रयोगादर्शनमेव । यत्त्वाहुः— इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम् * अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयादिति वचनादेवंविधस्यार्थस्याभिमुखीकरणानर्हत्वादिति । तदापाततः सन्निकृष्टादिशब्दानामिव इदमादीनामपि सम्बोध्यसमर्पकत्वे बाधकाभावात् । विप्रकृष्ट-

---

पदां दतामित्यादौ भूतपूर्वगत्याश्रयणेऽतिप्रसङ्गः । ह्रस्वत्वं नाम मात्राकालिकाच्त्वम् । तत्र सामर्थ्याद् विशेषणभूतमात्राकालिकत्वांशे एव भूतपूर्वगत्याश्रयणं, न तु विशेष्यभूताच्त्वांशेऽपीत्यदोषादिति दिक् ॥

इमिति ॥ अत्र त्यदादीनाम इत्यनुवर्तते । तदाह ॥ त्यदादीनामिति ॥ अत एव सिद्धान्ते उपसर्जने नेति भावः ॥ द्वेः प्रागिति ॥ तेन द्विपर्यन्तानां त्यदादित्वेऽपि न दोषः । किंसर्वनामबहुभ्य इत्यत्र किंग्रहणं न कार्यमिति भावः । न च इमौ इत्यत्राप्यापत्तिः । अङ्गकार्ये कृते इति निषेधात् ॥ आरम्भसामर्थ्याच्चेति ॥ त्यदादीनाम इत्यनेनैवान्त्यादेशे सिद्धे इम इत्यारम्भसामर्थ्यादित्यर्थः ॥ कक इति स्यादिति ॥ मम तु तन्मध्यपतित इति न्यायेन साकच्कस्य किंशब्दत्वात् सिद्धम् । निर्दिश्यमानस्येति परिभाषा तु नात्र प्रवर्तते । कादेशविधानसामर्थ्यात् । न च सुबन्तात्तद्धितोत्पत्त्या विभक्त्युत्पत्त्यनन्तरं परत्वात् कादेशे कृतेऽकचि कक इत्येव स्यादिति वाच्यम् । प्रातिपदिकादित्येवाधिकारात् सुपः शब्देन निमित्तत्वेनानाश्रयणादङ्गसंज्ञानिमित्तप्रत्ययानपेक्षणेन चाऽकचोऽन्तरङ्गत्वादिति भावः ॥ किम इत्यवश्यमिति ॥ कु तिहोः, कातीत्यादेशे कद्वयश्रवणापत्तिः । कतिहोरतीति न्यासे उकारस्यान्त्यादेशत्वापत्तिः । एतदर्थं, नानर्थक इत्यारम्भे गौरवम् । अङ्गवृत्तपरिभाषया केत्यत्र गुणस्य वारणे च क्लेश इति भावः । किमो द्वेरनन्तरं पाठेऽपि दोषाभावमाह ॥ अनुवृत्तीति ॥ इति च न विरुद्ध्यत इति ॥ यद्यप्ययं प्रयोगो निपातमादाय सिध्यति तथापि, विभाषा भवदिति वार्त्तिकं

स्यापि बुद्ध्या सन्निधापितस्य बहुशः सम्बोधनदर्शनाच्च । तथाच भट्टिः । हा पितः कासि हे सुभ्रु वहेवं विललाप स इति ॥

अनाप्यकः ॥ प्रत्याहार इति ॥ न तु टाप् । विभक्ताविति विशेषणादिति भावः । अनभ्यासविकार इति ॥ तेन भृञामित् । अर्तिपिपर्त्योश्चेतीत्वेऽल्लोन्त्यविधिरस्त्येव । बिभर्ति पिपर्ति । ननु स्मायादेशात् परत्वादनादेशः स्यादित्याशङ्क्याह ॥ नित्यत्वाद् ङेः स्मै इति ॥ कार्यं विधातुमिति ॥ अपूर्वं बोधयितुमित्यर्थः । ईषदर्थे क्रियायोगे इति श्लोके तु ईषदर्थादयो न विधीयन्ते, किन्त्वनूद्यन्ते । तेन एनादेशो न । एतेन, नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापयेत्यपि व्याख्यातम् । भीरुत्वस्यानुवाद्यत्वेन विवक्षितत्वात् ॥ मान्ताः ॥

सुगाणिति ॥ अनुनासिकस्य किझलोरिति दीर्घः । न च तस्मिन् कर्तव्येऽल्लोपणिलोपयोः स्थानिवद्भावः शङ्क्यः । दीर्घविधौ तन्निषेधात् । कौ विधिं प्रति निषेधाच्चेति भावः । एतेन सुगण्णीश इति प्राचो ग्रन्थं, गणयतेः किबिति व्याचक्षाणा उपेक्ष्या इति ध्वनयति । तदीयो ग्रन्थोऽपि समर्थनीय इत्याग्रहे तु इत्थं समर्थ्यताम् । सर्वलोपित्वेन किबिवाचरतीति क्विप् । क्विप्शब्दादाचारक्विबन्तात् कर्तरि क्विप् । तेन विजित्यर्थः ॥ णान्ताः ॥

उपधादीर्घ इति ॥ सर्वनामस्थाने चासम्बुद्धाविति नेन ॥ ङौ सम्बुद्धौ चेति ॥ प्राचामनुरोधेनेत्थं व्याख्यातम् । ङ्यन्तस्य सम्बुद्ध्यन्तस्य च पदस्येति षष्ठ्यन्ततया व्याख्यानं तूचितम् । एवं हि प्रत्ययलक्षणं सुलभ-

---

न विरुद्धत इति तात्पर्यम् ॥ विप्रकृष्टस्यापीति ॥ परोक्षस्य चेत्यपि बोद्धम् ॥

पिपर्त्योरिति ॥ अयं निर्देश एवास्यांशस्य ज्ञापक इत्याहुः ॥ अनादेशः स्यादिति ॥ तत्र कृते सकृद्गतिन्यायेन पुनः स्मै न स्यादिति भावः ॥ नित्यत्वादिति ॥ लक्ष्यानुरोधेन बाधकाबाधितप्रसङ्गस्यैवात्र ग्रहणान्नाऽनादेशो नित्य इति भावः ॥ अपूर्वं बोधयितुमिति ॥ अज्ञातज्ञापनमेवोभयत्रापि विधानं, न तु प्रवर्तनाविषयत्वमित्यर्थः ॥ न विधीयन्ते – नाज्ञाता बोद्ध्यन्ते ॥ अनुवाद्यत्वेनेति ॥ सखीवाक्यमिदम् । तत्र कृष्णे आरोपितभीरुत्वं भाविकामिव्यवहारसङ्गोपनायाऽनुवाद्यत्वेनैव विवक्षितमिति भावः ॥ नन्दनिदेशत इति ॥ नन्दनीयनिदेशादित्यर्थकं बोद्धम् ॥ दीर्घविधाविति ॥ न पदान्तसूत्रे सपादसप्ताऽध्यायीस्थदीर्घस्यापि ग्रहणमित्यर्थस्य, चिण्णमुलोरिति सूत्रे भाष्ये ध्वनितत्वादिति भावः ॥ उपेक्ष्या इति ॥ दीर्घप्राप्तेरिति भावः ॥ व्याख्यानं त्विति ॥ तुनाऽरुचिर्बोधिता ॥ सप्तस्य-

मिति तदर्थं निषेधसामर्थ्यानुसरणक्लेशो न कर्तव्यः । पूर्वस्मादपि विधौ स्थानिवत्त्वमाशङ्क्याह ॥ न चेति ॥ षाष्ठीमिति ॥ वाह ऊठित्यत्र ज्ञापितत्वेन तदेशस्थत्वादिति भावः ॥ इत्यसिद्धत्वादिति ॥ नियमसूत्राणां विधिरूपेण प्रवृत्तिः सामान्यशास्त्रतात्पर्यसङ्कोचकता चेति पक्षस्य, द्युद्भ्यो लुङीति सूत्रे भाष्यकृता ध्वनितत्वादिति भावः । निषेधरूपेण प्रवृत्तिरिति पक्षे तु पूर्वत्रासिद्धमित्यत्रेति बोद्धव्यम् । सुब्विधिमुदाहरति ॥ आत्वमित्यादिना ॥ स्वराविधौ तु पञ्चार्मम् । दिक्संख्ये संज्ञायामिति समासे नलोपे कृते अवर्णान्तपाठेऽपि, न लुमतेति निषेधानित्यत्वेन, वा नपुंसकानामेत्यस्य सिद्धिरिति लाघवमस्तीति ॥ औचित्यमेव दर्शयति ॥ एवं हीति ॥ सामान्यशास्त्रेति ॥ प्राप्तस्य पुनर्विधानसामर्थ्येन सामान्यशास्त्रस्य सङ्कोचस्तदितरपरतारूप इत्यर्थः ॥ संकोचश्च नलोपविधौ [illegible]सिद्धमित्यस्यानुपस्थितिरूपः । अर्थवत्सूत्रे चार्थवत्पदेन अर्थवत्समुदायाग्रहणरूपः । एवञ्चास्य विधित्वं स्पष्टम् । इदमेव च नियमस्य विध्यपेक्षया गुरुत्वम् । निषेधवादिनोऽप्यस्यावश्यकत्वम् । अन्यथा विकल्पापत्तेः । सामान्यशास्त्रसङ्कोचे चान्यत्र तदभावस्याप्यर्थतः सिद्धेरर्थसिद्धं तमादाय नियमशास्त्रेषु प्रतिषेधत्वव्यवहारोऽपि कृत्तद्धितेतिसूत्रस्थसमासग्रहणकृतानियमेन बाध्यसामान्यचिन्तया कृदंशस्यापि सङ्कोच इति, मूलकेनोपदंशमित्यादौ न कृदन्तत्वप्रयुक्तं प्रातिपदिकत्वम् । पञ्च पञ्चनखा भक्ष्या इति शास्त्रेणापि प्रापकप्रमाणरागप्राप्तभक्षणस्य तदितराविषयत्वरूपसंकोचकल्पनम् । तेनान्येषां भक्षणाभावो गम्यते, तद्भक्षणे प्रायश्चित्तं च गम्यते । पतिः समास एवेत्यादौ एवकारो घिसंज्ञाशास्त्रस्य समासाघटकपतिशब्दाविषयकत्वरूपसंकोचस्य स्फुटं द्योतनाय । पतिघटितसमास न्यसमासाविषयकत्वरूपसंकोचो मा भूदिति । अन्ययोगव्यवच्छेद एवकारार्थइतितुसामान्यप्रमाणसंकोचफलितमर्थमादाय नेयम् द्युद्भ्यो लुङीति॥द्युद्भ्यो लुङीतिसूत्रमुपक्रम्यानुपराभ्यामिति सूत्र इत्यर्थः । पञ्च पञ्चनखा भक्ष्या इत्यत्र भक्ष्यनियमेऽभक्ष्यप्रतिषेधो गम्यते इति ग्रन्थेन पस्पशायां च भाष्ये स्पष्टमेतत् ॥ भक्ष्यनियमे– प्राप्तभक्षस्य पुनर्विधाने इत्यर्थः ॥ निषेधरूपेणेति ॥ सुबादिपदस्य स्वव्यतिरिक्तविधौ लक्षणया भवतीत्यस्य च, न भवतीत्यर्थे लक्षणयेति भावः । निषेधश्च नलोपविधावनुवर्तमानं वैत्रासिद्धत्वस्य । अत एवात्र स्वार्थहानिप्राप्तबाधपरार्थकल्पनारूपदोषत्रयं मीमांसकैरुच्यते, परिसंख्यापदेन चायं व्यवह्रियते इति बोद्धव्यम् ॥ इति पक्षे त्विति ॥ अनेनारुचिर्बोधिता । तद्बीजं तु लक्षणायां गौरवं, फलाभावश्च, तदभावे लक्षणायाअनौचित्यं वेति ॥ इति समासे इति ॥ इत्यनुवर्तमाने तद्धितार्थेति समासे इत्यर्थः । स्वराविधौ व्यञ्जनमविद्यमानवदिति तु नात्र । तस्य स्वरोद्देश्यकविधावेव प्रवृत्तेः । नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिष्विति सूत्रे देवताद्वन्द्वे उत्त[illegible]निषेधके पृथिव्यादिपर्युदासरूपधर्मिग्राहकस्य तथैव सत्त्वात् । अत एवाच[illegible]

न्तं पूर्वपदं जातमिति, अर्मे चावर्णे द्वयच्त्र्यज् इति पूर्वपदाद्युदात्तत्वं प्राप्तं नलोपस्यासिद्धत्वान्न भवति । सञ्ज्ञाविधौ, पञ्चेत्यत्र नलोपे कृतेऽपीत्यादिना स्त्रीप्रत्ययेषु वक्ष्यति । कृति तुग्विधौ तु, वृत्रहभ्याम् । हस्वस्य पितीति तुग् न । कृति किम् । वृत्रहच्छत्रः । छे चेति तुक् स्यादेव ॥ प्रतिदिवेति ॥ कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिव इति कनिन् । हलि चेति दीर्घः । यत्तूपधायां चेत्युपन्यस्तम् । तन्न । दिवेर्वकारस्यानुपधात्वात् ॥

इन्हन् ॥ उपधाया इति ॥ उपधादीर्घस्यैवायं नियमः । तेन वृत्रहायत इत्यत्र, अकृत्सार्वधातुकयोरिति दीर्घो भवत्येव । तथा वृत्रहणी इत्यत्रानुनासिकस्य क्विझलोरिति यो दीर्घः सोऽपि नियमेन व्यावर्त्यते।उपधादीर्घमात्रापेक्षया नियमविज्ञानादिति भावः ॥ हन्तेरत्पूर्वस्येति सूत्रं योगविभागेन व्याचष्टे—

हन्तेः ॥ प्रसङ्गादस्योदाहरणमाह ॥ प्रहण्यादिति ॥ प्रकृतोपयुक्तमंशमा-

अत्पूर्वस्य ॥ एकाजुत्तरेति ॥ न चाल्लोपे कृते एकाच्त्वं नास्तीति वाच्यम् । पूर्वस्मादपि विधौ स्थानिवत्त्वात् । न च पूर्वत्रासिद्धे न स्थानिवदिति वाच्यम् । तस्य दोषः संयोगादिलोपलत्वणत्वेष्वित्यूक्तेः । यत्तु अट्कुप्वाङ्भिति सूत्रे वृत्रघ्न इति भाष्यमुपादाय कैयटेन व्याख्यातं प्रातिपदिकान्तेति णत्वप्रसङ्ग इति । तत् पञ्चमीसमासो मास्त्वित्याशयेन । तस्य दोष इत्यत्र णत्वग्रहणं मास्त्वित्याशयेन वा बोद्धव्यम् । णत्वग्रहणप्रत्याख्यानं

यकि, शतुरनुमो नद्यजादी इत्यादौ अच इति, अजादी इत्यादि च चरितार्थम् । अत एव राजवतीत्यादौ नलोपस्यासिद्धत्वादन्वतीशब्दत्वादन्तोऽवत्या इति स्वरो न । उदश्वित्वानित्यत्र ह्स्वनुड्भ्यामिति मतुबुदात्तत्वं च नेत्याकरः । इदं समासस्येति सूत्रे भाष्ये स्पष्टम । इदमेवाभिसंधाय, यतोऽनाव इत्येतन्निषेधमूलकं हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवदिति परिभाषान्तरं भाष्ये तत्रैव स्पष्टमुक्तम् ॥ अनुपधात्वादिति ॥ धातोरुपधाभूतरेफवकारयोर्हल्परयोरिति तदर्थादिति भावः ॥ प्रतिदिवन्शब्दादाचारक्विप्यपि, अनुनासिकस्येति दीर्घे इदं रूपं दुर्लभम । वस्तुतो हलन्तेभ्य आचारक्विपोऽनभिधानाल्लोकम् ॥

तथेति ॥ यथोपधाग्रहणादकृदिति दीर्घव्यावृत्तिस्तथा स्थानभस्थानग्रहणाऽसंबद्धोपधापदानुवृत्तेरस्य व्यावृत्तिरित्यर्थः ॥

पञ्चमीसमासो मास्त्विति ॥ सार्वधात्रिको मास्तु । अनित्यत्वादित्यर्थः । तदनित्यत्वेन स्थानिवत्त्वाभावे एकाच्त्वाभावादेवैकाजुत्तरेति णत्वव्यावृत्तिः सिद्धेति भावः ॥ णत्वग्रहणमिति ॥ माषवपनीत्येतद्धि तत्प्रयोजनम् । तच्च बहिरङ्ग-

तु भाष्ये ध्वनितं कौस्तुभे प्रपञ्चितम् । वस्तुतस्तु, कुमति चेति नित्यं णत्वमिह न्याय्यम् । सर्वथाऽपि वैकल्पिकं नित्यं वा प्राप्तं णत्वं नियमेन निवर्त्यत इति सिद्धम् । भाष्ये तु कुव्यवाये हादेशेषु प्रतिषेधो वक्तव्यः । किं प्रयोजनम् । वृत्रघ्नः । स्रुघ्नः । प्राघानि । हन्तेरत्पूर्वस्येति अत्पूर्वग्रहणं न कर्तव्यं भवतीत्युक्तम् । एतच्च वार्तिकाशयवर्णनमात्रं, न तु वस्तुस्थितिः । वार्तिकेन सूत्रावयवप्रत्याख्यानापेक्षया योगविभागमाश्रित्य वार्तिकार्थोपसंग्रहस्यैव न्याय्यत्वमिति दिक् ॥

माधवेनोक्तमिति ॥ इत्थं हि तदीयो ग्रन्थः । भसञ्ज्ञायामल्लोपे उत्तरपदमनक्कं स्यात् । स्थानिवद्भावश्चाल्विधित्वान्नेति एकाजुत्तरपदत्वाभावात् प्रातिपदिकान्तनुम्विभक्तिषु चेति विकल्पो भवति । वृत्रघ्नो, वृत्रघ्ण इति ॥ तद्ग्राह्येति ॥ किञ्चाल्विध्यर्थमेव, अचः परस्मिन्नित्यस्यारम्भात् तस्याप्रवृत्तौ युक्त्यन्तरस्यैव वाच्यत्वात् । विकल्प इत्यसङ्गतम् ॥ कुमति चेति सूत्रस्य दुर्वारत्वादित्यऽवधेयम् ॥

मघवा बहुलम् ॥ अर्वणस्रसावनञ इति सूत्रात् तृ इत्यनुवर्तते । तदपेक्षया च मघवेति षष्ठ्यर्थे प्रथमा । तदाह ॥ मघवन्शब्दस्येति ॥ अधातोरिति ॥ अधातुभूतपूर्वस्यापीत्यर्थः । अञ्चतिग्रहणं हि नियमार्थम् । धातोश्चेद्भवति

या, यस्येति चेत्यल्लोपासिद्धत्वेनापि सिद्धमिति तन्मास्त्विति भावः । इदं त्रिपाद्यां तत्परिभाषाप्रवृत्त्यभिमानेन ॥ भाष्ये ध्वनितमिति ॥ अन्यथासिद्धमाषपवनीत्येतस्य तदुदाहरणत्वोक्त्येत्यभिमानः ॥ न्याय्यमिति ॥ तस्य, प्रातिपदिकान्तेत्यपवादत्वादिति भावः । न च सन्निपातपरिभाषया तदप्राप्तिः । सर्वणत्वेषु कवर्गव्यवायाश्रयणेन तद्विषये तस्या अनित्यत्वावश्यकत्वात् ॥ हादेशेष्विति ॥ हादेशकवर्गव्यवाये इत्यर्थः । आर्षत्वाद्वार्तिके समासः । वार्तिके हादेशेत्युक्तेर्द्रुघण इत्यादौ पूर्वपदादिति णत्वं सिद्ध्यति ॥ तत्र हि हन्तेरप्प्रत्ययो घनादेशश्च । अत एवागारैकदेश इति सूत्रे प्रघणप्रघाणयोः कृतणत्वयोरुच्चारणम् । तत्रापि हन्तेर्घनघानादेशविधानात् ॥ न्याय्यत्वादिति ॥ न चवार्तिकरीत्या बहुवृत्रहाणीति णत्वमायाति, सूत्रारम्भे तु नेति वार्तिकारम्भस्यैव ज्यायस्त्वात् कथं न्याय्यत्वम् । बहिरङ्गत्वेन दीर्घस्यासिद्धत्वे तु प्राघानीत्यत्र दोषः । तथा सूत्रारम्भे प्रघनाघन इत्यत्र णत्वं प्राप्नोति, वार्त्तिकरीत्या तु नेति वाच्यम् । अत्पूर्वस्येत्यनेन हस्थानिककवर्गाभावबद्धन्तेरेवोपलक्षणेनादोषात् । कृतणत्वयोरगारैकदेशे इति सूत्रे उच्चारणमत्र्याऽत्पूर्वग्रहणस्योक्तार्थोपलक्षणत्वे मानम् । णत्वनिपातनकल्पनापेक्षयोक्तार्थग्राहकत्वौचित्यादिति भावः । तदेतद् ध्वनयतोक्तं- वार्तिकार्थोपसंग्रहस्येति ॥ भूतपूर्वपर्यन्तमधातुपदस्य लक्षणायां बीजमाह ॥ अञ्चतिग्रहणं

श्नश्नतेरेवेति । एवञ्च गोमानित्यादौ सत्यपि धातुत्वेऽपि विध्यर्थमधातुग्रहणम् । एतच्च मूल एव स्फुटीभविष्यति।ननु कुर्वन् इत्यादाविव संयोगान्तलोपस्यासिद्धत्वेन नान्तत्वाभावाद्दीर्घत्वं न स्यादित्याशङ्क्याह ॥ इहेति ॥ बहुलग्रहणादिति । क्वचिदन्यदेवेत्यर्थकादित्यर्थः । निपातनादिति ॥ महेर्हकारस्य घकारो वुगागमः कनिप्रत्ययश्चेत्यस्य नित्यस्य निपातनादित्यर्थः । प्रत्याख्यातमिति । तथाच, छन्दसीवनिपावित्यत्र कैयटेनोक्तम् । मघवा बहुलमित्येतन्न कर्तव्यं, श्वनुक्षन्निति निपातनान्मघब्दान्मतुपा च भाषायामपि शब्दद्वयस्य सिद्धत्वादिति । यत्त्वत्र वार्तिककृतोक्तम् — अर्वणस्तृ मघोनश्च न शिष्यं छान्दसं हि तत् * मतुब्वन्योर्विधानाच्च छन्दस्युभयदर्शनादिति ॥ यच्च तद्व्याख्यावसरे कैयटेन भाषायामसाधुतेत्युक्तम् । तद्वनिबन्तमद्र्यग्घोदात्तमघवन्शब्दविषयकम् । छन्दस्येव वनिब्विधानात् । अतो न कैयटस्य पूर्वापरविरोध इति ध्वनयन्नाह ॥

हीति ॥ अश्नतेरिति ॥ नलोपिनोऽश्नतेरित्यर्थः । नलोपेन निर्देशात् । सामान्याऽपेक्षश्च नियमस्तेन, पर्णध्वद्, गोमत्यतेः क्विपि गोमानित्यादावुगितश्चेति ङीबपि नेति दिक् । स्पष्टं चेदं भाष्ये, उगितश्चेति सूत्रे ॥ कैयटेनेति ॥ अयं च कैयटः, केशाद्व इति सूत्रस्थः ॥ अर्वणस्तृ इत्यादि ॥ अर्वणो मघोनश्च तृ न शिष्यं, यतस्तच्छान्दसम् । सामान्यतो बाधितानामपि केषाञ्चिद् धृधात्वादिवन्नियतविषयत्वादित्यर्थः । एवञ्च छन्दसि दृष्टानुविधिरिति न तदर्थः शास्त्रारम्भ इति तात्पर्यम् । एवं हि छान्दसलक्ष्यसाधकसर्वसूत्रप्रत्याख्यानं स्यादतः प्रकारान्तरेणाऽपि सिद्धिमाह ॥ मतुब्वन्योरिति ॥ ऋधातोर्विज्ञान्मघशब्दाच्च मतुब्वनिभ्यां रूपद्वयसिद्धिरितिभावः । ननु सूत्रारम्भे नित्यस्तृ आदेशोऽर्वणः, प्रत्याख्याने तु पक्षे तदभावोऽपीत्यत आह ॥ छन्दस्युभयेति ॥ आदेशतदभावेत्यर्थः । तदुदाहरणमिमान्यर्वणः पदानीति । एतत्प्रत्याख्याने दीर्घो धकारोदात्तत्वं च लभ्यते । एतेन अस्य छान्दसत्वाच्छन्दसि आदेशपक्षे मघवान्नित्येव रूपम् । तच्च मत्वन्तस्य छान्दसत्वाद्दीर्घाभावेन साध्यमिति प्रत्याख्यानाशयः । लोके तु मत्वन्ते दीर्घो भवत्येवेति परास्तम् । वार्तिकाक्षरस्वारस्येन तथा प्रतीतेर्मघवानृजीषीत्यादौ वेदेऽपि दीर्घस्य पठ्यमानत्वाच्च । तदेतत्कैयटेनोक्तं, भाषायामसाधुतेति ॥ केशाद्व इति सूत्रस्थ उक्तकैयटस्तु एतत्सूत्रस्थवार्तिकविरोधात् स्वग्रन्थविरोधाच्च हेय एवेति ध्येयम् । यत्तु, छान्दसा अपि क्वचिद्भाषायामित्याश्रित्य भाषायां प्रयोग इति । तन्न । तज्ज्ञापकस्य, वयस्यासु मूर्ध्नो मतुबिति सूत्रप्रयोगस्य छन्दोवत् सूत्राणि भवन्तीतिभाष्यकारेष्टथाऽन्यथासिद्धत्वादिति तदाशयः ॥ तदनिबन्तेति ॥ इदं चिन्त्यम् । न शिष्यं छान्दसं हि तदिति सामान्यप्रवृत्तवार्तिकस्य साङ्केचे मानाभावात् । कविप्रयोगाणां बहुशः प्रामादिकानां दर्शनेन तेषा-

छन्दसीत्यादि ॥ अन्तोदात्तं त्विति ॥ श्वन्नुक्षन्नित्यत्र कानिनन्ता एते इत्युज्ज्वलदत्तादिग्रन्थमहिम्ना आद्युदात्तत्वं लभ्यते, तथापि उक्षा समुद्रो अरुणः सुपर्णः, पूषा त्वेतो नयतु, अग्निर्मूर्धा, निर्मज्वानं न पर्वणो जभार, त्वमर्यमा भवसि यत्, इत्यादौ तत्सूत्रोपात्तानामुक्षन्नादीनामन्तोदात्तत्वस्य निर्विवादतया कनिप्रत्यय एवोचित इति भावः । मघवा बहुलमिति सूत्रे मघोन इति प्रतीकमुपादाय मघशब्दस्याकारस्य, यस्येति लोपमाशङ्क्य, नैतदस्ति । अन्यदेव हीदमव्युत्पन्नं प्रातिपदिकम् । तथा हि भाषायामप्यस्य प्रयोगो दृश्यते इति वदन्न्यासकारोऽपि मघवन्शब्दस्याऽन्तोदात्तत्वे भाषायामपि साधुत्वे चानुकूलः । एवं स्थिते मतुपमाश्रित्य त्रादेशं प्रत्याचक्षाणौ भाष्यवार्तिककृतौ मघवानित्यत्र त्रादेशपक्षेऽपि दीर्घं स्वीकुरुत एव । फलभेदे प्रत्याख्यानासम्भवात् । अतो बहुलग्रहणान्नासिद्धत्वमिति यदुक्तं तद् भाष्यादिसम्मतमेव । यच्चाहुः । मतुप्पक्षेऽपि छान्दसत्वान्न दीर्घ इत्येव भाष्यस्याशय इति । तन्न । मतुबन्तस्य छान्दसत्वे मानाभावात् । उदाहृतभट्टिकैयटविरोधाच्चेति दिक् ॥ एतेन, श्वन्नुक्षन्नित्यत्र निपातितस्य मघवन्नित्यस्य त्रादेशे दीर्घाभावाद् मघवन्निति क्षीरस्वामिग्रन्थः प्रत्युक्तः । तथाच कातन्त्रसूत्रं,सौ मघवान् मघवा चेति । विचारचिन्तामणावपि मघवानेव मघवेत्युक्तम् । काशिकायामपि दीर्घ एव दृश्यत इत्यलं बहुना ॥

अर्वणस्तृ ॥ ऋधातोर्विचि गुणे च अरिति रूपम् । तस्मान्मतुपि अर्वन्तावित्यादि सेत्स्यति । छन्दसीवनिपाविति वनिपि वेदे अर्वेति । लोके तु ऋधातोरेव वनिपि सेत्स्यति । रूढिशब्दश्चायम् । वाजिवाहार्वगन्धर्वहयसैन्धवसप्तय इत्यमरकोशात् । अतोऽर्थोऽपि न भिद्यते । तथापि नान्तताऽन्तयोः सर्वत्र प्रयोगे प्राप्ते व्यवस्थार्थमिदं सूत्रं, तृज्वत्क्रोष्टुरिति त्रिसूत्रीवत् । यत्तु हरदत्तेनोक्तम् । अर्वन्मघवन्शब्दयोर्भाषायामसाधुत्वमेव।अर्वणस्तृ मघोनश्चेत्यादिभाष्यादिति । तन्न । भाष्यस्य विशेषविधितायाः प्रागेवोक्तत्वात् । तथाच श्रीहर्षः । वाहैरलुप्यत सहस्रदृगर्वगर्वं इति प्रायुङ्क्त । ननु गुणा अभेदका इति पक्षे सूत्रेऽननुनासिकोच्चारणेऽपि

मार्षवचनसङ्कोचे न मानत्वमिति दिक् ॥ उचित इति भाव इति ॥ तथाच, वनो र च इति सूत्रे भाष्ये मघोनीत्यत्र प्राप्नोति, मघवन्शब्दोऽव्युत्पन्नं प्रातिपदिकमिति ॥ प्रायुङ्क्तेति ॥ अत्र यद्वक्तव्यं तदुक्तम् ॥ इति पक्षे इति॥अस्थिदधीत्यत्रोदात्त

आन्तरतम्यादनासिकः स्यादित्याश ॥ अआदिति ॥ यस्त्वाहुः । इहानुनासिको न । अनण्त्वेन सवर्णग्रहणाभावात् । न च तपरस्तत्काल-स्येति अनणि विध्यर्थमिति वाच्यम् । भाव्यमानः सवर्णान्न गृह्णातीति निषेधात् । गुणानामभेदकत्वेऽपि शुद्धैकव्यक्तेः सूत्रे निर्देशान्नातिप्रसङ्ग इति । अत्रेदं वक्तव्यम् । अनणि विध्यर्थमिति शङ्कायां, भाव्यमान इत्याद्युत्तर-मसङ्गतम् । तस्याणविषयत्वात् । यदाहुः । भाव्यमानोऽणित्यादि । अन्यथा, चोः कुरित्यादावपि निषेधापत्तेः । तत्रोदित्करणसामर्थ्यान्न निषेध इति चेत् । किमनेन बकबन्धनप्रयासेन । तपरस्तत्कालस्येति सूत्रेऽप्रत्ययग्रहणस्य भाष्यकृताऽननुवर्तितत्वाच्च । किञ्च शुद्धैकव्यक्तेरित्यसङ्गतम् । अभेदकत्वे दोषस्य दुरुद्धरत्वात् । एका व्यक्तिर्गृह्यत इत्युक्त्या हि व्यक्त्यन्तरं न नि-र्दिष्टमित्यर्थः फलितः । स च गुणानां भेदकत्वे सत्येव सङ्गच्छते, नान्यथे-त्यास्तां तावत् । एतेन भाव्यमानोऽण् सवर्णान्न गृह्णातीति निषेधादाकारो नानुनासिक इति प्रसादग्रन्थोऽपि प्रत्युक्तः । दीर्घस्यानण्त्वेन मूलशैथिल्यात् ॥

थो न्थः ॥ स्थान्यादेशौ द्वावप्यनच्कौ । थेर्न्थ इत्येव सिद्धे इतोऽद्वचन-म् ऋभुक्षिन्नर्थम् ॥ न्थादेश इति ॥ केचित्तु अन्थादेशमाहुः । तत्राकार-प्रश्लेषो व्यर्थः । यत्तु न्यासकृता प्राचा चोक्तमनेकाल्त्वेऽपि थकारमात्र-स्यायमादेशो, निर्दिश्यमानस्यादेशा भवन्तीति न्यायादिति । तन्न । तद्विशिष्ट-स्याप्रसङ्गेनोक्तपरिभाषाया इह विषयाभावात् । प्रसङ्गादाह ॥ स्त्रियामिति ॥ सुपथीति ॥ इनः स्त्रियामिति तु कप् न कृतः । समासान्तविधेरनित्यत्वात् । युवोरनाकाविति सूत्रे, सुपथीति भाष्याच्च । न पूजनादिति निषेधस्य तु नायं विषयः । षचः प्राचीनेष्वेव स इति वक्ष्यमाणत्वात् । पथिमथीत्यात्वं,

---

पाठेन सिद्धे उदात्तग्रहणेन शास्त्रे विना यत्नं स्वरभेदो ऋक्पूरित्यादाविवक्षया भेदकत्वज्ञापनादिति भावः । उञ ऊँ इत्यत्र नासिकाव्यापारेण क्लेशाधिक्येन उच्चारणादानुनासिक्यं विवक्षितमिति सर्वेषां समानम् । भेदकत्वेऽपि तपर-सूत्रस्यानणि विध्यर्थत्वाद् दोषः । तत्राप्रत्ययग्रहणानुवृत्तौ मानाभावादित्यपि बोध्यम् ॥ अननुवर्तितत्वाच्चेति ॥ एवञ्च तत्र सूत्रे तत्सम्बन्धे मानाभावः ॥ एवञ्च भेदकत्वेऽपि तपरसूत्रस्यानणि विध्यर्थत्वादोष इति भावः ॥ नान्यथेति ॥ एवञ्च गुणानामभेदकत्वेऽपीत्युपक्रम्य तादृश्युक्तिरसङ्गतेति भावः ॥ मूलशैथिल्या-दिति ॥ सवर्णग्रहणाप्राप्तेरिति भावः ॥

॥ थ इति स्थानिश्रवणात्तदन्तविध्यभावाच्चेति भावः । अ-यम् इनः स्त्रियामित्येषः । एवञ्च ऋक्पूरित्येष तेन निषेधेनापि वारयितुं शक्य

थो न्थश्च लिङ्गविशिष्टपरिभाषया प्राप्तं, विभक्तौ लिङ्गविशिष्टाग्रहणान्न भवति ॥ शाविति ॥ यत्तु प्राचा, इतोऽत्सर्वनामस्थाने, थो न्थ इति सूत्रद्वये सुटीति व्याख्यातम् । तदसत् । निर्बीजलक्षणापत्तेः । क्लीबे औङः श्यां, सुपथी इत्यत्रातिव्याप्तेः । सुपन्थानि पश्येति शसि रूपस्यासिद्धिप्रसङ्गाच्चेति भावः । अत्रेदमवधेयम् । पन्थानमात्मन इच्छति पथीयति । ततः क्विप् । अल्लोपः । यलोपः । एकदेशविकृतस्यानन्यत्वात्, पथिमथीत्यात्वम् । थो न्थः । पन्थाः । इतोऽत्सर्वनामस्थान इत्यत्वं न भवति । इत इति तपरकरणात् । एरनेकाच इति यणं बाधित्वा परत्वाद् नित्यत्वाच्च थो न्थः । संयोगपूर्वकत्वान्न यण् । पन्थियौ । पन्थियः । पन्थियम् । पन्थियौ । भस्य टेर्लोपः । पथः । पथा । पथीभ्याम् । पथीभिः, इत्यादि । एतेन, इतोऽत्सर्वनामस्थाने इत्यत्र स्थानिन्यादेशे च तपरकरणं मुखसुखार्थमिति हरदत्तग्रन्थः प्रत्युक्तः । यत्तु न्यासकारस्तदनुसारिणोऽन्ये च सुखीः सुतीरिति वत्, पथीः पथ्यौ पथ्य इत्याद्युदाजह्रुस्तच्चिन्त्यम् । सावात्वस्य दुर्वारत्वा-

---

इति भावः ॥ थो न्थश्चेति ॥ थो न्थ इति सूत्रमित्यर्थः । चाट्टिलोपः ॥ प्राप्तमिति ॥ तदन्तग्रहणादिति भावः ॥ भवतीति ॥ नच टिलोपो न विभक्तिनिमित्तको ऽन्यत्रापि तत्प्रवृत्तेरिति वाच्यम् । प्रकृतोदाहरणे विभक्तिनिमित्तत्वमात्रेण तत्प्रवृत्तेः । अत एव– युवोरनाकाविति सूत्रभाष्ये, श्वयुवेत्यादेः परिभाषाफलत्वेनोपन्यासः सङ्गच्छते । परत्वादित्यभ्युच्चयः । न चाभिव्यक्तपदार्था इति न्यायेन कथमत्रात्वादीनां प्रवृत्तिः । तस्य न्यायस्य पदकार्यविषयत्वेन तपरकरणादनित्यत्वेन चेहाप्रवृत्तेः । न च न केवलः पथिशब्दः स्त्रियामस्तीति युवोरनाकाविति सूत्रस्थभाष्यप्रमाण्यादेभ्यः क्यजन्तेभ्यः क्विपोऽनभिधानमिति वाच्यम् । स्त्रीप्रत्ययाप्रवृत्त्या तदङ्गीकारेऽप्यक्षतेः । विभक्तौ लिङ्गविशिष्टाग्रहणमित्येतत्प्रयोजनकथनावसरे हि भाष्ये तदुक्तम् ॥ न यणिति ॥ ननु तदभावेऽपीयङ् दुर्लभः । सुब्विधावन्तर्वर्तिविभक्त्याश्रयनलोपस्यासिद्धत्वेनाऽबर्णान्ताङ्गाभावादिति वाच्यम् । सुप्त्वतद्व्याप्यधर्मनिमित्तकसुब्विधेरेव ग्रहणात् । अत एव दण्डिष्वित्यादौ षत्वे नलोपऽस्यासिद्धत्वं न । नच न्थादेशेऽङ्गवृत्तपरिभाषया नेयङ् । तस्या अनित्यत्वात् । नचेयङि कृतेऽत्वं दुर्वारम् । संनिपातपरिभाषया स्वातिरिक्ततद्विघातकस्य बाधेनादोषादिति भावः । न च प्रकृतिप्रत्ययविशेषापेक्षन्याऽपेक्षयान्तरङ्गत्वाद्यणेव स्यादिति वाच्यम् । प्रातिपदिकस्याप्यत्र प्रकृतित्वेन हलादेरपि तन्निमित्तत्वेन यण्प्रकृतितन्निमित्तव्याप्यत्वाभावात् । तदोः सः सावि ति सूत्रेऽनन्ययोरित्युक्त्या तत्प्रत्याख्यानाय भाष्यकृताऽदस इति योगविभागकरणेन च तादृशान्तरङ्गत्वस्य सर्वत्रानाश्रयणाच्चेति बोधनात् ॥ सावात्वस्येति ॥

त् । यत्तु पथिमथ्यृभुक्षामिति नान्तप्रकृत्यनुकरणमेतदिति । तदप्यनर्थकम् । एकदेशविकृतस्यानन्यत्वात् । पन्था इत्यत्रापि नित्यत्वाद् विशेषविहितत्वाच्च । पूर्वमात्त्वे कृत्वेऽनान्तत्वेन न्थादेशाप्रसङ्गश्च । यदप्याहुः । अल्लोपस्य स्थानिवत्त्वान्नात्त्वादि । क्वौ लुप्तं न स्थानिवदिति नेहाश्रीयते इति । तदपि चिन्त्यम् । तथा सति यण्प्रसङ्गात् । ख्यत्यादिति सूत्रे सुखीः सुतीरित्यादिनिर्वाहाय, क्वौ लुप्तं न स्थानिवदित्यस्य कैयटादिभिराश्रितत्वात् । इतोऽदित्यत्र तपरकरणं कुर्वतः सूत्रकृतोऽपि इहानुकूलत्वाच्च । तस्मादात्त्वं न्थादेशश्च न्याय्य एवेति स्थितम् । एतेन, मथीः मथ्यौ मथ्यः, इत्याद्यपि प्रत्युक्तम् । मन्थाः । मन्थियौ । मन्थिय इत्यादेरेव न्याय्यत्वात् । यदपि, ऋभुक्षीः ऋभुक्ष्यौ ऋभुक्ष्य इत्यादि । तत्र सावात्वं दुर्वारमित्युक्तमेव । औङादिषु यण् तु दुर्लभः । संयोगपूर्वकत्वात् । तस्माद्, ऋभुक्षाः, ऋभुक्षियौ इत्यादि बोद्धव्यम् ॥

ष्णान्ता षट् ॥ स्त्रीलिङ्गनिर्देशः संख्यां विशेषयितुम् । तत्सामर्थ्याच्च पूर्वत्र संज्ञापरमपि संख्याग्रहणमिह संज्ञिपरं संपद्यत इत्याशयेनाह ॥ संख्येति ॥ यत्तु प्राचा उपदेशकाले षान्ता नान्ता चेत्युक्तम् । तत् पञ्चेत्यत्र नलोपे कृतेऽपीत्यादिस्वग्रन्थविरुद्धम् । संप्रत्यनान्तत्वेऽपि उपदेशे नान्तत्वमासीदिति किमसिद्धत्वेन । नन्वयं पूर्वापरविरोधः काशिकायामपि

न्थादेशस्याप्युपलक्षणम् । यदि वैयात्याद्यात्रातिदेश इति वदेत्तत्राप्याह ॥ पन्था इति ॥ न्थादेशेति ॥ अत्त्वस्याप्युपलक्षणम् ॥ नात्त्वादीति ॥ नच, न पदान्तेति निषेधः । अनान्ततया, नः क्ये इति नियमेन संज्ञाविधौ नलोपासिद्धत्वेन चेकारान्ते पदत्वाभावात् । तेन पदान्तत्वादिकोऽसवर्ण इति ह्रस्वेऽत्त्वं दुर्वारमित्यपास्तमिति भावः ॥ आश्रितत्वादिति ॥ तत्प्रकृतिकसख्युरिति रूपे ङस्निमित्तो यण् । क्यजकारनिमित्तकत्वे हि क्विनिमित्तकलोपापत्तिः । ङस्निमित्तकस्य तु बहिरङ्गत्वेनासिद्धत्वान्न लोपः । स्थानिवत्त्वे हि व्यवधानात्तन्निमित्तकोऽपि न स्यात् ॥ अनुकूलत्वाच्चेति ॥ आत्त्वादिप्रवृत्तिप्रतिबन्धकन्यायानामनित्यत्वेनैतद्विषयेऽप्रवृत्तिबोधकतयेति भावः ॥

विशेषयितुमिति ॥ विशेष्यसाकाङ्क्षत्वात्तस्येति भावः ॥ तत्सामर्थ्याच्चेति ॥ षान्तेत्यनेन विशेषणसामर्थ्यादित्यर्थः । संख्याशब्दे तत्त्वासम्भवादिति भावः ॥ इहेति ॥ अनुवृत्तमिति शेषः ॥ संज्ञिपरमिति ॥ यद्यपि संज्ञिषु बहुगणवतुडतिष्वपि तदसम्भवस्तथापि लोके संख्याप्रकारकबोधजनकाः पञ्चादय इह तत्त्वेन विवक्षिता इति बोद्धव्यम् ॥ किमसिद्धत्वेनेति ॥ नलोपे कृतेऽपीत्यादिग्रन्थप्रतिपादितेने-

तुल्य इतिचेत्, किं ततः । बाधे दृढेऽन्यसाम्यात् किं, दृढेऽन्यदपि बाध्यतामिति न्यायात् । यत्तु व्याचख्युः । उपदेशकाले यौ षकारनकारौ तदन्तेत्यर्थः । देवदत्तस्य गुरुकुलमितिवत् समुदायेन सम्बन्धान्नाऽसमर्थसमास इति । तदापाततः । अवयवेन सम्बन्धं व्याख्याय समुदायेन सम्बन्धादित्युक्तेः परस्परव्याघातात् । किञ्च यत्रोपसर्जनपदार्थः ससम्बन्धिकस्तत्र द्वयी विधा । सापेक्षोऽपि समस्यत इत्येका । प्रधानपदार्थस्यैव कुलादेर्वादिनेव देवदत्तादिनाऽपि सम्बन्धः । स च गुरुणा सह उत्पत्तिगर्भो, देवदत्तेन सह तु तदीयगुरूत्पाद्यत्वरूपो गुरुघटित इति द्वितीया विधा । उक्तञ्च हरिणा—

सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते ।
वाक्यवत् सा व्यपेक्षा हि वृत्तावपि न हीयते, इति ॥
समुदायेन सम्बन्धो येषां गुरुकुलादिना ।
संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह, इति च ॥

अत्र उपसर्जनं न ससम्बन्धिकं, येन द्वयी विधाऽवकाशमासादयेत् । नन्विहाप्यन्तशब्दः ससम्बन्धिकार्थोऽस्तीतिचेत् । उपदेशकाले यौ षकारनकाराविति वदन्नन्तं यस्य त्यक्तत्वात् । अन्यथा हि उपदेशकालेऽन्तौ यस्येति वक्तव्यं स्यात् । वस्तुतस्तु तदपि न । अन्तशब्दो हि अवयविनि साकाङ्क्षो, न तु यत्र कुत्रचित् । अन्यथा ऋद्धस्य राजपुरुष इति स्यात् । राज्ञाऽपि ईशितुरीशितव्यं प्रति साकाङ्क्षत्वात् । राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोरिति कोशात् । यदि तु ऋद्धं प्रत्यनाकाङ्क्षतेति ब्रूषे तर्हि समं प्रकृतेऽपि ॥ सन्निपातेति ॥ तथा चोपदेशकाले इति व्याख्यानं निष्फलमपीति भावः । यत्त्वाहुः । परिभाषाया अनित्यत्वाल्लुक् स्यादिति । तत् साहस-

---

ति भावः ॥ बाधे – दूषणे ॥ अवयवेनेति ॥ ष्णान्तपदावयवेन षकारनकारेणेत्यर्थः ॥ समुदायेन – ष्णान्तपदेन ॥ ससम्बन्धिकः – नित्यं संबन्ध्यन्तरसापेक्षो, यथा गुर्वादिः ॥ सापेक्षोऽपीति ॥ सापेक्षस्यासमासे हि ततो बोधाभावो बीजम् । न च नित्यसापेक्षे तद्बीजमस्तीति भावः ॥ तदेवाह ॥ वाक्यवदिति ॥ व्यपेक्षा – आकाङ्क्षा ॥ अवयवान् – गुर्वादीन् ॥ संस्पृश्य युज्यन्ते इत्यस्य, तद्द्वारकसम्बन्धेन युज्यन्त इत्यर्थः ॥ उपसर्जनम्, ष्णपदम् ॥ न ससम्बन्धिकम् – न सम्बन्ध्यंशे नित्यसाकाङ्क्षम् ॥ साकाङ्क्षो – नित्यसाका[illegible]ः ॥ ईशितव्यम् – प्रजाभूम्यादि ॥ समं प्रकृतेऽपीति ॥ अन्तशब्दस्य उपदेशकालं प्रति न नित्यसाका[illegible]

यात्रम् । इष्टस्थलेऽप्यप्रवृत्तौ परिभाषाया निष्फलत्वापत्तेः । किञ्चोपदेश इति निर्मूलमपि । यत्तु वदन्ति । अन्तग्रहणसामर्थ्यादौपदेशिकत्वं लभ्यते इति । तदपि न । संख्येत्यस्याकर्षणेन संज्ञिपरत्वसंपादनेन च सामर्थ्योपक्षयात् ॥

नोपधायाः ॥ नेति लुप्तषष्ठीकमङ्गस्य विशेषणम् ॥ गौणत्वे त्विति ॥ बहुवचननिर्देशस्यार्थमाधान्यार्थत्वादिति भावः ॥ प्रियपञ्चामिति । नकारद्वयमध्ये चकारः ।

अष्टन आ ॥ हलादाविति ॥ रायो हलीत्युत्तरसूत्राद्धलीत्यनुवर्त्तते । तच्च विभक्तेर्विशेषणमिति भावः । तेनाष्टानामित्यत्र नुटः पश्चादेव संज्ञिपातपरिभाषाया अनित्यत्वादात्वं, न तु प्राक् । अन्यथा, अष्टन् आमिति स्थिते परत्वान्नित्यत्वाच्च आत्वे कृतेऽनान्तत्वे षट्संज्ञाभावान्नुट् न स्यात् । न च यथोद्देशपक्षेऽन्तरङ्गत्वात् प्रागेव कृता षट्संज्ञा एकदेशविकृतन्यायेन कृतात्वेऽपि सुलभेति वाच्यम् । अल्विधौ उक्तन्यायायोगादिति भावः ॥

तेति भावः ॥ संज्ञिपरत्वेत्यादि ॥ संख्यापदस्येत्यादिः । अन्तग्रहणं समासंपादनद्वाराऽन्यपदार्थबोधकत्वेन तत्संपादकमिति भावः । किञ्चान्तग्रहणस्य तदर्थत्वे तस्य विशेषणतया सप्तम्यन्तत्वेन च पूर्वनिपातापत्तिः । उणादीनामव्युत्पत्तिपक्षे प्रत्ययानां सुमुदायानां वोपदेशाभावेन त्वदुक्तार्थासङ्गतिश्चेत्यपि बोध्यम् । उपदेशग्रहणं कर्त्तव्यमिति वार्तिकस्य तु स्वप्रकृतिकप्रत्ययोपदेशकाले ष्णान्तेत्यर्थः । त्वया तु समस्तान्तपदार्थभूतस्य उपदेशकालस्य तथाऽन्वयो वक्तुमशक्य इति स्पष्टमेवेति दिक् ॥

हलीत्यपकृष्यत इति ॥ हलीत्युभयोः शेष इति भाष्योक्तेरिति भावः ॥ संनिपातेति ॥ नान्तत्वप्रयुक्तषट्सञ्ज्ञकसंनिपातेन जातस्य नुटस्तद्विघातकत्वमिति प्राप्तिः ॥ अनित्यत्वादिति ॥ न च नुटि नोपधाया इति दीर्घे नलोपेनाष्टानामित्यस्य सिद्धेः किमनित्यत्वेन । न च नलोपस्यापि संनिपातपरिभाषयाऽप्राप्तिः नलोपस्याऽसिद्धत्वेन तद्विषये तदप्राप्तेरिति वाच्यम् । कृन्मेजन्तसूत्रभाष्ये संनिपातपरिभाषादोषनिरूपणावसरे, हे गौरीत्यादौ सम्बुद्धिलोपेऽपि तस्य स्थानिवत्त्वेन ह्रस्वनिमित्तसन्निपातविघाताभावात्तत्राति‌व्याप्तिपरभाष्यासङ्गतेः । संनिपातस्याशास्त्रीयत्वान्नस्थानिवत्त्वमितिचेत्तत्रासिद्धत्वमपि कथमिति विभावय । किञ्च पूर्वत्र कर्त्तव्ये लक्षसिद्धेऽपि तत्र कृते तस्यासिद्धत्वे मानाभावः ॥ अन्यथा — हलीत्यस्यात्राऽसम्बन्धे ॥ परत्वादित्यभ्युच्चयः ॥ नित्यत्वाच्चेति ॥ कार्यकालपक्षे संज्ञायास्तत्तद्विध्येकवाक्यतया षट्त्वात्वयोर्बहिरङ्गत्वं समानमिति भावः ॥ अल्विधाविति ॥ षट्संज्ञाया अल्विधित्वेन तन्मूलककार्याणामप्यल्विधित्वमित्यभिमानः । यदि तु नामसंख्यावाचकत्वसमानाधिकरणधर्मविशेषरूपस्य षट्त्वस्य स्थान्यलब्धर्मत्वाभावेन तत्प्रयुक्तकार्यस्य नुडादेरपि नाल्विधित्वमिति स्थानिवत्त्वेनैकदेश-

अष्टाभ्य औश् ॥ कृताकारादिति ॥ ननु हलीत्यपकृष्यत इत्युक्तं, तत् कथं कृताकारेत्यत आह ॥ अष्टभ्य इति ॥ कृतात्वस्येदमनुकरणं, न तु लक्षणवशसंपन्नमात्वम् । तथा हि सति वक्ष्यमाणज्ञापकेन तस्य वैकल्पिकतया लाघवार्थमष्टभ्य इत्येव ब्रूयादिति भावः ॥ इदमिति॥ श्रुतमनुमितं चेत्यर्थः ॥ अष्टनो दीर्घादिति ॥ दीर्घान्तादष्टनः परा असर्वनामस्थाना विभक्तिरुदात्ता स्यात् । अष्टाभिः । दीर्घात् किम् । अष्टभिः । मध्योदात्तमिदम् । षट्त्रिचतुर्भ्यो हलादिरिति बाधित्वा, झल्युपोत्तममित्यस्य प्रवृत्तेः। षट्त्रिचतुर्भ्यो या हलादिर्विभक्तिस्तदन्ते पदे उपोत्तमम् उदात्तं स्यादिति तस्यार्थः । एवं स्थिते ह्रस्वव्यावृत्त्यर्थं क्रियमाणं दीर्घग्रहणमात्वस्य नित्यत्वे व्यर्थं स्यादित्यर्थः ॥ पूर्वस्मादपीति ॥ एवञ्च प्रियाष्ट्ण इति

विकृतन्यायेन च नुट् सुलभस्तार्हि मुख्ये कार्यकालपक्षे तत्सिद्धिर्हलीत्यनुवृत्तेः फलमिति बोध्यम् ॥

श्रुतं हलादौ, अनुमितं जश्शसोः ॥ ह्रस्वव्यावृत्त्यर्थमिति ॥ ह्रस्वेऽन्तोदात्तव्यावृत्त्यर्थमित्यर्थः ॥ व्यर्थं स्यादिति ॥ ननु ज्ञापितेऽपि व्यर्थमेव तत् । अष्टाभिरित्यत्र सावकाशस्याष्टन इति सूत्रस्याष्टभिरित्यत्र परत्वाज्झल्युपोत्तममित्यनेन बाधे, सकृद्गतिन्यायेन पुनरप्रवृत्तेरितिचेन्न । दीर्घग्रहणेनैव सकृद्गतिन्यायानित्यत्वस्यापि ज्ञापनात् । यद्वाऽत्र यथोद्देशपक्ष एव ज्ञाप्यते । तत्रात्वस्य बहिरङ्गतया प्राक् षट्त्वे जाते नान्तसंख्यावाचकत्वसमानाधिकरणधर्मरूपस्य षट्त्वस्याऽरूढधर्मत्वाभावेन स्वरादेरल्विधित्वाभावात् । स्थानिवद्भावेनैकदेशविकृतन्यायेन वाऽकारान्तस्यापि षट्त्वेन तत्रापि झल्युपोत्तममित्यस्य प्राप्त्याऽष्टन्स्वरस्य तदपवादत्वात् । तत्र पक्षे, भविष्यति किञ्चिदनेन प्रयोजनमित्यभिसन्धिमात्रेणैव संज्ञाप्रवृत्तेः प्रगृह्यसंज्ञाप्रकरणे कैयटेनोक्तत्वात् । स्पष्टं चेदं षट्संज्ञासूत्रेऽष्टनो दीर्घादिति सूत्रे च भाष्यकैयटयोः । आकारान्तस्य षट्त्वेऽप्यौश्विधिसामर्थ्याद्द्वावित्यत्र लुग्न। नन्वेवमष्टावित्यत्राष्टन्स्वरस्य चारितार्थ्यम् । हलादित्वाभावेन षट्स्वरस्य तत्राप्राप्तेः।नचैकादेशे व्यपर्गाभावः। स्वरात् पूर्वं सन्धिकार्याप्रवृत्तेरेहीत्यत्राङ्निमित्तनिघातसिद्ध्ये,याद्धि तु परमिति सूत्रे भाष्ये ध्वनितत्वादितिचेन्न। एतद्भाष्यप्रमाण्यादेवाष्टन्शब्दस्य घृतादिपाठादन्तोदात्तत्वेनैकादेश उदात्तेनोदात्त इत्येव तत्रान्तोदात्तसिद्धेः। ननु प्रियाष्टाभ्यामित्यादावष्टन् स्वरः सावकाशः षट्स्वरविधायके विहितविशेषणाश्रयणेन समासे गौणे तदप्राप्तेःअत एव,चतुरः शसीति सूत्रे स्त्रियां प्रतिषेधो वाच्य :।चतस्रः पश्य चतसर्याद्युदात्त[illegible]त् सिद्धम्। तन्निपातनेऽपि चतसृणामिति विभक्तिस्वरः सिद्धः।षट्त्रीतिसूत्रे हलादिग्रहणेन निपातनस्वरस्य विभक्तिस्वराबाधकत्वज्ञापनात्।आद्युदात्तनिपातने [illegible]

हरदत्तोदाहृतं ष्टुत्वं न सम्भवतीति भावः। न च पूर्वत्रासि द्धे न स्थानिवदिति निषेधः। तस्य दोष इति सापवादत्वात्। ननु रषाभ्यामिति प्रतिपदोक्तं णत्वं तत्र ग्रहीष्यामः। न तु ष्टुत्वविधिलभ्यमितिचेत्। मैवम्। भाष्यमते तदयोगात्। तथाहि। रषाभ्यामिति सूत्रेऽपदान्तस्य मूर्द्धन्य इति सूत्रमनुवर्त्य णग्रहणं, पदान्तस्येति निषेधसूत्रं च भाष्ये प्रत्याख्यातम्। न च मूर्द्धन्यशब्देन ष्टुशब्देन वा निर्वर्त्यमाने णकारे वैषम्यं सुवचम्। यथोत्तरं मुनीनां प्रामाण्यमिति स्थानिवद्भाव एवोचितः। शब्दकौस्तुभे, तस्य दोष इत्यत्र णत्वग्रहणं मास्त्विति निष्कर्षः कृतस्तद्रीत्याप्याह॥ कार्यकालपक्ष इति॥ न च यथोद्देशमाश्रित्य ष्टुत्वमस्त्विति वाच्यम्। फलभेदे प्रत्याख्यानासंभवेन कार्यकालपक्षस्यैवेह न्याय्यत्वादिति भावः। अत एव पञ्चमीसमासस्य प्रत्याख्यानोपष्टम्भेनापि ष्टुत्वं प्रत्याशा न कार्या। फलैक्याय कार्यकालपक्षस्यैव न्याय्यत्वेनासिद्धत्वस्य दुर्वारत्वात्। निष्ठायां

हलादिग्रहणानर्थक्यं, न ह्यन्यद्धलादिग्रहणं प्रयोजयति अन्यदतश्चतसृशब्दादिति भाष्योक्तं सङ्गच्छते। अन्यथा प्रियाष्टान इत्यादेः संभवेन तदसङ्गतिः। अष्टौ परमाष्टावित्यादेरेकादेशस्वरेण सिद्धेः। न च कदष्टावित्यादिव्यावर्त्यम्। संख्याप्रकारकसंख्येयविशेष्यकबोधजनकतयोत्तरपदार्थप्रधानसमासे समुदायस्यापि षट्त्वात्। स्पष्टं चेदं सर्वादीनीत्यत्र भाष्ये। ततो विहितत्वाच्चेति वाच्यम्। एतद्भाष्यप्रामाण्येन तदनभिधानादितिचेन्न। एतज्ज्ञापकपरभाष्यप्रामाण्यादष्टन इत्यस्यापि विहितविशेषणाश्रयणेन समासेऽप्रवृत्तेः। प्रियाष्टादीनामनभिधानस्य षट्सञ्ज्ञासूत्रे भाष्ये स्पष्टत्वाच्च। तिसृभ्यो जस इति सूत्रस्थेनोपसमस्तार्थमेक इति भाष्येण तुल्यन्यायात् षट्स्वरस्यापि तदन्ते प्रवृत्तेरुक्तत्वाच्च। चतुरः शसीतिसूत्रस्थन्तु वार्तिकं जस्ग्रहणानर्थक्यमन्यत्राभावादिति तिसृभ्य इति सूत्रस्थवार्तिकवदेव दृष्यमेके इति च मुख्यार्थकमिति दिक्॥ प्रतिपदोक्तमिति॥ संयोगादिलोपसाहचर्याल्लुत्वस्येवेति भावः॥ प्रत्याख्यातमिति॥ तदेकवाक्यतयाऽग्नित्यत्वेन णत्वांशे प्रतिपदोक्तपरिभाषासाहचर्यपरिभाषयोरप्रवृत्तिरिति भावः। प्रत्याख्यानेन च तयोरुपादानं स्पष्टार्थमेव, न तु फलान्तराभिनिवेशः कार्य इति सूच्यते॥ प्रत्याख्यानासम्भवेनेति॥ उक्तरीत्या भाष्यध्वनितणत्वग्रहणेत्यादिः। णग्रहणेति वा॥ पञ्चमीसमासेति॥ अपरविधाविति वक्तव्यमित्यचः परस्मिन्निति सूत्रस्थवार्तिकव्याख्यानावसरे कैयटध्वनितेत्यर्थः। वस्तुतस्तदयुक्तमिति प्राङ्निरूपितम्। तत्प्रात्याख्यानमभ्युपेत्यापि समाधत्ते॥ फलैक्यायेति॥ प्रत्याख्यानायुक्तत्वं ध्वनयन् पञ्चमीसमासपक्षे लक्ष्यसिद्धिं शङ्कते—

निष्ठायामिति॥ तत्र हि सेड्ग्रहणं, नानिड्व्यावृत्त्यर्थं, णिजन्तात्तदसम्भवात्।

सेटीति सेड्ग्रहणाज्ज्ञापकात् यस्माद्धौ स्थानिवद्भावस्यानित्यतया नेह प्रवृत्तिरिति तु संभवेदुत्प्रेक्षा यदि लक्ष्ये ष्टुत्वं भ्रमितं स्यात् । लक्षणैक-चक्षुष्कतायां तु अनित्यत्वपुरस्कारोऽनुचित एवेत्यास्तां तावत् । जश्शसो-रिति ॥ औश्त्वं हि लुग्नुटाविव गौणत्वे न भवति । अष्टाभ्य इति बहु-वचननिर्देशात् । अन्यथा हि कृतात्वानुकरणेऽपि एकवचनेनैव निर्दिशेत्, अष्टा औशिति, अष्ट इति वा । एतच्च ष्णान्तेति सूत्रे भाष्यकैयटयोः स्पष्ट-म् । तथाच औश्त्वविधौ कृतात्वनिर्देशबलेनानुमीयमानमात्वमपि प्राधान्ये एवोचितम् । तथाच जसि प्रियाष्टान इत्येव स्यान्न तु प्रियाष्टा इत्याशङ्क्योक्तं भाष्ये, यथालक्षणमप्रयुक्ते इति । न भवत्येवात्रात्वमित्यर्थ इति कैयटः ।

नच, ह्रेपेः सनीवन्तेतीड्विकल्पात् संज्ञापित इत्यादौ, यस्य विभाषेतीण्निषेधे तत् संभवतीति वाच्यम् । यस्य विभाषेत्यत्रैकाच इत्यनुवृत्तेः । अन्यथा दरिद्रा-तेरपि सनि विकल्पितेड्त्वेन दरिद्रित इतीण्न स्यात् । घा दान्तेति सूत्रे ज्ञा इति निपातनेनेडभावस्यैव णिलोपेऽपि निमित्तात् । तस्माच्चोगविभागेन कालावधारणार्थमिटि कृते एव णिलोपो, न तु ततः प्रागिति । अन्यथा कारित-मित्यादौ परमपीटं बाधित्वा नित्यत्वाण्णिलोपे, एकाच इतीटिनिषेधः स्यात् । पूर्व-स्माद्धौ स्थानिवत्त्वे त्वप्राप्त एव निषेधो णिचा व्यवधानादिति भावः । यदि तु एकाच उपदेशे इत्यत्र विहितविशेषणपक्षे सेटीति चिन्त्यप्रयोजनमित्युच्यते तदा प्रविगणय्येति भाष्योदाहरणादेव तदनित्यत्वम् । अन्यथाऽल्लोपस्य स्थानि-वत्त्वाल्ल्यपि लघुपूर्वादिति णेरयादेशो न स्यात् । ल्यपीति सूत्रं प्रशमय्येत्यादौ चरितार्थमिति दिक् ॥

स्पष्टमिति ॥ वस्तुतस्तु षड्भ्यो लुगित्येतत्साहचर्यादस्य गौणे न प्रवृत्तिः । तस्य च विहितविशेषणाद् गौणेऽप्रवृत्तिरिति सर्वादिसूत्रे भाष्ये स्पष्टम् । गौणे औशोऽप्रवृत्तौ तज्ज्ञाप्यात्वमपि नेति बोध्यम् ॥ इत्येव स्यादिति ॥ यद्यपि हलीत्य-पकर्षपक्षे प्रियाष्टाविति न सिध्यति, प्रियाष्टान इति प्राप्नोतीति भाष्ये उक्तम् । तथापि अपकर्षाभावेऽप्यात्वस्य वैकल्पिकतया प्रियाष्टान इत्यस्य दुर्वारत्वेन यथाश्रुतभाष्यासङ्गतेरेवगर्भतया तद् व्याख्यातम् ॥ प्रियाष्टा इतीति ॥ आवादेशे वकारस्य, लोपः शाकल्यस्येति लोपः । अत्र गौणत्वेऽप्यात्वप्रवृत्तौ हि भाष्य-मसङ्गतमेवेति भावः॥ कैयट इति॥ अत्राऽरुचिबीजं तु यथालक्षणमित्यत्र तत्कृता, नैवंवालक्षणमप्रयुक्ते प्रवर्त्तते प्रयुक्तानामेव लक्षणेनान्वाख्यानादितिद्वितीयव्याख्यै-व युक्ता । आद्यव्याख्यायामप्रयुक्ते इति वाक्यशेषासङ्गतिः । प्रयुक्तेऽपि लक्षणा-ऽनातिक्रमसत्त्वात् । प्रयुक्तानामिदमन्वाख्यानमित्यभियुक्तोक्तिविरोधाच्च । यथा-लक्षणमित्यस्याप्रयुक्ते लक्षणाभावस्यैव योग्यता, न तु लक्षणप्रवृत्तेरित्यत्र । किञ्च भाष्यकारस्य लक्ष्यैकचक्षुष्कतयैवैव व्याख्योचिता । एकस्यैव प्रयोग-

वामनोऽपि, अष्टाभ्य औशिति सूत्रे तदन्तग्रहणात् परमाष्टावित्युक्त्वा प्रियाऽष्टान इत्यत्रात्वस्याभावादौश् न भवतीत्याह । हरदत्तस्तु तत्रैव, प्रियाष्टान इत्यत्रेतिहृति न्थमुपादाय यथा [illegible] न भवति तथा तद्विधावेव वक्ष्यत इति प्रतिज्ञाय, अष्टन आ विभक्ताविति सूत्रे एकवचननिर्देशादुपसर्जनेऽप्यात्वम् । भविषये आतो लोपः । प्रियाष्टः पश्येत्यादि वदन् पूर्वप्रतिज्ञातार्थविपरीतं भाष्यवृत्त्यादिविरुद्धं कथमभिहितवानिति स एव प्रष्टव्यः ॥ [illegible] ॥ यद्यपि हलीत्यस्यापकर्षमकृत्वाऽपि व्याख्यानं भाष्ये प्रतीयते । तथाऽपि तस्यापरितोषग्रस्तत्वं प्रपञ्चितमन्यत्रेति भावः । प्रियाष्टा इति प्रथमैकवचनम् । उक्तं संपृक्तादि । प्रियाष्ट्न इति ॥ नान्ताः ॥

भुदिति । बुध्यतेः क्विप् ॥ धान्ताः ॥

[illegible]क् ॥ किञ्चिदिति ॥ ऋतावुपपदे यजेः क्विन् । धृष्णोतेर्द्विर्वचनमन्तोदात्तत्वं च । सृजेः कर्मणि क्विन् अमागमश्च । दिशेः कर्मणि । उत्पूर्वात् स्निहेः क्विन् उपसर्गान्तलोपः षत्वम् । अञ्चेः सुप्युपपदे क्विन् चेत्यर्थः ॥ युजेरिति ॥ कुञ्चेरप्येवम् । नलोपाभावस्त्वधिकः ॥ कनाविति ॥ इकारस्तूच्चारणार्थ इति भावः ॥ सन्निहिते इति ॥ यत्तु प्राञ्चस्तृतीये धात्वधिकारे इति । तन्न । सन्विधौ धातुग्रहणस्य उत्तरत्रानुवृत्तेरभावेनाऽधिकारत्रयाभावात् ॥

स्य भाष्यफक्किकाव्याख्यानभेदेन साधुत्वासाधुत्वयोरनौचित्याच्च। तस्मादत्रत्यं मूलं टीका चैवंव्याख्यातृकैयटाद्यनुरोधेन । वस्तुतः प्रियाष्टादीनामनभिधानमेवेति दिक् ॥ आत्वस्याभावादौश् नेति ॥ अत्र वृत्तिकृता, औशोऽभावादात्वं नेति वक्तुं युक्तम् ॥

प्रथमैकवचनमिति ॥ हल्ङ्यादिलोपात् परत्वादात्वे सोर्लोपाप्राप्त्या रुत्वविसर्गौ । न च लोपोऽन्तरङ्गः । प्रकृतिप्रत्ययोभयसापेक्षत्वेन समत्वादित्यभिमानः॥नलोपाभावस्त्विति ॥ कुञ्चधातुर्नोपध इति संमताकारीयधातुवृत्त्यनुसारेणेदम् । परेश्चेति सूत्रभाष्यात्तु अयं नोपध इति लभ्यते । तत्र हि कुञ्चेत्यत्र कुत्वमाशङ्क्य कुञ्चामिति ऋत्विगादिसूत्रस्थनिपातनात् सिद्धमित्युक्तम् । तस्य नकारजत्वे तु परसवर्णासिद्धत्वात् कुत्वाप्राप्तौ भाष्यासङ्गतिः । निर्देशेन च चयोगे कुत्वाभावो निपात्यते इति क्रुञ्चित्यादौ कुत्वं भवत्येव । तदा नलोपस्य प्राप्तिरेव नेति तत्त्वम् ॥ उच्चारणार्थ इति ॥ न तु तदित्सञ्ज्ञाप्रयुक्तकार्यभागयमतो विशिष्य तस्य नोक्ता सा । उच्चारणे सहायसम्पादनेन वर्णोच्चारणस्य चारितार्थ्ये विधेये तदपगममात्रफलि[illegible] तु साऽस्त्येवेति, न, तस्य लोप इति सूत्रस्थभाष्यविरोध इति बोध्यम् ॥

युजेरसमासे ॥ सर्वेति ॥ यत्तु प्राचोक्तं, सुटीति । तन्न । सर्वनाम-स्थाने इत्यस्यैव प्रकृतत्वात् । लक्षणायां बीजाभावात् । क्लीबे युजी इति द्विवचनेऽतिव्याप्तेश्च । यत्तु वदन्ति । नपुंसके शसि युञ्जीत्यत्र नुम् न स्यादिति । तन्न । नपुंसकस्य झलच इति नुमः सम्भवात् ॥ सुलोप इति ॥ कुत्वस्यासिद्धत्वात् परत्वादादौ नुम् । ततो हल्ङ्यादिलोप इति भावः ॥

क्विन्प्रत्ययस्य कुः ॥ पदान्ते इति ॥ यत्तु प्राचोक्तं, झलीति ॥ तन्न । झलीत्यस्यासन्निहितत्वान्निष्फलत्वाच्च । यत्तु तत्पौत्रेण व्याख्यातम् । झलो झलीत्यतो मण्डूकप्लुत्या झलीत्यस्मिन्नवर्तमानेऽपि न कश्चिद्दोष इति । तन्न । स्पृष्ट इत्यादावतिव्याप्तेः ॥ खन् इति ॥ खञ्जतीति खन् । खजि गतिवैकल्ये ॥

परौ व्रजेः ॥ दीर्घश्चेति ॥ यत्तु प्राचा व्याख्यातं, विण्णिस्वादुपधावृद्धिरिति । तन्न । पञ्चपाद्यां दशपाद्याञ्चानेन किबदीर्घयोरेव विधानात् ॥

स्कोः ॥ संयोगेति ॥ झलन्ताभ्यां विशेष्यते इति व्याचष्टे ॥ पदान्त इत्यादिना ॥ भृज्जतीति भृट् । क्विप् ॥ सस्येति ॥ जश्त्वस्याऽसिद्धत्वात् पूर्वं श्चुत्वमित्यर्थः । एतेन प्राचो विपरीतोक्तिः प्रत्युक्ता ॥ ऊर्गिति ॥ ऊर्ज बलप्राणनयोः । अस्माच्चुरादिण्यन्ताद् भ्राजभासेत्यादिना क्विप् । णिलोपः । स च चोः कुत्वे न स्थानिवत् । पदान्तविधित्वात् पूर्वत्रासिद्ध-

---

कुत्वस्यासिद्धत्वादिति ॥ चोः कुरिति कुत्वस्येत्यर्थः । इदं सर्वं न्यायसिद्धार्थकथनमात्रम् ॥ परत्वादिति ॥ हल्ङ्यादिलोपादित्यादिः ॥

असंनिहितत्वादिति ॥ स्भ्वोर्ग्रहणसामर्थ्येनैकाचो बश इत्यतस्तदनुवृत्तेर्निष्ठादेशप्रकरणेन विच्छेदाच्च । एतेनात्रैव चोरितिवक्तव्यं, तत्रैव वा क्विन्प्रत्ययस्येति वक्तव्यम् । एवञ्च कुग्रहणं व्यर्थमित्यपास्तम् । चोरित्यत्र तत्सम्बन्धादत्र तदसम्बन्धाच्च ॥ निष्फलत्वाच्चेति ॥ सिद्धान्तसम्मतफलाभावादित्यर्थः । तद्ध्वनयन्नाह ॥ अतिव्याप्तेरिति ॥

लुप्तषष्ठीकमिति ॥ एतेनोपसर्जनस्य सविशेषणत्वात् समासानुपपत्तिरित्यपास्तम् । पदान्ते झलि च यौ स्कौ संयोगादी तयोर्लोप इति न सूत्रार्थः । संयोगादित्वस्य पदान्तत्वस्य चैकस्मिन्नसम्भवात् । तदपवादस्येति [illegible] क्विनपवादस्येत्यर्थः । तत्र मन्त्रे इति सूत्रे उपपदानां धातूनां च पृथक् पाठे कर्तव्ये समुदायोच्चारणमलाक्षणिकानां निपातनार्थम् । तत्र श्वेतशब्दे कर्तर्युपपदे वहेः कर्मणि प्रत्ययः । उक्थे कर्मणि करणे वोपपदे शंसेः प्रत्ययो नलोपश्च । अस्य नलोपेऽपि न वृद्धिः । उक्थशस्शब्दस्य सामान्येन कः सिद्धो न तस्य निपातनं क्रियते इति भाष्येण तत्र तदभावस्यापि निपातनात् । दाशूवाने

त्वाच्च । इह जान्तेष्ववया इति नोदाहृतम् । मन्त्रे श्वेतवहोक्थेति प्रकृत्य, अवे यज इति विहितस्य ण्विनस्तदपवादस्य पदान्ते डसश्च छान्दसत्वात् । यत्तु श्वेतवाडुक्थशास्पुरोडाशवयजां डासिति प्राचोक्तम् । तन्न । डसः प्रकृतिभूतयोर्वहियज्योर्दीर्घाभावात् । यदपि अवया इति प्रतीकमुपादाय ण्विनिति प्राचा व्याख्यातम् । तन्न । अपवादस्य डसो विषये उत्सर्गस्य ण्विनोऽप्रवृत्तेः ।

तदोः सः सावनन्त्ययोः ॥ अनन्त्ययोः किम् । हे स । परत्वात् त्यदाद्यत्वं बाधित्वा सत्वं स्यात् । ततो हल्ङ्यादिलोपे रुत्वविसर्गौ स्याताम् । किञ्च स्त्रियां, सेति न स्यात् । वस्तुतस्तु अनन्त्यग्रहणं शक्यमकर्तुम् । न चोक्तदोषः । पुनः प्रसङ्गविज्ञाने त्यदाद्यत्वसम्भवात् ।

इत्यस्मात् पुरःपूर्वकात् प्रत्ययः कर्मणि दाश आदेर्डत्वं चेति ॥ वहियज्योरिति ॥ शंसेरप्युपलक्षणमिदम् । किञ्चोक्तभाष्यादुक्थशास्तित्युच्चारणमपि प्राचामसङ्गतम् । न च डस् न विधेयः । अवयाः श्वेतवाः पुरोडाश्वेति पदान्तविषये रुत्वे रूपसिद्धेरिति वाच्यम् । वृद्धौ अतः परत्वाभावेनोत्वानापत्तौ श्वेतवोभ्यामित्याद्यसिद्ध्यापत्तेः ॥ अप्रवृत्तेरिति ॥ ननु पदान्तविषये वासरूपन्यायेन ण्विनप्यस्तु, निपातनं चैदमुभयोः । अत एव रुप्रकरणे, अवया इति सूत्रपाठः । अन्यथा डसन्ते, ससजुषो रुरिति रुत्वे सिद्धे दीर्घमात्रस्य निपातनात् तत्प्रकरणे एव कृतं स्यादिति चेन्न । डस् वक्तव्यः । किं प्रयोजनं वैयर्थम् । क्रियते वैयर्थे निपातनम् । अवयाः श्वेतवा इति । तन्न वक्तव्यम् । अवश्यं तद्वक्तव्यम् । डसारम्भेऽपि सम्बुद्धौ दीर्घार्थं, तर्हि डस्न वक्तव्यः । डसपि वक्तव्यः श्वेतवोभ्यामित्यर्थमिति भाष्यविरोधात् । अन्यथा ण्विनपक्षे रुत्वार्थमपि तस्यावश्यकत्वेन सम्बुद्धौ दीर्घार्थमिति भाष्यस्य निर्दलतापत्तिः । तस्मादत्र वार्तिकनये वासरूपन्यायाप्रवृत्तिः । क्रादिष्विव व्यवस्थितविभाषाऽङ्गीकार्या । रुप्रकरणे सूत्रं तु सूत्रकृता डसोऽकरणात् कृतं, ण्विनन्ते रुत्वमात्रस्यैव तदिष्टत्वात् । श्वेतवोभ्यामिति प्रयोगं तु सूत्रकृन्न जानात्येवेति स्पष्टं भाष्यविदाम् । केचित्तु ण्विन आदेशो डस् । श्वेतवहादीनां डस्पदस्येति वार्त्तिकात् । एतत्सम्बन्धिनो ण्विनः प्रत्ययस्य डस् तदन्ते पदत्वस्य भावित्वे इति तदर्थः । अत एव वृत्तिकृता ण्विनं प्रक्रम्य श्वेतवा इत्युदाहृतम् । एवञ्च वासरूपन्यायस्यात्र विषय एव नेत्याहुः ॥

परत्वादिति ॥ नित्यत्वं तु नात्वस्य । झब्दान्तरस्य प्राप्तेः ॥ सत्वं स्यादिति ॥ उभयोरपीति भावः । असो लाक्षणिकत्वेनात्वसन्तस्येत्यस्य न प्रवृत्तिः । न च प्रत्ययविशेषापेक्षसत्त्वापेक्षयाऽन्तरङ्गत्वादत्वे रूपसिद्धेदं व्यर्थम् । तादृशान्तरङ्गत्वस्य शास्त्रेऽनाश्रयणज्ञापनार्थत्वात् । अत एव भाष्ये ईदृशमन्तरङ्गत्वं न काप्याश्रितम् ॥ पुनः प्रसङ्गेति ॥ कृताकृतप्रसङ्गित्वमात्रेण नित्यतायां सापि सुवचा ।

सकृद्गताविति पक्षेऽपि, तदोः सः सावित्यस्यानन्तरमदस इति योगं विभज्याऽदस एव दस्य सत्वं, नान्यस्य दस्येति व्याख्यातुं शक्यत्वात् । ननु यथान्यासे द्वीयतेः क्विपि स्व इति प्राप्नोति, नियमे तु द्व इति स्यादिति चेन्नैवम् । गौणे अत्वसत्वयोरसम्भवेन द्वीरित्यस्यैव न्याय्यत्वात् ॥

ङे प्रथमयोरम् ॥ ङ इति पृथक्पदं लुप्तषष्ठीकम् । प्रथमाशब्दः प्रथमाद्वितीययोः समुदाये गौण इति व्याचष्टे, ङे इत्यस्येत्यादिना ॥ ङेसुटोरम् इति सुवचम् । अधिकरणत्वविवक्षयेति ॥ यदि तु, शेषे इति विभक्तिविशेषणं स्यात् तर्हि व्यर्थमेव तत् । आत्वयत्वाभ्यां विशेषविहिताभ्यां स्वविषये लोपस्य बाधसम्भवात् । न चैवमन्त्यलोप इति पक्षस्य निरालम्बनत्वापत्तिः । साम आकामिति समुदकनिर्देशेन तस्यापि ज्ञापितत्वादिति भावः ॥ युवं वस्त्राणीति ॥

शेषे लोपः ॥ यत्तु काशिकायामुक्तम्— पञ्चम्याश्च चतुर्थ्याश्च षष्ठीप्रथमयोरपि * यान्याद्विवचनान्यत्र शेषे लोपो विधीयते, इति ॥ तद्भाषापेक्षया । छन्दसि तु प्रथमाद्विवचनमपि शेषे लोपस्य विषय एवेति बोद्धव्यम् ॥ मपर्यन्तस्य किमिति ॥ अधिकारसूत्रं किमर्थमिति प्रश्नः ॥ अङ्गकार्ये इति ॥ एतेनाङ्गवृत्ते पुनर्वृत्तावविधिरिति परिभाषा अर्थत उपनिबद्धा। अङ्गे अङ्गाधिकारे वृत्तं वर्तनं यस्य तदङ्गवृत्तं शास्त्रम् । तस्मिन् कृते सति पुनरन्यस्य प्रवृत्तौ प्राप्तायामविधिरिति हि तस्या अर्थः । एषा च परिभाषा, ज्यादादीयसः, ज्ञाजनोर्जेतिसूत्रद्वयेऽपि ज्ञापितेति भाष्ये स्थितम् ।

शब्दान्तरप्राप्त्याऽनित्यत्वमभ्युपेत्य प्रवृत्तं भाष्योक्तं समाधिमाह ॥ सकृदिति ॥ अनन्त्ययोरित्येतदेव सकृद्गतिन्यायज्ञापकमिति तदाशयः ॥ न्याय्यत्वादिति ॥ वस्तुत एषामनभिधानमेव । एतदाशङ्क्य, यथालक्षणमप्रयुक्ते इति भाष्योक्तेः । अस्यार्थश्चाष्टनशब्दे उक्तः ॥

द्विवचनप्रसङ्गे आह ॥ पृथक्पदमिति ॥ अत्र गौरवं मत्वा प्रकारान्तरमाह॥ प्रथमाशब्द इति ॥ एवञ्च तस्यैकत्वाद् ङेशब्देन समासे द्विवचनमिति भावः ॥ तस्यापीति ॥ तस्यैवेत्यर्थः । अन्त्यलोपस्यैवेत्यर्थः । अनेनायमेव पक्षः सूत्रसम्मत इति सूचितम् । किञ्च शेषस्य लोप इत्यर्थे फलाभावः । अन्त्यलोपेऽप्यस्य विभक्तिसंज्ञिपातनिमित्तकत्वात् सन्निपातपरिषया बुद्धाविव्यत्रेव टापो निवृत्तेः । शेषग्रहणं तु भाष्ये प्रत्याख्यातमेव । ससुङ्निर्देशप्रत्याख्यानापेक्षयाऽस्य प्रत्याख्यानमेव ज्यायः । त्यदादीनाम इति सूत्रभाष्योक्तोऽप्ययं पक्षस्तत्रैवाहुरित्युक्त्वा बोधितारुचिक इत्यन्यत्र निरूपितम् ॥

अन्यथा हि ज्यादादिति आकारं न ब्रूयात् । बहोर्लोप इत्वतो लोपमेवा-वर्तयेत् । अकृत्सार्वेति दीर्घे सिद्धं ज्यायानिति । ज्ञाननोत्व यं त्वदध्या । अतो दीर्घो यञीति दीर्घो भविष्यतीति । न चैवं द्वाभ्यामित्यत्र त्यदाद्य-कृते, सुपि चेति दीर्घो न स्यादिति वाच्यम् । द्वयोरेकस्येत्यादिनिर्देशेनोक्त-परिभाषाया अनित्यत्वज्ञापनात् । यत्तु केचित् परिनिष्ठितस्येति पठन्ति । द्वाभ्यामिति तु दीर्घं विना न परिनिष्ठितामिति च वदन्ति । तद्भाष्यविरुद्ध-म् । ज्यायान्, जानाति, ज्ञायते इत्येतेषामपि दीर्घं विना अपरिनिष्ठितत्वेन भाष्योक्तज्ञापनस्यापि शिथिलमूलत्वापत्तेः । यदि तु, भ्यसो भ्यमिति सूत्रे भाष्येऽपि परिनिष्ठितस्येत्येव पाठस्तर्हि वाचनिकतामेवाश्रित्य पक्षान्तरपर-तया योज्यः । अनित्यत्वबलफलितार्थकथनं तद्, न तु ज्ञाप्यांशप्रविष्टमिति वास्तु । एवं तु काशिकादिग्रन्थोऽपि कथञ्चिन्नेतुं शक्य इति दिक् । मका-रान्तरमित्युपलक्षणम् । जसः शीत्यत्र जसः स् इति सकारं प्रश्लिष्य सान्तस्य जस इति व्याख्यानादतोऽमिति सूत्रादमग्रहणमनुवर्त्य अम् अमेवेति व्याख्यानाद्वेति बोद्धव्यम् ॥ अविभक्तिकामिति॥ तथाच, ङे प्रथमयोरिति पूर्वसूत्रेण प्राप्तस्यापः प्रतिषेधोऽयमिति भाष्ये शङ्कितम् । न च तथैव किं न स्यादिति वाच्यम् । स्त्रीनपुंसकयोरनन्तावात्मेयवान् ब्राह्मणीः कुलानि-

---

अन्यस्य – अङ्गवृत्तशास्त्रस्य ॥ दीर्घो भविष्यतीति ॥ जानातीत्यादौ मूलोक्त-स्य दीर्घनिर्देशसामर्थ्यान्न ह्रस्व इत्यस्याङ्गवृत्तपरिभाषाज्ञापनद्वारा, न ह्रस्व इत्यर्थ इति, न तद्विरोधः । नन्वनेन दीर्घे, पचामि भो इतिवद्, जानामि भो इत्यादावन-न्त्यस्यापीति प्लुतो न स्यात् । अत आदित्येव सिद्धे तत्रत्यदीर्घग्रहणस्य प्लुत-निवर्तकत्वात् । न चानन्त्यस्य पदस्य च टेरिति तदर्थात् कथं पचामीत्यादौ तत्प्राप्तिरिति वाच्यम् । दीर्घग्रहणसामर्थ्येनान्त्यविषय एव तत्सम्बन्धाद् वाक्य-स्थोः क्लृप्तसम्बन्धत्यागे मानाभावात् । तेन वाक्यस्यानन्त्यस्य पदस्य प्लुतः स्यादन्त्यस्य पदस्य च टेरित्यर्थः । तपरकरणेन तु न प्लुतनिवृत्तिः । प्लुतस्या-ऽसिद्धत्वात् । अत एव गीः पूरित्यादौ दीर्घः । अन्यथा तस्याधीदुदिति तपरत्व-सामर्थ्यादप्रवृत्त्यापत्तिः । दीर्घग्रहणे तु तत्सामर्थ्यादसिद्धत्वस्यापि बाधः । आका-रान्तरप्रश्लेषेण वारणं तु क्लिष्टम् । अस्तु वा तदुपायान्तरमितिचेन्न । उक्तज्ञापक-परभाष्यप्रामाण्यात्तु प्लुतस्य तत्रानिष्टत्वे वैकल्पिकत्वेनेदशे विषये प्लुताप्रवृत्तेः । अतो दीर्घ इत्यत्र दीर्घग्रहणं, हलि लोप इति सूत्रे हल्यशिति वक्तव्ये लोपग्रहण-वत् सत्त्वेन नार्थसाधकमिति दिक् ॥ निर्देशेनेति ॥ अन्यथा त्यदाद्यत्वे एत्वं न स्यादिति भावः । वाचनिकत्वे गौरवं ज्ञापकद्वयशैथिल्यं चाऽपरिहृतमित्यत आह ॥ अनित्यत्वबलेति ॥

वा । अलिङ्गत्वे युष्मान् ब्राह्मणानित्यादेरसिद्धिप्रसङ्गाच्च ॥

योऽचि॥अचि किम् । युवाभ्याम्। यदि तु युष्मदस्मदोरनादेशे इत्यत्र रायो हलीत्यतो हलीत्यनुवर्तते तदा इहाचीति मास्तु परिशेषादेव सिद्धेः ॥

युष्मदस्मदोः ॥ हलादाविति ॥ योऽचीत्यज्ग्रहणात् परिशेषात् सिद्धमिदम् । रायो हलीत्यतोऽनुवृत्त्या लब्धं वा । नन्वेवं किमनादेशग्रहणेन, न त्वादेशो हलादिरस्तामैवम् । भ्यमः सत्त्वात् । अभ्यम्पक्षे तु योऽचीत्यत्राऽनुवृत्त्यर्थमनादेशग्रहणं बोध्यम् ॥ पक्षद्वयेऽपीति ॥ नचान्तलोपपक्षे पररूपं बाधित्वा सवर्णदीर्घः स्यादकारोच्चारणसामर्थ्यादिति वाच्यम् । एत्वनिवृत्त्या अकारोच्चारणस्य चरितार्थत्वात् ॥

युष्मदस्मद्भ्यां ङसोऽश् ॥ शित्त्वं सर्वादेशार्थम् । अन्यथा हि आदेः परस्येति स्यात् । न च वैयर्थ्यम् । आदेशव्यपदेशेन यत्वनिवृत्त्यर्थत्वात् । न चावयवस्यादेशे सत्यपि विभक्तेरनादेशताऽस्त्येवेति वाच्यम् ।

अनुवृत्त्यर्थमिति ॥ स्पष्टमेतद्भाष्येऽत्रैव । अभ्यमिति च्छेदस्यैव मुख्यत्वं ध्वनयन् शङ्कते ॥ न चेति ॥ अत एव युष्मदस्मदोरिति सूत्रे न चादेशो हलादिरस्तीति भाष्यं सङ्गच्छते ॥एत्वनिवृत्त्येति ॥ अङ्गवृत्तपरिभाषाया अनित्यत्ववोधनद्वारेति भावः ॥ एवञ्च पररूपेण बाधान्न सवर्णदीर्घ इति तात्पर्यम् ॥

वैयर्थ्यमिति ॥ अकारस्याकारविधिवैयर्थ्येनान्त्यस्यैवाकारेऽतो गुणे च सिद्धं तवेत्यादीति व्यर्थमेव शित्त्वमित्यर्थः । न च पररूपबाधनार्थमेवादेरत्वविधानं स्यादिति वाच्यम् । विधिबाधापेक्षयाऽऽदेः परस्येति परिभाषाबाधस्य न्याय्यत्वात् ॥ आदेशेति ॥ आदेर्विधानेऽप्यादेशत्वसम्पादनेन यत्वनिवृत्त्या शेषलोपार्थं चकारविधानं चरितार्थमित्यादेः परस्येत्यस्य बाधे मानाभावेन सर्वादेशार्थं शित्त्वमिति भावः। नच योऽच्यङसीत्युक्त्वैव यत्वनिरासशेषलोपौ सिद्धाविति वाच्यम । पर्युदासे एकवचनत्वादिना सादृश्यग्रहणापत्तेः । युष्मदस्मदोरित्यात्वस्य प्राप्तेश्च । हलादाविति हि परिशेषसिद्धोऽर्थस्तत्रेति भावः ॥ अनादेशताऽस्त्येवेति ॥ अनादेश इति हि तत्पुरुषो लाघवात् । एवञ्च त्वमहमित्यादौ सम्पूर्णविभक्त्यादेशो यत्वाभावसम्पादकमनादेश इति प्रकृते यत्वं स्वादेव। नन्वेवमादेरकारस्य विधानं व्यर्थमिति सामर्थ्यादन्त्यस्य स्यात् । तत्र चातो गुण इति पररूपे आदेशरूपविभक्तित्वमिति यत्वाप्राप्तिः । नच वर्णादङ्गमिति परिभाषया पररूपात् पूर्वं यत्वप्राप्तिरिति वाच्यम । वर्णाङ्गयोरेकस्थानिकत्वे एव धर्मिग्राहकमानेन तत्प्राप्तेरितिचेन्न । युष्मदस्मदोरनादेश इत्यत्र प्रत्यासत्त्या युष्मदादिग्रहणेन विहितादेशरूपविभक्तेरेव ग्रहणेनाम्त्यादेशे पररूपेऽपि तादृशविभक्तेरभावेन यत्वापत्तेर्दुर्वारत्वात् । पररूपादेशस्तु न

सर्वे सर्वपदादेशा इति सिद्धान्तात् । इदमेव ञित्त्वं ज्ञापयति, सर्वे सर्वपदादेशा इति । अर्थवत्येव स्थान्यादेशभाव[illegible] । सिच्चङादयस्तु वचनसामर्थ्यादनर्थकस्यापि बोध्याः । इदं त्ववधेयम् । अन्त्यलोपपक्षे अश्नः स्यादेशः प्राप्तोऽङ्गवृत्तपरिभाषया वारणीयः।यदि त्वङ्गस्य यत्कार्यं तद्विषयिण्येव सा परिभाषा, न त्वङ्गाधिकारमात्रपरेति दुराग्रहस्तर्हि अशित्यत्रातो गुण इति पररूपेणाकारान्तरं प्रश्लिष्याकाररूप एव अश् भवति, न विक्रियते इति व्याख्येयम् । यत्तु स्यादेशस्यापवादोऽशिति । तन्न । आदेशप्रवृत्तिकाले शेषे लोपाभावेन स्यादेशस्याप्रसक्तेः ॥ भाविन इति ॥ कृते हि शेषे लोपेऽकारान्तत्वात् प्राप्तः सुद् ससुट्कस्य स्थानित्वेन निर्देशसामर्थ्यान्निवर्तत इति भावः। शेषे लोपष्टिलोप इति पक्षे तु सुड्ग्रहणं व्यर्थमेव । आकमि दीर्घोच्चारणं सवर्णदीर्घार्थम् । अन्यथा पररूपं स्यात् । न चाकारोच्चारणसामर्थ्यम् । एत्वनिवृत्त्याऽभ्यम इव चरितार्थत्वात् । इह, युवावौ द्विवचने, त्वमावेकवचन इति सूत्रद्वये द्विवचनैकवचनशब्दौ

तथेति भावः ॥ सर्वे सर्वति ॥ स्पष्ट [illegible] । एवं च [illegible] व्यावृत्त्या तस्य चरितार्थेनादेः परस्यत्वतदभावे [illegible] सार्थकमिति भावः । अत्र पदशब्देन अर्थवद् गृह्यत इत्याह ॥ अर्थवत्येवेति ॥ अर्थवत्त्वं च कल्पितमेव गृह्यते । एतेन, कृत्वा इत्यस्य कृय इत्यादेशे प्रकृतिप्रत्ययसम्मोहे, ह्रस्वस्येति तुन्न स्यादित्यपास्तम् । सिजादीनां कल्पितोऽप्यर्थो नास्तीत्यत आह ॥ सिच्चङादय इति ॥ द्योत्यार्थेन सोऽप्यर्थवानित्यन्ये ॥ दुराग्रह इति ॥ ज्यादादीयस इत्यस्य ज्ञापकत्वपरभाष्यविरोधादस्य दुराग्रहत्वम् ॥ अकारान्तत्वात् प्राप्त इति॥ससुट्कनिर्देशाभावे इति शेषः॥निर्देशसामर्थ्यादिति ॥ अयं भावः । सामः प्रसङ्गे आकमिति सूत्रार्थः । तेन आम्सकारयोरत्र विषयेऽत्यन्तमप्रयोगो बोध्यते । स्थान्यादेशभावविषये सर्वत्रैवमेव । यथाऽऽर्धधातुकविषयेऽस्तेरप्रयोगो भुवः प्रयोगश्चाऽस्तेरित्यनेन प्रतिपाद्यते, न तु सतो निवृत्तिः । शब्दानित्यत्वप्रसङ्गात् । किन्तु प्रसक्तबुद्धेरेव निवृत्तिः । तत्र सकारबुद्धेः प्रकृते सांप्रतिक्या असंभवाद्भाविन्या ग्रहणं सकारोच्चारणसामर्थ्यादिति भाष्ये स्पष्टम्।तन्निवृत्तिश्चामोऽभावात्।अत्र सामः स्थानित्वोक्त्याऽऽकमि स्थानित्वेन सामृत्वमेव, न त्वामृत्वम्।अत एवातित्वाकमित्यादौ प्रत्ययोत्तरपदयोरिति सूत्रभाष्योदाहृते आकम्नुडभावौ सिद्धौ । आम्येव सामत्वस्याहार्यारोपेणादेशः । आदेशस्यास्त्वाभावाच्चात्र न नुट् । न च यत्र भावी सुट् तत्रैवायम् । सामो भावित्वस्य सर्वथा दुरुपपादत्वादिति भाष्यविरुद्धकल्पना व्यर्थेति दिक् ॥

न प्रत्ययपरौ, किं त्वर्थपरावितिं व्याख्यातम् । तत्फलं दर्शयति ॥ समस्यमाने इत्यादिना ॥ द्येकत्वेति ॥ पञ्चकं प्रातिपदिकार्थ इति पक्षे संख्याया अपि प्रातिपदिकार्थत्वादिति भावः । त्रिकपक्षे तु द्येकार्थवाचिनी इति पाठ्यम्।संख्याया विभक्त्यर्थत्वेऽपि संख्येयस्य प्रातिपदिकार्थत्वादिति भावः। समासार्थो मुख्यविशेष्यम् ॥ अन्यसंख्यश्चेत् ॥ युष्मदस्मदर्थगतसंख्येतरसंख्यश्चेदित्यर्थः ॥ स्त इति ॥ अर्थपरत्वाश्रयणसामर्थ्यादेव भूतपूर्वगतेरपि स्वीकारात् । प्रत्ययपरत्वे तु न स्यातामित्यव्याप्तिः स्यादित्यर्थः । एवं चतुर्थश्लोकेऽपि, युवावौ त्वमौ न चेत्युक्त्या प्रत्ययपरत्वेऽतिव्याप्तिर्ध्वनिता । एवञ्चाव्याप्त्यतिव्याप्तिपरिहारायार्थपरत्वमाश्रितमिति फलितम् । न च त्रिमाकृत्रिमन्यायविरोधः । वचनग्रहणसामर्थ्यादेव तद्बाधात् । अन्यथा हि द्वित्वे एकत्वे इत्येव ब्रूयात् । द्वित्वे एकत्वे च या विभक्तिस्तस्यामिति व्याख्यानसंभवादिति भावः ॥ अतित्वाकमतिमाकमिति ॥ यत्तु वदन्ति साम आकमित्यत्र यद्यपि सुड्ग्रहणं न स्थानिविशेषणं, बाधात् । तथाऽपि उपलक्षणं भवति । तेन यस्यामः सुडग्रे भावी तस्यैव आम आकमा भवितव्यम् । न चैतद् गौणेत्वे सम्भवति इत्याकम् न प्रवर्त्तते। न च समुदायानिर्देशे विशेषणत्वमुपलक्षणत्वं वा विहाय तृतीयः प्रकारोऽस्ति । न च सुडामोः पृथक् स्थानित्वमिह विवक्षितम् । चशब्दस्य द्विवचनस्य च अभावात् । यदि तु स् च आम् चेति समाहारद्वन्द्वो व्याख्यायेत, योग्यताबलाच्च सूशब्देन सुडेव गृह्यते। तथापि यदि सुड्ग्रहणमन्वाचयशिष्टं ततः समासो न स्यात् । अन्यत्र तु स्थानिविवक्षया केवलस्यामोऽप्रसक्तेरिति । अत्रेदं वक्तव्यम् ।यस्यामः सुडग्रे भावीत्यादि तावद् बाधितम् । आकमाऽपहृतस्य सुडन्वयाभावात् । आकमः सुड् भवतिचेत् तर्हि तमेवोपलक्षयेत् । आदेशद्वारकेण परम्परासम्बन्धेन स्थानिनमुपलक्षयतिचेत् । हन्तैवं, युष्माकमित्यादौ सुड् श्रूयेत । साम इति

किं त्वर्थपरावितिं ॥ व्याख्यानमत्र शरणम् । द्वयोरेकस्य वचने बोधने समर्थयोर्युष्मस्मदोरिति वाच्योऽर्थः ॥ भूतपूर्वेति ॥ जहत्स्वार्था वृत्तिरित्यभिमानेनेदम् ॥ सामर्थ्यादेव तद्बाधादिति ॥ उभयगतिरिह शास्त्रे भवतीति संख्यासंज्ञासूत्रस्थभाष्योक्तेश्चेति तत्त्वम् । अन्यथा द्वयोरेकस्मिन्नित्युक्त्यैव युष्मदादिविशेषणतया सिद्धे वचनग्रहणसार्थक्यं दुरुपपादमिति बोध्यम् ॥ बाधादिति ॥ आकमुत्पत्तिकालेऽन्त्यलोपाभावेन सुटोऽसत्त्वादिति भावः ॥

न चैतद्गौणत्वे इति ॥ सर्वनामत्वाभावादिति भावः॥ योग्यताबलाच्चेति॥आम्

निर्देशसामर्थ्यान्न श्रूयत इतिचेन्न । निर्देशस्य गौणत्व [illegible] चरितार्थत्वेन सामर्थ्याभावात् । यदपि समाहारद्वन्द्वं प्रक्रम्यान्वाचयशिष्टत्वे [illegible] म् । तदप्यसम्भवदुक्तिकम् । साहित्यविवक्षया केवलस्यामसन्निधिरिति परमवशिष्यते। तदपि न। प्रक्रियादशायां स्थितस्याम उत्तरकालभावित्वेनोत्प्रेक्षितस्य सुटश्चैकबुद्ध्युपारोहेणैव साहित्याभ्युपगमात् । अतीतानागतयोरयं द्रष्टेतिवत् । तत्रोभयोरेकस्मिन् दर्शने सम्बन्ध इति चेदिहाप्येकस्मिन्नादेशे इति तुल्यम् । तथाच, इरयोरिति सूत्रे दध्रे इत्यादौ धाञो झस्य इरेचि आतो लोपे रेभावे तस्य कृसृभृप्रभृतिषु चरितार्थतया इटि कृते इरयोरिति द्विवचननिर्देशाल्लाक्षणिकस्यापि रेभावः पुनः क्रियत इति स्थितमाकरे । इरयोरित्येकशेषः । साम इति तु द्वन्द्वः । सह विवक्षा तूभयत्र तुल्यैव । वस्तुतस्तु साम आकमिति सूत्रे केवलोऽप्याम् तन्त्रेण निर्दिष्टः । तस्याकमि स्थानिवद्भावेनामुत्वा[illegible] समुदकत्वाच्च साम इति प्रवर्तते । गौणत्वे तु प्रथमप्रवृत्त्यैव पर्यवसानात् । अत एव शेषे लोपष्टिलोप इति पक्षेण सह फलैक्यमपि सिद्ध्यति । सर्वथाऽपि [illegible] कैश्चिदुत्प्रेक्षितं समर्थयितुं नाभिनिवेष्टव्यम् । [illegible] त्वादिति दिक् ॥

समभिव्याहारे युष्मदस्मद्भ्यां तस्यैव सम्भवादिति भावः ॥ साहित्याभ्युपगमादिति ॥ समूहाभ्युपगमादित्यर्थः ॥ कृस्रिति ॥ तेभ्यो लिट इण्निषेधादिति भावः ॥ उभयत्र तुल्येति ॥ एवञ्च पूर्वमाम आकमि ततः सुटि तद्विशिष्टस्य पुनराकम् । मुख्ये गौणत्वे त्वाम् एव । सूत्रे सकारग्रहणं तु सुड्विशिष्टपरमिति भावः । एवं परोक्तसमाहारद्वन्द्वेऽपि गौणे आकममुपपाद्य स्पदस्य सुड्विशिष्टे लक्षणामसहमानैस्तदीयैरन्यैरुक्तं प्रकारान्तरमपि, स्वरूपव्याक्रियैव परा[illegible]क्रिये ति न्यायेन दुष्टमिति बोधयन्ननुवदति ॥ वस्तुत इत्यादिना ॥ फलैक्यमिति ॥ तत्पक्षेऽपि प्रथमप्रवृत्त्यैव पर्यवसानादिति भावः । सिद्ध्यतीत्यस्यैवं त्वदीयैरुक्तमिति शेषः । एतेन साम्पदस्याम्पदेन न तन्त्रमसारूप्यात् । सारूप्यस्यैव तद्बीजतया हर्यादिभिरुक्तेः। पूर्वं तन्त्रं कृत्वा ततः स्पदेन समासे उभयोरपि तत्सम्बन्धबोधापत्तिः । किञ्चैवमपि गौणे नुड् वारयितुमशक्यः । न चामा सहितस्यामश्चाकामित्यर्थः । गौणे नुटि तत्सहितस्याप्याकमिति वाच्यम् । प्रथमप्रवृत्त्यैवेत्यादेरसङ्गत्यापत्तेस्तन्त्रे एवमर्थस्य निरूपयितुमशक्यत्वाच्चेति, वस्तुतस्त्वित्याद्युक्तिरसङ्गतेत्यपास्तः । अस्यापि ग्रन्थस्य परमतानुवादत्वेन दुष्टत्वेऽप्यदोषात् । तदनुवादफलं च तेषां परस्परविरोधप्रदर्शनम् । तदेतत्सकलं ध्वनयन् परमतदूषणमुपसंहरति ॥ सर्वथेति ॥ अत्र नुटो निवृत्तिस्तु पूर्वमुपपादितेति दिक् ॥ ननु पदस्येत्यधिकारेऽपि

षष्ठ्यादिविशिष्टयोरिति ॥ एतच्च सर्वस्य पदस्येत्यधिकाराल्लभ्यते। स्थग्रहणं तु विभक्तौ श्रूयमाणायामे यथा स्यान्न तु लुप्तायामित्येतदर्थमिति वक्ष्यति ॥ वेदैरशेषैरिति ॥ युष्मान् रक्षतु गोविन्दोऽस्मान् कृष्णः सर्वदाऽवतु इति तु प्राचः पाठस्त्यक्तोऽस्मानित्यस्य समानवाक्यस्थत्वाभावादेवाऽप्राप्तेः ॥ स्थग्रहणादिति ॥ तिष्ठतिरिहाऽहानौ वर्तते। यथा, समये तिष्ठ सुग्रीवेति समयं मा हासीरिति गम्यते। तेन षष्ठ्यादीनजहतोरेवादेशा इत्यर्थः ॥ युष्मत्पुत्र इति ॥ युवयोर्युष्माकं वा पुत्र इति विग्रहः। पदात् परत्वं सम्पादयितुमिति-शब्दः। प्राचा तु नाऽसौ प्रयुक्तः, तत्र पदात् परत्वाभावादेवादेशो न भविष्यतीति किं स्थग्रहणेन ॥

न चवा ॥ चादिपञ्चकेति ॥ पञ्चानां मध्येऽन्यतमेन योग इत्यर्थः ॥ युक्त इति ॥ नपुंसके भावे क्तः ॥

पश्यार्थैः ॥ अत एव निपातनाद्भावे शः। दर्शनं पश्यः। तच्चेह ज्ञानमात्रम्। अदर्शनं लोप इत्यत्र यथा । न तु चाक्षुषज्ञानमेव। अनालोचन इति निषेधात् ॥ तदेतदाह ॥ अचाक्षुषज्ञानार्थैरिति ॥ भक्त इत्यादि ॥ अत्र व्याचख्युः। येन हरेस्त्वं भक्तस्तेनैव कारणेनाहमपि भक्त इति योज्यम्। यदि तु तेनेत्यनेन भक्तत्वं त्राणे हेतुर्निर्दिश्यते ततः सापेक्षविधाने, त्वमेव तदिमामितिवदन्वादेशो न स्यादिति। अत्रेदं वक्तव्यम्। सापेक्षत्वविधानेऽन्वादेशत्वं नास्तीति तावदसङ्गतम्। आदेशो हि विधिः। किञ्चिद्विधाय पश्चादितरविधिश्चान्वादेशो, न तु निरपेक्षत्वगर्भोऽशब्दार्थत्वात्। शास्त्रे तथा अपरिभाषितत्वाच्च। न च प्रयोगदर्शनादेव तथा कल्प्यत इति वाच्यम्। वन्यद्विपेनोन्मथिता त्वगस्य * अथैनमद्रेस्तनया शुशोचेत्यादौ सापेक्षत्वेऽपि

युष्मदादिरूपपदस्य विभक्त्यविशिष्टस्यापि भ्यामादौ सम्भवाद्विशिष्टयोरित्यर्थलाभः। षष्ठीद्वितीययोरसम्भवेन पदाव[illegible]त्यर्थलाभेऽपि त्वदुक्तार्थे न मानम्। न च पदावयवत्वस्याव्यभिचारित्वेन तदनुवृत्तिसामर्थ्यात्तदर्थलाभः। तदनु[illegible]वश्यकत्वेन सामर्थ्यायोगादत आह ॥ सर्वस्येति ॥ तत्सामर्थ्याद्युष्मद[illegible]प सर्वस्य पदस्येत्यर्थ इति भावः। अत एव युवाभ्यामित्यादौ प्रकृतिभागस्य न। असहाये एव व्यपदेशिवद्भावप्रवृत्त्या युष्मदाद्यवयवकत्वमात्। एकाजिद्भवचनन्यायेन समुदाये एव तत्प्रवृत्तेश्च। अ[illegible]तु न ते इत्याद्यादेशाः। षष्ठ्यादेः प्रकृत्याकाङ्क्षायां प्रत्यासत्त्या श्रूयमाणस्य युष्मदादिप्रकृतिकस्यैव ग्रहणेनादोषात् ॥ तेनैव कारणेनेति ॥ श्लोकस्थं तेनेति भक्तत्वे हेतुकथनमिति तद्भावः ॥

एनद्देशदर्शनात् । तत्र हेतुत्वं [illegible] । तदेन [illegible] तशासनं विधेर्विधेहि कीनाशनिकेतनातिथिमित्यादमाभवेन विरोध । मक्तं भीरुरयमिति तु नायं विधिः, किं त्वनुवादः । अतस्तदिमामिति न विरुद्ध्यते । एवं स्थिते येन त्वं भक्त इति यच्छब्दाध्याहारक्लेशो व्यर्थः । किन्तु तेन त्रायत इत्येव सम्बन्धः प्रक्रान्तार्थत्वाच्च न यच्छब्दापेक्षेति दिक् ॥ अत्र तेनेति पूर्वं विद्यमानं ततो हरिरिति प्रथमान्तं ततः परस्यादेशस्तथा त्रायत इत्यस्मात् परं स इति प्रथमान्तम् न च त्रायत इति भिन्नवाक्यस्थमिति भ्रमितव्यम् । स हरिस्त्वां मां त्रायत इति तन्त्रेणानेकवाक्यत्वात् । अनुषङ्गाभ्युपगमेऽप्येकतिङ्वाक्यमिति परिभाषितैकवाक्यत्वानपायाच्च ॥

सामन्त्रितम् ॥ संज्ञाविधावपि [illegible] सामर्थ्यात्तदन्तग्रहणं । आमन्त्रणमामन्त्रितमुपचारात्तत्साधने वृत्तिः । विभक्त्यन्तेन चामन्त्र्यते, न तु केवलया विभक्त्येत्याशयेनाह ॥ तदन्तमिति ॥

आमन्त्रितं पूर्वमविद्यमानवत् ॥ यत्तु प्राचोक्तं विशेष्यपूर्वं संबोधनेतरपूर्वं च सम्बोधनं हित्वाऽन्यस्मात् सम्बोधनात् परयोर्नैते आदेशा इति केचिदिति । तत्र केचिदित्यनुचितम् । उक्तार्थस्य भक्तादिसूत्रविरुद्धत्वात् । यच्च व्याचख्युः । त्रिसूत्र्या नेयमर्थ इति तत्र । तृतीयसूत्रार्थस्य तेनासंस्पर्शात् ॥

पादः पत् ॥ तदवयवस्येति ॥ निर्दिश्यमानस्यादेशा इति परिभाषयेदं लभ्यते ॥ दान्ताः ॥

अग्निं मन्थतीति ॥ मथ्नातेर्मन्थतेश्च किपि एतदेव रूपम् । इदितस्तु

विधिरिति ॥ स चाज्ञातज्ञापनरूपोऽत्र, न तु प्रवर्तनारूपः ॥ दिगिति ॥ तदर्थस्तु भक्तत्वे हेत्वाकाङ्क्षाया अभावः । त्राणे आकाङ्क्षितहेत्वर्थकस्याध्याहारे साऽपेक्षत्वं तवापि दुर्निवारं च । शब्दमर्यादया तेनेत्यस्य त्राणे एवान्वयप्रतीतेः शाब्दमर्यादात्यागश्चेति ॥ न चेति ॥ त्रायत इत्यनेन, हरिस्त्वामित्यनेन शाब्दोऽन्वयः । स मामित्यत्राध्याहारः । वैपरीत्यं तु न । अध्याहारस्यानुपपत्तिमूलकत्वेनोत्तरत्रैव युक्तत्वात् । किञ्चाध्याहृतस्यागन्तूनामन्ते निवेश इति न्यायेनान्त एव निवेशेन स मामित्यस्य तदर्थकत्वमित्यस्यैवाध्याहारपदार्थत्वेन च स इत्यस्य विद्यमानपूर्वकत्वाभावः । श्रूयमाणं तु न समानवाक्यस्थमिति भावः ॥ अनुषङ्गेति ॥ अनुषङ्गो हि तत्सजातीयशब्दान्तरकल्पना, उपात्तस्यैव तदर्थकत्वं वा । तत्रोपात्तस्यान्वयाभावेन समानवाक्यत्वं दुरुपपादमिति भावः ॥ कतिङिति ॥ एकशब्दो हि तत्र समानवाचीति भावः ॥

नलोपाभावात् । अग्निमन् । अग्निमन्थौ । अग्निमन्थः ॥ थान्ताः ॥

ङकार इति ॥ आन्तरतम्यादिति भावः ॥ ह्रस्वव्यञ्जनयोरिति ॥ व्यञ्जनस्य हि ह्रस्व ईषत्सदृशो, दीर्घस्तु विसदृश इति भावः॥ उक्तं चेति॥ वार्त्तिककृतेति शेषः । केचित्तु पूर्वस्यैव मुत्वादमुण्ड्मित्युदाहरन्ति।तद्भाष्या-ऽऽदौ नोक्तमित्युपेक्षितम् ॥

उद ईत् ॥ अच इत्यस्यापवादः ॥ चान्ताः ॥

अत्वसन्तस्य चाधातोः ॥ इहाधातोरिति योगो विभज्यते। तत्सामर्थ्यादनन्तरस्यासन्तस्यैव प्रतिषेधो,नात्वन्तस्येति कैयटहरदत्तादयः॥ तदेतदर्शयति ॥ धातुभिन्नासन्तस्येति ॥

उभे अभ्यस्तम् ॥ द्वे इत्यनुवृत्त्यैव सिद्धे उभेग्रहणं समुदायप्रतिपत्त्यर्थमिति व्याचष्टे ॥ उभे समुदिते इति ॥ अन्यथा हि नेनिजतीत्यत्राऽभ्यस्तानामादिरित्याद्युदात्तत्वं प्रत्येकं पर्यायेण स्यात् ॥

जक्षित्यादयः षट् ॥ जक्ष् इति पृथक् पदम् । इतिशब्देन जक्षितिरेव परामृश्यते, इति आदिर्येषामित्यतद्गुणसंविज्ञानो बहुव्रीहिस्तदेतदाह॥ षड् धातवोऽन्ये इति ॥ तान्ताः ॥

गोपायतीति गुप् । किपि विवक्षिते, आयादय आर्द्धधातुके वेत्यायाभावः ॥ पान्ताः ॥

त्यदादिषु ॥ अनालोचने किम् । तं पश्यतीति तदृशः । कर्मण्यण् । तादृशादयस्तु रूढिशब्दत्वादसताऽप्यवयवार्थेन व्युत्पाद्यन्ते । अत एव

केचित्तु पूर्वस्यैवेति ॥ अदसोद्रेः पृथङ् मुत्वमिति पृथग्वाक्यम् । तेन कदाचित् पूर्वस्येति तदाशयः ॥ उपेक्षितमिति ॥ केचित्त्वदेतत्येत्यस्य वैयर्थ्यापत्तेश्चेत्यपि बोध्यम् ॥

विभज्यते इति ॥ तत्र चासन्तस्येत्येकदेशे स्वरितत्वप्रतिज्ञानात्तावत एव तत्र सम्बन्ध इति भावः। अनु इति वा लुप्तषष्ठीकं पृथक् पदम् ॥ कैयटेति ॥ उगिदचामिति सूत्रे हि तेनेदमुक्तम् ॥

द्वे इत्यनुवृत्त्यैवेति । अनुवृत्तं च पूर्वोऽभ्यास इत्यादाविवानुवाद्यमिति भावः। समुदायेति ॥ गर्गाः शतं दण्ड्यन्तामित्यत्रेवेति भावः । अन्यथा ब्राह्मणभोजन-न्यायेन प्रत्येकं संज्ञा स्यादिति भावः॥ अन्यथा-प्रत्येकं संज्ञायाम् ॥ अभ्यस्तानामिति ॥ अनिटि अजादौ लसार्वधातुकेऽभ्यस्तानामादिरुदात्त इति तदर्थः ॥

इति आदिरिति ॥ आदिशब्दः पूर्ववर्त्तिवाची ॥

अज्ञानार्थाद् दृशेरिति सङ्गच्छते । भाष्ये तु कर्मकर्तरि व्युत्पत्तिर्दर्शितेति । तमिवेमं पश्यन्ति जनाः । स इवायं पश्यति । ज्ञानविषयो भवतीत्यर्थात् । तत्र विषयत्वापत्तिमात्रवृत्तित्वेऽपि विषयीकरणावृत्तित्वादज्ञानार्थादिति सङ्गच्छते॥

नशेर्वा ॥ अत्र झल्यपीत्यपाणिनीयम् । नष्टमित्यादावतिप्रसक्तं च ॥ नगिति ।-षडगकाः प्राग्वत् ॥ शान्ताः ॥

नुम्विसर्जनीयशर्व्यवायेऽपि ॥ ष्टुत्वेनेति ॥ सनः सस्य रुत्वविसर्गयोः कृतयोर्वा शरीति विकल्पात् पक्षे सकारः । तेन शरा व्यवाये सुपः सस्य षत्वं पूर्वस्य ष्टुत्वं, न त्वादेशप्रत्यययोरिति षः । अपदान्तस्येति निषेधादिति भावः । एवं स्थिते सकारग्रहणेन सिद्धे शरग्रहणस्य प्रयोजनं चिन्त्यम् ॥ व्याख्यानादिति ॥ असम्भवादिति हरदत्तोक्तिर्नादर्तव्या । सुहिन्सु इत्यत्र सम्भवादिति भावः॥ संयोगान्तेति ॥ न चास्मिन् कर्त्तव्ये बहिरङ्गत्वेनातो लोपस्यासिद्धत्वं शङ्क्यम् । पदसंज्ञासापेक्षत्वेन संयोगान्तलोपस्यैव बहिरङ्गत्वात् । कथं तर्हि, काव्यं कलत्रं शाल्वं वाऽऽचक्षाणे संयोगान्तलोपो नेति प्रागुक्तमितिचेन्न । तत्र, यणः प्रतिषेधो न वा झलो लोपादिति पक्षद्वयेऽपि लोपाभावे निर्णीते तदैकरूप्याय पूर्वं पूर्वमन्तरङ्गमिति ग्रहीतुं युक्तम् । अतिदेशेन लभ्यस्य पदत्वस्य तत्प्रयुक्तलोपस्य च लक्ष्यपूर्वभागे विश्रान्तेः स्पष्टत्वात् । इह त्वाद्यपक्षद्वये संयोगान्तलोपस्य स्पष्टतया तदैकरूप्याय बहिर्भूतनिमित्तापेक्षं बहिरङ्गमित्यस्यैव न्याय्यत्वादिति दिक् ॥ तक्षिरक्षिभ्यामित्यादि ॥ यत्तु वदन्ति शुक्लं चक्रं शुक्लं वाऽऽचक्षाणेषु कलोपः।

भाष्ये तु कर्मकर्तरि व्युत्पत्तिर्दर्शितेति ॥ तमिवेमं पश्यन्ति जनाः सोऽयं स इव दृश्यमानस्तमिवात्मानं पश्यतीति भाष्ये उक्तम् । तत्राद्यारोपितप्रेषणपक्षे कर्मकर्तृत्वं पश्यतीत्यस्य च दर्शयतीत्यर्थ इति स्पष्टमेव । तत्राधिकारार्थत्वादज्ञानार्थत्वं बोध्यम । निवृत्तप्रेषणकर्मकर्त्तर्यपि सौकर्याय व्युत्पत्तिं दर्शयति ॥ तमिवेमित्यादि ॥ अत्र पक्षे कर्मणीत्यधिकारबाधः सामर्थ्यादिति बोध्यम ॥

पूर्वस्य – विसर्गस्थानिकसस्य ॥ अस्मिन् – संयोगान्तलोपे ॥ पूर्वं पूर्वमन्तरङ्गमित्याश्रित्येति भावः ॥ पदसंज्ञासापेक्षत्वेनेति । बहिर्भूतसुबनिमित्तकेत्यादिः । तदपेक्षया बह्वपेक्षत्वरूपं बहिरङ्गत्वं प्रबलमिति भावः ॥ प्रागुक्तमिति ॥ पूर्वं पूर्वमन्तरङ्गमित्याश्रित्याल्लोपासिद्धत्वेनेत्यादिः ॥ अतिदेशेनेति ॥ विभक्त्याश्रयस्यैकदेशविकृतन्यायेन लभ्यस्येत्यर्थः ॥ लक्ष्यपूर्वभागे इति ॥ काव्यादिशब्दरूपलक्ष्यस्य पूर्वभागे यावन्ते इत्यर्थः ॥ बहिर्भूतेति ॥ बहिर्भूतनिमित्तापेक्षत्वरूपबहिरङ्गत्वस्येत्यर्थः । च ॥ तस्तेषामनभिधानमेव । पूर्वं पूर्वमित्यस्य च पूर्वपूर्वनिमित्त-

शुल्। शुल्कौ । शुल्भ्याम् । चः। चक्कौ । चर्भ्याम् । शूः । शुक्कौ।शूर्भ्यामित्यादि । तत् सर्वमनेन प्रत्युक्तम्। अयं तु विशेषः । तग् रगित्यत्र संयोगान्तलोपो निर्विवादः । तत्र तु सोऽपि दुर्लभ इति॥ दिधगिति ॥ यत्तु दहेर्हो ढः, षढोरिति कत्वस्यासिद्धत्वात् संयोगान्तलोपे ढस्य जश्त्वे दिधडिति नैमिषीयेण उक्तम् । तत् प्रामादिकम् । दादेर्ध इति धत्वस्य दत्वापवादस्य जागरूकत्वात् । षान्ताः ॥

विद्वानिति ॥ विदेः शतुर्वसुः । अदादित्वाच्छ ो लुक् ॥सेदिवानिति॥ भाषायां सदवसश्रुव इति कसुः॥ सेदुष इति ॥ ननु तदनुबन्धकग्रहणे नाऽतदनुबन्धकस्येति परिभाषया,विदेः शतुर्वसुरित्यस्यैव वसोः सम्प्रसारणं युक्तं न तु कसोः । सत्यम् । वसोरुकारानुबन्धकरणं कसोः सामान्यग्रहणार्थम्। उगित्त्वस्य स्थानिवद्भावेनापि सिद्धेः । इह गमिप्रभृतिभ्यः कसुर्नोदाहृतश्छान्दसत्वात् । कवयस्तु प्रयुञ्जते । श्रेयांसि सर्वाण्यधिजग्मुषस्ते, तं तस्थिवांसं नगरोपकण्ठे इत्यादि छान्दसा अपि क्वचिद्भाषायां भवन्तीति मासश्छन्दसीति सामान्यापेक्षज्ञापकमाश्रित्य कथञ्चित् समाधेयम् ।

पुंसोऽसुङ् ॥ विवक्षित इति ॥ तेन परमपुमानित्यत्र परत्वादसुडि कृते समासान्तोदात्तत्वं भवदसुङ एवाकारस्य भवति । परसप्तम्यां तु नैतत् सिद्ध्येत् । सर्वनामस्थानोत्पत्तेः प्रागेव पुंशब्दोकारस्योदात्तत्वे कृते लंसनधर्मिणो हलः स्थाने तद्धर्मिणोऽनुदात्तस्यैवादेशस्य प्रसङ्गात् । न चोकारस्य कृतोऽपि स्वरोऽन्त्यत्वादिवर्त्तयिष्यते । असुङश्चान्त्यत्वात् करिष्यत इति वाच्यम् । अन्तरङ्गे स्वरे कर्त्तव्ये बहिरङ्गस्याऽसुङोऽसिद्धत्वादिति भावः । एतच्च कैयटहरदत्तादीनामनुरोधेनोक्तम् । वस्तुतस्तु परसप्तमीपक्षोऽपि सूपपादः । अकृतव्यूहपरिभाषाया अन्तरङ्गपरिभाषापवाद-

---

कमित्येवार्थ इत्यन्यत्र प्रपञ्चितम ॥ दुर्लभ इति ॥ यण्त्वादझल्त्वाच्चेति भावः ॥ स्थानिवद्भावेनापि सिद्धेरिति ॥ ङित्त्ववदिति भावः । न च तदनुबन्धपरिभाषा प्रवृत्त्यर्थमेव तत् । निरनुबन्धकत्वेनापि तत्सिद्धेः ॥ कथञ्चिदिति ॥ तेन, षढ्न इति सूत्रे छन्दसीति निरर्थकल्पनया तस्य चारितार्थ्येनैतदर्थज्ञापकत्वासम्भव इति सूचितम् ॥

प्रागेवेति ॥ अन्तरङ्गत्वादिति भावः ॥ निवर्तयिष्यते इति ॥ अकृतव्यूहपरिभाषया पूर्वमेव न प्रवर्तयिष्यते इति भावः ॥ अन्तरङ्गे इति ॥ अकृतव्यूहपरिभाषा तु नास्त्येवेति भावः । तदेवाह ॥ कैयटेत्यादि ॥ भाष्येऽप्युपदेशिवद्भावकार्यं कर्त्तव्यमित्युक्तम् ॥ अकृत[illegible]परिभाषया इति ॥ सूत्रे इति शेषः ॥

त्वादित्यवधेयम् । नन्वेतदसम्भवेऽन्त्य [illegible] कृते [illegible] स्वरेण सति शिष्टेन प्रत्ययस्वरस्य बाधादनुदात्तत्वं स्यात् । इत्येवं [illegible] । पुमान् पुमांसं परिपात्वित्यादौ तथैव पाठादितिचेन्न सत्यम् । डुम्सुनो नित्करणसामर्थ्यात् प्रातिपदिकस्वरो न भवतीति हरदत्तः । नन्वेतद् [illegible] म् । प्रकृतिप्रत्ययविभागशून्येष्वेव फिष इत्यस्य प्रवृत्तेरिति चेत् सत्यम् । क्वचित् सखण्डेष्वपि प्रवृत्तावि दं लिङ्गम् । यद्यपि, असिद्धं बहिरङ्गमित्येवेदं सिद्धं, तथाऽपि बहिरङ्गपरिभाषाया अनित्यत्वमपि ज्ञापयितुं नित्करणमिति निष्कर्षः ॥ उच्चारणार्थ इति ॥ यत्तु प्र [illegible] । यच्च तत्पौत्रेण व्याख्यातमुकार उगित्कार्यार्थ इति तदसङ्गतमिति भावः ॥ हे पुमन्निति ॥ असम्बुद्धावित्युक्तेर्न दीर्घः ॥ पुंस्वति ॥ संयोगान्तलोपे मोऽनुस्वारः । नुम्स्थानिकस्यैवा स्वारस्योपलक्षणान्नुम्विसर्जनीयेति न षत्वम् ॥ अस्य सम्बुद्धाविति ॥ एतच्च वाचनिकम् । यत्तु हरदत्तादय आहुः । सोर्डेति वाच्यम्, अनङ् सावित्ति वचनेन क्वचिदनङ एव श्रवणस्य ज्ञापितत्वादेतत्सिद्धमिति । तत्तु प्रागेव दूषितम् । अवृत्तपरिभाषया वा समाधेयम् ॥

अदस औ सुलोपश्च । ननु तोरेवौकारो विधीयतां, उदात्तत्वेनाविति सिद्धं, किं सुलोपविधानेन । मैवम् । असकौ स्त्रीत्यत्र टापि प्रत्ययस्थादितीत्वप्रसङ्गात् ॥ असुक इति ॥ औत्वाभावे त्यदाद्यत्वं सादुत्वम् । अमुक इति त्वसाधुः । सत्वेन मुत्वस्य बाधात् । एवममुकी अमुकशर्मा इत्यादयोऽप्यसाधव एव । अमुका अदकःशर्मेत्यादेरेव न्याय्यत्वात् ॥

नन्वेतदिति॥अन्तोदात्तत्ववारणाय नित्करणसामर्थ्यश्रयणमित्यर्थः॥फिट्स्वरस्यैवात्र प्राप्तेरिति भावः ॥ इदम् – डुम्सुनो नित्त्वम् ॥यद्यप्यसिद्धमिति॥ नित्त्वाभावेऽपि, फिषोऽन्त इति कर्तव्ये असुङो बहिरङ्गस्यासिद्धत्वात् प्रत्ययस्वरेणोकारस्योदात्तत्वे एव स्थिते ततोऽसुङनुदात्त एवेति भावः ॥नित्करणमिति॥ व्युत्पत्तिपक्षे इत्यादिः ॥ उङाविताविति ॥ लोपेतरेत्संज्ञाप्रयुक्तकार्यार्थमिति भावः । तद् ध्वनयन् तद्व्याख्यामाह ॥ उगित्कार्यार्थमिति ॥ इत्वप्रसङ्गादिति ॥ न चैत्वविधायके आआपीति प्रश्लिष्टनिर्देशान्नेत्वम् । कारिकेत्यादावपि इत्वानापत्तेः । तस्मात् प्रश्लिष्टनिर्देशो नात्रेत्यत्रैव भाष्ये स्पष्टम् । एतेन विभक्तावित्वस्य त्यदादीनाम इत्यत्र विषयसप्तमीत्वमपास्तम् । एवं हि विभक्त्युत्पत्तेः पूर्वं त्यदाद्यत्वे टापि सावदस इत्यन्त्यस्यौत्वेऽपि स्थानिवत्त्वेनाप्त्वादित्वापत्तेः निर्दिष्टपरिभाषायां सत्यां विषयसप्तम्या वक्तुमशक्यत्वाच्चेति दिक् ॥ न्याय्यत्वादिति ॥ क्वचित् सान्तत्वेन मुत्वाप्राप्तेः, क्वचित् सत्वेन बाधादिति भावः ॥

एत ईद् बहुवचने ॥ पारिभाषिकस्य ग्रहणे अमीभिरित्यादिसिद्धावपि जसि अमी इति न सिद्ध्येत् । न ह्यत्रैकारस्य बहुवचनपरताऽस्त्यतो व्याचष्टे ॥ बहर्थोक्ताविति ॥

न मु ने ॥ ने इति विषयसप्तमीत्याह ॥ नाभावे कर्त्तव्ये इति ॥ अन्यथा घेः परत्वाभावान्नाभावो न स्यादिति भावः । नन्वेवमपि कृते नाभावे, सुपि चेति दीर्घः स्यात् । दीर्घं प्रति मुत्वस्यासिद्धत्वादत आह ॥ कृते चेति ॥ संनिपातपरिभाषया वा समाधेयम् । अत्रेदमवधेयम् । अधुनेतिवदमुनेति वक्तव्ये, न मु न इत्युक्तिर्नेति योगविभागार्था । तेन रामो रामेभ्य इत्यादि सिद्ध्यति । अन्यथा रोरसिद्धतयोकारस्येत्संज्ञालोपौ कथं स्याताम् । न चानुनासिकनिर्देशसामर्थ्यादित्संज्ञालोपौ प्रत्यसिद्धत्वं नेति वाच्यम् । तरुलामित्यादौ, हशि चेत्यस्य व्यावृत्तयेऽतो रोरित्यत्रानुनासिकस्यैव निर्देशेन तत्रैव चरितार्थत्वात् । न चाऽतो रोरित्यत्र मास्त्वनुनासिकः प्रतिपदोक्तग्रहणेनैव निर्वाहादिति वाच्यम् । एवमपि, देव रुहीत्यत्र रुधातोर्दुर्वारत्वात् । राम इत्यादावप्यनुनासिकस्य रोः श्रवणस्यापाद्यमानतया चरितार्थत्वस्य सुवचत्वाच्च । एवञ्च स्थानिवत्सूत्रस्यापि प्रवृत्तौ पदत्वाद्विसर्गोऽपि लभ्यते । प्रत्ययः परश्चेत्यादिनिर्देशा यत्वविधावश्ग्रहणं चेह लिङ्गमिति दिक् ॥ इति हलन्ताः पुँल्लिङ्गाः ॥

नहो धः ॥ द इत्येव नोक्तम् । तथा हि सति नद्धमित्यत्र रदाभ्यामिति नत्वं स्यात् । झषस्तथोरिति च न स्यात् । अत्रेदमवधेयम् । सुष्ठु अनड्वाहो यस्यामिति बहुव्रीहौ स्वनड्वानित्यादि पुंवदेव रूपम् । यत्तु गौरादिङीषं कृत्वा स्वनड्वाहीत्युदाजहरुस्तच्चिन्त्यम् । अनुपसर्जनादित्यऽधिकारविरोधात् ॥ गीरिति ॥ गॄ निगरणे शब्दे च । क्विप् । ऋत इदितीत्त्वम् । र्वोरुपधाया दीर्घः ॥ पूरिति ॥ पॄ पालनपूरणयोः । उदोष्ठ्यपूर्वस्येत्युत्त्वम् ॥ आशिषाविति ॥ आशासः क्वावुपसंख्यानमित्युपधाया इत्त्वम् । शासिवसीति षत्वम् ॥ इति हलन्ताः स्त्रीलिङ्गाः ॥

न स्यादिति ॥ इनादेशगुणौ च स्यातामित्यपि बोध्यम् ॥ हशि चेत्यस्येति ॥ तर्वथमित्यादि ॥ रोरित्यस्य व्यावृत्त्यर्थमित्यपि बोध्यम् ॥ तत्रैव चरितार्थत्वादिति ॥ सामर्थ्याच्चोत्वं सर्वादेशः ॥ एवञ्च – योगविभागेनासिद्धत्वाभावे च ॥ अश्ग्रहणं चेति ॥ अत्र यद्वक्तव्यं तदुक्तं प्राक् ॥ इति हलन्ताः पुँल्लिङ्गाः ॥

नन्वु संनिपातपरिभाषया नत्वं न स्यादत आह ॥ झष इति ॥ धत्वे कृते सं-

अन्वादेश इति ॥ अम इति व्याख्यातः । तत्र लुका लुप्तत्वेऽपि वचनसामर्थ्यात् प्रत्ययलक्षणमित्याहुः । वस्तुतस्तु सूत्रे एव [illegible] । एनम् एनौ इत्यादि तु त्यदाद्यत्वेन सिद्धम् । क्लीबेऽमि लुका लुप्तेऽपि तकारोच्चारणसामर्थ्यादेनदादेशः । न चैवमेतच्छ्रुत इत्यत्रापि तदापत्तिः । एकपदाश्रयत्वेनान्तरङ्गे स्वमोर्लुकि चरितार्थत्वेन बहिरङ्गे सामासिके लुकि तदप्रवृत्तेः ॥

रोऽसुपि॥ अहर्भातीति॥ प्राचा तु अहन्नित्युपन्यस्तं, तदिहानुचितम्। अहोभ्यामित्याद्यर्थतया कथञ्चिद्योज्यम् ॥ असृक्शब्दस्त्विति ॥ एतच्च क्षीरस्वामिग्रन्थे स्पष्टम् ॥ बहूर्ज्जीति, अन्त्यादिति च वाचनिकम् । तथाच वार्तिकम् ॥ बहूर्जि प्रतिषेधः ॥ अन्त्यात् पूर्वो नुमित्येके इति ॥ भाष्ये तु अचः परो यो झल् तदन्तस्य नुमित्यर्थमाश्रित्य प्रथमं वार्तिकं प्रत्याख्यातम्। एवं तु, उर्दे माने, गर्हे गर्हायामित्यादीनामपि क्विबन्तानां नुमा न

निपातपरिभाषायाअनित्यत्वान्नद्धमित्यादौजश्त्वंबोध्यः॥इति हलन्ताःस्त्रीलिङ्गाः॥

अम्येवेति ॥ औशसादिष्वनेनैव सिद्धिरिति भावः ॥ त्यदाद्यत्वेनेति ॥ न च येन नाप्राप्तिन्यायेनैतदस्त्यदाद्यत्वापवादत्वेन तत्र कृते कथं त्यदाद्यत्वम् । न चोपसर्जन एतच्चरितार्थम् । त्यदाद्यत्वेन सिद्धमिति भाष्यासङ्गत्यापत्तेः । एनदोऽप्युपसर्जने, एतदस्रतसोरिति साहचर्येणाप्रवृत्तेः स्वीकारात् । नच नपुंसकेऽपि तच्चरितार्थं, द्वितीयादिग्रहणस्यैवमप्यचरितार्थ्यादिति वाच्यम् । आर्धधातुके इत्येतत्साहचर्येणास्यापि द्वितीयादिविषये पूर्वमेव प्रवृत्तेरित्याशयात् एतत्सर्वं भाष्ये यद्येनत् क्रियत इत्याद्येकदेश्युक्त्या ध्वनितम् ॥ स्वमोर्लुकीति ॥ तद्विषये, न लुमतेति निषेधबाधेन चरितार्थ्येन बहिरङ्गलुग्विषये तदबाधे न मानमिति भावः । वस्तुत एतत्सर्वमत्यकैयटानुरोधेन तकारोच्चारणसार्थ्येन नपुंसकलुकीवात्रापि सामर्थ्यादेवैनत्प्रवृत्तेः । न च बहिरङ्गत्वम् । लुग्विषये बहिरङ्गपरिभाषाप्रवृत्तेः । अत एवैनदादेशे एतच्छ्रुतक इति न सिद्ध्यति । एनच्छ्रुतक इति प्राप्नोतीति भाष्यं सङ्गच्छते । एतद्विधानेन एतत्सूत्रविषये न लुमतेत्यस्याप्रवृत्तिरिति तदाशयः । वस्तुत एषामनभिधानमेव । अस्यां शङ्कायां यथालक्षणमप्रयुक्ते इति भाष्योक्तेः । विषयसप्तम्यां मानाभावे त्वेनैनतौ पृथग्वक्तव्यौ इत्याहुः ॥ अचः पर इति ॥ नपुंसकस्येति सूत्रेऽञ्ग्रहणसामर्थ्येनावृत्त्याऽच इत्यस्य झल्विशेषणत्वमन्यथेगन्तानामिकोऽचीत्येव सिद्ध्या एजन्तेषु नपुंसकह्रस्वत्वेन चाकारग्रहणमेव कुर्यात् । आवृत्तौ मानं च, दाण्डिनायनेति सूत्रे द्विरण्मयानीति निर्देश एव । काष्ठतक्षीत्यादौ ल्वजातेरचः परत्वाद्भवत्येव नुम् । ऊर्क्शब्दादौ तु नेति भावस्तदाह ॥ एवमिति ॥ एतेन युज्शब्दान्नपुंसके

भाव्यमेव । यथोत्तरं मुनीनां प्रामाण्यादिति दिक् ॥ अल्लोपस्येति ॥ क्वौ लुप्तं न स्थानिवदिति तु नेहाश्रीयते । तस्य क्वाचित्कत्वात् । क्वौ विधिं प्रति न स्थानिवदित्यस्यैव सार्वत्रिकत्वादिति स्पष्टमाकरे ॥ अश्वाक्षिभूता-नीति ॥ सप्तविंशत्यधिका पञ्चशती इत्यर्थः । तथाहि । सौ नवानामन्त्यस्य द्वित्वेऽष्टादश । औङि चतुर्णां मध्ये पूजार्थानां त्रयाणां अद्वित्वे सप्त । अनु-नासिकस्तु नास्ति । अगृह्यत्वात् । जसि अद्वित्वस्यानुनासिकस्य च विक-ल्पाद् द्वादश । सङ्कलनया सप्तत्रिंशत् । एवं द्वितीयायामपि । टायां चतुर्दश। भ्यामि अष्टचत्वारिंशत् । भप्राग्वर्णयमानां द्वित्वात् । भिसि चतुर्विंशतिः । ङयि सप्त । अनुनासिकस्तु नास्ति । एकारस्यानण्त्वात् । भ्यसि भ्याम्-वत् । ङसौ ङसादिपञ्चके चतुर्दश । सुपि गत्यर्थे त्रयाणां ककारषकारयो-र्द्वित्वेन उकारस्यानुनासिकेन चतुर्विंशतिः । एवं कुक्पक्षे षण्णां ङषयोर्द्वित्वे अनुनासिके च अष्टचत्वारिंशत् । कुगभावे त्रयाणां ङकारद्वित्वे अनुनासिके च द्वादश । सु १८ औ७ जस्१२ अम्१८ औ७ शस्१२ टा १४ भ्यां ४८ भिस् २४ ङे ७ भ्यां ४८ भ्यस् ४८ ङसि १४ भ्यां ४८ भ्यस् ४८ ङस् ओस् आम् ङि ओस् प्रत्येकम् १४ सुप् ४८ । अत्रेदमवधेयम् । पूजायां जसि नुमागमे कृते तस्य पाक्षिके द्वित्वे ञकारत्रयसहितं रूपषट्कम् । एवं शस्यपीति सङ्कलनया द्वादश । तथाच रूपं ग्रहाग्नि ५३९ भूताख्यमिति भाष्यव्यतिरिक्तमते इति दिक् ॥ यत्तु वदन्ति—

ऊह्यमेवं द्वित्वा नार्द्वित्वलोपविकल्पनैः ।
अष्टपञ्चाशतो वृद्ध्या त्रिसप्तत्यधिकं शतम्, इति ॥

तच्चिन्त्यम् । पुनर्द्वित्वस्याप्रमाणिकत्वाद् रूपानन्त्यप्रसङ्गाच्च । अष्ट-

---

शौ नपुंसकस्येति युजेरिति च नुम्ग्रहणात्तदा । युजेरित्यस्य नित्यत्वात् पूर्वं प्रवृत्तौ, अचः परङ्गलोऽभावेन नपुंसकस्येत्यस्याप्राप्तेः । वस्तुत ऊर्जादेः क्विपि नपुंसके नुम्विषयेऽनभिधानमेव । वार्त्तिकानुरोधात् । अन्यथा भाष्यवार्त्तिकयोः फलभेदापत्तेरित्याहुः ॥ आकरे इति ॥ दीधीवेवीटामिति सूत्रे, न पदान्तसूत्रे च भाष्यकैयटयोरित्यर्थः ॥ सङ्कलनयेति ॥ तत्कृत्यं मन्दबोधनम् ॥ चतुर्दशेति ॥ पूजार्थानां त्रयाणां भद्वित्वात् सप्तानाम् नासिकविकल्पाच्च ॥ चतुर्विंश-तिरिति ॥ भप्राग्वर्तिवर्णविसर्गद्वित्वात् । विसर्गे तु नानुनासिकः । अप्रगृह्य-स्येति पर्युदासेनाक्षरसमाम्नायिकेष्वेव तत्प्रवृत्तेः ॥ ङषयोरिति ॥ षकारद्वित्वं, शरः खय इत्यनेन ॥ भाष्यव्यतिरिक्तमत इति ॥ भाष्यमतेऽचः परो यो झलित्यर्थेन प्रकृतेऽचः परङ्गल्जातेरभावान्नुमोऽप्राप्तेः । एवञ्चैतान्यसाधून्येवेति भावः ॥

प्रश्नाशतो वृद्धावुपपत्त्यभावाच्चेति दिक् ॥ तिरश्ची इति ॥ मत्वादच इत्यल्लोपः। अलोप इति वचनात्तिर्यादेशाभावः ॥ स्वक्षिति ॥ शोभनः आपोऽस्मिन् सरसीति बहुव्रीहिः । ऋकपूरिति समासान्ते प्राप्ते, न जनादिति निषेधः। यच्चनित्यत्वादिति प्राचोक्तं, तत्प्रामादिकम् । द्वयन्तरुपसर्गेभ्य इति तु न भवति । तत्राप इति कृतसमासान्तस्यानुकरणमिति वक्ष्यमाणत्वात् ॥ सुपुमांसीति ॥ पुंसोऽसुङिति सूत्रे सुटीति व्याचक्षाणस्य प्राचो मते शासि नैतत् सिद्ध्येत् । औङि चातिव्याप्तिः । अस्माकं तु सर्वनामस्थान इति यथासूत्रं ब्रुवतां सर्वेष्टसिद्धिरिति भावः ॥ इति हलन्ता नपुंसकलिङ्गाः ॥

स्वरादिनिपातमव्ययम् ॥ स्वरादयो निपाताश्चेति समाहारद्वन्द्वः । स्वरिति स्वर्गे परलोके च । अन्तरिति मध्ये । प्रातरिति प्रत्यूषे । पुनरिति अप्रथमे विशेषे च । सनुतर् अन्तर्धाने । स्वराद्याः पञ्च रेफान्ताः । उच्चैस् महति । नीचैस् अल्पे । शनैस् क्रियामान्द्ये । ऋधक् सत्ये । वियोगशीघ्रसामीप्यलाघवेष्वित्यन्ये । ऋते वर्जने । युगपदित्येककाले । आराद् दूरसमीपयोः । पृथक् भिन्ने । ह्यस् अतीतेऽह्नि । श्वस् अनागतेऽह्नि । दिवा दिवसे । रात्राविति निशि । सायमिति निशामुखे । चिरमिति बहुकाले । मनाक् ईषदिमावल्पे । जोषं सुखे मौने च । तूष्णीमिति मौने । बहिस् अवस् इमौ बाह्ये । समयेति समीपे मध्ये च । निकषेत्यन्तिके । स्वयमित्यात्मनेत्यर्थे । वृथेति व्यर्थे । नक्तमिति रात्रौ । नञ् निषेधे । हेताविति निमित्ते । इद्धेति प्राकाश्ये । अद्धा इति स्फुटाऽवधारणयोः । तत्त्वातिशययोरित्येके । सामीत्यर्द्धजुगुप्सयोः । वत्, तेन तुल्यमित्यादिभिर्विहितो वतिप्रत्ययः । यस्तु उपसर्गाद्धात्वर्थ इति विहितः, स नेह गृह्यते । यदुद्वतो निवतो यासि । सना सनत् सनात् इत्येते नित्ये । उपधेति भेदे । तिरस् अन्तर्द्धौ तिर्यगर्थे परिभवे च । अन्तरेति मध्ये विनार्थे च । अन्तरेणेति वर्जने । ज्योगिति काले भूयस्त्वे प्रश्ने शीघ्रार्थे सम्प्रत्यर्थे च । कमिति वारिमूर्द्धनिन्दासुखेषु । शं सुखे । सहसेत्याकस्मिकाविमर्शयोः । विनेति वर्जने । नानेत्यनेकविनार्थयोः । स्वस्तीति मङ्गले । स्वधा पितृदाने । अलं

उपपत्त्यभावादिति ॥ नियमे मानाभावादिति भावः ॥ प्रामादिकमिति ॥ शास्त्रेणैव सिद्धेरिति भावः ॥ इति हलन्ता नपुंसकलिङ्गाः ॥

भूषणपर्याप्तिशक्तिवारणनिषेधेषु । वषट् वौषट् श्रौषट् एते हविर्दाने । अन्यदित्यन्यार्थे । अस्तीति सत्तायाम् । उपांश्वित्यप्रकाशोच्चारणरहस्ययोः । क्षमेति क्षान्तौ । विहायसेति वियदर्थे । दोषेति रात्रौ । मृषा मिथ्येत्येतौ वितथे । मुधेति व्यर्थे । पुरेत्यविरते चिरातीते भविष्यदासन्ने च । मिथो मिथस् एतौ रहस्सहार्थयोः । प्रायस् इति बाहुल्ये । मुहुस् पुनरर्थे । प्रबाहुकं समकाले सिद्धार्थे च । प्रवाहिकेति पाठान्तरम् । आर्यहलमिति बलात्कारे । शाकटायनस्तु — आर्येति प्रतिबन्धे, हलमिति प्रतिषेधविवादयोरित्याह । अभीक्ष्णमिति पौनःपुन्ये । साकं सार्द्धमेतौ सहार्थौ । नमस् नतौ । हिरुक् वर्जने । धिक् निन्दाभर्त्सनयोः । अम् शैघ्र्ये अल्पे च । आम् अङ्गीकारे । किमेत्तिङव्ययेति कास्प्रत्ययादित्यादिभिश्च विहितः प्रत्ययोऽपीह गृह्यते इत्येके । पपाचतराम् । कारयामास । प्रताम् ग्लानौ प्रशान् समानार्थे । प्रतान् विस्तारे । मा माङ् एतौ शङ्कानिषेधयोः ॥ आकृतिगण इति ॥ तेनान्येऽपि ज्ञेयाः । तथाहि । कामं स्वाच्छन्द्ये । प्रकामामित्यतिशये । भूय इति पुनरर्थे । साम्प्रतमिति न्याय्ये । परमिति किन्त्वर्थे । साक्षात् प्रत्यक्षे । साचि तिर्यगर्थे । सत्यमित्यर्द्धाङ्गीकारे । मङ्क्षु आशु एतौ शैघ्र्ये । संवत् वर्षे । अवश्यं निश्चये । सपदि शैघ्र्ये । बलवदित्यतिशये । प्रादुस् आविस् इति प्रकाशे अनिशं नित्यं नित्यदा अजस्रं सन्ततमेते सातत्ये । उषेति रात्रौ । रोदसी द्यावापृथिव्यर्थे । ॐम् इत्यङ्गीकारे ब्रह्मणि च । भूरिति पृथिव्याम् । भुव इत्यन्तरिक्षे । झगिति झटिति तरसा इति शैघ्र्ये । सुष्ठु प्रशंसायाम् । दुष्ठु अतिकष्टे । सु पूजायाम् । अह आश्चर्ये । कु इति कुत्सितेषदर्थयोः । अञ्जसा तत्त्वशीघ्रार्थयोः । मिथु इति द्वावित्यर्थे । भाजक् इति शैघ्र्ये । चिराय चिररात्राय चिरस्य चिरं चिरेण चिरादित्येते चिरार्थकाः । अस्तमिति विनाशे । आनुषक् आनुपूर्व्ये । अनुषक् अनुमाने । अम्नस् शीघ्रसाम्प्रतिकयोः । स्थाने इति युक्ते । वरमितीषदुत्कर्षे । सुदि शुक्लपक्षे । वदि कृष्णपक्षे, इत्यादि । वेति समुच्चयादिषु । वा स्याद्विकल्पोपमयोरिवार्थेऽपि समुच्चये । हेति प्रसिद्धौ । अहेति पूजायाम् । एवेत्यवधारणेऽनवक्लृप्तौ च । एवमिति उक्तपरामर्शे । नूनमिति

इत्यादिभिरिति ॥ आदिना, तत्र तस्येव, तदर्हम् ॥ इत्येक इति ॥ अत्राशुचिबीजं, किमेत्तिङ इति विहितस्य तद्धितश्चेत्यनेन सिद्धिः । कास्प्रत्ययादिति

निश्चये तर्के च। शश्वदिति पौनःपुन्ये नित्ये सदार्थे च। युगपदिति ऐककाल्ये। भूयस् पुनरर्थे आधिक्ये च। कूपदिति प्रश्ने प्रशंसायां च। कुविदिति भूत्यर्थे प्रशंसायां च। नेदिति शङ्कायां प्रतिषेधविचारसमुच्चयेषु। चेदिति यद्यर्थे। चण् अयं चेदर्थे णित्। समुच्चायादौ त्वननुबन्धः। कच्चिदिति इष्टप्रश्ने। यत्रेत्यनवक्लृप्त्यमर्षगर्हाश्चर्येषु। नाऽवकल्पयामि न मर्षये गर्हे आश्चर्ये वा यत्रभवान् वृषलं याजयेत्। नहेति प्रत्यारम्भे। हंतेति हर्षे विषादे अनुकम्पायां वाक्यारम्भे च। माकिः माकिं नकिरिति त्रयोऽपि वर्जने। माङ्नञौ स्वरादिषु उक्तौ। इह पाठस्तु निपातत्वार्थः। तेन आद्युदात्तत्वं सिद्ध्यतीति प्राञ्चः। तच्चिन्त्यम्। फिट्स्वरेणाऽपीष्टसिद्धेः। यदप्याहुः। सत्त्ववचनानामपि अव्ययसंज्ञार्थं स्वरादिपाठ इति। तदपि चिन्त्यम्। लक्ष्मीवाचकस्यापि माशब्दस्याव्ययत्वापत्तेः। तस्मादुभयत्र पाठे फलं चिन्त्यम्। यावत् तावत् एतौ साकल्यावधिमानावधारणेषु। साकल्ये। यावत् कार्यं तावत् कृतम्। अवधौ। यावद् गन्तव्यं तावत्तिष्ठ। माने। यावद्दत्तं तावद् भुक्तम्। अवधारणे। यावदमन्त्रं ब्राह्मणानामन्त्रयस्व। त्वै विशेषवितर्कयोः। द्वै वितर्के। न्वै इति पाठान्तरम्। रै दाने अनादरे च। रै करोति ददातीत्यर्थः। त्वं रै किं करिष्यसि। श्रौषट् वौषट् एतौ हविर्दाने। स्वाहा देवताभ्यो दाने। स्वधेति पितृभ्यः। श्रौषडादीनामनेकाचामुभयत्र पाठः स्वरभेदार्थः। तुमिति तुङ्कारे। गुरुं तुङ्कृत्य हुङ्कृत्य तथाहि निदर्शने। खलु निषेधे वाक्यालङ्कारे निश्चये च। किलेति वार्तायामलीके च। अथेति मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्याधिकारप्रतिज्ञासमुच्चयेषु। अयं स्वरादिरपि। तेन मङ्गलवाचकस्य सत्त्वार्थत्वेऽप्यव्ययत्वं सिद्ध्यति। तथाच श्रीहर्षः—

उदस्य कुम्भीरथ शातकुम्भजाश्चतुष्कचारुत्विषि वेदिकोदरे।
यथाकुलचारमथावनीन्द्रजां पुरन्ध्रिवर्गः स्नपयाम्बभूव ताम्॥

अत्र हि, अथ स्नपयाम्बभूवेत्यस्य मङ्गलं स्नपनं चकारेत्यर्थः। निपातस्तु स्वरूपेणैव मङ्गलं मृदङ्गध्वनिवत्। सुष्ठु। स्वरभेदार्थः पाठः। स्मेत्यतीते पादपूरणे च। आदहेत्युपक्रमार्हिंसाकुत्सनेषु॥ अवदत्तेति॥ इहानुपसर्गत्वादच उपसर्गात्त इति न भवति। अहमिति सुबन्त-

---

विहितात् परस्याम इत्यनेन लुक्सिद्ध्या तस्य तत्त्वे फलाभाव इति॥ अनुपसर्ग-

प्रतिरूपकम् । एतेन, गेये केन विनीतौ वामिति व्याख्यातम् । युवामर्थे हि वामित्यव्ययम् । अस्तीति तिङन्तप्रतिरूपकम् । एवमस्मीत्यहमर्थे । त्वामस्मि वच्मि । आहेत्युवाचेत्यर्थे । आसेति बभूवेत्यर्थे ॥ इत्यादि ॥ अ इति संबोधनेऽधिक्षेपे निषेधे च । आ इति वाक्यस्मरणयोः । इ इति संबोधनजुगुप्साविस्मयेषु । ई उ ऊ ए ऐ ओ औ संबोधने । पशु सम्यगर्थे । पशु मन्यमानाः । शुकं शैघ्र्ये । यथाकथा चेत्यनादरे । पाट् प्याट् अङ्ग हे है भोऽय्ये एते संबोधने । धेति हिंसाप्रातिलोम्यपादपूरणेषु । विषु नानार्थे । एकपदे इत्यकस्मादित्यर्थे । पुत् कुत्सायां हेतौ । आत इतोऽपीत्यर्थे ॥ आकृतिगण इति ॥ तद्यथा । यत् तत् इति हेतौ । आहोस्वित् विकल्पे । सिम सर्वतोभावे । कं पादपूरणे । सुकमतिशये । अनुकं वितर्के । शम्बट् अन्तःकरणे आभिमुख्ये च । व पादपूरणे इवार्थे च । दिष्ट्येत्यानन्दे । चटु चाटु प्रियवाक्ये । हुमिति भर्त्सने । इवेति सादृश्ये । अद्यत्वे इदानीमित्यर्थे इत्यादि । अत्रेदमवधेयम् । स्वरादिचाद्योराकृतिगणत्वाविशेषेऽपि येषां निपातस्वरो दृष्टस्ते चादिषु । अन्ये स्वरादिषु । स्वरद्वयभाजस्तूभयत्र बोद्धव्याः । यथा उतशब्दः स्वरादिषु । ईड्यो नूतनैरुतेत्यन्तोदात्तप्रयोगात् । यत्तु उतशब्दस्य स्वरादितामुक्त्वा निपातस्वरमाशङ्क्यान्तोदात्तनिपातनमाश्रित्य समादधुस्तद्भ्रमसात् । स्वरादेरनिपातत्वात् । अन्तोदात्तत्वनिपातनवैयर्थ्याच्च । यदपि काशिकायामुक्तम् । स्वर् शनैस् ऋधक् दिवा वृथा नक्तमित्यादयोऽन्तोदात्ता इति । यच्च सनत् सनात् एवमादय आद्युदात्ता इति । तत्सर्वं भ्रामादिकम् । लक्ष्यविसंवादान्निर्मूलत्वाच्चेति शब्दकौस्तुभे प्रपञ्चितम् ॥

तद्धितश्चासर्वविभक्तिः ॥ सर्वेति ॥ वचनत्रयात्मिकेत्यर्थः ॥ नेति ॥ किन्तु एकवचनमेवोत्पद्यते इति भावः । तद्धितः किम् । एकः द्वौ त्रयः । असर्वेत्यादि किम् । औपगवः ॥

त्वादिति ॥ अवदत्तं चेत्यादि भाष्ये त[illegible] गुणभूतोपसर्गत्वबाधो बोद्धव्य इति भावः ॥ यदपीति ॥ स्वरादीनुपक्रम्यान्तोदात्ताः पठ्यन्त इति काशिकायाम् ॥ भ्रामादिकमिति ॥ न्यङ्स्वरौ स्वरितावितौ फिट्सूत्रेण स्वरितत्वात् । सनाद्य होता नव्यः तिरः पुरूचिदद्विषेनेत्यादौ सनात्तिरसोरन्तोदात्तपाठाच्च ॥ निर्मूलत्वाच्चेति ॥ आद्युदात्तप्रापकश[illegible]भावादिति भावः ॥

कृन्मेजन्तः ॥ जीवसे इति ॥ तुमर्थे सेसेनिति असेप्रत्ययः ॥ पिबद्भ्यौ इति ॥ तेनैव शध्यैप्रत्ययः । पाघ्रेति पिबादेशः । यस्त्वाहुः । कर्तरि शबिति । तद्भसात् । शब्यङ्गतो भावे इति सिद्धान्तात् । अन्तग्रहणमौप-देशिकत्वप्रतिपत्त्यर्थम् । तेनेह न । आधये । चिकीर्षवे । लक्षणप्रतिपदो-क्तसंनिपातपरिभाषाभ्यां सिद्ध्यैतयोरनित्यत्वज्ञापनायेदम् ॥

क्त्वातोसुन्कसुनः ॥ उदेतोरिति ॥ उत्पूर्वादिणो, भावलक्षणे स्थेण्-कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् ॥ विसृप इति ॥ सृपितृदोः कसुन् ॥ आब्ग्रहणमिति ॥ तथाच वार्तिकम् । अव्ययादापो लुग्वचनानर्थक्यं लिङ्ग-भावादिति । सूत्रस्योक्तिसम्भवस्तु स्त्रियामिति सूत्रे स्त्रीसमानाधिकरणा-दिति पक्षं गृहीत्वा बोद्धव्यः । स च न स्थितः । भूतामियं ब्राह्मणीत्यादा-वतिव्याप्तेः । अलिङ्गत्वे आथर्वणविद्यागतश्रुतिविरोधमाशङ्क्याह ॥ सदृश-मिति ॥ लिङ्गकारकेति ॥ विभक्तिवचनशब्दौ कारकसंख्यापराविति भावः ॥ यथा वाचेति ॥ परिगणनमिदमित्येके । अन्ये तूदाहरणमात्रमित्याहुः ॥ वगाह इति ॥ आदिरेवाकारो लुप्यते, नान्त्यः । अपिना साहचर्यात् ॥ इत्यव्ययानि ॥

सिद्धान्तादिति॥व्यत्ययेन यगभाव इति भावः ॥ अन्तग्रहणमिति ॥ मेऽङ्भ्यां कृतो विशेषणात्तदन्तलाभे सिद्धे इत्यादिः॥लक्षणेति॥ क्वचिद्ग्रहणेऽपि तत्परिभाषाप्र-वृत्तिज्ञापकं च तदनित्यत्वमात्रज्ञापकमिति भावः॥भूतमिति॥भूतशब्दः पौतन्य स्ति-र्नित्यनपुंसकः । तत्र,पर्जन्यवल्लक्षणप्रवृत्त्याऽन्तरङ्गत्वाद्ह्रस्वे शब्दान्तरसंनिधानो-त्तरं टापि लब्धे लक्षणस्येति न्यायेन न पुनर्ह्रस्व इति भावः ॥ इत्यव्ययानि ॥

खट्वेति ॥ अशूभुषिलटिकणिविशिभ्यः क्वन् ॥ पञ्चाजीति ॥ न च तदन्तविधिविरहादेव टाबूनेति वाच्यम् । अमहत्पूर्वग्रहणेनाऽनुपसर्जनाऽधिकारेण च स्त्रीप्रत्ययेषु तदन्तविधिज्ञापना ॥ मूषिकेति ॥ वृश्चिकृषोः किकनित्यधिकारे मुषेर्दीर्घश्चेति किकनि इकारमध्यो मूषिकशब्दः । यस्तु मुष स्तेये इति दीर्घोपधात् संज्ञायां क्वुनि मूषकशब्दो माधवेनोक्तस्ततोऽप्ययं टाप् । प्रत्ययस्थादितीत्वमिति तु विशेषः । यत्तु, क्वुन्नन्तोऽसौ अजादिगणे पाठं न प्रयुङ्क्ते । तस्य जातिलक्षणङीषूबाधनार्थत्वात् । संज्ञायाश्चाजातित्वादित्याहुः । तच्चिन्त्यम् । व्याघ्रीत्यादिवत् संज्ञात्वेऽपि जातित्वानपायात् ॥ भस्त्रफलेति ॥ भस्त्रेव फलानि यस्या इति विग्रहः ॥ ङ्यापोरिति ॥ एतच्च, फल निष्पत्ताविति धातौ माधवग्रन्थे स्थितम् । भाष्ये तु प्रायेण दीर्घ एव पठ्यते ॥ प्रत्यक्पुष्पेति ॥ पाककर्णेत्यादिसूत्रस्थभाष्यवार्तिकपर्यालोचनयेदमुक्तम् । तेन सत्प्राक्काण्डेति पाठो नादर्तव्यः ॥ शूद्रा चेति ॥ शूद्रशब्दश्चापमुत्पादयति जातिश्चेत् । महत्पूर्वस्तु न । जातिश्चेदितीहापि सम्बद्ध्यते ॥ पुंयोगे त्विति ॥ पुंयोगो दाम्पत्यरूप एवेति न नियमः, किन्तु जन्यजनकभावोऽपि । तेन वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृताविति सिद्धम् ॥ महाशूद्रीति ॥ आभीरी तु महाशूद्री जातिपुंयोगयोः समेत्यमरः । अत्रेदमवधेयम् । अजादिगणे शूद्रेत्येव पाठ्यम् । जातिरिति व्यर्थम् । मुख्ये कार्यसम्प्रत्ययाज्जातिलक्षणो ङीषेव बाधिष्यते । पुंयोगे हि गौणी वृत्तिः । अमहदित्याद्यपि व्यर्थम् । महाशूद्रशब्दो हि विशिष्ट एव जात्यन्तरे वर्तते । तत्रावयवस्यानर्थकतया शूद्रशब्दार्थसमवेतस्त्रीत्वाभावात्, टापः प्रसङ्ग एव नास्ति । या तु महती शूद्रा तत्र महाशूद्रेतीष्यत एव ॥

अनुपसर्जनाधिकारेण चेति ॥ तस्य हि बहुकुरुचरा व्यावर्त्या । एवञ्च, वनो र चेत्यत्रेवात्रापि तदन्तविधिरिति भावः ॥ जातित्वानपायादिति ॥ क्वुनादिविधौ संज्ञापदेन रूढिरेव गृह्यते, न तु शब्दप्रवृत्तिनिमित्तकत्वरूपं संज्ञात्वं गृह्यते । अत एव घ्रः संज्ञायामित्यादिना व्याघ्रादिसिद्धिरिति दिक् ॥ गौणी वृत्तिरिति ॥ लाक्षणिकत्वापरपर्यायं गौणत्वमित्यभिमाननेदम् । सदृशलाक्षणिकत्वमप्रसिद्धत्वमेव वा गौणत्वम् । गौणमुख्यन्यायश्च पदकार्यविषयः । अत एवाजस्य स्त्रीत्यर्थेऽजेत्येवेति । सिद्धान्ते तु जातिरित्यावश्यकमिति बोध्यम् ॥ जात्यन्तरे इति ॥ ब्राह्मणादुग्रजातिकन्यायामुत्पन्ने आभीरजातावित्यर्थः । नृपाच्छूद्रायामुत्पन्नोग्रजातिकन्या । न तु शूद्रत्वं तत्रास्ति । अत एव शूद्रसधर्माणस्ते इत्येव स्मृतिषूक्तं, न तु शूद्रा इति ॥ इष्यते एवेति ॥ अतस्तदव्यावृत्त्यर्थं नैतदिति भावः । भाष्य-

कुञ्चेत्यादि ॥ त्रयोऽमी हलन्ता इत्येके । कुक्षिनाडलक्षेत उष्णिहः भौ इत्यादिप्रयोगमुदाहृत्यादन्ता अपि भाष्ये स्वीकृताः ॥ पुंयोगेऽतीति ॥ यदा ज्येष्ठादयः प्रथमजातादौ वर्तन्ते तदा अदन्तत्वादेव टाप् सिद्धः । यदा तु ज्येष्ठस्य स्त्रीत्वादिविवक्षा तदा पुंयोगलक्षणो ङीष् प्राप्तः, सोऽनेन बाध्यत इति ज्ञापितुमपिशब्दः ॥ मूलान्नञः ॥ नञः किम् ॥ अमूली ॥ अमूलेति ॥ औषधिजातिरियम् ॥

ऊगितश्च ॥ भवतीति ॥ सर्वादिषु भवतु इत्युदित्पठितो, भातेर्डवतुरिति व्युत्पादितश्च । शत्रन्तात्तु ङीपि शपूश्यनोरिति नित्यो नुम् ॥

वनो र च ॥ सुत्वानमिति ॥ सुयजोर्ङ्वनिप् ॥ अतिधीवरीति ॥ दधातेः कनिप् ॥ शर्वरीति ॥ शृधातोर्वनिप् । गुणे कृते हशन्तात् परत्वेऽपि हशन्ताद्विहितत्वाभावाद् ङीब्र्योर्निषेधो न ॥ अवावेति ॥ न्यासकारस्तु प्रायिकोऽयं निषेधः । तेन, अवावरीत्याह । न त्वेतद्भाष्यादौ दृष्टम् ॥ पक्षे ङाविति ॥ तथाच द्विवचने, बहुधीवर्यौ बहुधीवानौ बहुधीवे इति रूपत्रयं भवतीति भावः ॥

टाबृचि ॥ पूर्वेण प्राप्तस्य ङ[illegible]द्रः ॥ अविद्यत्वादिति ॥ कार्यकाल-

---

वार्तिककारौ तु शूद्रजातिवृत्तिमत्त्वेन तां जातिं तत्रारोप्य शूद्रशब्दोऽयं इति शूद्रशब्दार्थसमवेतस्त्रीत्वस्य सत्त्वादस्त्येव टापः प्राप्तिरित्यमहत्पूर्वेति । शूद्रशब्दार्थसमवेतस्त्रीत्वेऽपि शूद्रशब्दादेव टाप् स्यान्न तु तदन्तादिति तदन्तविधिज्ञापकताऽपि भाष्योक्ता नासङ्गता । अत एव शङ्खेन मातृजात्यारोपेणैव ब्राह्मणक्षत्रियवैश्यैः क्षत्रियावैश्याशूद्रासूत्पन्नाः क्षत्रियवैश्यशूद्रा एवेत्युक्तम् । तत्र जातिरित्यस्याभावे पूर्वं जातिमात्रविवक्षया कुक्कुटाण्डवच्छूद्रशब्देन समासे ततः स्त्रीत्वविवक्षायाममहत्पूर्वेति निषेधेन टाप् न स्यादिति मन्येत इत्यन्यत्रविस्तरः ॥

व्युत्पादितश्चेति ॥ न्यासकृतेति शेषः । इदं व्युत्पादनमप्रामाणिकम् । भाष्याऽसंमतेः ॥

दधातेः कनविति ॥ घुमास्थेतीत्वम् । पावान इत्यस्य वनिपा सिद्धिमाशित्य, ईत्वमवकारादावित्यस्य तत्रैव भाष्ये प्रत्याख्यानात् । स्थः क चेति सूत्रभाष्यस्थे शंस्था इत्यत्र, अम्बाम्बेति सूत्रभाष्यस्थे सव्येष्ठा इत्यत्र च, असिजित्यतो वाग्रहणं मण्डूकप्लुत्याऽनुवर्त्य व्यवस्थितविभाषाश्रयणात्तदभावः । तत्र विजेवेत्यन्ये । अत एव धीर्ध्यायतेर्दधातेर्वेति ध्यायतेः संप्रसारणमिति वार्तिकस्थं भाष्यं सङ्गच्छते । घुमास्थेत्यत्र हलीत्यर्थात् प्रत्ययलक्षणसूत्रस्थं नियमार्थत्वेऽपि प्रत्ययलक्षणकार्यं सुलभमिति दिक् ॥ निषेधो नेति ॥ वनो न हश इति वार्तिके विहितविशेषणस्येदमेव फलमिति भावः ॥ न त्वेतदिति ॥ अतोऽप्रमाणमेतदिति भावः ॥

पक्षेणेदम् । यदि तु यथोद्देशं षट्संज्ञा, यदि वा उपदेशकाले ष्णान्तेति व्याख्यानं तदा असिद्धत्वोपवर्णनं नोपयुज्यत इत्याहुः । वस्तुतस्तु यथोद्देश-पक्षेऽपि असिद्धत्वमुपयुक्तमेव । एकदेशविकृतस्योपसंख्यानं हि स्थानि-वत्सूत्रे पठ्यते । आदेशग्रहणसामर्थात् सर्वे सर्वपदादेः ॥ इत्याश्रित्य आनु-मानिकोऽप्यादेशः स्थानिवदिति वा व्याख्यायते । उभयथाऽपि अल्विधौ न तत्प्रवृत्तिः । एतच्च आकरे स्पष्टम् ॥ बहुयज्वानाविति ॥ न संयोगादिति निषेधान्नायमुपधालोपी । तेन, अन उपधालोपिन इति न प्रवर्तते ॥

ङाबुभाभ्याम् ॥ ननु निषेधङापोर्वचनसामर्थ्यात् पर्यायः सिद्धः । सत्यम् । अन्यतरस्यामिति योगो विभज्यते । तत्र मन इति निवृत्तम् । अनो बहुव्रीहेर्ङाब् वा स्यात् । ङीपा सह विकल्पलाभार्थमिदम् । अन उपधा-लोपिन इति सूत्रं तु नियमार्थम् । अनो योऽसौ विकल्पः स उपधालोपिन एवेति । तथाच सुपर्वेत्यादौ अनुपधालोपिनि निषेधार्थमिदम् । वृत्रहेत्यादौ तु ऋन्नेभ्य इत्येव ङीप् । तेन बहुधीवरी सिद्ध्यति । ऋन्नेभ्य इति हि ङीपमनूद्य तत्सन्नियोगेन विधीयमानो रेफः प्रकरणान्तरस्थेन ङीपि कृते न सिद्ध्येत् । किञ्च ननु वनो र चेति सूत्रमेव ङीबूरौ विधत्तामिति चेन्न । उभयविधौ गौरवात् । ङीपि निषिद्धे रोऽपि दुर्लभः । सन्नियोगशिष्टत्वा-

---

व्याख्यानमिति ॥ उपदेश इति वक्तव्यमिति वदतो वार्तिककारस्येति भावः ॥ आनुमानिकोऽपीति ॥ एरुरित्यनेन तेस्तोरनुमानादिति भावः ॥ तरुचाकरे इति ॥ अत्रारुचिबीजं तु षट्त्वं नाल्धर्म इति तदाश्रयविधीनां नाल्विधित्वमिति ॥

सिद्ध इति ॥ एवञ्चान्यतरस्याङ्ग्रहणं किमर्थमिति भावः ॥ ङीपेति ॥ ऋन्नेभ्य इति विहितेन ॥ अनो योऽसौ विकल्प इति ॥ अन्यतरस्यामिति विभक्तसूत्रेण प्राप्त इत्यर्थः । अन इति सूत्रेऽप्यन्यतरस्यामित्यस्य सत्त्वाद्विकल्पनियमलाभो-ऽन्यथा स नित्यार्थो विधिरेव स्यादिति भावः ॥ स उपधेति ॥ स उपधालोपिनो-ऽनुपसर्जनस्य बहुव्रीहेरेवेत्यर्थः ॥ निषेधार्थमिति ॥ योगविभागेन पक्षे प्राप्तस्य ऋन्नेभ्य इति ङीप इत्यर्थः ॥ इत्येव ङीबिति ॥ नियमशास्त्राणां निषेधमुखेन प्र-वृत्तिरित्यभिमानेनेदम् ॥ तेनेति ॥ अन उपधेत्यस्य नियमत्वेनेत्यर्थः ॥ ऋन्नेभ्य इति ॥ अस्यान्यथेत्यादिः । अन उपधेत्यस्य विधायकत्वे इति तदर्थः ॥ प्रकरणा-न्तरस्थेनेति ॥ तेनानन्तरत्वं बोधितम् ॥ गौरवादिति ॥ मम तु, ऋन्नेभ्य इति प्राप्तङीपमनूद्य तत्संनियोगेन रभावमात्रविधायकं तदिति भावः ॥ ननु वनो र चेत्यस्योभयविधायकत्वेऽनो बहुव्रीहेरित्यनन्तरत्वादस्य निषेधकम् ? उत येनेति न्यायेन, ऋन्नेभ्य इत्यस्य । नाद्य इत्याह ॥ किञ्चेति ॥ अन उपधेत्यनेन ङीप्यपि

भाष्ये तु सूत्रभङ्गेन समाहितम् । तद्यथा । अनो बहुव्रीहेरित्यस्यानन्तर-मुपधालोपिनो वेति सूत्रमस्तु । अन उपधेत्यादि प्रदेशान्तरस्थं सूत्रं डाप्सूत्रे-ऽन्यतरस्याङ्ग्रहणं च मास्त्विति ॥

अन उपधा ॥ बहुव्रीहेरूधसो ङीषित्यते बहुव्रीहिग्रहणं संख्याव्यय-देर्ङीबित्यतो ङीप् चानुवर्तत इत्याशयेनाह ॥ अन्नन्तादित्यादि ॥ नियमार्थ-मिदमित्युक्तम् । न चैवं पूर्वेण विकल्पसिद्धौ इहान्यतरस्यां ग्रहणं व्यर्थ-मिति वाच्यम् । असति हि तस्मिन् नित्यार्थो विधिरेवायं स्यान्न तु नियमः ॥

प्रत्ययस्थात् कात् पूर्वस्य ॥ कादित्यकार उच्चारणार्थः । व्यञ्जन-मात्रं विवक्षितम् । विशिष्टविवक्षायां तु एतिकाश्चरन्तीत्यादौ अकचि न स्यादित्याशयेनाह ॥ ककारादिति ॥ णिनिर्देशे हि कारप्रत्ययो विहितः । क्वचित् समुदायात् प्रयोगस्तु, उच्चैस्तरां वा वषट्कार इति निर्देशरूपयत्न-साध्य इति भावः ॥ आपि पर इति ॥ एतच्च अकारस्य विशेषणम् । तत्र सामर्थ्यात् ककाराभ्यां व्यवायेऽपि भवति । न तु रथकट्येत्यादौ त्रिचतु-

---

रो दुर्लभ एवेति भावः । किञ्चैवं बहुश्वेत्यत्र, ऋन्नेभ्य इति ङीबापत्तिः । किञ्च बहुव्रीहौ वेति वार्त्तिकस्याप्यपूर्वविधायकतापत्त्या सुपर्वनशब्दे ङीब्रयोरापत्तिः । सिद्धान्ते त्वन उपधत्येतत्प्रापितङीबनुवादेन रभावस्य तेन विधानान्न दोषः । एतेनान्त्यपक्षो बाध्यसामान्यचिन्तयोभयबाधकमिति पक्षश्च परास्तः । बहुव्रीहौ वेत्यनेन सुपर्वनशब्दे ङीब्रयोरापत्तेरिति दिक् ॥ इत्यस्यानन्तरमिति ॥ अनो बहु-व्रीहेर्ङाबुभाभ्याम् ॥ अनुपसर्जनाद् उपधालोपिनो वेति पाठ्यमिति भावः । यथा-श्रुतेऽनुपसर्जनादित्यस्य सम्बन्धो दुर्घटः । अत एव, बहुदामानि पुराण्यति-क्रान्ता नगरीत्यत्र ङीब् न ॥

ग्रहणं चेति ॥ चेन बहुव्रीहौ वेत्यस्यापि सङ्ग्रहः । पूर्वोक्तयोगविभागप्रकार-स्तु गुरुभूत इति भाष्याशयः ॥ इत्युक्तमिति ॥ डाप्सूत्रे, अन्यतरस्यामिति योग-विभागकरणपक्षे इदमुक्तमित्यर्थः ॥ पूर्वेणेति ॥ उक्तयोगविभागेनेत्यर्थः ॥

अकचि न स्यादिति ॥ तदकारो हि पचतकीत्यादिसिद्ध्ये न प्रयोगसमवायी-ति भावः ॥ यत्नसाध्य इति ॥ एतत्प्रयोगरूपज्ञापकसाध्य इत्यर्थः ॥ एतच्चाकार-स्येति ॥ संनिहितत्वात् साक्षाद्विध्युद्देश्यत्वेन प्राधान्याच्चेति भावः ॥ तत्र सा-मर्थ्यादिति ॥ कात्पूर्वस्येति शास्त्रसामर्थ्यात् ककारेण व्यवधानं सह्यते । आव-कारयोरेकादेशे कृतेऽचः परस्मिन्निति स्थानिवत्त्वेनाकारव्यवधानेऽपि श्रौत-मव्यवधानं गृहीत्वा प्रवृत्तिः । अकारशब्देनात्वजातिग्रहणम् । तेनैतिकेत्यादा-वकारद्वयसत्त्वेऽपि न क्षतिरिति भावः । अत एव, न यासयोरिति चरितार्थम् ॥

रादिव्यवाये । अत एव सर्विकादौ आद्याकारस्य न भवति । तदेतदुक्तम् ॥ अकारस्येकारः स्यादापि पर इति ॥ ककारविशेषणत्वे तु विवक्षिते आप्परात् ककारात् पूर्वस्याऽत इत्यवक्ष्यत् । यत्तु प्राञ्चः । आपीति ककारविशेषणं, सर्विकेत्यादौ तु एकादेशस्य स्थानिवद्भावादकारेण व्यवधानेऽपि वचनसामर्थ्याद्भविष्यतीति । तन्न । रथकट्यादावतिप्रसङ्गात् । व्यवहितस्यापि परत्वानपायात् । न च निर्दिष्टपरिभाषया निस्तारः । अनुवादे परिभाषाणामनुपस्थितेः । अनूद्यमानविशेषणेष्विति हि तदर्थः । अत्र च, उदीचामात इति सूत्रे स्थानेग्रहणं लिङ्गम् । फलं तु वृद्धसञ्ज्ञायामिक्परिभाषाऽनुपस्थानात् शालीयादिसिद्धिः । यदप्याहुः । आपीति विधीयमानस्येतो विशेषणमिति । तत् स्थवीयः । आपीत्यस्याङ्गविशेषणत्वं त्वनाशङ्क्यमेव । रथकट्या पुत्रकाम्येत्यत्रातिप्रसङ्गात् ॥ शकेति ॥ पचाद्यच् । स्थग्रहणं विस्पष्टार्थम् । ककारमात्रस्य प्रत्ययस्याभावादेव तात्स्थ्यलाभात् । पूर्वस्य किम् । सर्विकेत्यादौ टाबेकादेशं बाधित्वा कात् परस्य मा भूत् । तस्मादित्युत्तरस्येति परिभाषणात् । यत्तु वार्णादाङ्गमिति परिभाषया एकादेशो बाध्येतेत्याहुः । तन्न । अपवादे परत्वस्येव उक्तपरिभाषाया अपि निष्फल-

---

त्रिचतुरादीति ॥ श्रौतत्रिचतुरादीत्यर्थः ॥ आद्याकारस्येति ॥ इदं च, कात्पूर्वस्येत्यंशेऽप्यनूद्यमानविशेषणत्वान्नाव्यवधानांशप्रवृत्तिरिति वादिनां मते बोद्धव्यम् ॥ वचनसामर्थ्यादिति ॥ श्रौताव्यवधानमाश्रित्येत्यर्थः ॥ अनूद्यमानस्येति ॥ साक्षादनूद्यमानविशेषणतया वाऽनूद्यमानस्येत्यर्थः । विशेषणेषु, आपीत्यादिषु ॥ सिद्धिरिति ॥ अस्य तैरुक्तमिति शेषः । अनेन तत्र सूत्रे एतस्यैव ज्ञापकत्वं वर्णयतोऽत्र चैवं वदतस्तव पूर्वापरविरोध इति भावः । यदि त्वन्तरङ्गत्वेन स्थानसम्बन्धलाभ इत्यर्थः, षष्ठीस्थाने इत्यत्र भाष्ये स्पष्ट इति स्थानेग्रहणं व्यर्थमेव । तस्य परिभाषालभ्यत्वाभावेन ज्ञापकासम्भवात् । वृद्धसंज्ञायामिक्परिभाषानुपस्थितिस्तु, मालादीनां चेति ज्ञापकात् । तद्धि, प्रस्थेऽवृद्धमिति पर्युदासे प्राप्ते आरभ्यते । अनुवादे इति च निर्मूलम् । यद्वा इक्परिभाषाच्परिभाषयोर्विधीयते इत्यध्याहारात्तत्र तस्या अप्रवृत्तिरनुवादे इति च तद्विषयमेव । अत एवाल्लोपोऽन इत्यत्र यजादिस्वादिपर इत्यस्यानविशेषणत्वेऽपि अव्यवधानलाभ इति, ष्यङ इति सूत्रे भाष्ये ध्वनितं सङ्गच्छते इति विभाव्यते तदा संनिहितत्वादिनैवापीत्यस्याकासविशेषणतेति बोद्धव्यम् ॥ तत् स्थवीय इति ॥ विधेयस्यासिद्धत्वेन तद्विशेषणासम्भवादिति भावः ॥ अनाशङ्क्यमेवेति ॥ श्रुतेनान्वययोगादिति भावः । लक्ष्यविसंवादमप्याह ॥ रथेत्यादि ॥ तात्स्थ्यलाभादिति ॥ कान्तात् प्रत्ययादिति तु तार्थः । क्षिपकादीनां निषेधस्य व्यर्थत्वापत्तेः ॥ अपवादे इति ॥ येन नाप्राप्तिन्यायेन बा-

त्वात् । वस्तुतस्तु, प्रत्ययस्थे कि इति सप्तमीनिर्देश [illegible]: । पूर्वग्रहणं च सुत्यजम् । अत इति तपरः किम् । कृदाधाराकिकलिल्ला [illegible] । राका ॥ रामिकेति ॥ केवलमामकेत्यादिना सञ्ज्ञाच्छन्दसोरेवेति नियमात् ङीप् ॥ त्यकन्यापोरिति ॥ उदीचामातः स्थान इति विकल्पस्याऽपवादः ॥ दाक्षिणात्यिकेति ॥ दक्षिणस्यामदूरे दक्षिणा आजन्तः । दक्षिणा भवेति विग्रहः । यत्तु । दक्षिणस्यां दिशि भवेति प्राचा विगृहीतम् । तन्न । त्यम्-विधावव्ययसाहचर्यादाजन्तस्यैव दक्षिणाशब्दस्य ग्रहणात् । अन्यथा सर्व-नाम्नो वृत्तिमात्रे इति पुंवद्भावापत्तेश्च । यत्तु समासे एव पुंवादिति, तन्नेति वक्ष्यते । त्यकि, किति चेत्यादिवृद्धौ टाप् । ततोऽज्ञाताद्यर्थे कः । केऽण इति ह्रस्वष्टाप् ॥ इहत्यिकेति ॥ अव्ययात्त्यप् ॥

न यासयोः ॥ अत्र न्यासकारः । या इत्येतस्योदीचामातः स्थान इति विकल्पे प्राप्ते निषेधोऽयमिति । तन्न । आतः स्थाने इत्यंशस्येहाभावात् । या सेति यत्तदोरुपलक्षणमित्याशयेनाह ॥ यत्तदोरिति ॥ स्वरूपस्याविवक्षा-यां फलमुदाहरति ॥ यकां तकामिति ॥ यासयोरित्यपहाय यत्तदोरित्येव वक्तुमुचितम् । उप्रत्यकेति । उप्रत्ययान्तयां त्यकन्यासन्नाख्ययोः । क्षिपकादी-नां च । नेत्यनुषज्ज्यते ॥ क्षिपकेति ॥ क्षिपेरिगुपधलक्षणः कः । ततो-ऽज्ञातादौ कः । चट भेदने । पत्राद्यच् । ततः कः ॥ तारकेति ॥ तरतेर्ण्वुल् । ज्योतिर्नेक्षत्रं, नेत्रकनीनिका च । वर्णका प्रावारविशेषः । तन्तूनां विकार-स्तान्तवम् । ओरञ् । अन्यत्र, वर्णिकेति । ग्रन्थविशेषस्य व्याख्या । स्तोत्र-कर्त्री च । वर्तयतीति वर्तका । शकुनौ इत्वं वा । अन्यत्र नित्यमेव । पितरश्च ता देवताश्च पितृदेवतास्तदर्थं कर्म पितृदेवत्यम् । देवतान्तात्तादर्थ्ये यदिति यत् । अश्नन्ति ब्राह्मणा यस्यां सा अष्टका । इष्यशिभ्यां तकन् ॥ अष्टिकान्येति ॥ अष्टौ परिमाणमस्याः । संख्याया अतिशदन्तायाः कन् । अर्थगतं स्त्रीत्वमाकारेऽध्यारोप्य, यकपूर्वाया इति स्त्रीलिङ्गनिर्देशः ।

धकविषये तेनैव न्यायेन बाधसिद्धेरिति भावः ॥ प्रत्ययस्थे कीति ॥ प्रत्यये की-त्येव युक्तं, न यासयोरिति ज्ञापकात् कादौ प्रत्यय इति नार्थे इति बोध्यम् । एव-ञ्चाप्परस्य प्रत्ययस्थककारपरस्य चात इदित्यर्थः । तत्र सामर्थ्यादाप्परत्वांशे ककारव्यवधानं सोढव्यमेवेति भावः ॥ विग्रह इति ॥ दक्षिणापश्चादिति त्यक् ॥ अन्यथा – दिग्वाचकस्यापि ग्रहणे ॥ चेन साहचर्यत्यागे मानाभावः संगृहीतः ॥ ह्रस्वाभावादिति ॥ अककचः सत्त्वादिति भावः ॥ प्रावारविशेष इति ॥ वर्णयत्या-

तेन स्त्रीप्रत्ययो लभ्यत इत्याशयेनाह ॥ स्त्रीप्रत्ययाकारस्येति ॥ साङ्काश्यिकेति ॥ सङ्काशेन निर्वृत्तं साङ्काश्यम् । वुञ्छणादिसूत्रेण, सङ्काशादिभ्यो ण्यः । ततो भवार्थे धन्वयोपधाद् वुञ् । अकादेशः । स च साङ्काश्यभवां स्त्रियमाहेति तदकारस्यापि इत्वं विकल्प्येत।तस्मादात इत्युक्तम् । ननु यथा अयमकारो नाकारस्थानिक एवं स्त्रीप्रत्ययस्थानिको नेति द्वयङ्गविकलमेतत् । अत्राहुः । सति ह्यात इत्येतस्मिन् स्त्रीलिङ्गनिर्देशबलात् स्त्रीवाचक आकारः स्त्रीप्रत्यय एवेति लभ्यते । असति तु तस्मिन् स्त्रीवाचकस्य योऽकार इत्येतावल्लभ्येत । ततः साङ्काश्यिकेत्यत्रापि प्रसज्ज्येतेति । अत्रेदं वक्तव्यम् । यकपूर्वायाः स्थाने इति स्थानेशब्दे जागरूके कथमवयवषष्ठीत्वं गम्यताम् । न च वुञः स्थानेऽयमिति वाच्यम् । अकेति समुदायस्य तथात्वेऽपि अकाररूपावयवस्यातथात्वात् । वुञो यकपूर्वत्वाभावाच्च । नहि तस्यामवस्थायां यस्येति लोपोऽपि लभ्यते । किञ्च, प्रातिपदोक्तस्य स्त्रीप्रत्ययस्य लाभे भवार्थे विहितस्य वुञादेः प्रसङ्ग एव नास्ति । तस्मादात इति स्पष्टार्थमेव ॥ आश्विकेति ॥ कौमारास्तु भस्त्रादिवाक्येऽश्वशब्दमपि पठन्तोऽस्यापि विकल्पमिच्छन्ति । शुभं यातीति शुभंयाः । विच् । ततः कः । केऽणः । शुभमिति मान्तो निपातः । सुष्ठु नयो यस्याः सुनया । ततः कः ॥

भस्त्रैषा ॥ तदन्तेति ॥ आङ्गत्वादिति भावः ॥ एवञ्चेति ॥ उक्तं च हरदत्तेन—

अत्रातः स्थान इत्येतत् स्वशब्दस्य विशेषणम् ।
सम्भव्यभिचारौ हि तत्र स्तः काकचोः सतोः ॥
द्वैषयोः सम्भवो नास्ति नान्यत्र व्यभिचारिता ।
सर्वनाम्नः स्वशब्दस्य तेन नायं विधिर्भवेद्, इति ॥

इह स्वशब्दस्येत्यादिनात इति शेषो बोद्धव्यः । एतच्च इह मूलेऽपि

च्छादयतीति व्युत्पत्तेः ॥ जागरूके इति ॥ स्थानेपदाभावेऽप्यन्तरङ्गत्वात् स्थानसम्बन्धस्यैव लाभ इत्यपि बोद्धव्यम् ॥ प्रातिपदोक्तस्येति ॥ स्त्रियामित्यधिकृत्य विहितस्येत्यर्थः । विशिष्य तदनुपादानात् कथं तल्लाभ इति चिन्त्यम् ॥ इच्छन्तीति ॥ तद्भाष्यादावदर्शनादयुक्तम् ॥ शुभंयाः । विच् । ततः क इति ॥ नदीसंज्ञासूत्रस्थभाष्यप्रामाण्यादादन्तेभ्यः क्विपोऽनभिधानाद्विजुक्तः । तत्र हि, स्त्याख्याविति पदे आदन्तलक्षणो विजुक्तो, न तु क्विप् इत्याहुः । कैयटस्तु, शुभं याति क्विप् । शुभमिति निपातोऽत्रातदौ कः । केऽण इति ह्रस्व इत्याह ॥ मूलेऽपि

ध्वनितम् । एवञ्च, हंसं तनौ तनिहितं चरन्तं मुनेर्मनोदर्पणिरिव स्वकाय - मिति श्रीहर्षश्लोके भस्त्रैवेति वैकल्पिकमित्वमिति व्याच[illegible]क्षाणा इति भावः ॥ आत्मीयायामिति ॥ आत्मज्ञातिधनेषु तु स्त्रीत्वमेव नास्तीति भावः। यत्तु ज्ञातिधनयोः स्वका स्विकेति रूपद्वयमाकरे स्थितमित्याहुः । तच्चिन्त्यम् । तादृशस्याकरस्याप्रसिद्धेः । लिङ्गानुशासनविरोधाच्च । यत्तु स्वका स्विकेति काशिकायामुदाहृतं तत् सञ्ज्ञाविषयकं, न तु ज्ञातिधनविषयकम् । यदपि स्वार्थिकाः क्वचित् प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते इति परिजह्रुः । तदपि चिन्त्यम् । उक्तरीत्या कप्रत्ययान्ताट्टाप्सम्भवेऽपि [illegible]लिङ्गतया आतः स्थाने इत्यंशस्य दुरुपपादत्वात् । प्रत्युदाहरणान्युक्त्वा उदाहरणान्याह ॥ निर्भस्त्रिकेत्यादि ॥ निष्क्रान्ता भस्त्राया निर्भस्त्रा । उपसर्जनह्रस्वः । टाप् । ततोऽज्ञातादौ कः ॥ कृतषत्वेति ॥ सूत्रे विकृतनिर्देशो विवक्षितविषयो, न तु, न यासयोरितिवदुपलक्षणमिति भावः । स्त्रीलिङ्गनिर्देशादजादयः स्त्रीलिङ्गा एव गृह्यन्ते । तेनेह न । शुभ्रोऽजोऽस्याः शुभ्राजिका । जानातीति ज्ञः । प्रियो ज्ञोऽस्याः, प्रियज्ञिकेति ॥

अभाषित ॥ विहितविशेषणतया व्याख्यायाः फलमाह । बहुव्रीहेरिति ॥ नित्यमिति ॥ अस्य विकल्पस्यामंवृत्तेः प्रत्ययस्यादित्युत्सर्ग एव प्रवर्तते इत्यर्थः । परविशेषणत्वे त्वयं विकल्पः स्यादिति भावः । बहुव्रीहेरित्युपसर्जनोपलक्षणम् । तेनातिखट्विकेत्यादावपि नित्यमेव ॥ शैषिके

ध्वनितमिति ॥ स्वशब्दस्यातो विशेषणमित्यादिना, भवत्युदाहरणमित्यन्तेन ग्रन्थेनेति भावः ॥ स्विकायामितीति ॥ स्वाशब्दादत्यन्तस्वार्थिके के इत्वे साधुः । न ह्यकच् अत्यन्तस्वार्थिकस्याप्यपवादः ॥ व्याचक्षाणा इति ॥ अकचमुक्त्वा वैकल्पिकमित्वं व्याचक्षाणा इत्यर्थः ॥ स्त्रीत्वमेव नास्तीति ॥ स्वो ज्ञाताद्यात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने इति कोशादिति भावः ॥ सञ्ज्ञाविषयकमिति ॥ सञ्ज्ञाया अपि सञ्ज्ञापूर्ण्योश्चेति पुंवत्त्वनिषेधेन भाषितपुंस्कत्वबोधनाद्भाषितपुंस्काच्चेत्यनेन न सिद्धिरिति भावः । अत्यन्तस्वार्थिककान्तविषयं चेत्यपि बोद्धम् ॥ उपलक्षणमिति ॥ भस्त्राशब्दसाहचर्येण व्याख्यानेन च श्रुतानुपूर्वीकस्यैवैषाशब्दस्य ग्रहणमत एवैषाद्ये नञ्पूर्वे उदाहरणमित्याभ्येऽप्येषेत्येवोक्तम् । अन्यथा, एतद्वृत्तीत्येव वदेदिति भावः॥शुभ्राजिकेति ॥ बहुव्रीहेरपि ततः स्वार्थिकः क इति भावः । एतेनातः [illegible]प्रानिकत्वाभावाभावाद्प्राप्तिरित्यपास्तम् ॥

परविशेषणत्वे त्विति ॥ समुदायस्य भाषितपुंस्कत्वेऽपि तदवयस्य ऋदृक-

कपीति ॥ आपोऽन्यतर[illegible]ति ह्रस्वपक्षे इति भावः ॥ अभिव्याप्येति ॥ अत एव, बहुयुवा शालेत्यत्र [illegible]नास्तिरुपसर्जनत्वान्नेति प्राञ्च आहुः ॥

टिड्ढा ॥ इह वृत्तिकृता सूत्रे ख्युनपि प्रक्षिप्तः ॥ औत्सीति ॥ उत्से भवा । उत्सादिभ्योऽञ् । न च शार्ङ्गरवाद्यञ इति ङीना सिद्धमिदमिति वाच्यम् । तत्र जातेरित्यनुवृत्तेः । अन्यथा पुंयोगेऽपि स्यात् । एतेन इह अञ्ग्रहणं स्पष्टार्थमिति प्राचो ग्रन्थः प्रत्युक्तः । इहानेकं वाक्यम् । तत्र, अनुपसर्जनाण् योऽकारस्तदन्तादिति व्याख्यानान्नेह । आपिशलमधीते आपिशला ब्राह्मणीति । अत्र हि प्रोक्तार्थेऽण उपसर्जनम् । अध्येत्रण् तु लुप्तः । वर्णप्राधान्यान्न प्रत्ययलक्षणम् । अतष्टाबेव भवति ॥ ताच्छीलिके-

---

शब्दस्यातथात्वेन ततः परत्वात् परविशेषणे दोषः स्यादेवेति भावः ॥ ह्रस्वपक्ष इति ॥ बहु जस् खट्वा जसित्यवस्थायां कपि सुब्लुकि प्रत्ययलक्षणेन भागद्वयस्य सुबन्तत्वात् समाससंज्ञायां, समासान्ता इति शास्त्रबलात् कबन्तस्यैव समासत्वेनोप[illegible]धीत्व यान्तान्तसमासरूपप्रातिपदिकाभावाद् गोस्त्रियोरिति ह्रस्वत्वाभावे, केऽण इति ह्रस्वत्वे च, न कपीति निषिद्धे, आपोऽन्यतरस्यामिति ह्रस्वे कपः प्राग्वर्तिनः खट्वशब्दात् परस्यापोऽभाषितपुंस्काद् विहितत्वेन तत्स्थानिकाकारस्यायं विकल्पः । ह्रस्वाभावे तु बहुखट्वाकेतीति भावः ॥

प्राञ्च आहुरिति ॥ न च स्त्रियामित्यस्य गृह्यमाणविशेषणत्वान्नात्र दोषः । अनुपसर्जनाधिकारेण तदन्तविधौ स्त्रियामित्यस्य स्त्रीप्रत्ययप्रकृतिविशेषणतायाश्च ज्ञापनेनादोषात् । अत एव धीवानमतिक्रान्ता अतिधीवरीति सिद्ध्यति । प्राधान्येन तद्विशेषणतायाः न्याय्यत्वाच्च । अनुपसर्जनादिति तु गृह्यमाणस्यैव विशेषणम् । अत एव कौम्भकारेयसिद्धिः । अन्यथा कुम्भकारेयोऽप्यापद्येत । कुम्भेन समासेऽपि केवलस्य कारस्य प्रातिपदिकत्वेन तदर्थस्यापि स्त्रीत्वेन योगात्ततो ङीपि कुम्भेनैकार्थीभूतस्यापि विशिष्टस्यापत्येन योगे तस्यायोगस्य वक्तुमशक्यत्वात् तेनापि योगे कदाचित्ततो ढकि विशिष्टस्य तन्निरूपिताङ्गत्वाभावेन कुम्भशब्दोकारे वृद्ध्यनापत्तेः । निष्कृष्यैकार्थीभावस्यैव प्रत्ययोत्पत्तिनिमित्तत्वे न मानम् । समुदायेनैकार्थीभावेऽवयवेनापि तस्यैव सत्त्वात् । नच समुदायाद् ङीप्यपि अनुपसर्जनस्त्रीप्रत्यये तदादिनियमाभावेन कदाचित् कारीशब्दादापत्तिस्तवापीति वाच्यम् । एतदधिकारसामर्थ्यादेव तदादिनियमाभावेनाधिकस्यैव कार्यं बोद्धव्यते, न तु न्यूनस्येत्यदोषादिति तदाशयः । विस्तरस्त्वन्यत्र बोद्धव्यः ॥

पुंयोगेऽपि स्यादिति ॥ इष्यते तु ङीषित्यर्थः ॥ प्रत्युक्त इति ॥ अनेनैव सिद्धे तत्राञ्ग्रहणं वृत्तस्यापत्यं स्त्रीत्यत्र जातिलक्षणङीष्बाधनार्थमिति बोद्धव्यम् ॥ अत्र हीति ॥ न चैवमुपसर्जनाधिकारस्य चारितार्थ्ये मूलोक्ततदन्तविधिज्ञापक-

ति ॥ अयं भावः । शीलं, तच्छादिभ्यो ण इति णो अस्तस्मिन् अणुकार्यं भवति । कार्यमस्तच्छीलत्वे इति ज्ञापकात् । अनेन हि, अणिति णिच्चिह्नितं प्रकृतिभावं बाधितुं डिलोपो निपात्यते ॥ चौरीति ॥ चुरा च ... ॥

हलस्तद्धितस्य ॥ उपधाभूतस्येति ॥ ननु, यस्येति चेति यकारलोपे कृते यकारस्य ईकारपरत्वमस्त्येव, किमुपधाग्रहणं कर्तव्यमित्याह वृत्त्या । न चाल्लोपस्य स्थानिवद्भावः । यलोपे तन्निषेधात् । नैवम् । यलोपे कार्येऽल्लोपस्याभीयत्वेनासिद्धत्वात् ॥ अनपत्येति ॥ यद्यप्यापत्यग्रहणं कर्तव्यमिति वार्तिकं, तथाऽपि अपत्याधिकारविहितपरं तत् । तादृशश्च गर्गादिष्वेव, न तु देवाद्यञ् । तस्यापत्याधिकारात् प्रागेव पाठात् । अत एव भाष्यकृता, कञ्करपोऽयञश्चेति, गर्गादिभ्योऽयञिति च अकारः प्रश्लिष्टः । यस्कादिभ्यो गोत्रे, यञञोश्चेति सूत्रेऽप्येवम् ।

प्राचां ष्फ ॥ तद्धितग्रहणं प्रातिपदिकसंज्ञार्थम् । ननु तां विनाऽपि पित्करणसामर्थ्यादेव ङीष् भविष्यति । एवं तर्हि तद्धितग्रहणमिञन्तादपि क्वचित् ष्फ इति ज्ञापयति । यञन्ते सवर्णदीर्घेणापि रूपसिद्धौ, यस्येति लोपस्यानावश्यकत्वात् । तेन आनुरेरूपसंख्यानमिति वक्ष्यमाणं सिद्ध्यति ॥

आयनें ॥ [illegible] उपलक्षणार्थः । आमनीनोनेकारस्य नेत्वम् । फिनो नित्करणसामर्थ्यात् ॥

तानुपपत्तिरितिवाच्यम् । लक्ष्यानुसारिव्याख्यानेन स्त्रियामित्यस्य गृह्यमाणविशेषणतयाऽपि तद्धारणसम्भवात् । तस्माद् बहुकुरुचरेत्येव तद्व्यावर्त्यम् । तच्च तदन्तविधिं विना नोपपद्यत इति तज्ज्ञापकत्वं, स्त्रियामित्यस्य प्रकृतिविशेषणत्वज्ञापकत्वं चेति बोध्यम् । तत्करणे एतद्व्यावृत्तिरपि । अनेनैव उपसर्जनपदेनोभयोरपि ग्रहणमित्याशयात् ॥ अणकार्यमिति ॥ ङीबित्यर्थः । ताच्छीलिक इत्युक्तेस्तदस्यां प्रहरणमिति णे दाण्डेत्येव ॥

अकारः प्रश्लिष्ट इति ॥ तद्धार्तिकप्रत्याख्यानायेति शेषः । अभिजिद्विदभृदित्यादिसूत्रेऽस्त्रियामित्यनुवृत्तेस्तस्य गोत्रार्थकत्वेऽपि न तत्र ङीप् । सङ्घाङ्केति सूत्रे एतद्भाष्यप्रामाण्यादेकानुबन्धकपरिभाषाया अप्रवृत्त्या, गर्गादियञ एव ग्रहणमिति भावः ॥ एवमिति ॥ अकारः प्रश्लिष्ट इत्यर्थः ॥

[illegible]ङीषर्थमिति ॥ तत्फलं च ङीषिति भावः । न च लिङ्गविशिष्टपरिभाषया तत्सिद्धिः । एतत्सूत्रस्थेतरग्रन्थार्थभाष्यप्रामाण्येनास्याः स्त्रीप्रत्ययप्रकरणेऽनुपस्थितेः ॥ सामर्थ्यादेवेति ॥ अप्रातिपदिकत्वेऽपीति भावः ॥

उच्चारणार्थ इति ॥ तेन दृक आदेशसिद्धिः ॥ नित्करणेति ॥ असङ्गतविरोध-

कौरव्य ॥ कथं तर्हि, यद्यसौ कूपमाण्डूकि [illegible] स्मय इति भट्टिः । अत्राहुः । कौरव्यसाहचर्यादपत्यप्रत्ययान्तस्यैव माण्डूकस्येह ग्रहणम् । इह तु मण्डूकस्येयं भार्येति तस्येदमित्यण् ॥ कुमारीति ॥ प्रथमवयोवाची एष शब्दः । न त्वनूढत्वमयुक्तः । वृद्धकुमारीति तु गौणः प्रयोगः ॥ त्र्यनीकेति ॥ त्रयाणामनीकानां समाहारः अत्राजादेराकृतिगणत्वाट्टाबिति त्र्यनीकाधिकरणे मीमांसकाः ॥ पञ्चाश्वेति ॥ नन्वत्र द्विगोरिति ङीप् मा भूत्, ठगन्तत्वात्तु स्यादेवेति चेन्न । ठको योऽकार इति व्याख्यानात् ॥ द्विबिस्तेति ॥ सुवर्णबिस्तौ हेम्नोऽक्षे इत्यमरः । आचितो दश भाराः स्युः ॥ द्विकम्बल्येति ॥ द्वाभ्यां कम्बल्याभ्यां क्रीता । कम्बल्यमूर्णापलशतम् । कम्बलाच्च संज्ञायामिति यत् । क्रीतार्थस्य ठञो लुक् ॥ द्व्याढकीति ॥ द्वावाढकौ पचतीति, आढकाचितपात्रात् खोऽन्यतरस्यां, द्विगोष्ठँश्चेति, खठञ्भ्यां मुक्ते प्राग्वतीयष्ठञ् । तस्य लुक् । एतेन द्व्याचिता व्याख्याता ॥

काण्डान्तात् ॥ षोडशहस्तप्रमाणो दण्डः काण्डम् । यद्यपि विशेषणेन तदन्तविधिः सिद्धस्तथाऽपि अन्तग्रहणे असति क्षेत्र इत्येतत्, श्रुतत्वात् काण्डस्यैव विशेषणं स्यान्न तदन्तस्य । ततश्चेहापि स्यात्, द्वाभ्यां काण्डाभ्यां काण्डप्रमिताभ्यां क्षेत्राभ्यां क्रीता द्विकाण्डी वडवेति । इह तु न स्यात् । द्विकाण्डा क्षेत्रभक्तिरिति । अतोऽन्तग्रहणम् ॥ मात्रच इति ॥ यत्तु प्राचोक्तं द्व्यसचो लुगिति । तन्न । प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ ममेति सिद्धान्तात् ॥ द्विकाण्डी रज्जुरिति ॥ नन्विहापरिमाणान्तादिति पूर्वेण निषेधः स्यात् । काण्डशब्दस्यायामपरतयाऽपरिमाणार्थत्वात् । परितः

न्यायसहकृतेत्यर्थः ॥

न त्विति ॥ अल्पवयस्यूढायामपि प्रयोगादिति भावः ॥ गौण इति ॥ पुंसाऽसंयोगाऽऽदेरस्यादिति भावः ॥ ठगन्तत्वादिति ॥ द्वाभ्यां शताभ्यां क्रीता द्विशतेत्यादौ निषेधश्चरितार्थोऽत्र हि कनो लुक् ॥

कम्बल्यमिति॥अपरिमाणत्वेऽप्येतयोर्ग्रहणं नियमार्थम् उन्मानस्यचेद्, बिस्तकम्बल्ययोरेवेति । तेनाढकोऽन्ने द्विपली द्विनिष्कीत्यादिसिद्धिः ॥

श्रुतत्वादिति॥ अवान्तरवाक्यार्थबोधोत्तरं येन विधिरित्यस्य प्रवृत्तेस्तत्काले श्रुतत्वात्तेनैव सम्बन्धे जाते पञ्चात्तदन्तविधावपि पुनर्व्यापारे मानाभाव इति भावः ॥इहापीति॥ इहैवेत्यर्थः॥ सिद्धान्तादिति ॥ षोडशहस्तप्रमाणदण्डार्थकाण्डशब्दस्तु तिर्यङ्मानमिति न तस्योर्ध्वमानत्वमिति भावः ॥

सर्वत आरोहतः परिणाहतश्च येन मीयते तद्धि परिमाणपाढककुडवादि । न तु यथाकथञ्चित् परिच्छेदकमात्रम् । यदाहुः—

ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः ।
आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः, इति ॥

अत एव द्विहस्ता भित्तिरित्यत्र ङीप् न । अत्राहुः । नियमार्थमिदम् । क्षेत्रे एव निषेधो यथा स्यादिति । अतो द्विकाण्डी रज्जुरित्यत्र ङीषेव सूत्रस्य फलमिति ॥

पुरुषात् प्रमाणे ॥ यद्यपि पुरुषशब्दो जातिवचनस्तथापि द्वौ पुरुषौ प्रमाणमस्या इति वाक्ये प्रमाणे वर्तत एव । प्रमाणशब्दसामानाधिकरण्यात् । वृत्तौ तु तत्स्वभावादेव । तथा च शुल्बसूत्रम् । पञ्चारत्निः पुरुष इति ॥ द्विपुरुषीति ॥ अत्र न्यासकारः, प्रमाणे लो द्विगोर्नित्यमिति द्वयसचो लुगित्याह । तन्न । पुरुषशब्दस्य प्रमाणवाचित्वाभावेन, प्रमाणे ल इति श्लोकवार्तिकस्य तत्राप्रवृत्तेः । ये हि शमादिवत् प्रमाणत्वेन प्रसिद्धास्तत्रैतत् प्रवर्तते, न तु पुरुषशब्देऽपि । अन्यथा पुरुषद्वयसमित्यत्रापि लुक् स्यात् । स्पष्टं चेदं, पुरुषहस्तिभ्यामण् चेति सूत्रे पदमञ्जर्याम् । नचैवं द्वयसज्दघ्नचावपि नास्मात् स्यातामिति वाच्यम् । ऊर्ध्वमाने मतौ ममेति वचनात् । एवं, पुरुषात् प्रमाणे इत्यस्यापि सामर्थ्यादेव प्रवृत्तिः । यत्तु तत्रैव सूत्रे द्विगोर्नित्यं लुगिति वृत्तिग्रन्थमुपादाय हरदत्तेनोक्तम् । तस्मादप्राप्त एवात्र लुग्विधीयत इति । तदपि चिन्त्यम् । मुनित्रयानुक्तस्य विधानोक्तेर्व्याहतत्वात् । यदपि

प्रमाणे वर्तत एवेति ॥ परिच्छेदके वर्त्तत इत्यर्थः ॥ तत्स्वभावादिति ॥ वृत्तिस्वभावादित्यर्थः ॥ द्वयसचो लुगिति ॥ तस्यायं भावः । आयामो दैर्घ्यम् । तच्च द्विविधम् । तिर्यगूर्ध्वं च । उन्मानं च तुलादावारोप्य येन मीयते तदिदं च विनिगमनाविरहादिति ॥ प्रमाणवाचित्वाभावेनेति ॥ तिर्यङ्मानस्यैव प्रमाणत्वात् । तिर्यङ्मानस्यैवायामपदेन प्रमाणलक्षणे ग्रहणं, न तूर्ध्वमानस्य । ऊर्ध्वमानं किलोन्मानमित्युक्तेरिति भावः । द्विगोर्लुगित्यंशेऽपि, प्रमाणे इत्यनुवर्त्तते एवेति तात्पर्यम् ॥प्रमाणत्वेन प्रसिद्धा इति॥ तिर्यङ्मानत्वेन प्रसिद्धा इत्यर्थः । शमादीनामूर्ध्वाधरदिगवस्थितवस्तुपरिच्छेदकत्वेऽपि तिर्यगवस्थितवस्तुनोऽपि परिच्छेदकत्वात्तत्त्वेन सिद्धिरक्षता ॥ अन्यथेति ॥ न च प्रमाणे ल इत्यत्र, समर्थानां प्रथमाद्वेत्यतो वेत्यनुवृत्तेरुक्तप्रयोगसिद्धिः । आद्यपदयोरननुवर्तनेन वेत्यस्याप्यऽसम्बन्धात् ॥ लुक् स्यादिति ॥ शम इत्यादाविवेति भावः ॥ सामर्थ्यादिति ॥ तिर्यगवस्थितवस्त्वपरिच्छेदकत्वेऽपि सामर्थ्यात् प्रमाणपदस्य परिच्छेदकमात्रपर-

प्राचीनभाक्रियां व्याचक्षाणैरुक्तं, पुरुषहस्तिभ्यामित्यत्र पठ्यमानेन वार्तिकाऽन्तरेण लुगिति । तदपि रभसोक्तिमात्रम् । उदाहृतसूत्रस्य भाष्यवार्तिककाराभ्यामस्पृष्टत्वादित्यास्तां तावत् । वस्तुतस्तु, पुरुषात् प्रमाण इति सूत्रे द्विगोस्ताद्धितलुकि इत्यनुवर्तते । तत्सामर्थ्याल्लुगप्याक्षिप्यते । हरदत्तोक्तिरपि कथञ्चिदेवम्परतयैव नेयेति सहृदयैराकलनीयम् । प्रमाणे किम् । द्वाभ्यां पुरुषाभ्यां क्रीता द्विपुरुषा गौः । तद्धितलुकीत्येव । समाहारे पञ्चपुरुषी ॥

ऊधसोऽनङ् ॥ नादेशेनैव सिद्धेऽनङ्करणं, धनुषश्चेत्येतदर्थम् ॥

दाम ॥ बहुव्रीहिविशेषणत्वादेव सिद्धे अन्तग्रहणं स्पष्टार्थम् ॥ संख्यादेरिति ॥ स्वरितत्वबलादेकदेश एवानुवर्तत इति भावः ॥

केवलमामक ॥ इत्यादीति ॥ अध्यस्यां मामकी तनू । मित्रावरुणयोर्भागधेयी । अनिषव्यास्तन्वः सन्तु पापीः । उतापरीभ्यो मघवा विजिग्ये । समानी व आकूतिः । आर्यकृती । सुमङ्गली । शिवा रुद्रस्य भेषजी ॥ प्रत्युदाहरणं त्विति ॥ यत्तु प्राचाऽन्तर्वती पतिवतीति प्रत्युदाहृतम् । तदयुक्तमिति भावः ॥ व्यस्ते कथमिति ॥ यत्तु प्राचा समस्तेऽप्युपचार इति वर्णितं, तन्मुधेति भावः ।

पूतक्रतोरै च ॥ ऐकार आदेशो, न तु प्रत्ययः । उत्तरसूत्रे उदात्त इत्युक्तेः ॥ न त्विति ॥ अन्यथा वृषाकपिशब्दो लघावन्ते द्वयोश्च बह्वषो गुरुरिति मद्ध्योदात्त उदात्तत्वं प्रयोजयति । अन्यादिषु त्रिषु, स्थानेऽन्तर-

---

त्वमिति भावः ॥ लुगप्याक्षिप्यत इति ॥ इदमपि वृत्त्याशयवर्णनमात्रम् । वस्तुतस्तु द्वौ पुरुषौ प्रमाणमस्या इत्यर्थे, तदस्य परिमाणमिति ठकछञौ वाऽध्यर्धेति लुकि शास्त्रस्य चारितार्थ्यात् तदाक्षेपे न मानम् । तत्र हि परिमाणशब्देनोत्तरसूत्रानुरोधेन परिच्छेदकमात्रग्रहणमिति तत्त्वम् ॥

नादेशेनेति ॥ अत एव, ऊधसो नकारो लिङ्गाधिकारे इति वार्तिककृतोक्तम् । एतेन लाक्षणिकत्वादस्यानोऽल्लोपोऽन इति न स्यात् । कुण्डोध्न्यादिभ्य आचारक्विप्यात्मनेपदार्थं च ङकार इत्यपास्तम् । अत्रत्यवार्तिकभाष्यप्रामाण्येनाऽनङ्ग्रहणे प्रतिपदोक्तपरिभाषाया आचारक्विबभावस्य च तदन्ते अ त्मनेपद। भावस्य वा कल्पनात् ॥

तदयुक्तमिति ॥ अन्तर्वतीत्यत्र मतुपोऽप्राप्तेरिति भावः ॥ तन्मुधेति ॥ विभाषा सपूर्वस्येत्यत्र यञसंयोग इत्यस्यासम्बन्धात् । अत एवाशायाः पतिराशापत्नीति तत्रोदाहृतं भाष्ये । आशापूरकत्वेन कस्याश्चित्पतित्वमिति भावः ॥

इत्युक्तेरिति ॥ प्रत्ययत्वे हि आद्युदात्तश्चेत्येव सिद्धे तद्वैयर्थ्यं स्पष्टमेवेति

तम इत्येव सिद्धमिति प्राच्यां अन्या विरुद्धेराशिति भावः ॥ उदात्तैकार इति ॥ मनुशब्दो ह्याद्युदात्तः । सृष्टस्त्रिन्हीत्यादौ मनेरुभत्ययविधेः के सूत्रे धान्ये निदित्यधिकारात् । समासनिर्देशेनैतदर्शयति । उदात्त इत्यनुवर्त्तमानं सम्बन्धानुवृत्तेरैकारेणैव सम्बद्ध्यते, न त्वौकारेणापीति । ततश्च यदुक्तं प्राच्यैः, ऐकारौकारावुदात्तौ स्त इति । तदुपेक्ष्यम् । वृत्तिपदमञ्जर्यादिविरोधादिति भावः ॥ मनायीति, मध्योदात्तम् । इतरद् द्वयमाद्युदात्तम् । एता। कर्बुरा ॥ वर्णानामिति ॥ एतः । शोणः । शितिः । पृश्निः । पृषत् । इत्युदाहरणानि ॥ त्र्येण्येति ॥ अत्र उत्तरपदस्योपसर्जनत्वेऽपि समस्तस्य अनुपसर्जनत्वमिति भावः । सञ्ज्ञात्वाण्णत्वं छान्दसत्वाद्वा ॥ क्रमेके इति ॥ अत्र छन्दसीति भाष्योक्तेर्लोके, गतो गणस्तूर्णमासिक्रिकानामित्यादिप्रयोगाः प्रामादिका इति प्राञ्चः । वस्तुतस्तु छन्दस्येके इत्यन्वयात् भाषायामपि इति भाष्याभिप्रेतम् । अन्यथा एकग्रहणं न कुर्यात् । न हि छन्दसि, पलिक्रीरिङ्गवतय इत्यादिप्रयोगेषु कश्चिद्विप्रतिपद्यते ॥ विशुद्धवाचीति ॥ दैप् शोधने इति स्मरणात् । अवदातः सितो गौर इति कोशे तु विशुद्धत्वसाधर्म्यात् प्रयोग उपनिबद्ध इति भावः ॥ लघाविति ॥ अन्ते एकस्मिँल्लघौ, द्व्योश्च लघ्वोः परतो, बह्वषो बह्वच्कस्य गुरूदात्तः स्यात् । आपित्रि अचः प्राचां सञ्ज्ञा ॥ कृष्णेति ॥ कृषेश्चेति नप्रत्यये, कपेश्चेति सौत्राद्धालोरौणादिके इलचि च कृष्णकपिलावन्तोदात्तौ ॥

षिद्गौरादिभ्यश्च ॥ श्वन् शब्दोऽत्र पठ्यते । तेन, ऋन्नेभ्यो ङीप् इत्यत्र यत्प्राचा शुनीत्युदाहृतं तत्प्रामादिकम् । यत्तु व्याचक्षते । श्वानमाचष्टे श्वेवाचरतीति वार्थे णिचः किपो वा कौ उपसर्जनत्वाद् ङीषभावे

भावः ॥ न त्वौकारेणेति ॥ ततश्च स आन्तरतम्यादनुदात्त एवेति भावः । इतरद् द्वयम् । मनावी मनुरित्येतत् ॥ समस्तस्येति ॥ एतच्च गृह्यवृत्त्यनुसारेणोक्तम् । टिड्ढाणञित्यादाविवात्रापि गृह्यमाणविशेषणत्वमेवेत्युपमानानीति सूत्रभाष्यसंमते पक्षे त्रिषु स्थानेषु एनी त्र्येणीति बोध्यम् । छान्दसत्वाद्वा ङीप् । तदध्वनयन् सञ्ज्ञात्वानङ्गीकारे आह ॥ छान्दसत्वाद्वेति ॥ ङीप् णत्वं चेति शेषः ॥ प्राञ्च इति ॥ कैयटादय इत्यर्थः । छान्दसेषु सूत्रेषु वाग्रहणवदिदमेक इत्यपीति तेषां भावः ॥ नप्रत्यये इति ॥ दशपाद्यनुसारेणेदम् । तत्र हि नप्रत्ययप्रकरणे तृभिशुभिरप्सिकृषेश्च किदिति इलच्प्रकरणे कपेश्चेति पठितम् । कपिः सौत्र इति चोक्तम् । पञ्चपाद्यां तु कृषेर्वर्णे इति नक्प्रत्ययः । कपेः पश्चेति इलजित्युक्तम् ॥

निःशुनीत्यादिवद् ङीबिति। तन्न। णिचि संप्रसारणटिलोपयोरुक्तं रूपं मुख्यमते दुर्लभम्। अन्यत्र तु आस्तां कथञ्चित् ॥ आवपनं चेदिति ॥ ओप्यते निक्षिप्यते धान्यं यस्मिन्॥गोणान्येति ॥ यस्या यादृच्छिकं नाम॥अकृत्रिमेति ॥ यथा, सैषा स्थली यत्र विचिन्वता त्वामिति ॥ स्थलाऽन्येति ॥ कृत्रिमा पुरुषेण संस्कृता। यथा, स्थलयोदकं परिगृह्णन्ति ॥ भ्राणा पक्वा ॥ अयोविकार इति ॥ फाल इति प्रसिद्धः ॥ कुशान्येति ॥ छन्दोगाः स्तोत्रीयागणनार्थान् औदुम्बरान् शङ्कून् कुशा इति व्यवहरन्ति। अतः कृकमीति सूत्रे, हानौ तूपायनेति व्याससूत्रे, कुशा वानस्पत्या स्थ ता मा यातेति श्रुतौ च प्रसिद्ध एवायम् ॥ पतिंवरेति ॥ तथाच पाणिग्रहणोत्कण्ठाभिधायित्वाद् गुणवचनोऽयमिति भावः ॥

बह्वादिभ्यश्च ॥ बहुशब्दस्य गुणवाचित्वात् पूर्वेण सिद्धे उत्तरार्थं ग्रहणमित्याहुः। वस्तुतस्तु बहुशब्दो, नित्यं छन्दसीत्युत्तरसूत्रं चेति द्वयमपि व्यर्थमेव। सर्वविकल्पानां छन्दसि व्यवस्थितत्वात् ॥ पुंयोगादीति ॥ तथाच गौणी वृत्तिरितिभावः। यदा तु मुख्यार्थात्तस्येदमित्यण् तदा गौपी-

---

पठ्यत इति ॥ इदं चासिद्धवत्सूत्रे भाष्ये स्पष्टम् ॥ उक्तं रूपमिति ॥ नान्तं रूपमित्यर्थः। णिचि, नस्तद्धित इति टिलोपे तदभावः स्पष्ट एवानच, नस्तद्धित इति टिलोपो नेष्टवद्भावेन। टेरिति तु प्रकृत्यैकाजिति निषिद्धमिति वाच्यम्। अस्य मतस्य नामधातौ दूषयिष्यमाणत्वात्। तद् ध्वनयतोक्तम् ॥ मुख्यमते इति॥ नस्तद्धित इत्यस्यापि प्रकृतिभाव इति षपूर्वेति प्रकृत्यैकाजिति सूत्रभाष्ये ध्वनितत्वेन पूर्वं टिलोपाभावेऽपि संप्रसारणे वार्णादाङ्गमिति पररूपात् पूर्वं टिलोप इति तस्य दौर्लभ्यम्। तदुक्तं, संप्रसारणटिलोपयोरिति ॥ अन्यत्र क्विबन्तात् क्वौ, अनुनासिकस्येति दीर्घेऽपि एकदेशविकृतन्यायेनानत्वमिति सम्प्रसारणं भवतीति भावः ॥ कथञ्चिदिति ॥ अनेनारुचिः सूचिता। तद्बीजमेषामनभिधानम्। अन्यथाऽनुपसर्जनादिति सूत्रस्य तदन्तविधिज्ञापकता भाष्योक्ता भज्येत। किञ्चाचक्षाणकर्त्रादिरूपार्थस्यापि श्वशब्दार्थत्वेन तस्यानुपसर्जनत्वादस्त्येव ङीषः प्राप्तिः। अभिव्यक्तेति न्यायस्तु पदकार्यविषय एवेति ॥

इत्याहुरिति ॥ अत्रारुचिबीजं त्वाकडारसूत्रस्थभाष्यविरोधः। तत्र हि समस्तकृदन्ततद्धितसर्वनामजातिसंख्यासञ्ज्ञाशब्दातिरिक्तप्रातिपदिकग्रहणं गुणवचनसञ्ज्ञा कृता। बहुशब्दश्च संख्या। अत्रार्थे बहुग्रहणमपि मानम्। सत्त्वे निविशत इत्यादि गुणलक्षणमपि तदेकवाक्यतापन्नमित्यन्यत्र प्रपञ्चितम् ॥ व्यर्थमेवेति ॥ उत्तरार्थमिति वदतां मते इति शेषः ॥ गौणी वृत्तिरिति ॥ लक्षणेत्यर्थः।

त्येव भवति । योगश्चेह दम्पतिभाव एवेत्येके । वस्तुतस्तु संकोचे मानाभावाज्जन्यजनकभावोऽपीह गृह्यते। तथाच भट्टिः । कौशल्ययाऽसावि सुखेन रामः प्राक्केकयीतो भरतस्ततोऽभूदिति । केकयदुहिता केकयी । जनपदशब्दादित्यत्र्यप्रत्यये तु कैकेयीति स्यात् । न च तस्य, अतश्चेति लुक् । न प्राच्यभर्गादीति निषेधात् । तथाच कालिदासः, कैकेयि कामाः फलितास्तवेति । एतेन देवकी व्याख्याता॥ दुष्टो यवो यवानीति ॥ जात्यन्तरमेवानेनाभिधीयते । अयमेव तस्य दोषः।यदुक्तयवत्वजातेरभावेऽपि तदाकारानुकृतिः ॥ ङीष् वाच्य इति ॥ इदञ्च तृतीये भाष्ये, इङश्चेति सूत्रे स्थितम् ॥ कथमिति ॥ यत्तु वदन्ति । दोर्घोच्चारणसामर्थ्यात् आ अनुक् इति पदं विभज्यते।तत्रेन्द्रादीनामनुकैव सिद्धे आकारादेशविधानसामर्थ्यात् क्वचिदन्यतोऽपि विधानमनुमीयते। तेन ब्रह्माणी सिद्ध्यतीति। तच्चिन्त्यम् । अनुकि कृतेऽतो गुणे इति पररूपप्रसङ्गात्।नन्वकारोच्चारणसामर्थ्याद् दीर्घो भविष्यति । अन्यथा हि नुकमेव कुर्यादिति चेन्न । अल्लोपोऽन इत्यस्य बाधेन चरितार्थत्वात्। पत्युर्न इतिवदादेशे कर्त्तव्ये आगमलिङ्गककारोच्चारणसामर्थ्यादेवाल्लोपो न भविष्यतीति चेन्न । शर्वशब्दे ककारस्य चारितार्थ्यात् । न हि तत्र लोपोऽस्ति। न संयोगादिति निषेधात्। तस्मात् ककाराकारयोः सामर्थ्यविरहे पररूपबाधनार्थं दीर्घोच्चारणमावश्यकमिति ॥ एतेनानुक् ह्रस्वादिरेव लाघवाद्वक्तव्य इति हरदत्तोक्तिरपि प्रत्युक्ता ॥ कर्मण्यणिति ॥

न त्वेषा गौणी । सादृश्यसम्बन्धमूलकलक्षणाया एव गौणित्वात् ॥ इङश्चेति सूत्रे इति ॥ अपादाने स्त्रियां घञ उपसंख्यानं तदन्ताच्च वा ङीषिति तत्रोक्तम् । उपेत्याधीयते यस्या इति विग्रहः॥दीर्घोच्चारणेति॥ न चेन्द्रादिशब्देभ्य आचक्षाणिचि टिलोपे इन्द्राणीति सिद्ध्यर्थं तत् । अदन्तत्वाभावेन तत्राप्राप्तेः ॥ पदं विभज्यते इति ॥ तत्र नकारोच्चारणसामर्थ्याच्छ्रुतक्रमारोधेन च पूर्वमाकारस्ततोऽनुगिति बोद्धम् । स्पष्टार्थं दीर्घाकार आदेश उक्तः ॥ प्रसङ्गादिति ॥ इन्द्रादिशब्दे इति भावः ॥ अकारोच्चारणेति ॥ अनुकीति शेषः ॥ अल्लोपोऽन इत्यस्य बाधेनेति ॥ अल्लोपोऽन इत्यत्र लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्तेर्बहुव्रीहेरूधस इति सूत्रभाष्यसंमततयाऽकाराभावेऽवश्यप्राप्तस्य अल्लोपोऽन इत्यस्य बाधेनाकारोच्चारणं चास्तित्वार्थमित्यर्थः ॥ न भविष्यतीति ॥ एवञ्च न तद्बाधार्थमाकारोच्चारणमिति पररूपस्य तेन बाधादिति भावः ॥ पररूपबाधनार्थमिति ॥ अल्लोपबाधेन चरितार्थस्य पररूपबाधकत्वे मानाभावेनेन्द्रशब्दे पररूपबाधायाकारोच्चारणस्यावश्यकत्वेन त्वदुक्तकल्पनानवकाश इति भावः ॥

तदन्तान् ङीप् । पूर्वपदात्संज्ञायामिति णत्वम् ॥ वस्त्रक्रीतीति वस्त्रभिम् क्रीत इत्यस्यामवस्थायां प्राक् सुबुत्पत्तेः समासेऽदन्तत्वाद् ङीष् ॥ क्वचिन्नेति ॥ कर्तृकरणे कृतेति सूत्रे बहुलग्रहणात् क्वचित् सुबन्तेन समासः । तत्र च सुपः प्रागेवान्तरङ्गत्वाट्टाप् । ततोऽदन्तत्वाभावान्न ङीषिति भावः ॥ तेन बह्विति ॥ अयं भावः । बहोर्नञ्वदुत्तरपदभूम्नि, नञ्सुभ्याम्, जातिकालसुखादिभ्योऽनाच्छादनात् क्तोकृतमितप्रतिपन्नाः, इति ह्रदन्तोदात्ततांविधायकानि । तत्र जातिपूर्वादित्युक्ते बह्वादिपूर्वकस्यार्थाद् व्युदास इति अस्वाङ्गपूर्वपदाद्विकल्पस्य वक्ष्यमाणत्वादिह स्वाङ्गपूर्वपद एवोदाहरणमित्याह ॥ ऊरुभिन्नीति ॥जातान्तादिति॥ वर्णादनुदात्तादितिवद् बहुव्रीहेरुदात्तादित्येव सिद्धेऽन्तग्रहणं नित्यत्वप्रतिपत्त्यर्थम् ।वा जाते इति तु वैकल्पिक उदात्तो, न तु नित्य इति भावः ॥ सुमुखा शालेति ॥ एवञ्च फलमुखी कारणमुखी चानवस्थेत्यादिप्रयोगाः प्रामादिकाइति बोद्धव्यम् ॥ उरः क्रोडेति ॥ स्त्रीलिङ्गोऽयमिति हरदत्तादयः । तत्रोपसर्जनह्रस्वत्वे कृतेऽदन्तत्वाद् ङीषः प्राप्तिः । अमरस्तु । न ना क्रोडं भुजान्तरमित्याह । रत्नमतिस्तु पुंस्त्वमाह । गणे च क्रोडेति प्रातिपदिकमात्रं पठ्यते, न तु टाबन्तमिति गणरत्नमहोदधिकारः । एवञ्चाविशेषाल्लिङ्गत्रयेऽप्युदाहरणं बोद्धव्यम् । माधवस्तु तुदादिगणे, क्रुड निमज्जन इति धातावाह । क्रोडः । घञ् । क्रोडादिषु टाबन्तस्यैव पाठाद् भुजान्तरमात्रवचनस्य क्रोडशब्दस्य बहुव्रीहौ स्वाङ्गलक्षणङीष्विकल्पो भवत्येव । कल्याणक्रोडी कल्याणक्रोडा मयूरीति ॥ ङीषो ङीबादेश इति ॥ दिक्पूर्वपदादिति पञ्चम्या, ङीषिति प्रथमायाः षष्ठी कल्प्यत इति भावः । यदि तु स्वतन्त्रो ङीप् स्यात् तदा प्राग्गुल्फादावपि प्रसज्ज्येत । पूर्वोक्तपर्युदासस्य निषेधानां चानुवृत्तौ तु गौरवमिति भावः॥वृषलीति ॥ एकस्यां हि व्यक्तौ वृषलत्वे कथिते तदपत्यतत्सहोदरादौ कथनं विना तस्य

ङीबिति ॥ इन्द्रवरुणेति सूत्रं त्विन्द्रीत्यादिव्यावृत्त्यर्थमुदात्तनिवृत्तिस्वरेण च स्वरेन विशेष इति भावः ॥ सुबुत्पत्तेरिति ॥ टाबुत्पत्तेश्चेत्यपि बोद्धव्यम् ॥ बहुलग्रहणादिति ॥ तत्र एव गतिकारकेत्यादेरनित्यत्वेनाप्रवृत्तिरिति भावः ॥ सुखादिभ्य इति ॥ सुखादयश्च, सुखादिभ्यः कर्तृवेदनायामित्यत्र पठिताः सुखदुःखकृच्छ्रादयः । सकृदाख्यातनिर्ग्राह्योत्यन्ते द्वितीयं लक्षणम् । तत्राख्यातमुपदेश इत्याशयेन आह ॥ एकस्यामित्यादि ॥ ब्राह्मणत्वमप्येवं तत्पितृपितामहादौ सुग्रहमिति बोद्धव्यम् । इयं च चाकृतिर्न ॥ ब्राह्मणक्षत्रियाचाकारस्य समत्वादिति बोद्धव्यम् ॥

सुग्रहत्वादिति भावः ॥ औपगवीति ॥ अपत्यलक्षणं ङीषं परत्वादयं बाधते । एवञ्चापत्याधिकारे, औपगवीति प्रतीकमुपादाय, टिड्ढाणञ् इति ङीबिति व्याचक्षाणा उपेक्ष्या इति भावः ॥ ब्राह्मणीत्यत्रेति ॥ एवञ्च माचो ङीषुदाहरणं ग्रामादिकमिति भावः ॥ कुरुरिति ॥ लिङ्गविशिष्टपरिभाषया स्वादयः । माचा त्वन्तादिवच्चेति सूत्रमुपन्यस्यादिवद्भावः स्वादय इत्युक्तम् । अत्रेदं वक्तव्यम् । परं प्रत्यादिवद्भावो विधीयते । तथाचेद्भावः इति प्रतिषेध एव स्यान्न तु स्वादयः । यत्तु व्याचख्युः । आदिः ऊङ्पेक्षया पूर्वः प्रातिपदिकं तद्वद्भावात् तदवयवत्वेन ग्रहणात् पूर्वान्तवद्भावादिति यावदिति । तदपि क्लिष्टं स्वपरग्रन्थविरुद्धम् । उक्तरीत्या हि काण्डे कुड्ये इत्यादावप्येकवचनमुत्सर्गत इति सुः प्रवर्तेत । तद्वारणाय चाप्रत्यय इति प्रसज्ज्यप्रतिषेधाभ्युपगमे प्रकृते दोषः। श्वश्रूरित्यत्रैकादेशाभावाल्लिङ्गविशिष्टपरिभाषाया एव आवश्यकत्वाच्च । यत्तु तत्र श्वशुरः श्वश्रूति निर्देशात् स्वादय इति । तन्न । निर्देशस्य शब्दपरत्वात् । विपराभ्यां जेः, ङेर्य इतिवत् ॥ श्वशुरस्येति ॥ पुंयोगलक्षणे ङीषि प्राप्ते ऊङ् । तत्सन्नियोगेन च विधीयमानो लोपः सन्निहितत्वादन्तस्यैवाकारस्य, न त्वादेः । एतच्च वचनं श्वशुरः श्वश्रूति निर्देशसिद्धार्थकथनपरम् । अतोऽपि प्रथमाकारस्य लोपो न शङ्क्यः ॥ उपमानवाचिपूर्वपदमिति ॥ धात्रीकराभ्यां करभोपमोरुरित्यत्र तु न । करभशब्दस्योपमानवाचित्वेऽपि पूर्वपदत्वाभावात् ॥ शफौ खुराविति ॥ यद्यपि शफं क्लीबे खुरः पुमान् इत्यमरः । तथाऽपि शफशब्दस्य पुंस्त्वमपि

बाधते इति ॥ गोत्राणीति शेषः ॥ प्रतीकमुपादायेति ॥ औपगवीत्यस्य गोत्रानन्तरापत्यसाधारणत्वेन विशिष्य इति तदुक्तिरुपेक्ष्येत्यर्थः । एतेन जातिलक्षणे, एको गोत्रे इति सूत्रस्थभाष्यप्रामाण्येन पारिभाषिकगोत्रस्यैव ग्रहणम् । अवन्तीत्यादेर्गोत्रत्वारोपेण जातित्वमिति प्राचीनोक्तम् अदुष्टमित्यपास्तम् ॥ लिङ्गविशिष्टेति ॥ यत्तु लिङ्गबोधकप्रत्ययान्तत्वरूपलिङ्गवैशिष्ट्यस्य प्रातिपदिकत्वस्य च लाभाय पूर्वान्तत्वपरादित्वयोरावश्यकत्वेनोभयत आश्रयणेऽन्तादिवत्त्वाभावान्नात्रेयमिति । तन्न । इन्द्राणीत्यसिद्ध्यापत्तेः । तस्मात् प्रातिपदिकत्वोपयोगो न कश्चित् । नापि लिङ्गविशिष्टप्रातिपदिकस्येति परिभाषायां पठ्यते । तथा प्रातिपदिकत्वतद्धर्म्याप्यधर्माणां लिङ्गप्रत्ययविशिष्टेऽतिदेशान्नेति दिक् ॥

ननु सप्तम्यधिकरणे चेति निर्देशेन विभक्त्येकादेशस्यान्तवत्त्वाभावज्ञापनादुत्सर्गस्यासार्वत्रिकत्वाच्च ह्रस्वस्य सत्त्वप्रधाने एव प्रवृत्तेश्च काण्डे इत्यादौ न दोषोऽत आह ॥ श्वश्रूरित्यत्रेति ॥ वचनमिति ॥ वृत्त्यादिपठितमित्यर्थः ॥

बहुसंमतम् । शफाविव जर्भुराणेति श्रुतौ, ग्राम्यपशुसङ्घेष्विति सूत्रस्य व्याख्यावसरे न्यासहरदत्तादिग्रन्थेषु वाचस्पत्यादिनिबन्धेषु च प्रचुरप्रयोगदर्शनात् । लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति भाष्याच्च । शफो भुजो गुदं घोणेति गणरत्नमहोदधौ क्रोडादिगणे पाठाच्च । शफः खुरे गवादीनां मूले विटपिनामपीति हेमचन्द्रकोशाच्च । विश्वकोशे च पुन्नपुंसकतोक्ता । वामौ सुन्दरौ ऊरू यस्या इति विग्रहः । इह सर्वत्र उपमानाभावादप्राप्ते विधिः । कथं तर्हि पीवरोरु पिबतीव बर्हिण इति कुमारः । प्रमाद एवायम् । सञ्ज्ञापूर्वकत्वात् संबुद्धिगुणो नेत्येके ॥ हितेन सहेति ॥ समो वा हिततयोरिति व्युत्पादितः सहितशब्दस्तु नेह गृह्यते । एकदेशविकृततया संहितग्रहणादेव सिद्धेरिति भावः ॥ अञ् योऽकार इति ॥ अञ्ग्रा अकारविशेषणं किम् । शूरसेनी । जनपदशब्दादित्यञोऽतश्चेति लुकि जातिलक्षणो ङीष् ॥ शार्ङ्गरवीति ॥ शृङ्गरुशब्दादपत्यार्थे अण् ॥ नृनरयोरिति ॥ नृशब्दाद् ऋन्नेभ्य इति ङीपि नरशब्दाज्जातिलक्षणे ङीषि प्राप्ते वचनम् । ननु नरशब्देऽलोऽन्त्यस्य वृद्धिः स्यात् । यच्चाहुः । अन्त्यस्य यस्येति लोपेनापहारादनन्त्यस्याप्यकारस्य वृद्धिर्भवत्यान्तरतम्यात् । गुणे त्वन्याय्यकल्पनेत्यलोऽन्त्यपरिभाषाबाधस्यैव न्याय्यत्वादिति । तन्न । प्रत्ययसन्नियोगशिष्टाया वृद्धेरन्तरङ्गत्वेन परमपि यस्येति लोपं बाधित्वा प्रवृत्त्यौचित्यात् । किञ्चास्तु कथञ्चिल्लोपस्तथाऽपि रेफस्यैव वृद्धिः स्यान्न त्वकारस्य । अन्तरतमपरिभाषायाः परत्वात् । अपि चान्तरतमपरिभाषाऽसदृशमादेशं व्यावर्तयति,

---

उपमानंसादृश्यं,तदभावात्तस्य समासावाच्यत्वादित्यर्थः।यद्वोपमानत्वेन प्रतीत्यभावादित्यर्थः।शफोरूरित्यत्रापि सादृश्यमूलकः शफत्वारोपो, न तु तत्प्रतीतिरिति भावः । एवञ्च करभोरुशब्दे आरोपविवक्षायामूङ् न भवत्येव । एतेन करभोरुभिरिति व्याख्यातम् ॥ एके इति ॥ तस्य भाष्यानुक्तत्वात् साधुत्वे न नियामकतेत्यरुचिरत्र ॥ ङीषिति ॥ अल एव, न प्राच्येति सूत्रे यौधेयादिग्रहणं चरितार्थम् । ताद्धि पश्वादियौधेयादिभ्यामणञाविति स्वार्थिकाञोऽतश्चेति प्राप्तलुको निषेधार्थम् तत्फलं चाजन्तत्वाद् ङीन् यथा स्यात् । ठगन्तत्वाद् ङीब् मा भूदिति ॥ नरशब्दादिति ॥ यद्यपि नृशब्देन नारी सिद्धा, नरी च पुंयोगे दुर्वारा । तथाऽपि नरत्वजातिमात्रप्रतिपादनेच्छायां नरीत्यस्य वारणार्थं नरग्रहणं बोद्धव्यम् । ननु वृद्धिविधानसामर्थ्याल्लोपबाधोऽत आह ॥ गुणेत्विति ॥ अलोन्त्यपरिभाषाबाध एव न्याय्य इति भावः ॥ अन्तरङ्गत्वेनेति ॥ सामर्थ्याद् बाधो ह्यनुचितः । न्यायप्राप्तबाधस्तूचित एवेति भावः ॥ कथञ्चिदिति ॥ संनियोगशिष्टत्वानङ्गीकारेणेत्य-

न तु स्थानिनं नियच्छति । तत् कथं रेफस्य स्थानित्वव्याप्तिः । किञ्च गुणे त्वन्यायेति न्यायोपन्यासस्तु स्वकीय एव । परिभाषयोः परत्वं गुणगुणिभावाभावात् । अत्रेदं तत्त्वम् । नर इति रान्तलुप्ताकारोच्चरणम् । तत्र अः नरः । ना च नश्च नौ तयोरिति व्याख्येयम् । यद्वा नरस्य अः नरः कालात्यत् पररूपम् । ना च नश्च तयोर्नृनरयोः । नरस्य च अयम् एव अकारो गृह्यते, न तु द्वितीयः । अश्लेषसामर्थ्यात् । अधिकं शब्दकौ बोद्धव्यम् । पुत्रशब्दोऽत्र पठ्यते । शैलपुत्री, पुत्रीव हर्षं हृदये तनोति । दुर्वे तदुर्वीपतिपुत्रि सर्वम् । न च पुत्रशब्दः कन्यायां नास्तीति भ्रमितव्यम् । आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी । आहुर्दुहितरं सर्वे इत्यऽमरोक्तेः । अत एव प्रत्ययस्थादितीत्वप्रकरणे, वा सूतकापुत्रिका सूतिकापुत्रिकेति वार्तिकं च सङ्गच्छते । यत्त्वत्र हरदत्तेनोक्तम् । केवलपुत्रशब्दः स्त्रियां न वर्त्तते इति । तद्भाष्यादिविरोधादुपेक्ष्यम् । इत्त्वप्रकरणस्थस्वग्रन्थविरोधाच्च । इदं तु चिन्त्यम् । कारे सत्यागदस्येति सूत्रे सूतोग्रराजभोजकुलमेरुभ्यो दुहितुः पुत्रङ् वेति वार्तिकं किमर्थमिति । यत्तु वदन्ति स्वरार्थमिति । तन्न । टित्वाद् ङीपि कृते इदात्तानिवृत्तिस्वरेणान्तोदात्ते ङीनन्तेन तत्पुरुषेऽपि समासस्वरेणान्तोदात्त एवेति स्वरे भेदाभावात् । यदपि शार्ङ्गरवादौ

ऽर्थः ॥ तत्कथमिति ॥ स्थानेऽन्तरतमे इति सप्तम्यन्तपाठस्य भाष्ये कुमार्यर्थेत्यादौ यणनापत्त्या दूषितत्वादिति भावः ॥ परिभाषयोरिति ॥ तद्व्याख्यातृग्रन्थानुसारेण इदम् । तैर्हि अलोऽन्त्यस्येत्यस्यैव बाधो, न त्वन्तरतमपरिभाषाया इति व्याख्यातम् ॥ व्याख्येयमिति ॥ नृनरयोरित्यावर्त्तते । एकत्र पञ्चम्यर्थे षष्ठी । ताभ्यां ङीन् नुनेरोऽकारस्य च वृद्धिरित्यर्थ इति भावः । अत एव वानरशब्दे नातिप्रसङ्गः । यतो नरशब्दाद् ङीन्, तदीयरेफान्तसम्बन्ध्यकारस्यैव वृद्धिविधानाद् वानरे नरस्यानर्थक्यात्ततो न ङीनिति बोद्धव्यम् । तदाह ॥ अधिकमिति ॥ अमरोक्तेरिति ॥ तत्र स्त्रीत्वबोधे ईकारसमभिव्याहारस्तन्त्रम् । केवलाकारान्तपुत्रशब्दस्तु पुंस्त्वविशिष्टस्यैव बोधकोऽतएव, स पुत्र इत्यतो नसन्देहः । पुमांसं पुत्रमाधेहीत्यादौ पुंस्त्वेन विशेषणं त्वतिशयितपुंस्त्वबोधनायेति भावः ॥ चिन्त्यमिति ॥ चिन्ताबीजं तु सूतादिपुंशब्देभ्यः परे ङीनन्ते तत्पुरुषे, पुत्रः पुम्भ्य इत्यनेन पुंशब्दात् परपुत्रशब्दान्ततत्पुरुषे त्रस्यादिरुदात्त इत्यर्थकेन लिङ्गविशिष्टपरिभाषया ङीशब्दोकारोदात्तत्वम् । पुत्रडादेशे तु न तत्प्रवृत्तिः । सानुबन्धकत्वादन्तस्तत्रोदात्तनिवृत्तिस्वरेणान्तोदात्तत्वमिति । नादिन्याक्रोशे पुत्रस्येत्यस्य पुत्रटि अत्रवृत्तिस्तु न फलम् । एतत्सम्बन्ध्यचः परस्य यर आदिनीशब्दपरत्वासम्भवात् । पुत्रटः स्थानिवद्भावेन दुहितृशब्दे ऽपि, न षडिति निषेधो न । तस्य ऋन्नेभ्य

अन्यत्राऽदृष्टत्वादिति वाच्यम् । देवतार्थकतद्धितादौ दृष्टत्वादिति भावः ॥ वचनं संख्येति ॥ तथैव प्राचां व्यवहारात् । इह सूत्रे, अर्थे लिङ्गे च प्रथमेत्येतावदेव सुवचम् । इतरत् सर्वं त्युक्तुं शक्यम् । तथाहि । अर्थे प्रथमेत्युक्ते कस्यार्थे इत्याकाङ्क्षायां यस्मात् स्वादिविधिस्तस्येति लभ्यत एव स्वादयश्च प्रातिपदिकाल्लिङ्गप्रत्ययविशिष्टाच्च विधीयन्ते । तदर्थत्वञ्च ततो नियतोपस्थितिकत्वमेव । एवञ्च मृडानीत्यादौ पुंयोगमहत्त्वादेरपि ङ्यन्तानियतभानेन प्रथमा सिद्ध्यतीति अपरमनुकूलम् । यथान्यासे तु सा न स्यात् । यदि तु अर्थशब्दो वृत्तिविषयपरः । वृत्तिस्तु शक्तिर्लक्षणा च ।

स्थितिरिति तत्रान्वयस्यैवाभाव इति भावः । अत एवानुभूयते इत्यादौ सकर्मकत्वम् । निपातातिरिक्तत्वेन विशेषणाददोष इत्यन्ये ॥ देवतार्थकेति ॥ आमिक्षां देवतायुक्तां वदत्येवैष तद्धित इति मीमांसकमते इति शेषः । एकार्थीभाववादिनामस्माकं तु विशिष्टोपस्थित्या तत्रापीदृशान्वयो दुर्लभ एव । द्रोणो व्रीहिमानयेत्यादि त्वनभिधानान्न । सर्पिः कुडवमात्रामित्यादौ षत्वविकल्पोऽपि व्यवस्थितविभाषया नेति दिक् ॥ वस्तुतस्तिङ्समानाधिकरणे प्रथमेति लक्षणैकवाक्यतया परिमाणेत्यस्य परिमाणे वर्त्तमानात् प्रातिपदिकादित्येवार्थः । न च प्रातिपदिकार्थत्वात् सिद्धिः । प्रवृत्तिनिमित्ततदाश्रयद्रव्ययोरेवात्र प्रातिपदिकार्थपदेन ग्रहणाद् द्रोणादिपदानां च द्रोणत्वाद्येव प्रवृत्तिनिमित्तम् । परिमाणत्वेन परिमाणं तु लिङ्गवद्विशेष्यान्वय्येव । द्रोणः परिमाणमिति तु द्रौ ब्राह्मणावित्यादिवदुपपन्नम् । द्रोणत्वादि चेयत्ताविशेषावच्छिन्नपलादिपरिच्छिन्नधान्यादिपरिच्छेदकत्वसमानाधिकरणे धर्मः । द्रोणः खारी आढकमित्येव तदुदाहरणं भाष्योक्तं साधु । द्रोणो व्रीहिरिति तु सिंहो माणवक इतिवल्लक्षणया साधु । लक्षणा च शक्यतावच्छेदकारोप एव । एवञ्च प्रातिपदिकार्थ इत्यस्यालिङ्गा लिङ्गप्रवृत्तिनिमित्तकाश्रोदाहरणम् । अन्ये सर्वे लिङ्गाद्याधिक्यस्य । परिमाणग्रहणं परिच्छेदकमात्रोपलक्षणम् । तद् ध्वनयन्नाह ॥एतावदेव सुवचमिति॥ नियतोपस्थितिकत्वमिति॥ तद्वच्च प्रवृत्तिनिमित्ततदाश्रयरूपम् । परिमाणञ्च प्रातिपदिकांशे । लिङ्गप्रत्ययविशिष्टांशे तु लिङ्गमहत्त्वादिकं च ततो नियतोपस्थितिकमिति तत्सर्वं तदर्थत्वेन गृह्यते । लिङ्गोदाहरणं तटस्तटमिति बोद्धव्यम् । अकारान्तप्रातिपदिकात् कस्यापि नियमेनानुपस्थितेस्तस्य तदर्थत्वाभावात् ॥ सा न स्यादिति ॥ न च लिङ्गविशिष्टपरिभाषया सिद्धिः । यथान्यासे प्रातिपदिकार्थशब्देन प्रवृत्तिनिमित्ताश्रययोरेव ग्रहणेन लिङ्गग्रहणेन तन्मात्राधिक्यस्यैव ग्रहणेन हिमानीत्यादौ महत्त्वस्याधिक्यसत्त्वेन तदसिद्धिरित्याशयात् । द्रोणादिशब्देभ्यः परिमाणस्याऽपि नियतोपस्थित्या तदपि तदर्थ एवेति तेभ्यः प्रथमासिद्धिः । परिमाणग्रहणस्य मूलोक्तार्थकत्वे तु तथा बोधार्थं तस्यावश्यकत्वेनैतावदेव सुवचमित्युक्तेरसङ्गतिः । स्पष्टैव ॥ लक्षणा चेति ॥ इदं च रूपकथनं, न तु प्रकृतोपयोगि । यदस्य

गौणी तु लक्षणान्तर्भूता पृथगवोक्ता । त्रिकं प्रातिपदिकार्थ इत्याश्रीयते तदा लिङ्गेत्यपि प्राप्तम् । लक्ष्यमाणं विनियोज्यमपि न क्षतिः । तत्त्यागात् । तस्मात् अर्थे प्रथमेत्येव सारम् । द्रोणो व्रीहिरित्यपि द्रोणत्व इव तत्परिमिते उपचारात् सिद्धम् । गौर्वाहीक इतिवत् । एको द्वावित्यादावपि न केवला प्रकृतिः प्रयोक्तव्येति निषेधादे सिद्धम् । अनन्वितार्थकमपेक्षयाऽनुवादकमात्रप्रयोगस्य न्याय्यत्वात् । एवं मात्रग्रहणमपि व्यर्थम् । संबोधने चेति ज्ञापकेन कर्माद्यधिक्ये प्रथमाया अप्रवृत्तेः । यत्तु प्राचोक्तं,

---

स्वार्थे एवान्वाख्यातस्य पदान्तरसमभिव्याहारे लक्षणेति सिद्धान्तात् ॥ लक्षणान्तर्भूतेति ॥ सादृश्यसम्बन्धमूलकलक्षणाया एव गौणीत्वमिति भावः ॥ पृथगवेति ॥ मीमांसकरीत्येदम् ॥ त्रिकम् — स्वार्थद्रव्यलिङ्गानि ॥ इत्याश्रीयते इत्यऽनेन सूत्रारम्भेऽस्यानाश्रयणं ध्वनितम । एवञ्च लिङ्गस्यापि स्वमोर्नं सकादिन्यादिशास्त्रबलेन प्रातिपदिकार्थत्वात् तत्रापि सिद्धिरिति भावः ॥ विचित्रत्वेऽपीति॥ क्वचिल्लिङ्गस्य नियमेन भानं क्वचिदनियमेनेत्येवं विचित्रत्वेऽपीत्यर्थः । तदाह ॥ नियमांशेति ॥ नियतोपस्थितिक इत्यत्र नियमांशेत्यर्थः ॥ इत्येव सारमिति ॥ प्रातिपदिकग्रहणस्य सूत्रोपक्रमे संख्याविशिष्टैकवाक्यतयाऽव्ययेभ्योऽप्राप्त्या तेभ्यो विभक्त्यानार्थत्वं वदता, तद्धितव्यासर्षेविभक्तिर्बहुत्वित्यादिसूत्रेषु अव्ययेभ्यः प्रकारान्तरेण विभक्तिं साधयता प्रातिपदिकग्रहणं प्रत्याख्यातं भाष्यकृता । स्वादीनां प्रातिपदिकादेव विधानेन कस्यार्थे इत्याकाङ्क्षया यस्मात् स्वादिविधिस्तदर्थ इत्यस्य लाभ इति भावः॥ उपचारात् — द्रोणत्वारोपात् ॥ इतिवादिति ॥ अत्र यथा वाहीके गोत्वारोपस्तद्वत् । वचनग्रहणप्रत्याख्यानोपायमाह ॥ एक इत्यादि ॥ एतदनभिहित इति सूत्रे भाष्ये स्पष्टम् ॥ न्याय्यत्वादिति ॥ इदञ्च यथान्यासेऽप्यावश्यकम् । अन्यथा एकादिषु वचनविपर्ययो दुर्वारः स्यादिति ॥ भावः ॥ ज्ञापकेनेति ॥ ननु प्रातिपदिकार्थ एवेति नियमात्तदाधिक्येऽप्राप्तौ किं ज्ञापकेनेति चेन्न । यथा कर्मण्येव द्वितीयेति नियमेन कर्मत्वाभावसमानाधिकरणाऽर्थान्तरस्यैव व्यावृत्तिर्न तु तत्समानाधिकरणार्थान्तरस्य । अत एव, गां दोग्धि पय इत्यादावपादानत्वादिशक्तिबोधेऽपि द्वितीया भवति, तथा प्रातिपदिकार्थाभावसमानाधिकरणार्थान्तरस्यैव व्यावृत्तिः स्यान्न तु तत्सत्त्वे एव कर्मत्वादेरिति भावः । न च प्रातिपदिकार्थाभावसमानाधिकरणार्थान्तरस्याप्रसिद्ध्या नियमव्यावर्त्याप्रसिद्धिरिति नियमसामर्थ्यात्तत्समानाधिकरणार्थान्तरस्यापि तेन व्यावृत्तिरिति वाच्यम् । प्रातिपदिकार्थे एव प्रथमा, न तु निरर्थके इति तद्व्यावृत्तेरेव फलत्वात् । तत्सत्त्वे तु कर्मादियोग्यार्थकप्रातिपदिकाच्चैत्र हितस्वार्थे इत्यऽर्थान्न दोषः । संख्याधिक्ये तु भवत्येव द्वयेकयोरित्यादिभिरेकवाक्यत्वात् । वार्त्तिककृता तु अर्थनियममाश्रित्य मात्रग्रहणं, सम्बोधने चेति सूत्रं, लिङ्गादिग्रहणं च प्रत्याख्यातमिति दिक् ॥

प्रातिपदिकार्थः सत्तेति । यच्च व्याख्यातं— योऽर्थः सन्नेव केवलं भासते, न जात्यादिरूपो, न लिङ्गसंख्याकारकयोगी स विवक्षितः । यथाऽव्ययार्थः । यथाऽव्ययार्थो हि केवलमस्तीति शक्यते वक्तुं, न पुनरीदृशस्तादृश इतीतिचेन्न । उच्चैर्नीचैरित्यादिशब्दानां सन्नित्याकारकप्रतीतिजनकत्वस्य सर्वतन्त्राविरुद्धत्वात् । अस्त्यादिसामानाधिकरण्यस्यापि असत्त्वार्थकेषु दुर्लभत्वात् । न लिङ्गसंख्याकारकयोगीति त्वदुक्तिविरोधाच्च । पदान्तरोपस्थापितस्य अस्तिसामानाधिकरण्यमस्तीतिचेन्न । तस्य अव्यावर्तकत्वात् । न पुनरित्यादिवाक्यशेषविरोधाच्च । कृष्णः श्रीरित्यादावव्याप्तेश्च । न च लिङ्गग्रहणात्तत्सिद्धिः । मात्रशब्देनाधिकव्यवच्छेदात् । यदपि प्राचा व्याख्यातं, यत्रार्थान्तरानपेक्षया शब्दप्रवृत्तिः स सर्वः प्रातिपदिकार्थः, शब्दप्रवृत्तिनिमित्तमिति यावत् । यथा उच्चैर्नीचैरिति । अलिङ्गसंख्यावेतौ केवलं जात्यादिनिरपेक्षं स्वार्थमाहतुरिति । तदपि न । प्रवृत्तिनिमित्तमिह प्रकारीभूय भासते । तथाच तन्मात्रबोधोऽसम्भवी । यदि सोऽपीष्टस्तर्हि घटादिशब्देभ्योऽपि स्यादिति संख्याकारकाद्यनन्वय एव स्यात् । यद्यपि द्रोणपरिमिते व्रीह्यादौ द्रोणशब्दः, सोऽयमित्यभिसंबन्धात् प्रवर्तते । तत्र गौणमुख्यन्यायान्न आप्नोतीति परिमाणग्रहणमिति । तन्न । पदकार्येष्वयं न्यायो, न प्रातिपदिककार्येष्विति सिद्धान्तात् । अन्यथा सिंहो माणवक इत्याद्यसिद्धिप्रसङ्गाच्च । यदप्याहुः । द्रोणादयः शब्दा लौहं दारुमयं वा परिमाणमेव न व्यभिचरन्ति, परिमेयं तु व्यभिचरन्त्येव । अतस्तस्य प्रातिपदिकार्थत्वा-

---

जात्यादिरूप इति ॥ जात्यादिना रूप्यत इति व्युत्पत्त्या जात्यादिधर्मविशिष्ट इत्यर्थः । ननूच्चैरादीनामप्याधारतात्वविशिष्टाधारताशक्तिर्वाच्येति तदप्रसिद्धिरित्यतस्तद् व्याचष्टे ॥ न लिङ्गेति ॥ ईदृशस्तादृश इति ॥ अमुकलिङ्गादिरित्यर्थः । ननु सन्नित्याकारकप्रतीत्यभावेऽपि अस्तिसामानाधिकरण्यं स्यादत आह ॥ अस्त्यादीति ॥ विरोधाच्चेति ॥ सन्नित्यनेन सामानाधिकरण्ये कारकत्वस्य दुर्वारत्वादिति भावः ॥ वाक्यशेषविरोधाच्चेति ॥ तत्सत्त्वे लिङ्गादेरपि सम्भवेन तद्विरोध इति भावः ॥ अव्याप्तेश्चेति ॥ ततः सन्नित्याकारकप्रतीतेरभावादिति भावः ॥ अधिकव्यवच्छेदादिति ॥ कृष्णत्वादेः सत्तालिङ्गाभ्यामधिकस्य भानादिति भावः ॥ अलिङ्गेति ॥ अलिङ्गसंख्यावेतौ केवलमनाश्रितं निरपेक्षं लिङ्गादिनिरपेक्षं स्वार्थं जात्याद्याहतुरित्यन्वयः ॥ असम्भवीति ॥ प्रकारतायां विशेष्यतानिरूपितत्वात् । कारकादित्यत्र लिङ्गम् ॥ सिद्धान्तादिति ॥ ओत्सूत्रे कैयटे स्फुटमेतत् । इदमेव युक्तं, विशिष्टरूपोपादानाभावादस्या अत्राप्रवृत्तेर्द्रोणादि-

ऽभावादप्राप्तेः [illegible] प्रति तदपि न। गौणलाक्षणिकेषु सिंहो माणवको मद्याः क्रोशन्तीत्यादिष्वव्याप्त्यापत्तेः। तत्र किञ्चिदस्य माणवकादेर्भेदेऽपि [illegible] इत्यर्थो गौण्या वृत्तेरवस्थातिक एवेति यदि तर्हि वाक्यादेर्भेदेऽपि [illegible] स्थितेर्नियतोपस्थितिक एवेति तुल्यम्॥

सम्बोधने च॥ मात्रग्रहणात् संबोधनाधिक्ये च [illegible]

इह संबोधनं प्रकृत्यर्थं प्रति विशेष्यं, क्रियां प्रति विशेषणमिति सिद्धान्तः। उक्तं च—

संबोधनपदं यच्च तत् क्रियाया विशेषणम्।
व्रजानि देवदत्तेति निघातोऽत्र तथा सति, इति॥

एवञ्च, राम मां पाहीति वाक्यस्य रामसंबन्धिसंबोधनविषयो मत्कर्मक-रक्षणमर्थः॥ इति प्रथमा॥

कर्तुरीप्सिततमं कर्म॥ कर्तुरिति, क्तस्य च वर्तमाने इति कर्तरि षष्ठी। आप्नोतेः सन्नन्तान्मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमाने क्तः। मति-रिच्छा, न तु बुद्धिः। पुनर्बुद्धिग्रहणात्। एवञ्च कर्त्रा आप्तुमिष्यमाणं कर्मे-त्यर्थः। कर्ता च धातूपात्तव्यापाराश्रयः। स च केनाप्तुमिच्छतीत्याकाङ्क्षा-यां विशेषणीभूतेन व्यापारेणेत्यर्थो लभ्यते। तदेतदाह॥ क्रिययेति॥ क्तप्रत्ययेनोपस्थितं वर्तमानत्वं नेह विवक्षितम्। तेन कटं कृतवान् कटं

शब्दानां लाक्षणिकत्वेऽपि गौणत्वाभावाच्चेत्यपि बोद्धव्यम्॥ सम्बोधनपदमिति॥ अत्र पुङ्गराजः। आख्यातं सविशेषणं वाक्यमिति वाक्यलक्षणम्। तत्रास्य क्रि-याविशेषणत्वाभावे वाक्यत्वं न स्यादिति, समानवाक्ये इति प्रकृत्यविहितो निघातो न स्यादिति भाव इति॥ वस्तुतस्तु, एवं सति नद्या यत् कूलं तत्र तिष्ठतीत्याद्यर्थके नद्यास्तिष्ठति कूले इत्यादौ षष्ठ्यन्तस्य क्रियायां विशेषणत्वा-भावात्तद्घटितस्य वाक्यत्वानापत्तौ समर्थसूत्रभाष्यसम्मतनिघातस्य तत्रानाप-त्तिः। तस्मात् सविशेषणमित्यस्य साक्षादन्यद्वारा वा यद्विशेषणं तत्सहितमि-त्यर्थोऽवश्यं वाच्यः। एतेन यतः पदात् परस्य पदस्य निघातादयः क्रियन्ते तयोः परस्परान्वयनियम इत्यपास्तम्। वस्तुतो व्रजानि देवदत्तेत्यादौ जानीही-ति शेषः। तत्र व्रजनस्य कर्मत्वेन देवदत्तस्योद्देश्यत्वेऽपि [illegible] यान्न दोषः। प्रातःकाले-ऽत्र लोट् इति दिक्॥ इति प्रथमा॥

आप्नोतेरित्यादि॥ अनेन व्याख्यानात् क्रियाशब्द एवात्रेप्सितशब्दो, न त्व-ऽभिप्रेतपरो रूढ इति सूचयति॥ आप्तुमिति॥ संबन्धुमित्यर्थः॥ केनेति, करणा-काङ्क्षाप्रदर्शनम्॥ विशेषणीभूतेनेति॥ कर्तृपदार्थविशेषणीभूतेनेत्यर्थः। उपस्थितं वैशेष्यज्यानुपस्थितकल्पने मानाभावादिति भावः॥ लभ्यते इति॥ एवञ्चेप्सित-

करिष्यतीत्यादि सिद्ध्यति ॥ कारकमिति ॥ एतच्च कारके इत्यधिकारात्लभ्यते । तत्र हि व्यत्ययेन प्रथमार्थे सप्तमी । प्रतिसूत्रं वाक्यं भित्त्वा कारकसंज्ञा विधीयते । तद् यथा । अपाये ध्रुवं कारकसंज्ञं स्यात् । ततः, अपादानम् । उक्तं कारकमपादानसंज्ञं स्यात् । पुनः कारकशब्दः वृत्तिसामर्थ्यादविशेषसंज्ञाभिः सह समावेशः । अन्वर्था चेयं संज्ञा।करोतीति कारकमिति । तेन क्रियानन्वयिनो न भवति ॥ ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति ॥ इह हि ब्राह्मणः पुत्रविशेषणं, न तु क्रियान्वयि । यद्वा । कारकशब्दः क्रियापरः । करोति [illegible] व्यपदेशानिति व्युत्पत्तेः । तथाच अपादानादिसंज्ञाविधौ क्रियायामित्यस्योपस्थित्या क्रियान्वयिनामेव तत्तत्संज्ञा विधीयन्ते । कारकाद्दत्तश्रुतयोरित्यादौ तु कारकशब्दः स्वर्यते । तेनैतदधिकारोक्तं कर्त्रादिषट्कमेव गृह्यते । अस्मिन् पक्षे वृत्तावपि कारक-

---

पदेन कर्तृव्यापारसमाश्रयोऽपि फलाश्रय उच्यते । यथा तण्डुलं पचतीति । फलस्याऽपि व्यपदेशिवद्भावेन फलाश्रयत्वात् कर्मत्वम् । अत एव तत्समानाधिकरणे शोभनं पचतीत्यादौ कर्मत्वसिद्धिः ॥ वाक्यं भित्त्वेति ॥ योगविभागेनेत्यर्थः ॥ सञ्ज्ञा विधीयते इति ॥ तदुक्तं भाष्ये, किमिदं कारक इति सञ्ज्ञानिर्देश इति । वाक्यभेदं दर्शयति ॥ अपाये इत्यादिना ॥ नन्वेवमप्येकसञ्ज्ञाधिकारात् पर्यायापत्तिः । न च क्रियाजनकानां सञ्ज्ञिनामाक्षेपेण तेषां योगविभागानुवृत्तिभ्यां विनाऽपि कारकसञ्ज्ञाविधानेन पर्याये सिद्धे योगविभागेनानुवृत्त्या प्रतिवाक्यं सञ्ज्ञाविधानं समावेशार्थमिति वाच्यम् । आक्षेपे क्रियाजनकमात्रस्य सञ्ज्ञापत्तौ नटश्रुतमित्यादौ स्वरवारणाय कारकाद्दत्तेत्यादौ स्वरितपाठाद्याश्रयणेऽधिकगौरवादित्यत आह॥ पुनः कारकेति ॥ विभक्तेषु अपादानमित्यादिषु, तदनुवृत्त्या तदनुवादेन विशेषसञ्ज्ञाविधानादित्यर्थः । समावेशफलं तु ग्रामे वास इत्यादौ अधिकरणत्वात् सप्तमी, कारकत्वात् [illegible] तिस्वरश्चेति बोद्धव्यम् । करोतीति । क्रियां जनयतीत्यर्थः । तज्जनकं च प्रत्यासत्त्या तत्रैवान्वेति ॥ क्रियानन्वयिन इति ॥ तदन्वयप्र[illegible]जकतज्जनकत्वाभाववान् इत्यर्थः ॥ब्राह्मणस्य पुत्रमिति॥ अत्राकथितं चेत्यनेन पृच्छिकर्म [illegible]निमित्तस्य कर्मत्वापत्तिः । क्रियाजनकत्वं तु न तस्य । पुत्रेणान्यथासिद्धेः । अकथितं चेत्येतत् प्रा[illegible]त्वाश्रयविवक्षायां सर्वथा तदप्राप्तौ च प्रवर्त्तते । अत एवास्य न क्रियान्वय इत्याह ॥ न त्विति ॥ करोतीति ॥ स्वजनकत्वेनैतान् व्यपदेशान् करोतीत्यर्थः । तदुक्तं भाष्ये । यावद् भूयात् क्रियायामिति, तावत्कारके इति । क्रियायां विषय इत्यर्थः । विषयत्वं च जनकत्वेनेति बोद्धव्यम् ॥ क्रियान्वयिनामिति ॥ क्रियान्वययोग्यतावच्छेदकक्रिया[illegible]त्यर्थः ॥ गृह्यते इति ॥ अत एव नटश्रुतमित्यादौ न दोषः ॥

मित्यस्य क्रियान्वयीत्यर्थः। अन्वये तु कारकसंज्ञा स्यात्। तत्र कारकं कर्मसंज्ञं स्यादिति व्याख्येयम्॥

अनभिहिते॥ ननु [illegible] इत्यादौ बहुना उक्तार्थत्वान्नेयं कर्मवाद्यो न स्यात् क्रियते कट इत्यादावपि तिङादिभिरुक्तार्थत्वाद् द्वितीया न भविष्यति। किञ्च, कटं करोतीत्यादौ सावकाशा द्वितीया, कृतः कट इत्यादिषु प्रथमया बाधिष्यते निरवकाशत्वात्। न च वृक्ष इत्यादिरपि निरवकाशः। तत्रापि प्रतीयमानामस्तिक्रियां प्रति कर्तृत्वेन तृतीयाप्रसङ्गात्। अथ नीलमिदं, न तु रक्तमित्यादौ विशेषणान्तरानिवृत्तितात्पर्यके आस्तिक्रियान्वये अनावश्यकत्वात् प्रथमाया अवकाशं ब्रूषे तर्हि विप्रतिषेधात् प्रथमाऽस्तु। एवञ्चानभिहिताधिकारो वृथेतिचेन्नैवम्। संख्या विभक्त्यर्थ इति पक्षे सूत्रारम्भात्। तथाचानभिहिते कर्मणि यदेकत्वं तत्र द्वितीयैकवचनममित्यर्थः। सूत्रानारम्भे च कर्मणि यदेकत्वं तत्र द्वितीयैकवचनमम्इति हि वाक्यार्थः। तथा सति कृतः कट इत्यदौ च क्तेन कर्ममात्रोक्तावपि तदेकत्वस्यानुक्ततया अम्

क्रियान्वयीत्यर्थ इति॥तदन्वययोग्यतावच्छेदकक्रियाजनकत्ववदित्यर्थः। यथाश्रुतं तु न युक्तम्। कारकाणां भावनान्वय इति वाक्यस्थ घटत्ववतां घटत्ववत्तेत्येतत्तुल्यतापत्तेः। अत एव भाष्ये क्रियाजनकत्वमेव कारकत्वमुक्तम्। तज्जनकत्वं चैषां तत्क्रियोपयोगिक्रियाश्रयत्वेनेति चोक्तम्। अत एवैषां क्रियान्वयः। क्रियाजनकमिति ज्ञाने, का सा क्रियेत्याकाङ्क्षोदयेन क्रियाया जनकाकाङ्क्षया च तत्रैवाऽन्वयस्यौचित्यात्। अविद्यमानस्य सम्प्रदानस्यापि रुच्यादावन्वयः क्रियाजनकत्वमित्यलम्॥

तिङादिभिरिति॥ तैरेव तस्याः शक्तेरुक्तौ कटादिप्रातिपदिकस्य उद्भूततच्छक्तावृत्तेः कर्मणि वर्त्तमानात् प्रातिपदिकादित्यर्थेऽपि तदनापत्तिरिति भावः। अनभिहितसूत्रमपि अभिधानविषये प्रातिपदिकस्य उद्भूततच्छक्तौ वृत्त्यभाव इत्यत्रैव तात्पर्यग्राहकमिति बोद्धव्यम्॥सावकाशेति॥ मात्रग्रहणेन कर्माधिक्ये प्रथमाया अप्रवृत्तेरिति भावः॥ प्रतीयमानामिति॥ अत एव तिङ्समानाऽधिकरणे प्रथमेति वार्तिकन्यासः सङ्गच्छते॥अनावश्यकत्वादिति॥ तदभिमानादित्यर्थः॥ संख्येति॥ द्व्येकयोः कर्मणि स्वौजसित्यादेरेकवाक्यतयाऽन्वये कर्मणीति सप्तम्या द्व्येकयोरिति सूत्रोपात्तैकत्वाद्यपेक्षत्वात् कर्मणि यदेकत्वं तत्राऽमित्यर्थे हि सा विभक्त्यर्थ इति पक्षः। न च गुणानां च परार्थत्वादिति न्यायेन कर्मणि एकत्वे चामित्येवार्थ उचितः, संख्याया आश्रयापेक्षायां प्रत्यासत्त्या कर्मादेरेव तत्त्वमित्युक्तोऽर्थोऽसङ्गत इति वाच्यम्। संख्यासंख्येययोर्नियमतः साकाङ्क्षत्वेनेदृशे विषये उभयोरपि परस्परान्वयाङ्गीकारात्। स्पष्टं चेदमत्रैव कैयटे॥तदेकत्वस्येति॥ प्रधानप्रत्ययार्थस्येत्यर्थः। एवञ्चाप्रधानकर्मादिविशेषणा-

दुर्वारः। परत्वात् प्रथमेत्यपि न। कर्तव्यः कट इत्यादौ ततोऽपि परत्वेन कृद्योग-लक्षणषष्ठीप्रसङ्गात्। कारकं विभक्त्यर्थ इति पक्षे तु सूत्रं प्रत्याख्यातमाकरे॥ हरिं भजतीति॥ भजनक्रियया हरौ प्रीतेरुत्पादात् प्रीतिविशिष्टतया क्रिया-व्याप्यत्वेन हरिः कर्म। तद्विशिष्टं भजनं वाक्यार्थः। हरिः सेव्यते इत्यत्रा-ऽप्येवमेव। क्रियाप्रधानमाख्यातमिति सिद्धान्तः। धातूपस्थिता क्रिया तिङर्थं प्रति विशेष्या, न तु कृदर्थं प्रतीव विशेषणमिति हि तस्यार्थः। अत

ऽर्थमावश्यकं सूत्रमुक्तार्थानामितिन्यायश्च प्रधानार्थविषय एवेति भावः॥ कर्त्तव्यः कट इति॥ न चात्र द्वितीयातः परत्वात् प्राप्तायाः षष्ठ्याः, कृत्यानामिति विभक्तसूत्रेण निषेधापत्तिस्तदधिकाराभावे उभयप्राप्तेः सत्त्वादिति वाच्यम्। अधिकाराभावे सर्वत्रैवोभयप्राप्तिविषयसत्त्वात् कर्मण्येव षष्ठ्यापत्तौ कर्तृ-कर्मणोरिति सूत्रस्य कर्तृग्रहणस्य उभयप्राप्ताविति सूत्रस्य च वैयर्थ्यापत्त्या-ऽऽत्मनाने खश्चेति सूत्रस्थभाष्यग्रामाण्येन चोभयोः प्रयोग एवोभयप्राप्तेर्वाच्य-तया प्रकृते नोभयप्राप्तिरित्याशयात्। आकृष्टव्या ग्रामं शाखेत्यत्र, कृत्यानामिति विभक्तसूत्रस्थभाष्योदाहरणे आश्चर्यपदकर्तृपदे अञ्चाहृत्योभयप्राप्तिर्निरूप्या॥ इत्यादाविति॥ आदिना भवतो लाभोऽश्वः क इत्येतत्॥ कारकमिति॥ संख्या-याः सर्वत्र विशेषणतया भानादेकत्वे यत्कर्मेत्यर्थः। वृक्षे शाखेतिवदेकत्वे इति सप्तमी आधेयास्याधारत्वविवक्षया। एवञ्चैकत्वविशिष्टे कर्मणीत्यर्थ इति भावः॥ प्रत्याख्यातमिति॥ न्यायेनैव सिद्धेरिति भावः। अनेन, पञ्चकं प्रातिपदिकार्थ इति पक्षेऽप्यावश्यकता सूचिता। तत्र यथा प्रातिपदिकेनोक्ते कर्मत्वादौ भवति तथा तिङादिभिरुक्तेऽपि स्यादतस्तद्धारणार्थमिदम्। एवं संख्यातिरिक्तं चतुष्कं प्राति-पदिकार्थः। संख्यामात्रं विभक्त्यर्थ इति पक्षेऽप्यावश्यकं तत्। एवञ्च कारकस्य विभक्त्यर्थत्वं यत्र यत्र पक्षे तत्र तत्रानावश्यकमिति सूचितम्॥ प्रीतेरिति॥ तत्प्रीतिरेव च शुभफलजनिकेति भावः॥ क्रियाव्याप्यत्वेनेति॥ क्रियासम्बन्धि-त्वेनेत्यर्थः। तज्जन्यफलाश्रयत्वं हि तत्त्वम्॥ एवमेवेति॥ धात्वर्थ एव विशेष्य इत्यर्थः। इयांस्तु विशेषः। तत्र फलांशो विशेष्यः, कर्त्तरि तु व्यापारांश इति। अत एव, सुप आत्मन इति सूत्रे भाष्यमिष्यते पुत्र इत्यर्थे पुत्रीयतीति न प्रयोगो भिन्नार्थत्वादिति। यदा क्रियाफलस्य प्राधान्यं प्रतिपिपादयिषितं तदा वाक्यमेव। व्यापारप्राधान्ये तु क्यङिति कैयटश्च। यद्यप्ययमर्थः प्रतीकान्तरे कैयटेनोक्त-स्तथाऽप्यत्रापि स एवार्थ उचितः। अत्रैव वेत्यन्यत्र विस्तरः। ननु न्यायादि-ग्रन्थे प्रथमान्तविशेष्यकबोधस्यैवानुभवप्रदर्शनात्तथैव युक्तमित्यत आह॥ क्रिया-प्रधानमिति॥ इदं च रूपप्सूत्रे भाष्ये। क्रियेति धात्वर्थशब्दस्यापि क्रिया-त्वेन व्यवहारो द्रष्टव्यः॥ तस्यार्थ इति॥ आख्यातशब्देनात्र नियमेन जन्यका-लाङ्कविभक्त्यन्तमाख्यातमाख्यातेनेत्यादौ तथा प्रतीतेः। रूपप्सूत्रे कैयटोऽपि आख्यातात् कालसंख्यासाधनाद्यवगमेऽपि तस्य क्रियाप्रधानत्वमिति। नाना-

एव, पाचको व्रजतीतिवत्, पचति व्रजतीति नैकं वाक्यम् । प्राक्कर्तृकर्तृकं गमनं हि पाचक इत्यादेरर्थः । एककर्तृका क्रियाक्रिया तु पचति-व्रजत्योः पृथगर्थः । एवञ्च, [illegible] नोपक्लृप्तो नीम इति नैयायिकदोषो भाष्यानुसारिभिर्नादर्तव्यः । यास्कोऽप्याह । भावप्रधानानि क्रियाप्रधानानि नामानि । पश्य मृगो धावतीत्यादौ तु मृगकर्तृकं गमनं दृशिक्रियायां कर्म । प्रधानं दृशिक्रियैव । उक्तञ्च—

सुबन्तं हि यथाऽनेकं तिङन्तस्य विशेषणम् ।
तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणम्, इति ॥

एवं पचति भवतीत्यस्य पचिक्रिया भवतीत्यर्थः । अयं तु विशेषः । तिङन्तोपस्थिताया क्रियायाः क्रियान्तरं प्रति विशेषणत्वेऽपि शब्दाऽध्याहारवादे कर्मत्वं संसर्ग एव, न तु प्रकारः । अपदार्थत्वात् । अर्थाध्याहारवादे तु प्रकारत्वेऽपीष्टापत्तिः । पचतीत्यादौ धातूपात्तफलस्यापीत्थमेव

ख्याख्यातजानीति शाकटायनोक्तौ आख्यातावयवधातुजानीत्यर्थः । अत एव सर्वं नाम धातुजमाहेति तत्समानार्थकमुणादय इति सूत्रे भाष्ये पठितम् ॥ नैकं वाक्यमिति ॥ साधु इति शेषः । प्रथमान्तविशेष्यके बोधे तु तस्य तत्त्वं दुर्वारमिति भावः ॥ एवञ्च — अस्य साधुत्वापत्तेश्च ॥ भावप्रधानमिति ॥ भावकालकारकसंख्याश्चत्वारोऽर्था आख्यातस्य । तत्र भावः प्रधानमिति तदर्थं तद्भाष्यकार आह ॥ नामानीति ॥ नामपदेन सुबन्तमिति च तद्भाष्ये स्पष्टम् । तच्चाऽव्ययातिरिक्तमित्यन्यत्र निरूपितम् । नमन्त्याख्यातार्थं प्रति विशेषणीभवन्तीति नामानीति तद्व्युत्पत्तिर्निरुक्तभाष्ये दर्शिता । किञ्चैतन्निरुक्तोत्तरं, यत्रोभे भावप्रधाने भवत इति निरुक्ते उक्तम् । यत्रोभे नामाख्याते भवतो वाक्ये तत्र ते भावप्रधाने क्रियाप्रधान इत्यर्थकतया च तद्भाष्ये तद् व्याख्यातम् । अतः पूर्वनिरुक्तस्य व्याख्यानान्तरं नादरणीयम् । किञ्च कर्तृविशेष्यकबोधेऽपचदोदनं देवदत्तं पश्यतीति प्रयोगः शतृविधायकभाष्यकैयटयोरापादितः । यद्यप्यन्तरङ्गा प्रथमा तथाऽपि प्रधानानुरोधिनी द्वितीया भवतीति तदाशयः । तदनुसारेणाऽऽह ॥ पश्येति ॥ मृगस्य कर्मत्वे प्रधानानुरोधिनी द्वितीयैव स्यादिति भावः ॥ उक्तं चेति ॥ हरिणेति शेषः ॥ तिङन्तसुबन्तशब्देन तदर्थक्रियादिः ॥
पचिक्रिया भवतीत्यर्थ इति स्पष्टं भूवादिसूत्रे भाष्ये । योऽवऽमेधेन यजते स ब्रह्महत्यां तरतीत्यादौ यत्कर्तृका यागक्रिया तत्कर्तृका तरणक्रियेत्येव बोध इत्यन्यत्र विस्तरः ॥ अपदार्थत्वादिति ॥ तन्नये पदजन्योपस्थितिविषयस्यैव प्रकारविशेष्यत्वस्वीकारात् प्रदाऽध्याहारस्यात्रासंभवादिति भावः ॥ प्रकारत्वेऽपीति ॥ अग्निना सर्वपक्षे विभक्त्यर्थस्य संसर्गत्वमिति समर्थसूत्रषष्ठीसूत्रभाष्यो-

मतभेदेन व्यवस्था । अत एव तत्समानाधिकरणे शोभनं पचतीत्यादौ द्वितीयैकवचनोत्पत्तिः । अग्निष्टोमेन यजेतेत्यादौ तृतीयोत्पत्तिश्च सङ्गच्छते । न च दृष्टान्ते विशेष्यसमर्पकाद्दार्ष्टान्तिके विशेषणसमर्पकाच्च कर्मत्व। देवाचिकायाः सुब्विभक्तेः प्रयोगोऽस्त्विति वाच्यम् । धातुतिङन्तयोरप्रातिपदिकत्वात् । नैयायिकानां तु स्यादेष दोषः। तथाहि । धावन्तं मृगं पश्येतिवत्, धावति मृगमित्यपि स्यात् । न चाप्रथमासामानाधिकरण्ये शतृशानचोर्नित्यत्वान्नैवं प्रयोग इति वाच्यम् । एवमपि द्वितीयानुत्पत्तेर्दुरुपपादत्वात् । ननु तत्र वाक्यभेद एव । पश्येत्यत्र तमिति कर्माऽध्याहारात् । पचति भवतीत्यादि तु पाको भवतीत्याद्यर्थेऽनिष्टमेवेति चेत् । मैवम् । अध्याहारे गौरवात् । तस्य च मुनिवचनविरोधेनाप्रामाणिकत्वात् । त्वदीयानिच्छामात्रस्याकिञ्चित्करत्वात् । अपि च । अपाक्षीद्देवदत्तोऽवेहि इत्यादौ शत्रादेः प्रसङ्ग एव नास्ति । एकवाक्यत्वं च भाष्यवार्तिकादिसकलसंमतम् । नच

कः सिद्धान्तः सूचितः । शब्दोपस्थितस्यापि संसर्गत्वं षष्ठ्यां सर्वैरङ्गीकृतमेव वृद्धैः ॥ फलस्यापीति ॥ अपिना, पक्व इत्यादौ व्यापारस्य सङ्ग्रहः । तत्र तस्य फलं प्रति विशेषणत्वात् ॥ इत्थमेव ॥ कर्मत्वभानविषये उक्तप्रकारेणैवेत्यर्थः ॥ व्यवस्थेति ॥ सर्वसम्मतेति शेषः । तद्वत्प्रकृतेऽपीति भावः । वस्तुतस्तत्रापि संसर्गतैव घटपदे घटघटत्वयोः समवायस्येव उपस्थितिपूर्वकं पृथगाकाङ्क्षाया अदर्शनेनाऽध्याहारस्योक्तिसंभवाभावादिति ध्येयम् ॥ अत एव – फलस्य कर्मत्वादेव ॥ तृतीयेति ॥ तत्र तस्य करणत्वेनान्वयादितिभावः ॥ दृष्टान्ते इति॥ शोभनं पचतीत्यादौ । तत्र नव्यनैयायिकवैयाकरणयोरुभयोरपि मते फलव्यापारयोः परस्परान्वयस्य सत्त्वेन तस्य दृष्टान्तत्वौचित्यात् । पश्य मृग इत्यादौ धावनदर्शनयोरन्वयस्य नैयायिकासम्मततया साध्यत्वेन न दृष्टान्तत्वमिति बोध्यम् ॥ दार्ष्टान्तिके — पश्य मृगो धावति पचतीत्यादौ ॥ विशेषणसमर्पकादिति ॥ अन्वयबोधकाले इत्यादिः ॥ दुरुपपादत्वादिति ॥ एवञ्च तथा प्रयोगविलय एव स्यादिति भावः ॥ गौरवादिति ॥ एकवाक्यतयाऽन्वये संभवति अध्याहारेण वाक्यभेदे गौरवमिति भावः । ननु प्रामाणिकं गौरवं न दोषायेत्यत आह॥ तस्य चेति ॥ शतृसूत्रस्थेन भूवादिसूत्रस्थेन च मुनिवचनेन विरोध इति बोध्यम् ॥ अकिञ्चित्करत्वादिति ॥ ऋषीणामेकवाक्यतया बोधे साध्यत्वस्येच्छासत्त्वे इत्यादिः ॥ नास्तीति ॥ एवञ्च तत्र द्वितीया दुर्वारेति भावः । न चेदृशे स्थले विशिष्टस्य देवदत्तमृगादेः कर्मत्वं विशिष्टवाचकं च नप्रा तिपदिकमिति न दोषः। श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभा इतिवदिति वाच्यम् । नीलत्वविशिष्टघटस्य कर्मत्वे प्रतिपादनीये नीलं घटमित्यादौ द्वितीयानापत्तेः। श्रुत्वे-

तिङन्तस्थले क्रियाप्रधानमित्यादि [illegible] । तथैव व्युत्पत्तीनां तादृशबोधस्य [illegible] न । साधुत्वानुशासनार्थं प्रवृत्तैरेव तस्य स्वीकारः । [illegible] ऽधिकारव्युत्पादिते पुरोभवस्कन्देत्यादौ तस्यावश्यकत्वात् । [illegible] क्रियाया अपि कर्तृत्वकर्मत्वाद्यवच्छेदे तस्याः प्रत्ययत्वं भज्येतेति चेन्न । लिङ्गसङ्ख्ययोः कर्तृकर्मेतरकारकस्य चाभावप्रयोज्य तथात्वोपपत्तेः । कर्मत्वस्य प्रकारतयाऽनभ्युपगमाद्वेत्यन्यत्र विस्तरः ॥ अभिहिते त्विति ॥ नन्वेवं पक्वमोदनं भुङ्क्ते इत्यत्रापि द्वितीया न स्यादिति चेद् मैवम् । इह हि पचिभुजिनिरूपिते द्वे कर्मत्वशक्ती । तत्र प्रधानक्रिया-निरूपितामनभिहितां शक्तिमाश्रित्य द्वितीयोत्पत्तेः । उक्तं च हरिणा—

प्रधानेतरयोर्यत्र द्रव्यस्थ क्रिययोः पृथक् ।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ॥
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते ।
यदा गुणे तदा तद्वदनुक्ताऽपि प्रतीयते, इति ॥

स्यादि त्यर्थोक्तं मुनिविरुद्धविचारेण । क्रियाप्रधानमित्य [illegible] क्रियाया आधान्यमाख्यातघटकप्रत्ययार्थापेक्षयैव बोद्धतेऽतो द्रव्यादिकं प्रति धावनादेर्विशेषणत्वेऽपि न क्षतिरिति दिक् ॥ भाष्येति ॥ [illegible] वादिसूत्रस्थं भाष्यम् । पचादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्तीति तत्रोक्तम् ॥ वार्त्तिकं, शतृविधायकस्थम् ॥ तस्य ॥ क्रियाविशिष्टक्रियाबोधस्य ॥ कर्मत्वस्वीकारे इति ॥ क्रियान्तरनिरूपितत्व स्वीकारे इत्यर्थः ॥ कारकस्य — करणादिकारकशक्तेः । हरिं नमेद्येत्सुखं यायादित्यादौ हेतुहेतुमद्भावेनान्वयो, न क्रियाकारकभावेनेति, न दोषः । स्ववाचकधात्वर्थं प्रति तु कर्मत्वान्वयः करणत्वान्वयश्च नाऽसत्त्वरूपताप्रतिबन्धकः । शोभनं पचति, ज्योतिष्टोमेन यजेतेत्यादौ दर्शनात् ॥ अन्यत्रेति ॥ कर्मत्वस्य सर्वत्र संसर्गतैवेति भाष्यसंमतपक्षे त्वाद्यमेव सारम् ॥ अभिहिते त्विति ॥ तिङादिभिः कर्मादिशक्तेरभिधाने प्रातिपदिकस्योद्भूततच्छक्तिकेऽर्थे वर्त्तमानत्वाभावाद् द्वितीयादेः कर्मादिशब्देभ्य इवाप्रातिरिति भावः ॥ न स्यादितीति ॥ पचधातूत्तरनिष्ठयाऽभिधानादिति भावः ॥ गुणाश्रया — गुणनिरूपिता ॥ प्रधानम् — प्रधानक्रियानिरूपितां शक्तिम् ॥ अनुरोधमेव विशदयति ॥ प्रधानविषयेति ॥गुणेऽनुक्ताऽपि तद्वदुक्तवत् प्रतीयते। तुल्यन्यायाद् गुणनिरूपिता उक्तशक्तिवत् प्रकाशत इति । अत एव, प्रासादे आस्ते इत्यादौ, सप्तम्यादिनिरूपिताधिकरणत्वस्योक्तत्वेऽप्यासिनिरूपितस्यानभिधानेनानाभिहितत्वात् सप्तमीसिद्धिः । इदं च, स्वादुमि णमुलिति सूत्रे भाष्ये स्पष्टम् । तत्रत्यभाष्यार्था-

अत एव पक्त्वौदनो भुज्यते इत्यत्र [illegible]जिमत्ययेनाभिहिते प्रथमैव। यत्नेरप्याधान्यात्। वस्तुतस्तु पक्त्वा भुज्यत इत्यादौ कर्मणः प्रत्ययभुजिभ्यां न युगपच्छाब्दोऽन्वयः, किन्त्वन्यतरेण शाब्दोऽपरेणार्थः। तत्र च प्रथमाद्वितीये व्यवस्थिते एव। तद्यथा, पक्त्वा भुज्यते ओदनः। किं पक्त्वा? अर्थादोदनम्। यदा तु ओदनं पक्त्वा भुज्यते इति भुज्यते तदा भुज्यते इत्यत्र अर्थादोदन इति गम्यते। एवञ्च विवक्षाभेदेन पूजयितुं शक्यते हरिर्हरिं वेत्युभयं साधु॥ प्राप्तानन्द इति॥ आनन्दकर्तृकप्राप्तिकर्मीभूत इत्यर्थः। यदुक्तं,प्रायेणेति; तस्य फलमाह॥ क्वचिदिति॥विवक्षत इति॥ यदि वाद्धिक्रियोरन्यतरेण सह कर्मतथाऽन्वयो विवक्ष्यते तदा द्वितीया स्यादेवेति ध्येयम्॥तृणं स्पृशतीति॥यथा स्पृश्यमानस्य गङ्गादेरीप्सितस्य क्रियया योगस्तज्जन्यसंयोगादिफलाधारत्वात्, तथैवानीप्सितस्य तृणादेरपीति भावः। स्यादेतत्। धातूपस्थाप्यफलशालि कर्मैत्येवाऽस्तु। किमीप्सितानीप्सितयोः पृथक्कथनेनेतिचेत्। मैवम्।

ऽनुवादिन्यौ चेमे हरिकारिके इत्यन्यत्र प्रपञ्चितम्। एत्रमुभयनिरूपितशक्तेरनभिधाने गुणक्रियानिरूपितशक्तेरप्यभिधायिनी विभक्तिर्भवति। यथा ग्रामाय गन्तुमिच्छति ग्रामं गन्तुमिच्छतीति च।इष्यते ग्रामो गन्तुमित्यादौ प्रधानेऽपि क्रियानिरूपितशक्तेरभिधाने गुणनिरूपिताया अप्यभिधानान्न कदापि चतुर्थीद्वितीये॥ गमेर्ग्रामः कर्म, इषेस्त्वभे कर्मणी इति तत्सूत्रे भाष्ये स्पष्टम्। एवञ्चोभयत्राऽप्यावृत्त्या शाब्दोऽन्वय इत्येव प्रतीयते। अत्र प्रयोगे गमिक्रियापेक्षे द्वितीयाचतुर्थ्यौ, न कदाऽपि भवत इति कैयटात्। एवञ्चैतद्विरोधादोदनं पक्त्वेत्यपास्तमेवेति, यत्कैनचित् प्राचीनेन वस्तुतस्तु पक्त्वेत्यादिना साध्वित्यन्तेनोक्तं तदतितुच्छमिति बोध्यम्। स्वरूपव्याक्रियैव च पराक्रियेति न्यायेन तथैवानुवदति॥ [illegible]स्तस्त्वित्यादिना॥ अत एव, स्वादुमीति सूत्रे भाष्ये तुमुन्क्त्वाणमुलादयः स्वान्वयिना समभिव्याहृतेनानुप्रयुज्यमानेन समानाधिकरणे तद्वाच्यकारके वक्तव्याः। तेन पक्त्वौदनो भुज्यत इत्यादावोदने द्वितीया न। अन्यथा कृत्वादस्य कर्तर्यापत्तौ पाचिक्रियाकर्मत्वस्यानभिधानात् सा स्यादेवेत्युक्ता, न वक्तव्यव्यक्तता भावे विधानादित्युक्तम्। अनेन हि भाष्येणोभयत्र शाब्दान्वय एव लभ्यते। तत्र यत्नारम्भे एषां प्रयोगाणामुपपत्त्यभावात् प्रत्याख्यानेऽपि हर्युक्तरीत्या सनादिसूत्रस्थभाष्यसम्मत्याऽभाव एवोचितः। एवञ्च कैयटोक्तं क्षुधं प्रतिहन्तुं शक्त्यमित्यऽप्यसङ्गत्यैवा[illegible]नारम्भेऽसिद्धेरनुमुनाद्यन्वयिक्रियानिरूपितशक्तेरप्यस्वशब्दो यत्[illegible]स्समानाधिकरणगुण[illegible]तुमुनादिप्रकृत्य[illegible]मितशक्तेस्तद्वाच्यनिहितत्वेनानभिहितत्वेन वा [illegible] सुधियो विभावयन्तु॥अ[illegible]रेण सहेति॥इदं प्रायुक्त[illegible]तारित्यस्यापि प्रत्याख्यानं, तद्देवेति बोध्यम्॥ मैवमिति॥ क्रमं [illegible]त्यत्र

अग्नेर्माणवकं वारयतीत्यत्र वारणार्थानामिति [illegible] माणवकस्याऽपादानत्वं प्राप्तं, तद्बाधनाय कर्तुरीप्सिततममिति वक्तव्यमेव । एवञ्च द्वे [illegible] संग्रहार्थं, तथा युक्तमित्यस्याप्यावश्यक [illegible] ग्रहणं तु स्पष्टार्थमेव, न त्वावश्य [illegible] । इदं त्वऽवधेयम् । ईप्सितानीप्सितयोः शाब्दबोध एकरूप एव । ई [illegible] दे धिशोङादिव सञ्ज्ञाप्रवृ [illegible] ऽपि द्वितीयावाच्यकोटावप्रवेशात् । अनन्यलभ्यस्यैव शब्दार्थत्वात् । कर्मणि द्वितीयेतिसूत्रे हि तत्तत्सूत्रैर्यावतां कर्मसञ्ज्ञा विहिता ते सर्वे तेन तेन रूपेण उपस्थिताः । तेषु च विधीयमाना द्वितीया आधारवाचिका । लाघवात् । क्रियाया धातुना कर्तुश्च देवदत्तादिशब्दैर्लाभात् । इष्टतमत्वादेस्तु भानाभावात् । प्रकृतिप्रत्ययार्थयोश्चाभेद इह संसर्गः । तथाच इर्योपारिका या प्रीति-

---

ईप्सिततमत्वोपलक्षितमुद्देश्यत्वं भासते । एतत्सूत्रबोध्यकर्मत्वशक्तेरुद्देश्यतासमानाधिकरणत्वा [illegible] । अत एव, कर्मणा यमभिप्रैतीति सूत्रे कर्मणेत्यस्याभावे, गां ददातीत्यत्रगोरप्युद्देश्यतयातत्रैवपर्यायेण संप्रदानसञ्ज्ञा स्यादिति भाष्यकैयटोक्तं संगच्छते। चतुर्थ्या उद्देश्यत्वं वाच्यं,तत्समानाधिकरणशक्तिर्वेति सर्वसंमतमिति भावः ॥ फलान्तरमप्याह ॥अग्नेरिति॥ ईप्सितपदाभावे वारणार्थानामित्य स्यैव तदपवादत्वापत्तेः। न चाग्नौ तद्वारितार्थम् । तस्यापि तदुपस्थाप्यसंयोगरूपफलाश्रयत्वात् । वारयतेश्च संयोगाद्यनुकूलव्यापाराभावानुकूलव्यापारोऽर्थः । तत्रापीप्सितशब्दः क्रियाशब्द एव। ईप्सिततममित्युक्तौ ईप्सितमात्रे सावकाशस्य परत्वादीप्सिततमेऽनेन बाधः । ईप्सिततमत्वं च प्रकृतधात्वर्थप्रधानी [illegible]-प्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वम् । अत एवाग्नेर्नोद्देश्यत्वप्रतीतिस्तत्रेति भावः ॥ न त्वावश्यकमिति ॥ द्वेष्यसंग्रहोऽपि व्याख्यानादेव भ[illegible]तीति भावः । तस्याऽपीप्सिततमभिन्नत्वात् ॥एकरूप एवेति॥इच्छाविषयत्वानिच्छाविषयत्वभानकृतवैरूप्यरहित इत्यर्थः । तदाह ॥ईप्सानीप्सादेरिति॥ इच्छाविषयत्वानिच्छाविषयत्वयोरादिना ईप्सागतप्रकर्षस्येत्यर्थः॥उपयोगेऽपीति॥ स्वरूपतः सत्तयेति भावः । तदुपलक्षि[illegible] दिकं तु भासत एव । तदाह ॥ अनन्यलभ्यस्यैवेति ॥ भासमानोद्देश्यत्वतदभावाभ्यामर्थत इच्छाविषयत्वादिलाभादिति भावः ॥ आधारवाचिकेति ॥ इदमुपलक्षणम् । दिवो योगे करणवाचकत्वात् । आधारपदेन चाऽत्राधारताशक्तिमानुच्यते । कर्तुरीप्सिततममिति लक्षणे विशिष्टस्य प्रवेशात् प्रामाणिकं गुर्वेव शक्यमस्त्वित्यत आह ॥ क्रियाया इति ॥ फलस्य व्यापारस्य चेत्यर्थः ॥ देवदत्तादिशब्दैरिति ॥ आदिना तिङन्तम् । नन्वेवमाधारस्य धर्मिणोऽपि प्रकृत्या लाभः । आधारत्वेनालाभ इत्यस्याधारत्वं न लभते इत्यत्रैव पर्यवसाना तस्यैव शक्तिविशेषरूपस्य वाच्यत्वं युक्तम् । तस्य धर्मिसाकाङ्क्षत्वाद् विशेषणत्वञ्च युक्तमिति चिन्त्यम् ॥ अभेद इति ॥ विशेष्यविशेषणभाव इत्यर्थः ।

स्तदनुकूलो व्यापारो वाक्यार्थः । यद्यपि कर्मणि कर्तरि अधिकरणे च विहितानां द्वितीयादीनामाधारोऽर्थ इति तुल्यम् । तथाऽपि तत्र रूपकं फलं व्यापारः स्वाश्रयद्वारा तदुभयं चेति फलीभूते शाब्दबोधे वैलक्षण्यं सङ्गच्छते । न चाधारतैव वाच्येति मन्तव्यम् । तन्निष्ठधर्मस्य वाच्यतावच्छेदकतापत्त्याऽतिगौरवात् । कर्मणि द्वितीयेत्यादित्रस्वरसभङ्गापत्तेश्च । अत एव भाष्यकार आह— सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङामिति । न च तिङोऽपि धर्ममात्रमर्थः । कर्तरि कृत्, लः कर्मणि च, तयोरेव कृत्यक्तखलर्था, इति सूत्राणां वैरूप्यापत्तेः । पाचको देवदत्तः, पक्व ओदन इत्यादौ सामानाधिकरण्यानुरोधेन धर्मिवाचकतास्वीकाराच्च । तस्मादिह घटादिशब्दानामिव विशिष्टमेव वाच्यम् । आकृत्यधिकरणाभ्युपगमे तु कृत्स्वपि धर्ममात्रम् । सर्वथाऽपि नैयायिकमीमांसकाद्यभ्युपेतमर्द्धजरतीयं हेयमेव । न हि तिङ्कृत्तद्धितसमासानां वैलक्षण्यं सूपपादम् । प्रपञ्चितश्चैतच्छब्दकौस्तुभेऽस्माभिरित्यलमियता ॥ एतेन पाचकः ॥ तेन नटस्य स्थितिरित्यादौ

वाक्यार्थ इति ॥ हरिं भजतीत्यत्रेति शेषः ॥ फलमिति ॥ कर्तुरित्यादिविहितकर्मसञ्ज्ञकविषये फलमित्यर्थः॥व्यापार इति कर्तृविषये ॥ स्वाश्रयेति ॥ स्थाल्यां पचति तण्डुलमित्यत्र कर्मद्वाराऽधिकरणम् । भूतले देवदत्तः पचतीत्यादौ कर्तृद्वाराऽधिकरणम् ॥ फलीभूते इति ॥ पदजोपस्थितावविशेषेऽपि तत्फलभूते शाब्दबोधे इत्यर्थः। इदमुपलक्षणम् । सञ्ज्ञयार्थस्य निमित्तत्वे तत्तत्सञ्ज्ञाप्रकारिकैवोपस्थितिरिति कर्मत्वादिनैवोपस्थितेस्तत्रापि वैलक्षण्यमस्तीत्यन्यत्र विस्तरः ॥ तन्निष्ठधर्मस्येति ॥ आधारेतरावृत्तित्वे सति सकलाधारवृत्तिरूपस्येत्यर्थः। आधारता तु शक्तिविशेषरूपाऽखण्डैवेत्याशयः । नन्वाधारतैव निरूपकाश्रयसम्बन्धभेदेन भिन्ना, आश्रयतात्वमखण्डमिति न गौरवमत आह ॥ कर्मणीति ॥ लोके कर्मादिपदानां धर्मिपरतया दृष्टत्वेन सूत्रेऽपि तत्परतैवोचितेति भावः । आधारस्य शक्यत्वेनानन्ताधारतानामाधारत्वादुपगमाच्च शक्त्यानन्त्यमिति बोध्यम् ॥ कर्मादयोऽपीति ॥ अपिना संख्या । कृद्विषयेवाऽपि कर्मपदस्य धर्मिपरता । शक्तिरप्येतैर्धर्म्यभेदमापन्नैवोच्यत इति बोध्यम् ॥ संख्या चेति ॥ चेन कर्तृकर्मणी ॥ वैरूप्यापत्तेरिति ॥ कृद्विषये धर्मिपरता, तिङ्विषये धर्मपरतेति वैरूप्यापत्तेरित्यर्थः । कृतां धर्मिवाचकत्वे बीजमाह ॥ पाचक इत्यादि ॥ स्वीकारादिति ॥ कृतामिति शेषः ॥ प्रपञ्चितमिति ॥ लादेशशत्रादेस्तिङां च वैषम्यं सर्वथा दुरुपपादमित्यादीति भावः ॥ तेन नटस्येति ॥ अपादानादिविशेषैरविवक्षा च प्रसक्तस्य बुद्धिपूर्वमविवक्षा सर्वथाऽप्रसक्तस्याविवक्षा वेत्युभयथाऽपि गृह्यते । प्रकृते चान्त्या । गतिद्वारा च तस्याख्यातोपयोग इति [illegible] । न च तस्य कर्मयुक्त्वाभावः । तदंश-

नातिप्रसङ्ग इति भावः ॥ गां दोग्धीति ॥ गोसम्बन्धिपयःकर्मकं दोहनमर्थः स्यादेतत् । कर्तुरीप्सिततमं कर्म, तथायुक्तं चानीप्सितमिति वाच्यं गतार्थमेतत् । तथाहि । त्यजनोपसर्जनं त्याजनं दुहेरर्थः । दापनमङ्गीकरणं च याचेः । विक्लेदनं पचेरित्यादि । एवञ्च धातूपात्तव्यापारविषयीभूतं यत् त्यजनादिकारकादि तदाश्रयत्वं गवादीनां स्पष्टमेव । अत एव हि अणौ कर्तुर्णौ कर्मत्वस्य न्यायसिद्धतया गत्यादिसूत्रं नियमार्थमिति प्राचां सिद्धान्तः । अत एव चाकडारसूत्रे अपादानमुत्तराणि । गां दोग्धि पय इत्यत्र परत्वात् कर्मसञ्ज्ञेति भाष्यं सङ्गच्छते । पञ्चकं प्रातिपदिकार्थ इति पक्षे त्वधित्वफलाश्रययोर्युगपद् विवक्षायां चेदम् । अवधिभूता या गौस्तन्निष्ठो यः पयःक्षरणानुकूलव्यापारस्तद्विषयिणी गोपनिष्ठा प्रेरणेत्यर्थात् । तथा चाऽकथितं चेति सूत्रं व्यर्थमितिचेत् । अत्रोच्यते । कर्मणः शेषत्वेन विवक्षायां, न माषाणामश्नीयादितिवत् षष्ठी प्राप्ता । तां बाधितुमिदं सूत्रम् । तथाचेह षष्ठीवत् सम्बन्धमात्रं द्वितीयार्थ इति स्थितम् ॥

स्यापि परिगणनलभ्यत्वात् । न च नटान्निस्सरन्तं शब्दं गृह्णातीत्यर्थात् प्राप्तापादानत्वाविवक्षैवात्रेति वाच्यम् । आख्यातोपयोग इति सूत्रे उपयोगग्रहणेनानुपयोगे आख्यातुरीदृशलक्षणयापादानत्वस्यानिष्टत्वबोधनादिति भावः ॥ गोसंबन्धीति ॥ गोकर्मकं पयःकर्मकं चेत्यर्थः । तत्र पयस एवेप्सिततमत्वे आह ॥ तथा युक्त इति ॥ त्यजनोपसर्जनमिति ॥ गौः पयस्त्यजति । गवा पयस्त्याजयतीति प्रतीतेरिति भावः ॥ न्यायसिद्धतयेति ॥ व्यापारद्वयार्थत्वेनोक्तसूत्रद्वयसिद्धतयेत्यर्थः ॥ प्राचां हेतुमति चेति सूत्रे भाष्यकृताम् ॥ परत्वादिति ॥ ग्रामादायातीत्यादौ सञ्ज्ञान्तराप्राप्तावपादानत्वं सावकाशम् । कर्मसञ्ज्ञा तु ग्रामं गच्छतीत्यादौ ॥ भाष्यमिति ॥ तच्च भाष्यं नाकथितं चेत्येतद्विषयम् । अस्यापादानत्वाविवक्षायां प्राप्त्या परत्वादित्युक्त्यसङ्गतेः । तद् ध्वनयन्नाह ॥ पञ्चकमित्यादि ॥ अवधित्वेत्यादि ॥ अपादानत्वकर्मत्वशक्त्योरित्यर्थः । ईदृशे च विषये आकडारसूत्रतद्भाष्यबलादुभयोरपि द्वितीयैव बाधिकेति भावः ॥ इति स्थितमिति ॥ प्राचां ग्रन्थे इति शेषः । अत्रारुचिबीजं तु, यदा पयोनिष्ठविभागानुकूलव्यापार एव धात्वर्थस्तदाऽपादानत्वाविवक्षायामन्येनासिद्धेः कर्मत्वार्थमिदमारभ्यमेवमन्येष्वपि । किञ्च कर्तुरित्यपि षष्ठ्यपवाद एव । तदभावे तद्विषयेऽपि षष्ठ्या एव प्राप्तेरतः षष्ठ्यपवादत्वमात्रेण न सम्बन्धत्वेन बोधकतोचिता । तस्मादत्रापि क्रियाजनकतासमानाधिकरणकर्मत्वशक्तिमत्त्वेनैव बोध इत्येवोचितम् । व्यापारद्वयार्थत्वे कर्तुरीप्सिततममित्यनेनापि द्विकर्मकत्वमस्त्येव यथाप्रयोगं बहूनां धातूनाम् । तत्र ये व्यापारद्वयार्थत्वेन द्विकर्मकास्तेषां प्रधानकर्मणि लादयः । प्रधानकर्म-

अपादानत्वमात्रविवक्षायां तु पञ्चम्येव । गोः क्षीरविशेषणत्वे तु षष्ठी । तेन गोः पयो दोग्धीत्यपि प्रयोगः साधुरेव । एवमग्रेऽप्यूह्यम् । यत्तु प्राचोक्तम्—

दुह्याच्यर्थरुधिप्रच्छिचिब्रूशासुजिकर्मयुक् ।
नीहृकृष्मन्थवहदण्डग्रहमुष्पचकर्मभाक्, इति ॥

अत्रेदं वक्तव्यम् । ग्रहेः पाठो निर्मूलः । जग्राह द्युतरुं शक्रमित्युदाहरणमप्ययुक्तम् । इतरेषां तु द्विकर्मकत्वं यद्यपि प्रामाणिकं तथाऽपि संदर्भाऽशुद्धिः । तथा हि । दुह्यादीन् न्यादींश्च द्वैराश्येनेह पठित्वा भावकर्मप्रक्रियाशेषे लकृत्यक्तखलर्थाः किं द्विकर्मकेभ्यो मुख्ये कर्मणि स्युर्गौणे वेत्याकाङ्क्षायां स्वयमेव पठितम्—

न्यादयो ण्यन्तनिष्कर्मगत्यर्था मुख्यकर्मणि ।
प्रत्ययं यान्ति दुह्यादिर्गौणेऽन्ये तु यथारुचि, इति ॥

एवञ्च दण्डिमन्थिभ्यामपि मुख्ये स्यात् । तथाच गर्गाः शतं दण्ड्यन्तामिति भाष्यं विरुद्ध्येत । शतं ह्यत्र प्रधानं न गर्गाः । अर्थिनश्च राजानो

ण्याख्येये लादीनाद्विर्द्विकर्मणामित्युक्तेः । प्रधानकर्मत्वं च कर्तृप्रत्ययसमभिव्याहारे कर्तृनिष्ठप्रधानधात्वर्थव्यापारमात्रविशेषणफलाश्रयत्वम् । ण्यन्तविषये ईदृशप्राधान्यस्यैव ग्राह्यत्वात् । गर्गाः शतं दण्ड्यन्तामित्यादौ गर्गाणामेव तत्त्वमिति तत्रैव कर्मणि लादयः । उद्देश्यत्वरूपमार्थप्राधान्यं तु शतस्येत्यनुद्देश्यत्वेनाप्रधानगर्गानुरोधान्न शतावृत्तिरिति न वृद्धिसूत्रस्थभाष्यविरोधः । एकव्यापारार्थकदुहादियोगे त्वप्रधानकर्मणि । अप्रधानत्वं चात्रोक्तप्रधानकर्मभिन्नत्वम् । तच्च तत्रार्थे गवादीनामेव फलाश्रयत्वाभावात् । एवञ्च भाष्यानुक्तानां परिगणने पाठोऽयुक्तः । अर्थानिबन्धनेयं सञ्ज्ञेति चायुक्तम् । एवं द्व्यर्थत्वेन द्विकर्मकत्वातिप्रसङ्गस्त्वनभिधानेन वारणीय इति दिक् ॥ अपादानत्वमात्रेति ॥ विभागानुकूलव्यापारमात्रार्थकत्वविवक्षायामिति भावः ॥ गोः क्षीरेति ॥ नच क्रियान्वयेऽपि शेषत्वविवक्षायां सेति वाच्यम् । षष्ठ्यन्तार्थकस्य स्वान्वययोग्यार्थकनामसमभिव्याहारे तत्रैवाऽन्वयव्युत्पत्तेः । अत एव, तण्डुलानामोदनं पचतीत्यादौ द्व्यर्थश्चैव पचिर्विकारयोगे षष्ठी, तण्डुलविकारमोदनं पाकेन निर्वर्त्तयतीत्युक्तं भाष्ये, न तु पाकान्वये षष्ठीत्युक्तमिति दिक् ॥ निर्मूल इति ॥ अपादानत्वाद्यविवक्षायां तत्संबन्धिनः कर्मत्वे मूलं नास्तीति भावः । द्विकर्मत्वं तु यदीष्टं तर्हि व्यापारद्व्यर्थतया बोध्यम् ॥ उदाहरणमप्ययुक्तमिति ॥ शक्रादु द्युतरुञ्जग्राहेत्येव प्रतीतेः । पराक्रमातिशयद्योतनाय, जहार द्युतरुमित्यस्यैवोचितत्वोक्तेति भावः ॥ द्विकर्मकत्वमिति ॥ अकथितसूत्रविषयतयेत्यर्थः । कैयटमाधवादिसंमतत्वादिति भावः । अतस्तद्रीत्यैव दूषणमाह ॥ एवञ्चेत्यादिना ॥ प्रधानमिति ॥ उद्देश्यत्वा-

हिरण्येन भवन्तीति वाक्यशेषात् । दण्डिश्चेह ग्रहणार्थो, न तु निग्रहार्थः । अत एव ह्यत्र समुदाये वाक्यसमाप्तिः । गुणानुरोधेन प्रधानाद्वेरसर्त्वात् । तथा मन्थेरपि प्रधाने स्यात् । इष्यते तु गौणे । तथाच भारविः येनाऽपविद्धसलिलस्फुटनागसद्मा देवासुरैरमृतमम्बुनिधिर्ममन्थे, इति । अत्रामृतं मुख्यम् । उद्देश्यत्वात् । अम्बुनिधिस्तु गौणः । यदपि व्याख्यातार आहुः । द्विकर्मकेषु पचेरप्रामाणिकः पाठ इति । तद्रभसात् । तथा हि । कर्मवत्कर्मणेति सूत्रे दुहिपच्योर्बहुलं सकर्मकयोरिति वार्तिके तद्भाष्ये च पचेर्द्विकर्मकता लभ्यते । कैयटहरदत्ताभ्यां तत्रैव स्फुटीकृता । माधवोऽप्याह । जयतेः कर्षतेर्मन्थेर्मुषेर्दण्डयतेः पचेरित्यादि । उदाजहार च । तण्डुलानोदनं पचतीति । यच्चकथितश्चेति सूत्रे हरदत्तेनोक्तम् । अकथितशब्दो यद्यप्रधानार्थो गृह्येत तदा पाणिना कांस्यपात्र्यां दोग्धि पय इत्यत्र पाणिकांस्यपात्र्योरपि स्यात् । करणाधिकरणयोस्तु पचत्यादिरवकाशः । न हि तत्रास्य प्रसङ्गो दुहादिपरिगणनादिति । तन्मतान्तराभिप्रायेण । अन्यथा उदाहृतस्वपरग्रन्थविरोधादित्यास्तां तावत् ॥ शतं जयतीति ॥ जि अभिभवे । यत्तु, जि जय इति व्याख्यातम् । तन्न । तस्याकर्मकत्वात् । यद्यपि जयत्यादयो भाष्ये न पठितास्तथाऽपि चकारेण संगृह्यन्त इति कैयटः ॥अर्थनिबन्धनेति॥ न तु स्वरूपाश्रया । अहमपीदमचोद्यं चोद्य इति तद्राजसूत्रभाष्ये पृच्छिपर्यायस्य चुदेरपि द्विकर्मकत्वदर्शनादिति भावः । तथाच भट्टिः । स्थास्नुं रणे स्मेरमुखो जगाद मारीचमुच्चैर्वचनं महार्थम् । कालिदासोऽपि । शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव । भारविश्च । उदारचेता

दिति भावः । तस्योद्देश्यत्वे मानमाह ॥ अर्थिनश्चेति ॥ न तु निग्रहार्थ इति ॥ शारीरदण्डाद्यर्थ इत्यर्थः । तस्मादेव वाक्यशेषादिति भावः । एतत्सर्वं माधवादिरीत्या लाघुत्पत्तिनियामकम् । यदि प्रागुक्तं प्रधानकर्मत्वं तदेदं सर्वमसंगतमित्युक्तदिशोह्यम् ॥ द्विकर्मकेष्विति ॥ अकथितसूत्रविषयेष्वित्यर्थः । पचेरप्रामाणिकत्वदूषणं कैयटाद्यनुरोधेनेति ध्वनयन्नाह ॥ कैयटेति ॥ अत्रारुचिबीजं तु पचेर्व्यापारद्वयार्थत्वे कर्त्तुरीप्सिततममामिति कर्मणो वृक्षस्यैकव्यापारपरित्यागेन कर्तृत्वाविवक्षयाऽपि भाष्यस्य सूपपादत्वेनैतत्सूत्रविषयत्वे नमानामिति ॥ तन्मतान्तरेति ॥ पूर्वोपपादितभाष्यसंमतमतान्तरेत्यर्थः॥भाष्यानुक्तानां ग्रहणमप्रमाणमित्यनेन सूचयति । उदाहृतस्वपरग्रन्थाश्च यथाश्रुतकैयटानुसारेणेति च ध्वनितमित्यन्यत्र विस्तरः ॥ कैयट इति ॥ अत्रारुचिबीजमुक्तम् ॥ इति भाव इति ॥ अर्थ-

गिरमित्युदारां द्वैपायनेनाभिदधे नरेन्द्र इति । एवञ्च नाथत्यादयो बहवो द्विकर्मका बोद्ध्याः॥ देश इति ॥ कुरुपञ्चालादिरेव गृह्यते । तेनाधिशीङ्स्थासामित्यादेर्न वैयर्थ्यम् ॥ गोदोह इति ॥ न चेह कालत्वात् सिद्धिः । लोके कालत्वेन प्रसिद्धस्य मासादेरेव ग्रहणात् । तेन घटमास्ते इत्यादि न भवति । यत्तु प्राचोक्तम् । अकर्मकधातुभिर्योगे देशकालाध्वभावेभ्यो द्वितीयेति केचित् । नदीमास्ते इत्यादि । अत्रेदं वक्तव्यम् । कर्मसञ्ज्ञाया अनुक्तत्वात् कर्मणि लादयो न स्युः । आस्यते मास इति यथा । केचिदित्यप्यसङ्गतम् । द्वितीयाया भाष्यसंमतत्वात् । नदीमित्युदाहरणमप्यसङ्गतम् । ग्रामसमूहकुर्वादिरेव देशो,न तु प्रदेशमात्रम् । तेन ग्रामं स्वपितीत्यत्र न भवतीत्याकरात् । अध्वेति च न्यूनम् । अध्वानं स्वपितीति प्रसङ्गात् । अत एवाकरे अध्वा, गन्तव्यत्वेन विशेषितः। गन्तव्यत्वेन प्रसिद्धो नियतपरिमाणः क्रोशादिरिति व्याख्यातम् ॥

गतिबुद्धि ॥ प्रत्यवसानं भक्षणम् ॥ शब्दकर्मकाणामिति ॥ शब्दः कर्म कारकं येषां तेषामित्यर्थः । न त्विह कर्तरि कर्मव्यतिहारइतिवत् कर्मशब्दः क्रियापरः । कृत्रिमे कार्यसंप्रत्ययात् कर्मग्रहणसामर्थ्याच्च । अन्यथा गतिबुद्धिप्रत्यवसानशब्दार्थाकर्मकाणामित्येवावक्ष्यत् । नियमार्थं चैतत् सूत्रमिति प्राञ्चः । णिजर्थेनाप्यमानस्य यदि भवति तर्हि गत्यर्थानामेव कर्तुरिति । तेन पाचयति देवदत्तो यज्ञदत्तेनेत्यत्र प्रयोज्ये प्रकृत्यर्थं प्रति कर्तृत्वस्यैव निरपवादत्वेनावस्थानात् तृतीया सिद्ध्यति । उक्तं च—

निबन्धनेयं सञ्ज्ञेति वदतां कैयटादीनामित्यादिः । द्विकर्मकत्वं तु व्यापारद्वयार्थत्वेन सिद्धमिति तत्त्वम् ॥ कुरुपाञ्चालादिरिति॥ व्याख्यानात्तथैव भाष्योदाहरणाच्चेति भावः ॥ न वैयर्थ्यमिति ॥ शीङादेरपि शयनपूर्वके व्यापने वृत्त्यर्थे कर्तुरित्येव कर्मत्वस्याऽस्यादियोग इव सिद्धत्वादिति भावः । एवञ्चैवंकल्पनयोक्तदेशादीनामेव कर्मत्वं, नान्येषामनभिधानादिति सूचयति ॥ प्रसिद्धस्येति । क्रियायाः कालोपाधित्वमेव प्रसिद्धमिति भावः ॥ तेनेति ॥ देशादीनां ग्रहणेनेत्यर्थः । यत्तु मासादेरेव ग्रहणेनेत्यर्थ इति । तन्न । जन्यमात्रस्य कालोपाधित्वेऽपि कालत्वाभावात् । यदि तु जन्यमात्रस्य कालत्वमिति मतमस्ति तदा घटत्वादिना न तस्य कालता, किन्तु मासत्वादिनैवेति भावः । एतच्च नापूर्वं वचनमित्याकरे स्पष्टम् ॥ अध्वानं स्वपितीति ॥ स्वापमात्रार्थकोऽत्र स्वपितिः ।

कार्यसम्प्रत्ययादिति । कार्यसम्प्रत्ययस्यौचित्यादित्यर्थः । ननु कर्तरि कर्मेति सूत्रे क्रियाया अपि कृत्रिमकर्मत्वोक्तेरिदमसङ्गतमत आह ॥ कर्मेति ॥ आ-

गुणक्रियायां स्वातन्त्र्या॰ प्रेषणे कर्मतागतः ।
नियमात् कर्मसञ्ज्ञायाः स्वधर्मेणाभिधीयते, इति ॥

कर्तुः स्वधर्मेण तृतीययेत्यर्थः । ननु णिजर्थे प्रति कर्मत्वं बाधित्वा-प्रकृत्यर्थं प्रति कर्तृत्वं परत्वादेव सिद्धम् । अन्तरङ्गत्वाच्च । स्वकारकविशिष्टा हि क्रिया णिजर्थेन सम्बद्ध्यते । हेतुमति णिज्विधानात् । कर्तृप्रयोजकस्य हेतुत्वात् । अत एवोपजीव्याऽपि कर्तृसञ्ज्ञा । एवञ्च,

परत्वादन्तरङ्गत्वादुपजीव्यतयाऽपि च ।

प्रयोज्यस्यास्तु कर्तृत्वं गत्यादेर्विधितोचितेति चेत् । अस्त्वेवम् । लक्ष्यस्य निर्बाधत्वात् । नियमसूत्रमिदमिति ग्रन्थानां का गतिरिति चेत् । शृणु । णिजर्थस्य शाब्दं प्राधान्यं पुरस्कृत्य प्रधानानुरोधिन्याः कर्मसञ्ज्ञायाः प्राबल्याद् विप्रतिषेध एव नास्ति । अन्तरङ्गोपजीव्यत्वे अपि प्रधानं प्रति न प्राबल्यं प्रयोजयत इत्याशयेन ग्रन्थानामुक्तिसंभवः । अर्थप्राधान्य-पुरस्कारे तु विधायकत्वमेवोचितामिति ध्येयम् ॥ शत्रूनिति स्वर्गकर्मकं शत्रु-निष्ठं यद् गमनं तदनुकूलो यन्निष्ठो व्यापारः स श्रीहरिर्मे गतिरित्यर्थः । नन्विह कथं स्वर्गस्य कर्मत्वं कर्तुरीप्सिततमं हि कर्म, न च शत्रवः कर्त्तारः ।

इति ॥ हेतुमति चेत्यत्र भाष्यकृत इत्यर्थः ॥ गुणक्रियायां — णिच्प्रकृत्यर्थक्रिया-याम् ॥ स्वातन्त्र्यादित्यस्य स्वधर्मेणाभिधाने हेतुत्वं कर्मसञ्ज्ञानियमस्य च ॥ प्रेषणे ण्यर्थे ॥ तृतीययेति ॥ स्वधर्मेणेत्यस्य स्वकार्येणेत्यर्थः ॥ विशिष्टक्रियायाः सम्बन्धे हेतुमाह ॥ हेतुमतीति ॥ अन्तरङ्गत्वादिति॥एवञ्च परत्वादित्यभ्युच्चयः । अस्य विधित्वमित्ययं पक्ष आकडारसूत्रे भाष्ये ध्वनित इत्यभिमानः । तत्र हि परं कार्यमिति पाठे गत्यादीनां ण्यन्तानां कर्मकर्तृसञ्ज्ञापि प्राप्नोति, आरम्भ-सामर्थ्यात्, कर्मसञ्ज्ञा परकार्यत्वाच्च कर्तृसञ्ज्ञा प्राप्नोतीत्युक्तम् । तत्रारम्भ-सामर्थ्यादित्यस्य गत्यादिसूत्रारम्भसामर्थ्यादित्यर्थं मन्यते ॥ पुरस्कारे त्विति ॥ तुनाऽरुचिः सूचिता । प्रयोजकव्यापारेऽन्यानधीनत्वलक्षणार्थप्राधान्यस्य शाब्द-प्राधान्यस्य च सत्त्वेनोद्देश्यत्वलक्षणार्थप्राधान्यस्य प्रयोज्यव्यापारनिष्ठस्य पुर-स्कारो नयुक्तइति।किञ्च कर्तृग्रहणं धात्वर्थप्रधानीभूतव्यापाराश्रयरूपस्वतन्त्रोप-लक्षणं, न तु तत्सञ्ज्ञकपरम्। अत उपजीव्यत्वं दुरुपपादम्। आकडारसूत्रस्थस्या-रम्भसामर्थ्यादित्यस्यैतन्नियमारम्भसामर्थ्यादित्यर्थः । किञ्च, परं कार्यमिति पाठे विरोधाभावात् सर्वत्र सञ्ज्ञाद्वयप्राप्तावस्य नियमार्थतैवोचिता । एषां कर्म-सञ्ज्ञैवेति नियमस्तु न । प्राक् कडारादिति शास्त्रबाधापत्तेः । स्पष्टं चेदं तत्रैव कैयटे ॥ नन्विहेति ॥ तथायुक्तमित्यनेनापि न । तस्यानीप्सितत्वाभावात्, तत्रा-

तेषां गत्यादिसूत्रेण कर्मत्वादिति चेत् । मैवम् । कर्मसञ्ज्ञायां हि कर्तृग्रहणं स्वतन्त्रस्योपलक्षणम् । स्वातन्त्र्यं च, धातूपात्तव्यापाराश्रयत्वमेव । तच्च प्रयोजकसंनिधानेऽपि प्रयोज्यस्यास्त्येव । न चोपलक्षणत्वे प्रमाणाभावः । प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् * अप्रधाने दुहादीनामित्युक्त्वा, ण्यन्ते कर्तुश्च कर्मण इति वदतो भाष्यकृत एव तत्र प्रमाणत्वात् । न हि लक्षणां विना णिजन्तानां द्विकर्मकता लभ्यते, येन ण्यन्ते कर्तुरिति वचनं सावकाशं स्यात् । ननु स्वतन्त्रे सङ्केतितस्य तत्रैव लक्षणा कथमिति चेत् सञ्ज्ञान्तरानुपहिते सङ्केतितस्य तदुपहितसाधारणे स्वतन्त्रमात्रे सेत्यवधेहि ॥ नीवह्योरिति ॥ यद्यप्यनयोः प्रापणमर्थो न गतिस्तथाऽपि गतिरपि विशेषणीभूय प्रापकमध्ये प्रविष्टेत्येतावन्मात्रेण प्राप्तिं मत्वा प्रतिषेध उक्तः ॥ नियन्त्रिति ॥ नियन्ता पशुप्रेरको, न तु सारथिरेव । तेन वाहयति बलीवर्दान् यवान् इति सिद्ध्यति ॥ अनिषेध इति ॥ प्रयोज्यः कर्मेति वक्तव्यमिति फलितोऽर्थः ॥ सूत इति ॥ नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः ॥ आदयतीति ॥ अकर्त्रभिप्राये फले, शेषात् कर्त्तरीति परस्मैपदं, कर्त्रभिप्राये तु णिचश्चेत्यात्मनेपदमेव । तदपवादस्य निगरणचलनार्थेभ्य-

---

ऽपि कर्तुरित्यनुवृत्तेश्च ॥ लक्षणां विनेति ॥ कर्तृपदस्य स्वतन्त्रे लक्षणां विनेत्यर्थः । अत एव, सार्थाद्धीयते इत्यत्र कर्तुरपादानत्वेऽपि कर्मत्वप्रयुक्तकारसिद्धिरिति सम्प्रदानसञ्ज्ञासूत्रे कैयटे स्पष्टम् । तत्प्रयोजको हेतुरिति सूत्रेऽप्येवमेवात एव णिच्सिद्धिः ॥ अवधेहीति ॥ किञ्च प्रयोजककर्तृव्यापारप्रयोज्यसंयोगरूपफलाश्रयत्वेनाक्षतं कर्मत्वम् । किञ्च णिजुत्पत्तेः प्रागेव स्वर्गादीनां कर्मत्वप्रवृत्तिस्तस्यामवस्थायां कर्तृत्वसत्त्वात् । अकृतव्यूहा इति त्वनित्या, नास्त्येव वा ॥ प्रापणमिति ॥ उत्तरदेशसंयोगानुकूलव्यापारो हि तत् ॥ तथाऽपीति ॥ अत एव प्रतिषेधाद् यथाकथञ्चिद्गत्यर्थानामप्यत्र ग्रहणमिति भावः ॥ प्राप्तिं मत्वेति ॥ न वेति सूत्रे भाष्ये, हृक्रोरित्यस्योभयत्र विभाषात्वमुक्त्वा प्राप्तेऽभ्यवहरतिमुदाहृत्याप्राप्ते हरति भारं देवदत्तो हारयति भारमित्युदाहरणात् । विपूर्वो हरतिर्गत्यर्थोऽभ्यवपूर्वः प्रत्यवसानार्थ इति तत्रत्यकैयटाच्च । न गतीतिसूत्रभाष्ये, हृवह्योरप्रतिषेधः सम्प्रहरन्ते राजान इति हिंसार्थे एव भाष्ये उदाहरणाच्च । तत्रैव वहिर्न गत्यर्थः । देशान्तरप्रापणं हि वहेरर्थ इति भाष्येण प्रापणस्य गतित्वाभावबोधनाच्च, न गत्यर्थत्वेन तेषां ग्रहणम् । प्राप्तिश्च सम्बन्धमात्रं, न संयोग एव । सुखं प्राप्तो, धनं प्राप्तो, भूः प्राप्तेत्यादिव्यवहारात् । आदिकर्मणि च कर्तरि क्तः । देशान्तरप्राप्तेः परं गतिं विनाऽनुपपत्त्या क्वचिन्नान्तरीयकतया गतिप्रतीतिरस्त्येव । तादृशमपि

श्वेत्यस्य, अदेः प्रतिषेध इति निषिद्धत्वात् ॥ सस्यमिति ॥ क्षेत्रस्थानां यवानां भक्ष्यमाणानां हिंसा द्रष्टव्या । तस्यामवस्थायां तेषां चेतनत्वा॰ ॥ स्मारयतीति ॥ यत्तु, णेरणाविति सूत्रे स्मरयत्येनं वनगुल्मस्स्वयमेवेति दाहियते, तत्र भाष्यप्रयोगादेव कर्मत्वं बोद्धव्यम् ॥ शब्दायतेरिति ॥ शब्दं करोतीत्यर्थे, शब्दवैरेत्यादिना क्यङ् । ततो हेतुमण्णिच् ॥ धात्वर्थेति ॥ एतेन, शब्दाययति सनिकै रिपूनिति कर्म प्रयुञ्जानाः परास्ताः । यत्तु प्राचा, अय-क्रन्द-शब्दाय-ह्वेञां नेत्युक्तम् । तत्रायतेरुक्तिस्तावन्निर्मूलैव । क्रन्दह्वेञोस्तु शब्दक्रियत्वमात्रेण प्राप्तिसम्भावना । वस्तुतस्तु नाऽसौ सूत्रार्थ इत्युक्तम् । यदपि श्रु-ग्रह-दृशामिति कर्मत्वमुक्तम् । तत्र दृशिग्रहणं प्रामाणिकमेव । शृणोतेस्तु शब्दकर्मकत्वात् सिद्धम् । ग्रहेस्तु द्विकर्मकत्वं यद्यपि सुधाकरादीनां संमतं, तथाऽपि बहूनामसंमतः । अत एव, अजिग्रहत्तं जनको धनुस्तादिति भट्टिप्रयोगमजिग्रहं बोधितवानिति व्याचख्युः । तथा,अयाचितारं न हि देवदेवमद्रिः सुतां ग्रहयितुं शशाकेत्यः ग्राहयितुमुद्वाह्यत्वेन बोधयितुमिति । युक्तं चैतत् । ग्राहेर्द्विकर्मकत्वे हि जायाप्रतिग्राहितगन्धमाल्यामित्यत्र क्तेन प्रयोज्याया धेनोरभिधानं स्यात् । ण्यन्ते कर्तुश्च कर्मण इत्युक्तेः । ततश्च जायया गन्धमाल्ये प्रतिग्राहितामिति स्यात् । सिद्धान्ते तु प्रतिग्राहिते गन्धमाल्ये ययेति विग्रहः । जायानिष्ठप्रेरणविषयी-

---

गत्यर्थकत्वमभिमत्य वार्तिकारम्भः । वस्तुतोऽप्राप्तिरेवेति अनेन सूचितम् ॥ हिंसेति ॥ हिंसाङ्गे भक्षणे च भक्षयतेर्वृत्तिर्बोद्धा ॥ भाष्यप्रयोगादेवेति ॥ आद्यानाऽर्थकघटादिभिन्नस्मरतेरेव योगे तद्भाष्यप्रामाण्यात् कर्मत्वाभावो, घटादेस्तु भवत्येव कर्मत्वमिति भावः ॥ परास्ता इति ॥ इदं च कैयटानुरोधेनोक्तम् । वस्तुतः शब्दक्रियाणामिति पक्षे भाष्ये, ह्वाययति-शब्दाययति-क्रन्दयतीनां निषेध उक्तो, न तु शब्दकर्मकाणामिति पक्षे । एवञ्च तत्र पक्षे शब्दायतौ प्रतिषेधानुपपत्त्याऽकर्मकशब्दायतिसत्त्वे, न मानम् । शब्दस्य धात्वर्थेन संगृहीतत्वेऽपि बहिर्भूतपुत्रादिकर्माभावे न मानमिति बोद्धव्यम् ॥ व्याचख्युरिति ॥ तेन बोधनातिरिक्तार्थस्य न द्विकर्मकत्वम् । अन्यथाऽप्रसिद्धार्थपरिग्रहो व्यर्थ एव स्यादिति भावः ॥ ग्राहेः – बोधनातिरिक्तार्थग्राहेः ॥ ततश्चेति ॥ एवं व्यधिकरणत्वादन्यपदार्थाभावाच्च बहुव्रीहिर्न स्यादिति भावः ॥ प्रतिग्राहिते इति ॥ अस्य जायया-त्यादिः । तत्र जायाप्रतिग्राहितशब्दयोस्तृतीयातत्पुरुषं कृत्वा बहुव्रीहिः कार्य इति भावः । बहुव्रीहिणा तृतीयातत्पुरुषस्तु दुर्लभो, विधायकाभावात् । अवयवेन सामर्थ्येऽपि समुदायेन तृतीयान्तस्यासामर्थ्याच्च । तदाह ॥ जायानिष्ठेति ॥ ननु

भूतं गन्धमाल्यकर्मकं यत्प्रतिग्रहणं तत्कर्त्रीमित्यर्थः । अन्यपदार्थान्तर्भावेणैव विशेषणविशेष्यभाववैपरीत्येनैवैकार्थी[illegible]नात् ॥ अभिवादिदृशोरिति ॥ अभिवादयतेरप्राप्ते दृशेस्तु प्राप्ते, विभाषेयम् ॥

अभिनि ॥ नेरल्पाच्तरत्वेन पूर्वनिपाते कर्तव्ये विपरीतोच्चारणं तादृशसमुदायविवक्षार्थमित्याह ॥ संघातपूर्वकस्येति ॥ तेनेह न । निविशते यदि शूकशिखा पदे इति ॥कचिन्नेति ॥ एष्वर्थेष्वभिनिविष्टानामिति भाष्यप्रयोगश्चेह मानम् । उपपदविभक्तिमाह ॥ उभसर्वतसोरित्यादिना । उभसर्वयोस्तसौ उभसर्वतसौ तदन्तयोर्योगे द्वितीया कार्येत्यर्थः ॥

अत्र प्राञ्चः । उभशब्देनोभयशब्दो लक्ष्यते।अन्यथा तसोऽसंभवादित्याहुः । वस्तुतस्तु वृत्तिविषये अयच्प्रवृत्तावपि उभशब्दाद्विहितो यस्तम् तदन्तमस्त्येवेति यथाश्रुतं साधु॥ धिगित्यविभक्तिको निर्देशो गवित्यययमाहेतिवदिति प्राञ्चः । तन्न । तथा सति अपदान्ततया दृष्टान्ते, लोपः शाकल्यस्येत्यस्येव,

द्विकर्मकत्वेऽपि धेनुरूपप्रयोज्यकर्मणः कर्मत्वविवक्षायां गन्धमाल्यरूपकर्मण्येव के इष्टसिद्धिरिति चेन्न । णिजुत्पत्त्यर्थं प्रयोजकजायाया हेतुत्वावश्यकत्वेन, हेतोश्च कर्तृप्रयोजकरूपत्वेन प्रयोज्याया धेनोः कर्तृत्वार्थं तन्निष्ठप्रेरणविषयीभूतव्यापाराश्रयत्वविवक्षाया आवश्यकत्वेनेदृशार्थस्यैवैतत्कर्मसञ्ज्ञानिमित्तकोटौ प्रवेशेनेदृशविषये कर्मत्वाविवक्षाया उपपादयितुमशक्यत्वात् । कर्मत्वशक्तेरपि तत्समानियतत्वेनाविवक्षाया असम्भव इत्यभिमानात् । न च निवृत्तप्रेषणप्रतिग्रहधातोर्णिजिति गन्धमाल्यकर्मण्येव के इष्टसिद्धिर्जायापदेन षष्ठीसमास इति वाच्यम् । प्रकृत्यैव तदर्थलाभाण्णिजुपादानस्या[illegible]तापत्तेः।ननु गवादिपदानां विग्रहे स्वार्थमात्रपराणां समासे अन्यपदार्थपरत्वमिव प्रतिग्राहितशब्दस्य धेनुपरत्वेऽपि वृत्तौ गन्धमाल्यपरत्वं भविष्यतीत्यत आह ॥अन्यपदार्थेति॥ तदन्तर्भावेणैकार्थीभावस्य सूत्रव्युत्पत्त्यादिबलेनाङ्गीकारेऽप्यन्यान्तर्भावेण तत्स्वीकारे मानाभाव इति भावः ॥ अभिवादयतेरिति ॥ वदि अभिवादन इति ण्यन्तस्येत्यर्थः । व्याख्यानात् सङ्घातग्रहणे स्थिते व्याख्याने बीजाभावं दर्शयति ॥

पूर्वनिपातेति ॥ निविशत इति ॥ अत एव, सत्त्वे निविशते इति भाष्यप्रयोगः सङ्गच्छते ॥ भाष्यप्रयोग इति ॥ समर्थसूत्रस्थ इति शेषः ॥ उभसर्वयोस्तसाधिति ॥ उभांशे उभशब्दघटितसमुदायोद्देश्यकत्वं षष्ठ्यर्थ इति बोध्यम् । उभशब्दस्य शब्दपरत्वाद् वृत्तिविषयेऽपि नायच् वार्त्तिके । उदाहरणे तु अन्तरङ्गत्वात् पूर्वमेवायचि तत उभयशब्दान्तस्यापि तदघटितसमुदायोद्देश्यकत्वमस्त्येवेति न दोषः॥ वृत्तिविषये इति॥ वृत्तौ कृतायामित्यर्थः । प्राचीनैर्हि, उभौ साभ्यासस्येति निर्देशेन वृत्तिघटके परत एवायजिति व्याख्यातं तदाह ॥ उभयशब्दादित्यादि ॥ एवञ्च तेषां लक्षणाश्रयणं व्यर्थमिति भावः ॥ अविभक्तिक इति॥अनुत्पन्नविभक्ति-

दार्ष्टान्तिके जश्त्वस्यापि अप्रवृत्तिप्रसङ्गात् । न चायं गकारान्त एवेति भ्रमितव्यम् । कस्य च द इति सूत्रे धकिदित्युदाहरणव्याख्यानविरोधप्रसङ्गात् । तस्माद् धिगिति विभक्त्यन्तमेव । प्रकृतिवदनुकरणमित्यतिदेशात् सुपो लुक् ॥ उभयतः कृष्णमिति ॥ कृष्णस्य पार्श्वद्वयेऽपीत्यर्थः । आद्यादित्वाच्चसिः । षष्ठ्यर्थे द्वितीया । एवमुपपदविभक्तौ सर्वत्र बोद्धव्यम् ॥

नाम्नो द्विधैव संबन्धः सर्ववाक्येष्ववस्थितः ।
सामानाधिकरण्येन षष्ठ्या वाऽपि क्वचिद्भवेद्, इति वृद्धोक्तौ षष्ठीग्रहणं तदपवादविभक्तेरप्युपलक्षणम् । द्विधेत्युक्तिः सामानाधिकरण्यवैयधिकरण्याभ्यां निर्वाह्या । षष्ठीतदपवादयोरेककोटितया वा ॥ धिक् कृष्णाऽभक्तमिति॥तस्य निन्द्यतेत्यर्थः।कथं, धिङ्मूर्खेति । संबोधनपदस्य क्रियाऽन्वय इति प्रागेवोक्ततया धिक्शब्दयोगाभावात् । क्रियापदं च क्वचिच्छ्रुतं, क्वचिदाक्षिप्तमित्यन्यदेतत् । तथाच मूर्खसंबोध्यकं निषिद्धाचरणादि निन्द्यत इति वाक्यार्थः । एतेन, हा तात, हा देवि धीरा भवेत्यादि व्याख्यातम् । यत्त्वाहुः । उपपदविभक्तेः कारकविभक्तिर्बलीयसीति संबोधने प्रथमैव भवति । संबोधनपदस्य कर्तृकारकवाचित्वादिति । तन्मन्दम् । संबोधनपदस्य कर्तृकारकत्वे उक्तिसंभवाभावात् । देव प्रसीदेत्यादौ वस्तुगत्या देव एव कर्तेति चेद्, नैतावता कारकविभक्तित्वं लभ्यते । किञ्च, देव त्वां भजे, त्वां भजन्तीत्यादौ संबोध्यस्य वास्तवमपि न कर्तृत्वमित्यास्तां तावत् ॥ उपर्युपरीति ॥ कथं तर्हि, उपर्युपरिबुद्धीनां चरन्तीश्वरबुद्धयः । उच्यते ।

क इति व्याख्यातारः ॥ दृष्टान्तबलेन तथैव लाभादित्यभिप्रेत्याह ॥ जश्त्वस्येति ॥ अतिदेशादिति ॥ अतिदेशेनाव्ययत्वादित्यर्थः ॥ आद्यादित्वादिति ॥ कृष्णसंबन्धिपार्श्वद्वयाभ्यामागता इत्यर्थे पञ्चम्यास्तसिलित्यन्ये ॥ सामानाधिकरण्येन – विनाऽपि संबन्धं विशेष्यविशेषणभावेन ॥ षष्ठ्येति ॥ भेदसम्बन्धपूर्वकविशेष्यविशेषणभावेनेत्यर्थः । नाम्नोरित्यनेन क्रियाकारकयोः क्रियाकारकभावरूपकारकविभक्त्यर्थसम्बन्धेनान्वय इति सूचितम् ॥ वैयधिकरण्येति ॥ षष्ठ्या वेत्येतद्वैयधिकरण्योपलक्षणमिति भावः ॥ क्रियान्वय इति ॥ बोधनीयक्रियान्वय इत्यर्थः ॥ धिक्शब्दयोगाभावादिति ॥ सम्बोधनस्य क्रियान्वयात्क्रियायैव, धिको योगो, न तेनापीति भावः ॥ व्याख्यातमिति ॥ तातेत्यादेर्हाशब्देन न योग इति भावः । हापदस्य चाद्याहृतत्वामित्यनेन वाऽन्वय इति तात्पर्यम् ॥ कारकविभक्तित्वमिति ॥ कर्तृकारकविभक्तित्वमित्यर्थः । सम्बोधनपदार्थस्य देवस्य, त्वमित्यनेन सहाभेदेऽपि शब्दतः क्रियाश्रयत्वादिप्रतीतेरुपपादनस्याशक्यतया कर्तृत्वं

उपरिबुद्धीनामुत्तानबुद्धीनामुपरि चरन्तीत्यर्थः । एवञ्च आम्रेडितत्वाभावान्न द्वितीया । यद्वा, प्रतिपदोक्तस्योपर्यध्यधसः सामीप्य इति कृतद्वित्वस्यात्र ग्रहणम् । तेन वीप्सायां द्विर्वचने सति नास्य प्रवृत्तिः । अन्यत्रापि दृश्यत इत्युक्तम् । तदर्शयति ॥ अभितः परित इति ॥ प्रतिभातीति ॥ एष प्रतिशब्दः क्रियाविशेषकत्वादुपसर्गः । न तु कर्मप्रवचनीयः ॥ अन्तरा त्वां मामिति ॥ तव मम च मध्ये इत्यर्थः ॥ सामर्थ्यादिति ॥ अत एव हेतुत्वपर्यन्तमपि शाब्दबोधे विषय इति स्वीक्रियत इति भावः ॥ नदीमन्विति ॥ द्वितीयायाः संबन्धोऽर्थः । स चेह साहित्यरूप इत्यनुना द्योत्यते ॥

लक्षणेत्थम् ॥ वृक्षं प्रतीति ॥ वृक्षसम्बन्धि द्योतनमर्थः । सम्बन्धश्च लक्ष्यलक्षणभाव इति प्रत्यादयो द्योतयन्ति ॥ भक्तो विष्णुं प्रतीति ॥ विष्णोर्भक्तेश्च विषयविषयिभावः प्रत्यादिद्योत्यः ॥ लक्ष्मीरिति ॥ लक्ष्मीरूपस्य भागस्य हरिणा सह स्वस्वामिभावः ॥ वृक्षं वृक्षमिति ॥ इह वीप्सा द्विर्वचनेनैव द्योत्यते । परिशब्दस्तु क्रियया सम्बद्ध्यते । कर्मणि द्वितीया । कर्मप्रवचनीयसञ्ज्ञया बाधात् षत्वं न । एतदर्थमेव लक्षणादयो विषयतयोपात्ता इति व्याख्यातमाकरे । पञ्चम्यपाङ्परिभिरिति तु न भवति। वर्जनार्थेनापेत्यनेन साहचर्यात् । ममाभिष्यादिति । मम भागः स्यादित्यर्थः। मामभिष्यादित्यपि प्राञ्चः प्रत्युदाहरन्ति । तत्र मां प्राप्नुयादित्यर्थः। उपसर्गवशेन अस्तेः सकर्मकत्वान्मामिति द्वितीया । अत्र च मम भाग इत्यर्थतः

दुर्लभम् । वास्तवक्रियाश्रयत्वमादाय कर्तृत्वे तु बहूपप्लव इति भावः ॥ नास्य प्रवृत्तिरिति ॥ अत एव सर्वेषामयमम्लानामुपर्युपरि वर्त्तत इत्यादौ न द्वितीया । अत्र ह्युपर्युपरीत्यस्यातिशयोऽर्थो, न सामीप्यम् । वीप्साद्विर्वचनं चात्रेति बोद्धव्यम् ॥ उपसर्ग इति ॥ बुभुक्षितान्वितप्रत्यर्थसम्बन्धस्य क्रियागतत्वाद्, बुभक्षितस्य न भातीत्यन्वय इति भावः ॥ मध्ये इति ॥ अन्तरा इति हि मध्ये इत्यर्थकम् ॥

लक्ष्यलक्षणेति ॥ वृक्षप्रकाशेन विद्युद्विद्योतज्ञानाद् वृक्षो लक्षणं विद्युद्विद्योतनं लक्ष्यम् ॥ कर्मणीति ॥ वृक्षपदार्थस्य सेचनं प्रति कर्मत्वात् । अत एव वृक्षस्य प्रतिसेचनमित्यादौ षष्ठीति भावः ॥ विषयतयेति ॥ अन्यद्योत्याया अपि वीप्सायाः सञ्ज्ञां प्रति निमित्तत्वादिति भावः । इतरे लक्षणादयस्तु द्योत्या एवेति बोद्धव्यम् ॥ इति तु न भवतीति ॥ विशिष्टक्रियासंबन्धे विशेषणेनापि संबन्धात् प्राप्तिरिति भावः । एतत्सर्वं हरदत्तानुरोधेन । कर्मत्वाविवक्षायामपि द्वितीयार्थं संज्ञाया आवश्यकत्वात् । किञ्च परेः क्रियाविशेषकत्वेऽन्वर्थत्वेन कर्मप्रवचनीयत्वस्यैवानापत्तिरित्यत्र विस्तरः । नैन्वत्रार्थे भागमतीत्या कथं निषेधोऽत आह ॥ अत्र

पर्यवसानात् । अभागे इति कर्मप्रवचनीयत्वे निषिद्धे, उपसर्गाद्दुर्भ्यामिति षत्वम् ॥ पूजायां चेति ॥ सुः पूजायामिति पूर्वसूत्रात् पूजाग्रहणमनुवर्त्तते॥

कालाध्वनोः ॥ अन्तं विराममतिक्रान्तोऽत्यन्तः । स चासौ संयोगो निरन्तरसंनिकर्ष इत्यर्थः ॥ द्वितीया स्यादिति ॥ श्रुतकालाध्ववृत्तिभ्यामेव ॥ मासस्येति ॥ कृत्वोऽर्थप्रयोगे कालेऽधिकरण इति षष्ठीत्याहुः । तन्न । तत्र शेषग्रहणानुवृत्त्या द्विरह्नो भोजनमिति कृदन्तेन सह समासाप्रवृत्तेरेव फलत्वात् । तस्मादिह, षष्ठी शेष इतिसूत्रेणैव षष्ठीति तत्त्वम् ॥ इति द्वितीया ॥

स्वतन्त्रः कर्ता ॥ प्रधानीभूतधात्वर्थं प्रति आश्रयत्वं स्वातन्त्र्यम् । आह च । धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते, इति ॥

साधकतमं करणम् ॥ प्रकृष्टेति॥ यद्व्यापारादनन्तरं क्रियानिष्पत्तिस्तत्प्रकृष्टम् । उक्तं च—

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्, इति ॥

विवक्ष्यत इत्यनेन स्थाल्यादीनामपि वैवक्षिककरणत्वमस्तीति ध्वनयति । आह च—

वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम् ।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः, इति ॥

अयं भावः । कारकत्वं तद्व्याप्यकर्तृत्वादिषटकं च वस्तुविशेषे विशे-

---

चेति ॥ अर्थतो भागे पर्यवसानमादाय निषेधप्रवृत्तिरिति भावः ॥

कालाध्वेति ॥ येन कालेनाध्वना वाऽत्यन्तसंयोगस्तद्वृत्तिभ्यामित्यर्थः ॥ तस्मादिति ॥ अन्तरङ्गत्वाच्चेत्यपि बोध्यम। एतेन शेषग्रहणानुवृत्तौ तेनैवेति परास्तम् ॥ इति द्वितीया ॥

प्रधानीभूतेति ॥ प्राधान्यं च कर्तृप्रत्ययसमभिव्याहारे धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयधात्वर्थत्वम् । धातुनोक्तक्रिये कारके नित्यं कर्तृतेष्यते इत्यन्वयः ॥

यद्व्यापारादिति ॥ अनन्तरशब्दयोगे दूरान्तिकार्थैरिति सूत्रेण पञ्चमी ॥ यत्र येषां कारकाणां मध्ये इत्यर्थः ॥ वस्तुत इति ॥ वस्तुनीत्यर्थः । सार्वविभक्तिकस्तसिः । तत्कर्तृत्वादिकमनिर्देश्यम् । इदं वस्तु कर्तैवेत्यादिक्रमेण न निर्देश्यमित्यर्थः । हि यतो वस्तु तत्तद्रूपेण न व्यवस्थितम् । तामेवाव्यवस्थां दर्शयति ॥ स्थाल्येत्यादि ॥ कारकत्वमिति ॥ विशेषणत्वादि यथा खञ्जकुब्जादावव्यवस्थितमेवं कारकत्वं तद्व्याप्यमधि करणत्वादिकं चेत्यर्थः । तण्डुलानोदनं पचतीत्यत्र

षणविशेष्यभाववन्न व्यवतिष्ठते । न हि गौस्सर्वं प्रति गौरेव, न तु किञ्चित्प्रत्यगौरितिवद् विशेषणं विशेषणमेवेति सुवचम् । तथाच कथमिदं धातुव्यक्त्या उपस्थापितेऽर्थे किं कर्मादिकमिति प्रश्ने, प्रकृतव्यक्त्युपात्तव्यापाराश्रयतया विवक्षितः कर्ता । व्यापारव्यधिकरणफलाश्रयः कर्म । कर्तृकर्मद्वारकसम्बन्धेनाश्रयोऽधिकरणम् । पच्यर्थो व्यापारश्चानेकधा । एवञ्च पचेरविश्रयणतण्डुलावपनैधोपकर्षणादितात्पर्यकत्वे तदाश्रयो देवदत्तः कर्त्ता । ज्वलनतात्पर्यकत्वे एधाः कर्त्तारः । तण्डुलधारणादिपरत्वे स्थाली कर्त्री । अवयवविभागादिपरत्वे तण्डुलाः कर्तारः । स्थाल्या पचतीत्यत्र तृतीयोपात्तव्यापाराश्रयापि स्थाली करणमेव, न तु कर्त्री । देवदत्तादिव्यापारस्यैव तद्धातूपात्तत्वात् । तथा । आदिखादिभ्यामुपात्तेऽर्थे प्रयोज्यः कर्ता । तस्मिन्नेवार्थे भक्षयतिनोपात्ते कर्म । अधिपूर्वैः शीङादिभिरुपात्तेऽर्थे आधारः कर्म, केवलैरुपात्ते अधिकरणमित्यादि । एतेन ज्ञानस्य स्वप्रकाशकत्वे कर्तृकर्मविरोध इत्यादि परास्तम् । शब्दविशेषोपाधिकस्य कर्तृत्वादेः प्रत्यक्षादौ उक्तिसम्भवाभावात् । एतेन परसमवेतक्रियाजन्यफलशालि कर्मत्वञ्चेत्, अपादानेऽतिव्याप्तिमाशङ्क्य धात्वर्थतावच्छेदकफलशालि कर्मेति परिष्कुर्वन्तोऽपि प्रत्युक्ताः । ग्रामं गमयति देवदत्तामित्यादौ गन्तर्यव्याप्तेः । तन्मते गमनस्य प्रकृत्यर्थत्वेऽपि तथात्वानवच्छेदकत्वात् । तत्र णिचो व्यापारार्थ-

---

कारकस्यापि [illegible] तण्डुलानामोदनं पचतीत्यादावोदनपदार्थान्वयेन षष्ठ्यन्ततादर्शनात् कारकत्वस्य व्यभिचारो द्रष्टव्यः ॥ प्रकृतव्यक्त्युपात्तेति ॥ प्रकृतधातुव्यक्तीत्यर्थः । अनेकधात्वमेव दर्शयति ॥ एवञ्च पचेरिति ॥ तण्डुलधारणादिपरत्वे इति ॥ आदिना आपाकसमाप्तिधारणम् ॥ अवयवविभागादीति ॥ आदिना रोटिकादावयवसंमेलनम् ॥ तण्डुलाः कर्तार इति ॥ कर्मकर्त्तरीत्यर्थः । सम्प्रदानापादानयोस्तु न कर्तृत्वविवक्षा शब्दशक्तिस्वाभाव्यात्तद्व्यापारे धातोरवृत्तेरिति बोध्यम ॥ उपात्ते, उक्ते इत्यर्थः ॥ स्वप्रकाशत्वे – ज्ञानविषयत्वे ॥ कर्तृकर्मविरोध इति ॥ अभेदे आधाराधेयभावस्य विषयविषयिभावस्य चाभावादिति भावः ॥ शब्दविशेषोपाधिकस्य — शब्दविशेषनिमित्तस्य ॥ कर्तृकर्मशब्दयोराश्रयविषयोपलक्षकत्वे, स्वप्रकाशत्वे इत्यस्य स्वप्रकाशपदव्यवहार्यत्वे इत्यर्थे वा लक्षणैव दोष इति बोध्यम ॥ परेति ॥ कर्मत्वाभिमतापेक्षया परेत्यर्थः । गम्यादिकर्तर्यतिव्याप्तिवारणायेदम् ॥ अपादाने इति ॥ प्रयागात् काशीं गच्छतीत्यादौ तस्यापि क्रियाजन्यविभागाश्रयत्वादिति भावः॥ धात्वर्थतावच्छेदकेति ॥ संयोग-

कत्वं न प्रकृतेः। तत्त्वे वा पाचयत्यादिप्रयोज्यकर्तर्यतिव्याप्तेः। पारिभाषिक-मनुशासनोपयोगि कर्मत्वं वचनबलाद् व्यवस्थितमितिचेत्। अपादानेऽपि तर्हि तन्नास्तीत्यवधेहि। एकसञ्ज्ञाधिकारेऽनवकाश्य सावकाशाया बाधात्। अत एवात्मानमात्मना हन्तीत्यादौ परया कर्तृसञ्ज्ञया कर्मसञ्ज्ञा-माशङ्क्याऽहङ्कारादिविशिष्टात्मभेदमाश्रित्य समाहितं भाष्ये ॥ रामेणेति ॥ इह यद्यपि विभक्त्युपस्थितानां कारकाणां क्रियां प्रति विशेषणतैव, तथाऽपि कृदुपस्थितानां विशेष्यतैव। सत्त्वप्रधानानि नामानीत्युक्तेः। धातूपस्थाप्य-योः फलव्यापारयोरपि कर्मकृत्समभिव्याहारे विशेषणविशेष्यभावव्यत्य-सः। तथाच रामनिष्ठो यो व्यापारस्तद्विषयीभूतबाणव्यापारसाध्यप्राण-योगाश्रयो बालीति वाक्यार्थः। यत्तु वाजपेयाधिकरणे मीमांसकैरुक्तं, काष्ठैः पाचक इत्यपि स्यादिति। तदिष्टापत्तिग्रस्तम्। कर्तृकरणे कृता बहुलं, कर्तृकर्म-णोः कृत्यादिसूत्राणां कृत्यकृत्यर्थेन कारकत्वं विनोक्तिसंक्यस्यैवाभावा-दिति सुधीभिराकलनीयम्। अनभिहिते किम्। हरिः करोति। जीवन्त्यने-जीवनः शाब्दिकः। शब्ददर्दुरं करोतीति ठक्। कृतं विश्वं येन कृतविश्वः, विश्व-

---

स्यैव तथात्वं, न तु विभागस्येति भावः ॥ तत्त्वे वेति ॥ ण्यन्तधात्वर्थतावच्छे-दकत्वे वेत्यर्थः ॥ वचनबलात् – गत्यादिनियमबलात् ॥ ननु विभागस्य तत्त्वेन, कर्तुरिति, तथायुक्तमिति च प्राप्नोति। अपादानप्रकरणे अवध्यन्वयिनो विभाग-स्य धात्वर्थताया वक्ष्यमाणत्वादित्यत आह ॥ एकसञ्ज्ञेति ॥ सावकाशाया इति ॥ विषं भुङ्क्ते इत्यादौ सावकाशाया इत्यर्थः। कर्तुरिति कर्मसञ्ज्ञा त्वपा-दानसञ्ज्ञायाः परत्वाद् बाधिका। अत एव, ग्रामं त्यजतीत्यादौ द्वितीयासिद्धि-रिति तात्पर्यम्। अपादाननिष्ठविभागीयसम्बन्धस्य फलतानवच्छेदकत्वान्न दोष इत्यपि बोध्यम् ॥ अत एव। एकसञ्ज्ञाधिकारे सञ्ज्ञयोर्बाध्यबाधकभावादेव ॥ अ-हङ्कारादीति ॥ आदिना शरीरम् ॥ विभक्त्युपस्थितानामिति ॥ विभक्त्यर्थस्य संसर्गत्वमते तदन्तोपस्थितानामित्यर्थः ॥ व्यत्यास इति ॥ तद्व्यत्यासेनैव धातु-स्तदुपस्थितिरित्यर्थः। तत्र व्यापारजन्यफलमेव धात्वर्थ इति भावः ॥ तदिष्टापत्तीति ॥ तत्प्रकृत्यर्थक्रियायामपि कारकाणामन्वयादिति भावः। तत्रैव मानमाह ॥ कर्त्रित्यादि ॥ यत्तु भवतिक्रियायां प्राथमिकान्वयेन तत्तद्विभक्तौ कृदन्तेन पार्ष्णिकान्वयात् तेषां चारितार्थ्यमिति। तन्न। भवति-क्रियायां कर्तृत्वेनान्वये कर्तुरुक्तत्वात् तृतीयानापत्त्या, हरिणा त्रात इत्य-ऽसिद्धापत्तेः। करणत्वेनान्वये पार्ष्णिकत्वापि हरिकर्तृकत्राणकर्मणो बोधा-नापत्तेः। कर्तृतृतीयान्तेन समासविधायकासङ्गतेश्च। यत्कर्तृककृतिकर्म-

कर्मककृत्याश्रय इत्यर्थः । अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरस्वीकारात् । यथा चैतत्तथा वक्ष्यते ॥ प्रकृत्यादिभ्य इति ॥ आकृतिगणोऽयम् । तेन नाम्ना सुतीक्ष्णश्चरितेन दान्त इत्यादि बोद्धव्यम् । द्वयोर्द्रोणयोः समाहारो द्विद्रोणम् । पात्रादित्वात् स्त्रीत्वाभावः । द्रोणद्वयसंबन्धिधान्यमित्यर्थः ॥ चादिति ॥ करणशब्दानुवृत्त्या, परिक्रये संप्रदानमित्युत्तरसूत्रस्थान्यतरस्याङ्ग्रहणापकर्षणेन वा सञ्ज्ञयोः पर्याये लब्धे समावेशार्थश्चकारः । तेन मनसादेव इत्यत्र कर्मण्यण्, करणे तृतीया चेत्युभयं सिद्ध्यति । मनसः सञ्ज्ञायामित्यलुक् । किञ्चाक्षैर्देवयते यच्चदत्तेनेत्यत्र सकर्मकत्वादणि कर्तुर्णौ कर्मत्वं न । अणावकर्मकादिति [illegible] च नेति सिद्धान्तः । यत्तु प्राचा, कर्मसञ्ज्ञं वा स्यादिति व्याख्यातम् । तदाकरविरोधादुपेक्ष्यम् । स्यादेतत् । करणसञ्ज्ञाया अवकाशः । देवना अक्षाः । करणे ल्युट् । कर्मसञ्ज्ञायास्तु दीव्यन्ते अक्षाः । कर्मणि लट् । अक्षैर्दीव्यतीत्यत्र तु सञ्ज्ञाद्वयप्रयुक्तकार्यद्वयप्रसङ्गे परत्वात् तृतीयैव स्यान्न तु द्वितीयेति चेत् । अत्राहुः । कार्यकालपक्षे कर्मणि द्वितीयेत्यत्र यदस्योपस्थानं तस्यानवकाशत्वाद् द्वितीयेति । ननु दीव्यन्ते अक्षा इत्यत्र कर्मण्यभिहितेऽपि करणत्वस्यानभिधानात् तृतीया स्यात् । तथा देवना अक्षा इत्यत्र ल्युटा करणस्याभिधानेऽपि कर्मणोऽनभिधानात् द्वितीया स्यात् । मैवम् । एकैव ह्यत्र शक्तिः सञ्ज्ञाद्वययोगिनी । तथाच उभयत्राप्यऽभिधानमेव, न त्वनभिहितत्वम् ॥

विश्वमिति विग्रहवाक्यजबोधाद्विग्रहबोधस्वीकारे न मानमत आह ॥अषष्ठ्यर्थेति॥ आकृतीति ॥ इदं च यथायथं सर्वविभक्त्यपवादः ॥ नाम्नेति ॥ नामसंबन्धितीक्ष्णत्वाच्चानित्यर्थः ॥ करणशब्दानुवृत्त्येति ॥ एकसंज्ञाधिकारेण चेति बोद्धव्यम् । ननु मनसादेव इत्यसङ्गतं कृद्योगलक्षणषष्ठीप्राप्तेः । न च कर्तृसाहचर्यात्तत्र मुख्यव्यवहारेण धात्वर्थाश्रयस्येव कर्मणो ग्रहणम् । अतः स्तोकं पाक इत्यादौ षष्ठी नेति वाच्यम् । धात्वर्थे भेदेनान्वयिकर्मग्रहणेनैव तदुपपत्तावत्राप्रवृत्तौ मानाभावात् । ध्वनितं चेदमाकडारसूत्रे कैयटे । तादृशसञ्ज्ञात्वे दृढतरमानाभावश्चेत्यरुचेराह ॥ किञ्चेति ॥ कर्मत्वेनेति ॥ न च वैकल्पिकत्वेऽप्यत्यन्ताविद्यमानकर्मकत्वाभावात् कर्मत्वाभावः सिद्ध इति वाच्यम् । तत्रात्यन्ताविद्यमानकर्मकाणामेव ग्रहणे मानाभावस्यान्यत्र निरूपितत्वादिति भावः । फलान्तरमाह ॥ णाविति ॥ दीव्यतेऽक्षैर्देवनेनेति भावे लकाराभावः फलमित्यपि बोद्धव्यम् । करणत्वाच्च तृतीयेति समावेशफलम् ॥द्वितीयेतीति॥अक्षान् दीव्यतीत्यत्राक्षपदस्याक्षजेये धने लक्षणा । न च तदा करणत्वम् । अक्षैरित्यर्थेऽक्षानिति न [illegible]त्यर्थे ॥ एकैव ह्यत्र शक्ति-

•सहयुक्ते ॥ पुत्रेणेति ॥ पितुरत्र क्रियासंबन्धः शाब्दः । पुत्रस्य तु आर्थ इति तस्याप्राधान्यम् । अप्रधानग्रहणं शक्यमकर्तुम् । न चैवं पितुरपि तृतीयापत्तिः । तत्र प्रातिपदिकार्थमात्रे अन्तरङ्गत्वात् प्रथमोत्पत्तेः । पितुरागमनमित्यादौ कारकविभक्तेः प्राबल्याच्च ॥

येनाङ्गविकारः ॥ अङ्गशब्दोऽर्शआद्यजन्तस्तदा॰ ॥ अक्ष्णेति ॥ येनेति सर्वनाम्ना प्रकृत्यर्थभूतोऽवयव एव गृह्यते । सान्निध्यात् । स चार्थाद्विकृत एव । न हि विकृतेनावयवेन शरीरस्य विकारः संभवति । [illegible] ॥ येनाङ्गेन विकृतेनेति ॥ संजानीत इति ॥ संप्रतिभ्यामनाध्यान इति तङ् ।

रिति ॥ द्विवधात्वर्थनिरूपितसाधकतमत्वशक्तिरित्यर्थः ॥

सहयुक्ते ॥ अत्राप्राधान्यं नाम शाब्दगुणाद्यन्वयित्वाभाव इत्याह ॥ पितुरत्रेति ॥ आर्थ इति ॥ पुत्रसाहित्यवान् पिता आगत इति बोधे साहित्यस्य पुत्रेणाऽऽगमनसंबन्ध एव संभवतीति पश्चात्तस्यापि मानसस्तत्संबन्धबोध इति भावः । शाब्दत्वं च विवक्षानिबन्धनम् । एवञ्चैषु शाब्दत्वरूपविशेषणाभावकृतो विशिष्टाभावः । सहैव पुत्रैर्दशभिर्भारं वहतीत्यादौ विद्यमानतावाचिसहशब्दयोगे क्रियाद्यन्वयित्वरूपविशेष्याभावकृतो विशिष्टाभावो दशानां पुत्राणां विद्यमानत्वेऽपीत्यर्थ इत्यन्यत्र विस्तरः ॥ अन्तरङ्गत्वादिति ॥ प्राचीनैरन्तरङ्गत्वमूलकतयोक्तादुपपदविभक्तेरिति न्यायादित्यर्थः । वस्तुतस्तु तद्वाचनिकमेवेत्यन्तरङ्गत्वं तन्न्यायोपलक्षणं बोद्धम् । प्रथमायाश्च कारकविभक्तित्वमनभिहितपादे भाष्ये बहुशः स्पष्टमन्यत्र प्रपञ्चितं च । अन्तरङ्गत्वं तु न युक्तम् । षष्ठ्यपवादत्वमिव प्रथमापवादत्वमित्यस्याप्युपपदविभक्तीनामापत्तेः । अनन्तरस्येति न्यायेन च प्रथमापवादत्वस्यैव वाऽऽपत्तेः । उपपदविभक्तेरिति न्यायेन वाचनिके सर्वतो बलवत्त्वे कारकविभक्तेर्बोधितेऽर्थाच्छेषषष्ठ्यपवादत्वं उपपदविभक्तीनामवतिष्ठते। किञ्च उपपदविभक्तेः पदान्तरनिमित्तकत्ववत् कारकविभक्तेः क्रियानिमित्तकत्वात्तत्त्वं दुरुपपादम् । न च सम्बन्धस्य क्रियाकारकभावमूलकत्वेन तत्प्रयुक्तं कार्यं बहिरङ्गं पुत्रेऽपि तृतीयानापत्तेरेकक्रियाकर्तृत्वात् साहित्यस्य क्रियायाः प्रधान्यात्तन्निमित्तिका विभक्तिः प्रबलेत्यपि न युक्तम् । अप्रधानक्रियायामपि कारकान्वयदर्शनात् । तदेव ध्वनयन्नाह॥इत्यादौ कारकविभक्तेरिति ॥ अत्रादिना, पुत्रेण सहागतः [illegible] संग्रह इत्यलम् ॥

अर्शआद्यजन्त इति ॥ व्याख्यानादिति भावः । अन्यथा येन गुणेन करणत्वादिनाऽवयवस्य विकारो लक्ष्यत इत्यर्थापत्त्याऽक्ष्णि काणमित्यादौ प्रथमां बाधित्वा गुणवचनात् काणशब्दादेरेव स्यात् । अक्ष्णा काण इत्यादौ तु षष्ठ्येव स्यादिति बोद्धम् ॥ प्रकृत्यर्थेति ॥ अर्शआद्यजन्त [illegible] रित्यर्थः । शरीरस्येत्यवयव्युपलक्षणम् ॥ सम्भवतीति ॥ लक्ष्यः सम्भवतीत्यर्थः ॥

कृद्योगे परत्वात् षष्ठी पितुः सञ्ज्ञाता । यत्तु हरदत्तेनोक्तम् । आध्याने परत्वादधीगर्थेति षष्ठी, मातुः संजानातीति । तन्न । तत्र शेषाधिकारात् ॥ द्रव्यादीति ॥ उक्तं च—

द्रव्यादिविषयो हेतुः कारकं नियतक्रियम्, इति ॥
अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यते, इति च ॥

फलमपीति ॥ एतच्च, प्रत्यय इति सूत्रे कैयटे स्पष्टम् । एवञ्च तादर्थ्यचतुर्थ्या सहेयं तृतीया विकल्प्यते । अध्ययनाय वसति । अयं तु विशेषः । अध्ययनस्य फलेन सहाभेदः संसर्गः । उपकारकत्वेन सह तु निरूपकतेति ॥ गम्यमानेति ॥ न तु श्रूयमाणैवेत्याग्रह इति भावः ॥ साधनेति ॥ साध्यमित्यत्र प्रकृतिभागस्यार्थं प्रतीति भावः । मा चापलायेति गणान् व्यनैषीदित्यत्र तु यतध्वमिति शेषः ॥ अशिष्टेति ॥ एतच्च, दाणश्च सा चेच्चतुर्थ्यर्थे इत्यनेन ज्ञाप्यते ॥ इति तृतीया ॥

अन्वर्थसञ्ज्ञाबलेनाह ॥ दानस्येति ॥ तेन अजां नयति ग्रामं, हस्तं निदधाति वृक्षे इत्यादौ नातिप्रसङ्ग इति भावः । दानं चापुनर्ग्रहणाय स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनम् । अत एव, रजकस्य वस्त्रं ददातीत्यादौ न भवति । तत्र हि ददातिर्भाक्तः । एतच्च वृत्तिमतम् । भाष्यमते तु

द्रव्यादीति ॥ आदिना गुणक्रिये । एवञ्च त्रितयसाधारणं हेतुत्वम् ॥ नियतक्रियमिति ॥ क्रियया नियतमित्यर्थः । क्रियामात्रविषयमितियावत् । हेतुकरणयोर्वैषम्यान्तरमप्याह अनाश्रिते त्विति ॥ एवञ्च करणत्वहेतुत्वविषयकशाब्दबोधाय सूत्रद्वयमित्यर्थः ॥ विकल्प्यत इति ॥ तदर्थत्वेन विवक्षायां चतुर्थ्या हेतुत्वेन विवक्षायां तृतीयायाश्च प्राप्तेर्विवक्षाभेदेन विभक्तिद्वयमित्येतावता तयोर्विकल्पव्यवहार इति बोद्धव्यम् ॥ फलेन सहेति ॥ तच्च फलम् । फलत्वेन तृतीयार्थ इत्येके । हेतुत्वेनैवेत्यन्ये । अध्ययनहेतुको वास इति बोधस्तृतीयायाम् । चतुर्थ्यामध्ययनोपकारको वास इति बोध इति मते इदम् । अध्ययनोपकार्यको वास इति बोधश्चतुर्थ्यामिति मते तत्राप्यभेदभानमेवेति बोद्धव्यम् ॥ गम्यमानेति ॥ श्रमेणेत्यादिपदजबोधविषयेत्यर्थः । स्पष्टं चेदं, सहयुक्त इत्यत्र भाष्ये । तदाह ॥ न तु श्रूयमाणेति ॥ श्रूयमाणस्वमात्रवाचकपदजन्यबोधविषयेत्यर्थः ॥ ज्ञाप्यते इति ॥ चतुर्थ्यर्थविहिततृतीयायुक्ताद्दाण आत्मनेपदमिति तदर्थः । सा चेदित्यनेन तस्याः क्वाचित्कत्वं ज्ञाप्यते । तेनाशिष्टव्यवहारे इत्यंशोऽपि सिद्ध इति भावः ॥ इति तृतीया ॥

अपुनर्ग्रहणायेति ॥ इदं च स्वत्वनिवृत्तेर्वाच्यतास्वीकारफलप्रदर्शनं, न तु धात्वर्थनिविष्टमिति मूलाबो ॥ भाक्त इति ॥ अधीनीकरणरूपेऽर्थे इत्यर्थः ।

नान्वर्थतायामाग्रहः । खण्डिकोपाध्यायस्तस्मै चपेटां ददातीति प्रयोगात् । रजकस्य वस्त्रं ददातीति तु शेषत्वविवक्षायां बोद्धव्यम् । न चैवमजां नयति ग्राममित्यत्रापि प्रसङ्गः । यमभिप्रैतीत्युक्त्या हि यमिति निर्दिष्टस्य शेषित्वं कर्मणश्च शेषत्वं लभ्यते । ग्रामस्य अजां प्रति शेषित्वं नास्ति ॥ दानीय इति ॥ बाहुलकात् संप्रदाने अनीयर् ॥

रुच्यर्थानां प्रीयमाणः ॥ प्रीञ् तर्पणे । अस्मात् कर्मणि लट् ॥ हरये रोचते इति ॥ हरिं प्रीणयतीत्यर्थः । कर्मसञ्ज्ञायां प्राप्तायां वचनम् । प्रीयमाणः किम् । देवदत्ताय रोचते मोदकः पथि । अत्र पथो मा भूत् ॥

श्लाघह्नुङ् ॥ श्लाघा स्तुतिः । कृष्णाय श्लाघते । कृष्णं स्तौतीत्यर्थः । अन्ये त्वाहुः । कृष्णायात्मानं परं वा श्लाघ्यं कथयतीत्यर्थ इति । तत्राद्ये पक्षे कर्मत्वे प्राप्ते, द्वितीये तु कारकशेषत्वात् षष्ठ्यां प्राप्तायां वचनम् ॥ ह्नुत इति ॥ सपत्नीभ्यः कृष्णं ह्नुवाना तमेवार्थं कृष्णं बोधयतीत्यर्थः । यस्य कस्यचिद् ह्नुत इति वा ॥ तिष्ठत इति ॥ स्थित्या स्वाभिप्रायं बोधयतीत्यर्थः । प्रकाशनस्थेयाख्ययोरिति तङ् ॥

न शूद्राय मतिं दद्यादित्यत्र मतिं तज्ज्ञानकं शास्त्रं नोपदिशेदित्यर्थः ॥ आग्रह इति ॥ अत एव, क्रियाग्रहणं कर्त्तव्यमिति वार्त्तिकं भाष्ये प्रत्याख्यातम् । भाष्यान्तरमाह ॥ खण्डिकेत्यादि ॥ चपेटां ददातीत्यत्र संयोगोऽर्थः । शेषित्वमुद्देश्यत्वम् । शेषत्वमप्रधानत्वरूपम् ॥ शेषित्वं नास्तीति ॥ यद्यपि ग्रामसंस्कारार्थमजानयने, तदपि ग्रामस्यास्ति तथाऽप्यजाया इव परत्वात् कर्त्तुरिति कर्मसञ्ज्ञया बाधान्न दोष इति तत्त्वम् ॥

अस्मात् कर्मणीति ॥ क्र्यादेश्चुरादेर्वेत्यर्थः । प्रीङ् प्रीताविति दैवादिकादित्यपि काश्चित् ॥ हरिं प्रीणयतीति ॥ प्रीयमाण इति निर्देशेन प्रीधात्वर्थकर्मणः सम्प्रदानत्वाभावज्ञापनादत्र न सम्प्रदानत्वमिति भावः ॥ अत्र पथ इति ॥ न च तदभावे सूत्रस्य शेषत्वविवक्षायां चारितार्थ्येन परत्वात्तया बाधासिद्धिरिति वाच्यम् । देवदत्तं रोचत इत्यस्याप्यापत्तेः ॥

कृष्णं स्तौतीति ॥ स्तुत्या परस्मै कृष्णं कथयतीत्यर्थः । ज्ञीप्स्यमानपदेन प्रथमोपस्थितत्वा[illegible]र्थकर्मैव ग्राह्यम् । तस्यापि ज्ञापनविषयेच्छाविषयत्वाच्छानजुपपत्तिरिति भावः । न्हुङादेरपि न्हुत्यादिना बोधनमर्थ इति बोद्धव्यम् ॥ अन्ये त्विति ॥ प्राधान्याज्ज्ञीप्स्यमानपदेन प्यर्थकर्मण एव ग्रहणमिति तदाशयः । तदेवाह ॥ कृष्णायेति ॥ कारकशेषत्वादिति ॥ कर्मणा यमभिप्रैतीति सम्प्रदानत्वाविवक्षया शेषत्वादित्यर्थः ॥ सपत्नीभ्य इति ॥ तत्र न्हुवानेत्यन्तमार्थिकार्थकथनम् । स्वाभिप्रायं कृष्णं बोधयतीत्यर्थः । एवं शपते इत्यपि व्याख्येयम् ॥

धारेरुत्तमर्णः ॥ षष्ठ्यां प्राप्तायां वचनम् ॥

स्पृहेरीप्सितः ॥ परत्वादिति ॥ तेन परस्परेण स्पृहणीयशोभं, स्पृहणीयगुणैर्महात्माभिरित्यादि सिद्धम् । यदा तु शेषत्वविवक्षा तदा षष्ठी । तेन, कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति चेति सिद्धम् । एतच्च सर्वं हरदत्तादिरीत्योक्तम् । वाक्यपदीयहेलाराजग्रन्थयोस्तु स्पृहयतियोगे कर्मसञ्ज्ञायाः शेषषष्ठ्याश्च बाधिकेयं संप्रदाने इति स्थितम् । तन्मते स्पृहणीयमित्यत्र दानीय इतिवत् संप्रदाने कृत्यः । कुमार्य इवेत्यत्र तु विभक्तिविपरिणामेन कान्ताय स्पृहयन्तीति व्याख्येयम् ॥

क्रुधद्रुह ॥ क्रुध कोपे, द्रुह द्रोहे, ईर्ष्य ईर्ष्यायाम् । असूयेति कण्ड्वादियगन्तः । एषामर्थ इवार्थो येषां धातूनामित्यर्थः । तत्र क्रोधोऽमर्षः । द्रोहोऽपकारः । ईर्ष्या असहनम् । असूया तु गुणेषु दोषारोपः । क्रुधद्रुहोरकर्मकत्वात् तद्योगे षष्ठी प्राप्ता, अन्ययोः सकर्मकत्वाद् द्वितीया प्राप्ता ॥

राधीक्ष्योः ॥ कारकमिति ॥ कर्मकारकमिति तु प्राचः प्रमादः । एकसञ्ज्ञाधिकारात् । न च प्राथमिकप्राप्तिमात्राभिप्रायेण कर्मत्वव्यपदेशः । कृष्णसंबन्धि शुभाशुभं पर्यालोचयतीत्यर्थाभ्युपगमेन षष्ठ्या एव प्राप्तेः ॥

अनुप्रति ॥ गृण इति श्नान्तस्यानुकरणात् षष्ठी ॥ होत्रे इति ॥ कर्मत्वे प्राप्ते ॥

सिद्धमिति ॥ स्पृहणीये कर्मण्यनीयरिति भावः ॥ यदा त्विति ॥ कर्मणः शेषत्वेन विवक्षेत्यर्थः ॥ इति स्थितमिति ॥ शेषत्वविवक्षायां चारितार्थ्येन कर्मसञ्ज्ञाबाधकत्वायोगोऽत्रारुचिः ॥ सम्प्रदाने इति ॥ बाहुलकादिति भावः ॥ व्याख्येयमिति ॥ षष्ठ्यपवादत्वाच्छेषत्वविवक्षा कर्तुमशक्येत्यभिमानः ॥

अमर्ष इति ॥ वाक्चक्षुरादिविकारानुमेयः प्ररूढकोप इत्यर्थः ॥ अपकार इति ॥ अपकारविषयेच्छेत्यर्थः ॥ असहनम् उत्कर्षविरोधिधर्मारोपानुकूलो व्यापारः ॥ गुणेषु गुणविषये ॥ दोषारोपः दोषत्वारोपानुकूलो व्यापारः ॥ अकर्मकत्वादिति ॥ क्रोधजन्यस्य फलस्य देवदत्तादौ सत्त्वेऽपि तस्य धात्ववाच्यत्वादिति भावः ॥ द्वितीयेति ॥ तत्प्रयोजिका कर्मसञ्ज्ञेत्यर्थः ॥

प्राथमिकेति ॥ राधीक्ष्योः प्रश्नविषयपर्यालोचनमर्थः । तत्र प्रश्नविषयरूपफलाश्रयत्वात् कर्मत्वप्राप्तिरिति भावः ॥ इत्यर्थाभ्युपगमेनेति ॥ तस्य प्रधानीभूतधात्वर्थाप्रयोज्यत्वेन तदप्राप्तिरिति भावः ॥

कर्मत्वे प्राप्ते इति ॥ शंसितुः शंसनविषयहर्षानुकूलव्यापारलक्षणं प्रोत्साहनं तयोरर्थः । शंसितुः प्रोत्साहने कर्मतयाऽन्वयः । होतुश्च शंसितर्थभेदान्वयः । एवं कर्मतासामानाधिकरण्यात् कर्मत्वप्राप्तिरिति भावः ॥

परिक्रयणे ॥ क्रयो धनाद्यर्पणेनात्यन्तिकस्वीकरणम् । तस्य समीपं परिशब्द आचष्टे । तच्च नियतकालं ततो न्यूनत्वादिति व्याचष्टे ॥नियतेति॥ भृत्या वेतनादिना ॥ तादर्थ्य इति ॥ तस्मै कार्यायेदं तदर्थं कारणम् । तस्य भावस्तादर्थ्यम् । ष्यञा उपकारकत्वरूपः संबन्धोऽभिधीयते । कृत्तद्धित-समासेभ्यः संबन्धाभिधानं भावप्रत्ययेनेति सिद्धान्तात् । उपकारकत्वं चा-ऽनेकधा । तेन ब्राह्मणाय दधीत्यादावपि भवति ॥ भक्तिर्ज्ञानायेति॥ ज्ञाना-ऽऽत्मना परिणमत इत्यर्थः । [illegible]भेदविवक्षायां विकृतिवाचका-च्चतुर्थी । अभेदविवक्षायां तु परत्वात् प्रथमैव। भक्तिर्ज्ञानं कल्पत इति। यदा तु जनिकर्तुरिति भक्तेरपादानत्वं विवक्ष्यते तदा ज्ञानस्याभिहितकर्तृत्वात् प्रथमैव । भक्तेर्ज्ञानं कल्पते । क्लृपीत्यर्थग्रहणमित्याशयेनाह ॥ संपद्यत इत्यादि ॥ उत्पातेनेति ॥ प्राणिनां शुभाशुभसूचको भूतविकार उत्पातः । तेन ज्ञापितेऽर्थे वर्त्तमानाच्चतुर्थीत्यर्थः ॥ वातायेति ॥ वातस्य ज्ञापिकेत्यर्थः ॥ हितेति ॥ समासविधानाज्ज्ञापकादिति भावः । एवं सुखयोगेऽपि बोद्धव्यम् । तुमुन् ण्वुलौ क्रियायामिति सूत्रमहिम्ना क्रियार्थकमुपपदं क्रियावाच्येव फल-तीत्याशयेनाह ॥ क्रियेति ॥ क्रियाफलकम् । क्रियावाचकमकृतिकमित्यर्थः । तुमुनिति ण्वुलोऽप्युपलक्षणम् । फलेभ्यो यातीत्यस्य फलान्याहरक इत्यपि विवरणे बाधकाभावात् ॥ कर्मणीति ॥ तथाच द्वितीयापवादोऽयमिति भावः। यत्तु प्राचा व्याख्यातमप्रयुज्यमानस्यैव कर्मणि यथास्यात्, प्रयुज्यमानस्य मा भूदिति नियमार्थं सूत्रमिति । तन्न । अप्राप्तस्य नियमायोगात् । न च

धनादीति ॥ आदिना दुर्भिक्षेऽन्नम ॥ अनेकधेति ॥ साक्षात् परम्परया चेत्यर्थः । ब्राह्मणाय दधीत्यादौ तद्भोजनोपकारकत्वेन तदुपकारकत्वं बोद्धव्यम् ॥ ज्ञानात्मनेति ॥ आत्मशब्दस्तद्वृत्तिधर्मपरः । ज्ञानत्वेन परिणमत इत्यर्थः । एवञ्च तस्य विकृतिवाचकत्वाभावान्न विशिष्टरूपान्तरप्राप्तिर्भक्तिकर्तृकेति यावत् । रूपान्तरप्राप्तिर्हि परिणाम इति भावः ॥ प्रथमैवेति भक्त्युपादानको ज्ञानरूपः परिणाम इति तदा बोधः ॥ समासविधानादिति ॥ चतुर्थी तदर्थेति हितसुख-योगे समासविधानाज्ज्ञापकादित्यर्थः। तदाह ॥ एवमिति ॥ वृत्तावाशीरर्थाप्रतीते-र्न, चतुर्थी चाशिषीति चतुर्थ्या हितयोगे निर्वाहः । आशीरर्थयोगे आशीर्विषय-स्य विधेयत्वं तदाश्रयस्योद्देश्यत्वं च प्रतीयते । न च वृत्तौ तथाऽन्वयो व्युत्पन्न इति हरदत्त इति दिक् ॥

तादर्थ्यं इति प्राप्तिः । न हि फलार्था यानक्रिया,किन्त्वाहरणार्था। आहरणं तु फलकर्मकमित्यन्यदेतत् । तुमुनो भाव एव विधानात् तदर्थस्य भाववचनत्वे सिद्धे पुनर्भाववचनग्रहणं सूत्रविशेषपरिग्रहार्थमित्याह॥ इति सूत्रेणेति ॥ न च तादर्थ्ये इत्येव गतार्थता शङ्क्या । भाववचनेनैव तुमुनेव तादर्थ्यस्य द्योततया प्रातिपदिकार्थमात्रे प्रथमाप्रसङ्गात् । यत्तु प्राचोक्तम् । भाववचनादेव यथा स्यात्, पाचको व्रजतीति ण्वुलन्तान्मा भूदिति नियमार्थमिदं सूत्रमिति । तन्न । ण्वुलन्ते कर्तुः प्राधान्यात् कर्तारं प्रति च तादर्थ्याभावात् । गुणीभूत–यानस्य च विभक्त्यर्थानन्वयात् । ननु षष्ठ्यपीति कुतः । षष्ठ्येवास्तु । अलंशब्दस्तु पर्याप्तीतरार्थक एव गृह्यतामित्याशङ्क्याह ॥ तस्मै प्रभवतीति ॥ न त्वां तृणमित्यादि॥ ननु तृणादिवद् युष्मच्छब्दादपि पक्षे चतुर्थ्या भाव्यम् । मैवम् । अनादर इति हि कर्मणो विशेषणम् । अनादरद्योतकं यत् कर्मेति । तादृशं तृणमेव,न तु युष्मदर्थः ॥इति चतुर्थी॥

ध्रुवमिति ॥ ध्रु गतिस्थैर्ययोः ॥ अस्मात् कुटादेः पचाद्यच् । ध्रुव स्थैर्य इति पाठे तु, इगुपधलक्षणः कः । ध्रुवं स्थिरम्। प्रकृतधातूपात्तगत्यनाविष्टत्वे सति तज्जन्यविभागाश्रयः । तच्चार्थादवधेरेवेत्याह ॥ अवधिभूतमिति ॥ धावत इति ॥ इह क्रियाविशिष्टस्याप्यश्वस्य प्रकृतधातूपात्तक्रियां प्रत्यवधित्वं न विरुद्ध्यते । परस्परस्मान्मेषावपसरत इत्यत्र तु सृधातुना गतिद्वयस्याप्युपादानाद् एकनिष्ठां गतिं प्रतीतरस्यापादानत्वं न विरुद्ध्यते । उक्तं च–

न हि फलार्थेति ॥ यद्यपि ब्राह्मणाय दधीत्यादौ ब्राह्मणाय भोजनोपकारकमपि दधि तद्द्वारा ब्राह्मणोपकारकं तथाऽपि फलेनाहरणद्वारा न कोऽपि यानक्रियोपकार इत्याशयः ॥ तुमुनेवेति ॥ भाववचनघञादीनां तुमुनपवादतया तत्समानार्थत्वात् । एवञ्च प्रथमापवाद इति भावः । द्विषां विघातायां विधातुमिच्छत इत्यत्र विघातायेति तादर्थ्ये चतुर्थी । विघातार्थं यद्विधानं तदर्थेच्छावत इत्यर्थः । एतेनात्र तुमुना तादर्थ्यस्योक्तत्वात् कथं चतुर्थीत्यपास्तम् । उत्तरक्रिययोस्तद्द्योतनेऽपि पूर्वक्रिययोस्तद्द्योतनात् ॥ कर्तुः प्राधान्यादिति ॥ एवञ्च तादर्थ्यचतुर्थ्यास्तत्राप्राप्तेर्नियमासम्भव इति भावः ॥ विभक्त्यर्थेति ॥ तादर्थ्यचतुर्थ्यर्थे इत्यर्थः ॥ इति चतुर्थी ॥

प्रकृतेति ॥ कर्त्तर्यतिव्याप्तिवारणाय सत्यन्तम् । अन्यथा कर्तृसञ्ज्ञाया इयमपवादः स्यात् । कर्तृसञ्ज्ञा तु पचत्यादियोगे चरितार्था । कर्मणि ग्रामेऽतिव्याप्तिवारणाय विशेष्यम् ॥ अवधित्वं न विरुद्ध्यत इति ॥ तदुपात्तक्रियानाश्रयत्वादिति भावः ॥ न विरुद्ध्यते, तदनाश्रयत्वादिति भावः ॥

अपाये यदुदासीनं चलं वा यदिवाऽचलम् ।
ध्रुवमेवातदावेशात्तदपादानमुच्यते ॥
पततो ध्रुव एवाऽश्वो यस्मादश्वात् पतत्यसौ ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते ॥
मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक् ।
मेषयोः स्वक्रियापेक्षकर्तृत्वं च पृथक् पृथक्, इति ॥

पर्वतात् पततोऽश्वात् पततीत्यत्र तु पर्वतावधिकपतनाश्रयोऽश्वस्तदधिकं देवदत्तादिनिष्ठपतनमर्थः । पञ्चम्यर्थेऽवधौ अभेदेन संसर्गेण प्रकृत्यर्थो विशेषणम् । प्रत्ययार्थस्तु क्रियायाम् । स च धर्मी, न तु धर्ममात्रम् । विभक्त्यर्थे विहितस्य बहुव्रीहेर्धर्मिपरतायां निर्विवादत्वात् । उद्धृतौदनास्थालीत्यत्र हि ओदनकर्मकोद्धरणावधिभूतेत्यर्थः ॥ जुगुप्सेति ॥ भाष्यकारास्तु जुगुप्सादीनां तत्पूर्वकनिवृत्तिलक्षकतामाश्रित्य सूत्रेण तत्सिद्धिमाहुः । एवमुत्तरसूत्रेष्वपि ॥

भीत्रा ॥ कथं तर्हि, कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे इति रामायणम् । अत्राहुः । कस्य संयुगे इति । न चैवं संयुगस्यैवापादानसञ्ज्ञापत्तिः । परया अधिकरणसञ्ज्ञया बाधात् । अधिकरणत्वाविवक्षायां त्विष्टापत्तिः ॥ अध्ययनादिति ॥ अध्ययनसम्बन्धिनी ग्लानिरित्यर्थः ॥

जनिकर्तुः ॥ जननं जनिरुत्पत्तिः । इञजादिभ्यइति जनेर्भावे इञ् । जनिघसिभ्यामिण् इत्युणादिसूत्रेण इण् वा । जनिवद्ध्योश्चेति वृद्धिप्रतिषेधः । तस्याः कर्तेति शेषषष्ठ्या समासः । तथाच धात्वन्तरयोगेऽपि भवति । अङ्गा-

---

अतदावेशादिति ॥ तद्धात्वापात्तगत्यनावेशादित्यर्थः । तदावेशादितिपाठे तन्मात्रावेशाद् विभागमात्रावेशादित्यर्थः ॥ विशेषणमिति ॥ वस्तुतोऽवध्यऽवधिमद्भावरूपविभक्त्यर्थसम्बन्धेनावधिक्रिययोरन्वय इत्यन्यत्र निरूपितम् । सा च क्रिया विभागरूपा । कालिकसम्बन्धेन फलाश्रयेऽतिप्रसङ्गवारणाय फलतावच्छेदकसम्बन्धस्य कर्मलक्षणे निवेशान्न तदाश्रयस्य कर्मत्वम् । विभागजन्यसंयोगस्य धात्वर्थत्वाद्वेत्यन्यत्र विस्तरः ॥ निवृत्तीति ॥ विश्लेषेत्यर्थः ॥

इष्टापत्तिरिति ॥ शेषत्वविवक्षया कस्येति षष्ठीत्यन्ये ॥ सम्बन्धिनीति ॥ तज्जन्येत्यर्थः ॥

अर्थासङ्गतिमिति ॥ न हि धातुं प्रति कर्तृत्वं, किन्तु तद्वाच्यक्रियां प्रत्येवेत्यऽर्थः । समासानुपपत्तिस्तृजकाभ्यामिति निषेधात् । उपधालोपप्रसङ्गस्तु गमेरिडित्यादाविव, जनिघसिभ्यामित्यादाविव चानुकार्यस्वरूपभङ्गभिया न कृत इत्य-

दङ्गात् सम्भवसीति यथा । तदेतदाह ॥ जायमानस्येति ॥ एतेन इकः क्षितौ धातुनिर्देश इति इका निर्देशोऽयमित्याश्रित्य गमहनेत्यादिना उपधालोपप्रसङ्गः अर्थासङ्गतिं, समासानुपपत्तिं चोद्भावयन्तो मीमांसावार्त्तिककाराः समाहिता इति भावः । इह सूत्रे प्रकृतिग्रहणं हेतुमात्रपरमिति वृत्तिकृन्मतम् । पुत्रात् प्रमोदो जायत इत्युदाहरणात् । उपादानमात्रपरमिति तु भाष्यकैयटमतम् । तदुभयसाधारणमुदाहरणमाह ॥ ब्रह्मण इति ॥ ब्रह्मा हिरण्यगर्भः । स च हेतुरेव न तूपादानम् । किञ्च ब्रह्म मायाशबलम् । तद्धि सर्वकार्य्योपादानमिति वेदान्तसिद्धान्तः ॥

भुवः ॥ भवनं भूरिति ॥ संपदादित्वाद्भावे क्विप् । पूर्वसूत्रे समासनिर्दिष्टमपि कर्तृग्रहणमनुवर्तते स्वरितत्वादित्याह ॥ भूकर्तुरिति ॥ प्रभवत्यऽस्मादिति प्रभवः ॥ ल्यब्लोप इति ॥ ल्यबन्तस्य गम्यमानार्थकत्वादप्रयोग इत्यर्थः ॥ यतश्चेति ॥ यदवधित्वेनाश्रित्याध्वनः कालस्य वा निर्माणं परिच्छेदः प्रतिपाद्यते तस्मादित्यर्थः । तेन पञ्चम्यन्तार्थेन अर्थद्वारा प्रयुक्ताभिर्मीयमाणाध्ववाचिनः प्रथम सप्तम्यौ स्तः ॥ कालादिति ॥ उद्युक्तादित्यपेक्ष्यते ॥ प्रपञ्चार्थमिति ॥ न च, इतरस्त्वन्यनीचयोरित्यमरोक्तेर्नीचार्थकस्येदं ग्रहणमिति वाच्यम् । अस्मात्तारो मन्दो वेत्यादाविव, पञ्चमी विभक्त इत्यऽनेनैव सिद्धत्वात् । यत्तु इतर इति निर्धारणप्रतियोगिक एव प्रयुज्यते । तद् यथा । चैत्रः शूर इतरः कातर इति । अतो नायमन्यार्थ इति । तन्मन्दम् । प्रतियोग्यङ्गत्वस्य उभयत्र तुल्यत्वात् । उदाहृतकोशविरोधा-

---

ऽन्ये । सौत्रत्वादिति परे ॥ भाष्यकैयटेति ॥ इदमेव युक्तम् । प्रकृतिशब्दस्य तत्रैव प्रसिद्धेः । प्रत्याख्यानपरभाष्यसंमतत्वाच्च । किञ्च, वृत्तिमते कारकइत्यधिकृतस्य कारणसामान्यवाचिनो निर्धारणसप्तम्यन्तस्यान्वयोऽसम्भवी । न हि कारणानां मध्ये उपादानकारणमितिवत् कारणानां मध्ये कारणमिति सम्भवति ॥

भावे क्विबिति ॥ व्याख्यानाज्ञानिसाहचर्याच्चेति भावः ॥ प्रभवतीति ॥ प्रभवनमत्र प्रथमप्रकाशः । सूत्रे भवनमप्येतदेव ॥ अप्रयोग इति ॥ तदन्तशब्दाज्ञानेऽपि तदर्थज्ञाने इत्यर्थः । यथा प्रविश पिण्डीमित्यादाविग्यण इति सूत्रभाष्योक्तरीत्या वाक्यैकदेशप्रयोगस्तस्यैव च पदस्य वृत्त्या सम्पूर्णवाक्यार्थबोधकता तथा प्रकृतेऽपीति बोध्यम् । एवं फलेभ्यो यातीत्यादावपि ॥ अर्थद्वारा प्रयुक्तादिति ॥ तदर्थपरिच्छेदादित्यर्थः ॥ सिद्धत्वादिति ॥ अन्यार्थयोगे तु न तेन सिद्धिः । निर्धा[illegible]भूतधर्मानभिधानात् परस्परप्रतियोगिकभेदस्य [illegible] व्यभिचारित्वात् ॥ तुल्यत्वादिति ॥ तद्वदन्यः कातर इत्यस्यापि वक्तुं शक्य-

च ॥ ऋते कृष्णादिति ॥ कथं तर्हि, पुरुषाराधनमृते इति । प्रमादोऽयमित्येके । अन्ये तु उभसर्वतसोरित्यत्र [illegible] यावच्छीतमित्यादाविव ऋतेयोगे द्वितीयापि साधुरित्याहुः । युक्तं चैतत् । ऋते द्वितीया चेति चान्द्रसूत्रात् ॥ प्रभृतियोग इति ॥ प्रभृत्यर्थैर्योग इत्यर्थः । तथाच, कार्तिक्याः प्रभृतीति भाष्यं विवृण्वन् कैयटः प्रायुङ्क्त, तत आरभ्येत्यर्थ इति ॥ वचनग्रहणादिति ॥ सामर्थ्यादवधिमात्रं विवक्ष्यते ॥ तेन विनेति विशेषणांशस्तु नेति भावः । यद्वा, मर्यादेति शब्द उच्यतेऽस्मिंस्तन्मर्यादावचनः । आङ्मर्यादाभिविध्योरिति सूत्रम् । तत्र य आङ् दृष्टः स उक्तसञ्ज्ञ इत्यर्थः ॥परिहरेरिति॥ परेर्वर्जने वा वचनमिति वार्तिकात् पक्षे द्विर्वचनाभावः॥ परिरत्रेति ॥ अत्र पञ्चमीविधौ वर्जनार्थेनापेन साहचर्यादिति भावः ॥

प्रतिनिधिप्रतिदाने च ॥ अस्मादेव निर्देशादाभ्यां योगे पञ्चमीत्याहुः । मुख्यस्याभावे तत्सदृश उपादीयते, स प्रतिनिधिः । दत्तस्य प्रतिनिर्यातनं प्रतिदानम् ॥

अकर्तरि ॥ पञ्चमी स्यादिति ॥ तृतीयापवादोऽयम् ॥ शतेनेति ॥ शतमिह उत्तमर्णाय धार्यमाणत्वाद्ऋणम् । तत्प्रयोजको हेतुश्चेति चकारेण कर्तृसंज्ञा च ॥ योगविभागादिति ॥ एतच्च, हेतुमनुष्येभ्य इति सूत्रे हरदत्तग्रन्थे स्पष्टम् ॥स्त्रियां चेति॥ बाहुलकं प्रकृतेस्तनुदृष्टेरितिवार्तिकनिर्देशोऽपीह ज्ञापकः ॥

पृथग्विना ॥ समुच्चयार्थमिति ॥ निपातानामनेकार्थत्वादिति भावः ॥ पञ्चमीति ॥ तत्र [illegible] पञ्चमी। द्वितीया तु सन्निहितैव ॥ दूरं दूरेण चेति ॥ इह सप्तम्यपि वक्ष्यते । किञ्च । दूरान्तिकार्थेभ्य इति सूत्रस्थो-

त्वादिति भावः॥ कैयट इति ॥ मेरुपृष्ठादारभ्येति पातञ्जलभाष्यप्रयोगोऽपि बोद्ध्यः आरभ्येति ॥ अवधिमादायेत्यर्थकं तत् । आदिप्रकारार्थप्रभृतिशब्दयोगे तु न पञ्चमी । मानाभावादित्यन्यत्र विस्तरः ॥ विशेषणांशस्तु नेति ॥ तेन विनेति मर्यादा, तेन सहेत्यभिविधिरिति वृद्धोक्ताविति भावः ॥

अस्मादेव निर्देशादिति ॥ यत्त्वनेन सूत्रेणैवेति । तत्र । एतद्घटकीभूतप्रत्योः प्रतिनिध्याद्यर्थकत्वाभावेन कर्मप्रवचनीयत्वाभावात् । उपादीयते इत्यस्य, य इत्यादिः । दत्तस्य तत्तुल्यमूल्यादेः प्रतिनिर्यातनं परावृत्त्य दानम् ॥

तृतीयेति ॥ हेतुतृतीयेत्यर्थः ॥ हरदत्तग्रन्थे इति ॥ भाष्ये तु न दृश्यते ॥ इह-अगुणे, स्त्रियां चेत्यत्र ॥

सन्निहितैवेति ॥ उभयोः समुच्चयस्तु व्याख्यानादिति बोध्यम् ॥ [illegible]

शेषत्वाभावाच्च । पुरुषशब्दो हि यथायथं प्रातिपदिकार्थलिङ्गसंख्याकारकार्थको वा । यदा तु नैवं तदा पुरुषशब्दादपि षष्ठी भवत्येव । यत्र ज्ञानं शेष इति । तत्र । प्रातिपदिकार्थमात्रे शुक्लो घट इत्यादौ विशेषणे षष्ठीप्रसङ्गात् । न च प्रथमया बाधः । तस्याः प्राधान्ये चरितार्थत्वात् ॥ कर्मादीनामपीति ॥ यथा विशेषाविवक्षायां रूपवानितीति तद्विवक्षायां तु नीलः पीत इत्यादि प्रयुज्यते तथेदमपि न्यायासिद्धमिति भावः ॥ सतामिति ॥ एवञ्च नपुंसके भावे क्तस्य योगे शेषत्वविवक्षायां चेति तृप्त्यर्थानां करणे षष्ठी वेति च प्राचां ग्रन्थे पठ्यमानं नापूर्वं वचनमिति भावः ॥ सर्पिष इति ॥ ज्ञोऽविदर्थस्य करणे, अधीगर्थदयेशां कर्मणि, कृञः प्रतियत्ने, रुजार्थानां भाववचनानामज्वरेः, आशिषि नाथः, जासिनिप्रहणनाटक्रथपिषां हिंसायाम्, व्यवहृपणोः समर्थयोः, कृत्वोऽर्थप्रयोगे कालेऽधिकरणे, इत्यष्टसूत्री तु नेह व्याख्याता । तस्याः समासनिवृत्तिफलकत्वात् । तथा हि । तत्र, शेष इत्यनुवर्तते । शेषत्वेन विवक्षिते च करणादौ षष्ठी सिद्धैव । तदयमर्थः । इह षष्ठ्येव, न तु तल्लुक् । तथाच लुकः प्रयोजकीभूतः समास एव नेति । तथाच वार्त्तिकम् । प्रतिपदविधाना चेत्यादि ॥ हरिश्चाह—

कारकैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः
प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये, इति ॥

तेन शेषत्वविवक्षायां, सर्पिषो ज्ञानं, मातुः स्मरणमित्यादीन्यसमस्तान्येव साधूनि । हरिस्मरणमित्यादीनि तु शेषत्वाविवक्षायां कृद्योगषष्ठ्या

उक्तन्यायेति ॥ प्रकृत्यर्थस्यैव प्रत्ययार्थं प्रति प्राधान्यापत्तेरित्यर्थः ॥ राजसम्बन्धी पुरुष इत्येव बोधादिति भावः । शेषत्वाभावमुपपादयति ॥ पुरुषशब्द इति ॥ इदमपि – कर्मादीनां सबन्धसामान्येनाऽन्वयविवक्षणमपि ॥ नापूर्वमिति ॥ षष्ठी शेष इति सूत्रेण सिद्धत्वादिति भावः ॥ अष्टसूत्रीति ॥ कृत्वोऽर्थैति सूत्रं वृत्तिरीत्या धृतम् । वस्तुतस्तत्र शेषग्रहणं नानुवर्त्तते । मध्ये विच्छेदादित्यन्ये । तेषां सप्तसूत्रीति बोद्धव्यम् ॥ अनुवर्त्तत इति ॥ अत एवाधीगर्थेति सूत्रे, शेष इति वर्त्तत इति भाष्ये उक्तम् । तद्बलाल्लुगभावोऽस्तु । समासाभावः कुत इत्यत आह ॥ तथाचेति ॥ प्रतिपदविधाना षष्ठी न समस्यत इति वार्त्तिकबलात्तथा कल्पनेति भावः । वस्तुतो निषेधवार्त्तिकेऽनुवादायेमानि सूत्राणीति बोद्धव्यम् ॥ स्मरणमिति ॥ करणे ल्युट् ॥ कृद्योगषष्ठ्येति ॥ अत एव समासनिषेधप्रकरणे एतानि श्लोकानि । तथा सति कर्माद्यर्थकषष्ठ्यामपि समासनिषेधापत्तेः । विवस्तदर्थस्ये-

समासे बोद्धव्यानि । तत्र च कारकपूर्वकत्वात् कृदुत्तरपदप्रकृतिस्वरः । शेषषष्ठ्या समासे त्वन्तोदात्तत्वं स्यात्तच्चानिष्टम् । तथाच स्वरार्थेयमष्टसूत्रीति परमनिष्कर्षः । किञ्च, मातुः स्मृतमित्यादौ समासाभावोऽपि फलम् । न हि तत्र कारकषष्ठी लभ्यते । न लोकेति निषेधात् । आह च—

निष्ठायां कर्मविषया षष्ठी च प्रतिषिद्ध्यते ।
शेषलक्षणया षष्ठ्या समासस्तत्र नेष्यते, इति ॥

एवं स्थिते वृत्त्यादिबहुग्रन्थेषु इह प्रकरणे उदाहरणं प्रत्युदाहरणं च यद्यत्तिङन्तं दृश्यते तत् सर्वमुपलक्षणतया नेयमिति हरदत्तादयः ।

सर्वनाम्नस्तृतीया च ॥ इह सर्वनाम्न इति षष्ठी । तदाह ॥ सर्वनाम्नः प्रयोगे इति ॥ पञ्चम्यां तु शब्दात् षष्ठीतृतीये न स्याताामिति भावः ॥ निमित्तपर्यायेति ॥ पर्यायग्रहणस्य फलमुदाहरति ॥ एवमित्यादिना ॥ प्राचा तु किमर्थमित्युदाहृतम् । तत्र किमः क्लीबत्वं दुर्लभम् । सामान्ये नपुंसकतां समासं चाश्रित्य कथञ्चिद्वा नेयम् ॥असर्वनाम्न इति॥ निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति वार्तिकं हि वृत्तिकारेण यद्यपीहोक्तं तथाऽपि भाष्यकृता हेतावित्यत्र पठितम् । तेन सर्वनामाप्रयोगेऽपि प्रवर्त्तते । किन्तु प्रायग्रहणात्तत्र तृतीयादय एवेत्यर्थः । वर्द्धमानस्तु प्रथमामपीच्छति॥

त्यत्र कर्मणीत्यस्य कर्त्तव्यतापत्तेश्च । ननु शेषत्वाविवक्षायां कृद्योगषष्ठ्या वैकल्पिकसमासाङ्गीकारेऽधीगर्थेत्यादीनां वैयर्थ्यमेवेत्यत आह ॥ तत्र चेति ॥ करणल्युङन्तस्मरणादिशब्दैः कृद्योगषष्ठ्या समासेऽनो भावकर्मवचन इत्यस्याप्राप्तिरिति भावः ॥ मातुः स्मृतमिति ॥ आदिकर्मणि कर्तरि क्तः । प्रशब्दं विनाऽपि अनुज्ञादौ आदिकर्मबोधवदत्रापि प्रकरणादिना तद्बोधसम्भवः । एतेनात्र कर्मणि के कर्मण उक्तत्वादधीगर्थेत्यस्य विषय एव न । भावे तु को दुर्लभः सकर्मकत्वात् । गत्याद्यर्थकत्वाभावाच्च कर्त्तरि स दुर्लभ इत्यपास्तम् । कर्मणः शेषत्वेन विवक्षायामविवक्षितकर्मत्वेनाकर्मकतया भावे क्तस्य सुलभत्वाच्च ॥ षष्ठी चेति ॥ चस्त्वर्थे । एवञ्च तत्र समासाभावोऽपि फलमिति भावः ॥ दुर्लभमिति ॥ अर्थशब्दस्य द्वितीयान्तत्वे तु कमर्थमित्युचितम् । प्रथमान्तत्वेऽर्थशब्दस्य पुंस्त्वान्नपुंसकत्वं दुर्लभमिति भावः ॥ कथञ्चिदिति ॥ आद्ये क्लिष्टमन्त्ये लक्षणाभावोऽर्थासङ्गतिश्च । कोऽर्थः किमर्थमिति समासे, सामान्ये नपुंसकत्वाश्रयणं चेति भावः ॥ तेनेति ॥ यत्तु सर्वनामसूत्रशेषे भाष्ये भवतः सर्वनामत्वे तृतीया प्रयोजनं,सर्वनाम्नस्तृतीया चेति । तत्तु यथाश्रुतसूत्रमते। अत एव सूत्रोपन्यासः । न तु तद्बलादिदं सर्वनामविषयम् । कैयटादिविरोधात् । हेतादित्यत्रोपन्यासस्य निर्बीजत्वापत्तेश्चेति बोध्यम् ॥

षष्ठ्यतसर्थप्रत्ययेन ॥पञ्चम्या इति॥ कथं तर्हि, ततः पश्चादिति॥ ततः पश्चात् स्रंस्यते ध्वंस्यते चेति भाष्यप्रयोगात् पश्चाद्योगे पञ्चम्यापि । प्रत्ययग्रहणं चिन्त्यप्रयोजनम् ॥

एनपा॥कथं तर्हि,तत्रागारं धनपतिगृहादुत्तरेणास्मदीयमिति उत्तरेणेति तृतीयान्ततोरणेनेत्यनेन समानाधिकरणं बोद्धव्यम् ॥

दूरान्तिकार्थैः॥ अन्यतरस्याङ्ग्रहणं समुच्चयार्थम् । तेन च विप्रकृष्टाऽपि पञ्चमी समुच्चीयते, व्याख्यानान्न तु षष्ठीद्वितीयातृतीयाः । तदेदाह ॥ पञ्चमी चेति ॥

दिवस्तदर्थस्य ॥ तच्छब्देन व्यवहृपणौ परामृश्येते । तौ च द्यूते क्रयविक्रयव्यवहारे च तुल्यार्थौ पूर्वसूत्रे गृहीतौ, इत्याशयेनाह॥ द्यूते इति॥ कर्मणीति ॥ इह, शेष इति न सम्बद्ध्यते । उत्तरसूत्रद्वयारम्भादिति भावः ।

पञ्चम्यपीति ॥ अत्र सार्वविभक्तिकः षष्ठ्यन्तात्तसिरित्यन्ये॥ चिन्त्यप्रयोजनमिति ॥ इदमत्रैव सूत्रे भाष्ये स्पष्टम् ॥ समानाधिकरणं बोद्ध्यमिति ॥ स्व्यऽधिकारात् परेण, वा सरूपविधिर्नेत्यत्र परेणेति तृतीया । ततः परेण शास्त्रेण वा सरूपसम्बन्धो नेत्यर्थः । ततः परेण नायमनुवर्त्तते इत्यत्र सार्वविभक्तिकः षष्ठ्यन्तात्तसिरिति बोद्धव्यम् ॥

समुच्चीयत इति ॥ अतः षष्ठीपञ्चम्योरेवात्र विधानमित्यर्थः ॥ न तु षष्ठीति॥ विधीयन्त इति शेषः ॥ षष्ठीद्वितीयातृतीया अत्र न विधीयन्त इत्यर्थः । तत्राद्योपात्ता, अन्त्ये समुच्चेये इति बोद्धव्यम् । समुदायविधानाभावे तात्पर्यम् ॥ उत्तरसूत्रद्वयेति ॥ अयं भावः । अत्र, शेष इत्यस्य सम्बन्धे, विभाषोपसर्गे इत्यत्र शेष इति सम्बद्ध्यते ? उत न । नाद्यः । दिवस्तदर्थस्येत्यनेनैव समासाभावस्य सिद्धत्वेन सूत्रवैयर्थ्यापत्तेः । न च पक्षे, षष्ठी शेष इत्यस्य प्रवृत्त्या पक्षे समासप्रवृत्तिः फलम् । नोपसर्ग इति न्यासेन दिव इत्यस्य निषेधे शेषषष्ठ्यां समासविकल्पेन रूपद्वयस्य सिद्धतया विभाषाग्रहणस्य तथापि वैयर्थ्यात् । नान्त्यः । वेदेऽपि विभाषोपसर्ग इति सूत्रेण कर्मणि द्वितीयायाः सिद्धत्वादापाद्यरूपस्य तत्राभावाच्च । द्वितीया ब्राह्मण इत्यस्य वैयर्थ्यापत्तेः । न च तन्निरुपसर्गे द्वितीयार्थमिति वाच्यम् । कर्मत्वविवक्षायां दिव इत्यस्याप्रवृत्त्या कर्मणि द्वितीयेत्येव सिद्धत्वेन वैयर्थ्यस्य तदवस्थत्वात् । न च, द्वितीया ब्राह्मण इति सूत्रे, शेषे इत्यनुवर्त्तते । तेन कर्मत्वाविवक्षायां द्वितीयार्थमिति वाच्यम् । विच्छिन्नत्वेनानुवृत्तेरयुक्तत्वात् । वक्ष्यमाणोदाहरणे कर्मत्वस्यैव प्रतीतेश्च । कृति त्विदं न प्रवर्त्तते इति पुनर्विधानं समासाभावायेत्यपि न वाच्यम् । अत एव द्वितीया ब्राह्मण इति सूत्रे भाष्यम् । किमुदाहरणम् ॥ गां प्रतिदीव्यन्ति । पूर्वेणाप्येतत् सिद्धम् । इदं तर्हि

अत एवेह त्रिसूत्र्यां तिङन्तमुदाहरति ॥ शतस्य दीव्यतीति ॥

प्रेष्यब्रुवोः ॥ इष्यतेर्देवादिकस्य गत्यर्थस्य लोण्मध्यमपुरुषैकवचनं प्रेष्येति । तत्साहचर्याद् ब्रुविरपि तथाभूत एव गृह्यते । अत एवेह शेषग्रहणं न सम्बद्ध्यते । निरनुबन्धेन सह समासस्याप्रसक्तत्वात् ॥

कर्तृकर्मणोः कृति ॥ गुणेति ॥ तदुक्तम्— प्रधाने नियता षष्ठी गुणे तूभयथा भवेदिति ॥ कृतपूर्वीति ॥ कृतं पूर्वमनेनेति विग्रहः । पूर्वं कृतवानित्यर्थः । अविवक्षितकर्मकतया भावे क्तः । सुप्सुपेति समासः । पूर्वादिनिः, सपूर्वाच्चेति कर्तरि इनिः । तद्विधौ श्राद्धमनेनेति सूत्रादनेनेत्यनुवृत्तेः। अथ कथं, धायैरामोदमुत्तममिति भट्टिः । अत्राहुः । अनित्यमिदम् । तदर्हमिति निर्देशात् ॥

स्त्रीप्रत्यययोरिति ॥ कथन्तर्हि, सुदृतिथोरिति सूत्रे, सुटा सीयुटो बाधो नेति वृत्तिः । करणत्वविवक्षायां तृतीयेति गृहाण ॥

गामस्य तदहः सभायां दीव्येयुरिति । दिवस्तदर्थस्येति नित्यं षष्ठी प्राप्नोतीति कैयटश्चेति ॥

त्रिसूत्र्यामिति ॥ तृतीयस्य वैदिक्यामुपन्यासो द्रष्टव्यः ॥

अप्रसक्तत्वादिति ॥ कल्पाद्यन्तस्य तु न प्रैषे प्रयोग इति भावः ॥ उभयथा । षष्ठीतदभावौ ॥ इदं चाकथितसूत्रभाष्ये स्पष्टम् ॥

अविवक्षितेति ॥ तद्धितवृत्तेः पूर्वमविवक्षितेत्यर्थः । पश्चात्तु कर्मयोगो भवत्येवेति बोद्धव्यम् । अयं च प्रकारस्तद्धितविषय एव । तेन, घटं क्रियते इत्यादि न । नपुंसके भावे क्तोऽप्यकर्मकेभ्य एव । भ्रान्तं देशमित्यादि तु, गत्यर्थाकर्मकेति क्तेन निर्बाधम् । तत्सूत्रोपात्तधातुभ्यश्च न ते । तस्य भावे विधानादित्यन्यत्र विस्तरः ॥ धायैरामोदमुत्तममिति ॥ दधातेर्ददातिदधात्योर्विभाषेति णः । आतो युगिति जयमङ्गला । धयैरिति ह्रस्वपाठो लेखकप्रमादात् । उत्तमपुष्पादिसम्बन्ध्यामोदं धारयद्भिरित्यर्थाभिमानेन प्रश्नः । यदि त्वामोदं गृहीत्वा मादृशां दुःखस्य पोषकैरित्यर्थो जयमङ्गलाव्याख्यातरीत्या स्वीक्रियते तदा न काप्यऽनुपपत्तिः ॥ निर्देशादिति ॥ अयं भावः । तत्रेव, तस्य अर्हमिति सूत्रत्रयं कार्यम् । अर्हमित्यत्र योग्यताबलात् कर्मणि षष्ठीति, तस्य भाव इत्यत्र च तस्येति न वाच्यम् । एवं सिद्धे तदिति निर्देशोऽसमस्तद्वितीयान्तत्वबोधनार्थः । एतेन सूत्रे कर्मणि द्वितीयेत्ये उपपदसमासोऽजन्तस्य कर्मषष्ठ्या वा समास इति निरस्तम् । अत एव द्वितीयासमर्थादिति व्याख्यायते । राजानमतीति च विगृह्यते। तत्फलं त्वनित्यत्वबोधनमेवेति । भाष्ये तु नैतद् दृश्यते इति बोद्धव्यम् ॥

न लोकाव्ययनिष्ठा ॥ उश्च उकश्च ऊकौ लश्च ऊकौ चेति विग्रहः। उकारेण कृतो विशेषणात्तदन्तविधिस्तदाह ॥ हरिं दिदृक्षुः, अलङ्करिष्णुर्वेति ॥ शेषे षष्ठी त्विति ॥ एतेन, इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः, अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयमित्यादि व्याख्यातम्। यद्वा। इक्ष्वाकूणां सिद्धय इत्यन्वयो, न तु इक्ष्वाकूणां दुराप इति। तथा वागधिपस्य विस्मयामित्यन्वयो, न तु वागधिपस्य दुर्वचमिति ॥

तुल्यार्थैः॥कथं तर्हि, तुलां यदारोहति दन्तवाससा इति ? स्फुटोपमं भूतिसितेन शम्भुनेति माघश्च । उच्यते। सहयुक्तेऽप्रधाने इति तृतीया। स्ववालभारस्य तदुत्तमाङ्गजैः समं चमर्येव तुलाभिलाषिण इत्यत्र यथा। उक्तं हि। विनापि तद्योगं तृतीयेति ॥ व्याख्यानादिति ॥ सूत्रेऽर्थशब्दोऽपि पृथङ्निमित्तम्। तथाच द्वन्द्व एव। न तु अर्थशब्देन बहुव्रीहिरिति भावः ॥ इति षष्ठी ॥

आधारस्त्रियेति ॥ एतच्च संहितायामिति सूत्रे भाष्ये स्पष्टम् ॥ चतस्र इति ॥ प्रातिपदिकार्थमात्रे इति भावः। किञ्च, दूरान्तिकेति सूत्रस्य इहाऽप्यनुवर्तनादधिकरणेऽप्येता बोद्ध्याः ॥ क्तस्येति ॥ इन् इन्नन्तः शब्दो विषयो वृत्तिभूमिर्यस्य क्तस्येत्यर्थः ॥ हेतुतृतीयेति ॥ तादर्थ्ये चतुर्थीत्यपि बोद्धव्यम्॥सीमेत्यादि॥एतच्च दुर्व्याख्यानकोधे कुलचन्द्रेणोक्तम्। मेदिनीकारोऽप्याह। सीमाघाटस्थितिक्षेत्रेष्वण्डकोशेषु च स्त्रियामिति। अथ पुष्कलको

ऊकौ चेति ॥ अव्ययं चेत्यादेरुपलक्षणमिदम् ॥ तदन्तविधिरिति॥ व्यपदेशिवद्भावेन तस्यापीति बोद्धव्यम्। ननु, नपुंसके भावे क्तस्येति भाष्ये वार्तिकात् कारकषष्ठीनिषेधविषये शेषत्वविवक्षा न। तत्प्रत्याख्याने त्वनभिधानात् क्तातिरिक्तविषये सा न। अत एव, पूरणगुणेति सूत्रे सद्ग्रहणं भाष्ये प्रत्याख्यातमित्यरुचेराह ॥ यद्वेति ॥ सहयुक्ते इति ॥ स्फुटोपमामित्यत्रोपमाशब्दो भावसाधनः॥ इति षष्ठी ॥

प्रातिपदिकार्थमात्रे इति ॥ सप्तम्यधिकरणे चेति सूत्रेणाधिकरणे सप्तम्याः सिद्धत्वाच्चकारेणान्तरङ्गप्रातिपदिकार्थमात्रे सप्तमी विधीयते। प्रागुक्ताश्च तिस्रः। इयं च सप्तमी निरवकाशत्वात् पराया अपि प्रथमाया बाधिकेति भावः ॥ वृत्तिर्भूमिर्यस्येति ॥ यत् क्तान्तनिरूपितपरार्थाभिधायकत्वाश्रय इन्नन्तः शब्द इत्यर्थः। अत्रेनो विषयत्वेनः प्रकृतेः क्तान्तस्येति षष्ठीतत्पुरुषोऽपि वक्तुं शक्यः॥ तादर्थ्ये इति ॥ फलस्य हेतुत्वेन विवक्षणात् फलार्थत्वाच्च करणे चेति भावः ॥

गन्धमृगे क्षपणकीलयोरिति च । हरदत्तादयस्तु पुष्कलकः शङ्कुः सीम्नि सीमज्ञानार्थं हतो निहतो निखात इत्याहुः ॥

यस्य च ॥ निर्ज्ञातकाला क्रिया अनिर्ज्ञातकालायाः क्रियायाः काल-परिच्छेदकत्वाल्लक्षणम् । तदाश्रययोः कर्तृकर्मणोर्बोधकादियं सप्तमी । तत्र ब्राह्मणेष्वधीयानेषु गत इति कर्तर्युदाहरणम् । कर्मण्याह ॥ गोष्विति । इह अधीयानानां ब्राह्मणानां दुह्यमानानां गवां च प्रतीयमानलक्षकत्वं विशेषणी-भूतयोरध्ययनदोहनक्रिययोर्विश्राम्यति ॥ भेद एवेति ॥ न तु शब्दान्तरो-पात्तसामान्यरूपाक्रान्ततेति भावः ॥ माथुरा इति ॥ न ह्यत्र गवां कृष्णेत्या-दाविव सामान्यविशेषभावः, किन्तु शब्दोपात्तयोर्धर्मयोर्विरोध एव ॥ नि-पुणो राज्ञ इति ॥ साधुशब्दप्रयोगे त्वर्चां विनाऽपि सप्तमी भवत्येव । साध्वसाधुप्रयोगे चेति वार्त्तिकात् ॥ प्रसित इति ॥ तत्परे प्रसितासक्ता-वित्यमरः ॥ मूलेनेति ॥ नक्षत्रेण युक्तः काल इत्यणो, लुबविशेषे इति लुप् ॥ पर्यायेणेति ॥ ईश्वरशब्दो भावसाधनः । यस्य स्वामिन ईश्वरत्वमुच्यते इत्येकं व्याख्यानम् । यस्येति स्वं निर्दिश्यते । यस्य स्वस्य ईश्वर उच्यते इत्यपरम् । एवञ्च व्याख्याभेदात् पर्यायेण विभक्तिः । सा च विशेषणात् षष्ठीवदिति भावः ॥ इति सप्तमी ॥

इति श्रीमद्भट्टोजिदीक्षितविरचितायां प्रौढमनोरमायां कारकप्रकरणम् ॥

ननु ज्ञाप्यज्ञापकभावरूपलक्ष्यलक्षणभावो भूयो दर्शनाश्रयो दृष्टस्ततश्चोदिते आदित्ये तमो नष्टमित्यादावेव स्यान्न तु प्रकृते । कदाचिद्धि गोषु दुह्यमानास्व-ऽसौ गत इत्यत आह ॥ निर्ज्ञातकालेति ॥ कालो देशस्याप्युपलक्षणम् । तदुदा-हरणं, सति गुणे द्रव्यत्वमस्तीति ॥ तदाश्रययोरिति ॥ क्रिया श्रययोरित्यर्थः ॥ विशेषणीभूतयोरिति॥शिखीध्वस्त इत्यादौ शिखायां ध्वंसप्रतियोगित्वविश्रान्ति-वद्विशिष्टवेषेणैव तस्य लक्षकत्वात् ॥ न त्विति ॥ गवां कृष्णेत्यादौ गोत्वा-द्याक्रान्तता यथेति भावः । तदाह ॥ न ह्यत्रेति ॥ वार्तिकादिति ॥ साधु भृत्यो राज्ञ इति तु राज्ञो भृत्येनान्वये साधुः । प्रत्यासत्त्या च राजविषयमेव साधुत्वं गम्यते, न तु शब्देन तत् स्पृश्यते । अर्चायां प्रतियोगिनिषेधार्थं त्वत्र साधुग्रहण-मिति तत्त्वम् ॥ तत्परे इति ॥ रूढत्वादेतदर्थस्यैव ग्रहणम् । तेन प्रकर्षेण सित इत्यर्थे न ॥ इति सप्तमी ॥

इति श्रीमद्भट्टोजिदीक्षितपौत्रहरिदीक्षितविरचिते प्रौढमनोरमाव्याख्याने लघुशब्दरत्ने कारकान्तम् ॥

समर्थाश्रित इति ॥ सूत्रे समर्थशब्दो लाक्षणिक इति भावः ॥ कतिपयेति ॥ यद्यपि उदात्तवता गतिमता च तिङा गतेः समासो नित्याऽधिकारे वार्तिककृतोक्तः। तथाऽपि नाऽसौ नियतः। य आनयत्, अभिप्रभरधृषतेत्यादौ समासादर्शनात्। अत एव भाष्यकृता,सहेति योगविभागेनाऽयं साधितः । यथोत्तरं मुनीनां प्रामाण्यमिति भावः ॥
सचेति॥एतदपि योगविभागस्येष्टसिद्ध्यर्थत्वादेव लभ्यते।एतच्च संप्रदानसञ्ज्ञासूत्रेपदमञ्जर्य्यां स्पष्टम् । यदि हि लोकेऽपि स्यात् तर्हि अभिभैति इत्यादौ समासात् स्वादयः स्युः । पचतिकल्पमित्यादौ तद्धितान्ताद्यथा । न च लिङ्गसर्वनामनपुंसकताभ्युपगमेन निर्वाहः । प्रकुरुते इत्यादौ ह्रस्वापत्तेः । प्रकुर्वीरन्नित्यत्र नलोपापत्तेश्च ॥ निर्देशादिति ॥ अन्यथा हि प्रथमानिर्दिष्टत्वाविशेषेऽपि उपसर्जनसञ्ज्ञाया अन्वर्थत्वेन पूर्वनिपातः स्यादिति भावः ॥ इवेनेति ॥ अयमपि समासः पूर्ववत् क्वाचित्क एव । तेन, जीमूतस्येवेत्यादौ तैत्तिरीयाणां पृथक्पदत्वेन पाठः।उद्बाहुरिव वामन इत्यादौ व्यस्तप्रयोगोऽपि सङ्गच्छते ॥

गोस्त्रियोः॥ उपसर्जनं य इति ॥ यत्तु प्राचा, गोऽन्तस्त्रीप्रत्ययान्तयेरुपसर्जनयोरित्युक्तम् । तन्न । चित्रगुरित्यादौ गोशब्दस्योपसर्जनत्वेऽपि तदन्तस्यातथात्वाद्, गौरीपतिरित्यादौ अतिप्रसङ्गाच्च । कथं सुगोकुलं

नित्याधिकारे इति ॥ उपपदमतिङित्यत्रेत्यर्थः ॥ नियत इति ॥ अप्रतिबद्धप्रसरो नित्य इत्यर्थः । एवञ्चाधिकारप्राप्तमपि नित्यपदं तदंशे न सम्बद्धत इति भावः ॥ योगविभागेनेति ॥ तस्य च वैकल्पिकत्वं वक्ष्यति ॥एतदपीति॥छन्दस्येवेत्येतदित्यर्थः । एतदुत्तरं छन्दस्येवेति प्रतीकपाठो लेखकप्रमादात् ॥ एतच्चेति ॥ उक्तच्छान्दसत्वमित्यर्थः ॥ निर्वाह इति ॥ शयितव्यमित्यादेः क्रियावाचकस्यापि नपुंसकत्ववदस्यापि प्रातिपदिकत्वे तत्त्वेन लुका तदश्रवणादित्यर्थः ॥ अन्यथेति ॥ सुबन्तमित्यनेनान्यतरस्यैव ग्रहणे विनिगमकाभावादिति भावः ॥ पूर्वशब्दस्यैवेति ॥ तस्य कालवाचकत्वेन क्रियायां विशेषणत्वादिति भावः ॥ क्वाचित्क इति ॥ कादाचित्क इत्यपि बोध्यम् । योगविभागसिद्धत्वात् तदनुवादेन विभक्त्यलोपस्यैवानेन विधानमिति भावः ॥ व्यस्तप्रयोग इति ॥ समासे ह्यस्य परनिपातः स्यादिति भावः । अयं लोपश्च प्रत्यासत्त्या समासावयवविभक्तेरेव । तेन समासादुत्पन्नस्याव्ययादिति लुग्भवत्येव ॥

ननु गोपदार्थस्यैव चित्रगो इति समुदायार्थस्य चित्राभिन्नगोरूपस्यान्यपदार्थोपसर्जनत्वमेवेत्यरुचेराह ॥ गौरीपतिरिति ॥ राजकुमारीपुत्रे स्त्रीप्रत्ययान्तस्य

राजकुमारीपुत्र इतिचेच्छृणु।उपसर्जनस्य ससम्बन्धिकतया यस्य प्रातिपदिकस्य ह्रस्वो विधीयते तदर्थं प्रति उत्तरपदयोर्गोस्त्रियोर्युणीभावस्तदैव ह्रस्वत्वम् ॥ दिशयोरिति॥दिशोरिति हलन्तेन विग्रहेऽप्येतदेव रूपम्। दिश्शब्दस्य शरदादित्वाट्टच् ॥ वचनसामर्थ्यादिति ॥ विभक्तीत्यनेन हि येन सुबन्तेन सह समासस्तद्घटकीभूतैव विभक्तिर्गृह्यते संनिधानात् । तदर्थद्योतकश्चाऽधिरिति भावः । परिशिष्टे तु प्रथमान्तेनायं समासः । षष्ठ्यन्तेन वेत्यपि पक्षद्वयं स्थितम् । यत्तु प्राचोक्तं, हरौ अधीत्येति विग्रहे हरावधीति स्थित इति । तन्न । नित्यसमासत्वेन विग्रहायोगात् । यदाहुः । अविग्रहो नित्यसमास इति । नन्वस्त्यविग्रहोऽपि स्वीक्रियते, कुम्भं करोतीति यथा । अयमपि तथाऽस्तु, अधिकृत्येति ल्यबन्तस्य समासाप्रविष्टस्य सत्त्वादिति चेन्न । समासार्थलेशमपि अबोधयतस्तस्य विग्रहे प्रवेशस्यैवासम्भवात् । यत्तु व्याचख्युः । विग्रह इव विग्रहः । अर्थकथनमात्रम् । तेनाविग्रहत्वान्नित्यसमासत्वमविरुद्धम् । अत एव समासप्रकृतिभूतलौकिकं वाक्यान्तरं दर्शयति ॥ हरौ अधीति स्थित इतीति ॥ अत्रेदं वक्तव्यम् । विग्रह इवेत्यसङ्गतम् । अर्थकथनवाक्यस्यैव विग्रहत्वेन ततो भेदाभावात्।अर्थकथनमात्रमित्यपि न । ल्यबन्तेन समासार्थाऽसंस्पर्शात् । यच्च, हरौ अधीति अलौकिकमित्युक्तम् । तदपि न । तत्र हरि ङि इत्यस्यैव प्रवेशात् । अन्तरङ्गानपीति न्यायात् । अन्यथा समासे हरिशब्देकारस्य दुर्लभत्वापत्तेश्च । यदपि व्याचख्युः । अलौकिकत्वादेवाऽधिशब्देनाभिहितेऽपि सप्तमी, अन्यथा सा न स्यात् । अनभिहिताधिकारादिति।तदप्यापाततः। अलौकिकत्वं हि नित्यविग्रहवाक्यापरविषयत्वेनापरिनिष्ठितत्वम् । न त्वेतावन्मात्रेणाननुशिष्टा-

---

प्रातिपदिकत्वलाभाय समस्तस्य सुबन्तपदत्वकरणम् । उत्तरपदभूतयोरिति स्वरूपकथनम् । उत्तरपदस्यैव तथात्वसम्भवात् ॥ टजिति ॥ यतष्टच्, अत एतदेव रूपमित्यन्वयः ॥ संनिधानादिति ॥ उपस्थितत्वादित्यर्थः ॥ परिशिष्टे त्विति ॥ अत्रारुचिः स्पष्टैव ॥ द्योतकसमभिव्याहारे षष्ठ्या अप्रसेश्च । वाचकत्वेऽपि सम्बन्धानत्यागे न मानमिति ॥ विग्रहायोगादिति॥ एवञ्च विग्रहे इति तदुक्तिरसङ्गतेति भावः ॥ प्रवेशस्यैवेति ॥ एवञ्च तादृशविग्रहस्वरूपकथनमसङ्गतमिति भावः ॥ असंस्पर्शादिति ॥ एवञ्च तत्रार्थकथनत्वं चैवाभावेन तन्मात्रत्वोक्तिरसङ्गतेति भावः ॥ दुर्लभत्वापत्तेरिति ॥ कृतात्वेन कृतह्रस्वस्यैकारस्यैव लुकापहारेणेति भावः । वैकल्पिकेऽडादिविषये सेद्धेत्यादावलौकिकत्ववारणाय नित्ये-

याः सप्ताम्यास्तत्र प्रवेशः सूपपादः । अतिप्रसङ्गात् । यत्तु तत्पौत्रेण व्याख्यातम् । [illegible]द्धितसमासैरिति परिगणनादधिनाऽभिहितेऽपि सप्तमीति । तन्न । परिगणनस्याकरे प्रत्याख्यातत्वात् । कर्मणि द्वितीयेति सूत्रे स्वयमपि तथैवोक्तत्वात् । क्रमादमुं नारद इत्यबोधि स, इत्यादिप्रयोगविरोधाच्च ॥ द्वितीयापञ्चम्योरिति ॥ एतच्च रक्षितग्रन्थे स्पष्टम् । यत्तु वदन्ति, चैत्रस्य वनादारादित्यादौ सापेक्षत्वादसमासे चरितार्थत्वाद्विधानसामर्थ्ये नास्तीति । तच्चिन्त्यम् । नित्यसमासस्य न्याय्यत्वे सति चैत्रस्येत्यादिविशेषणप्रयोगस्यैवासम्भवात् । उक्तं हि भाष्ये ॥ वृत्तस्य विशेषणयोगो नेति ॥ ननु सविशेषाणानां वृत्तिर्नेत्यपि भाष्ये उक्तमिति चेत् सत्यम् । अनित्यसमासविषयं तत् । नित्यसमासस्यापि सविशेषणेष्वप्रवृत्तौ महतः कुम्भस्योप इत्याद्यापद्येत । यत्तु प्राचा कृष्णस्योपेत्युक्तम् । यच्च व्याचख्युरीदृशे प्रक्रियावाक्ये स्थिते इति । तदुभयमपि प्रागुक्तरीत्या प्रामादिकमेव ॥ संप्रति नेति ॥ सम्प्रतीत्यव्ययमित्यर्थे । एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथेत्यमरः । तच्चाधिकरणशक्तिप्रधानत्वात् क्रियापदेनैवान्वयार्हम् । निषेधोऽपि क्रियाया एव । तदेतदाह ॥ युज्यते इति ॥ असम्प्रतीति समासवृत्तौ तु युजिक्रियान्तर्भवति । दध्योदन इत्यत्र सेकक्रिया यथा । यत्तु प्राचोक्तम् । असम्प्रतीति सम्प्रत्यभाव इत्यर्थः । अनेनोपभोग्यवस्तुनो यो वर्तमानः कालस्तस्यैव निषेधः क्रियते इति । तन्न । अधिकरणस्य निषेधं प्रति प्रतियोगित्वेनान्वयस्य सर्वतन्त्रविरुद्धत्वात् । न हि भूतले घटो नास्तीत्यनेन भूतलं निषिद्ध्यत इति कश्चिदभ्युपैति, न वा युक्तिसहमित्यास्तां तावत् ॥ इति हरीति ॥ स्वरूपपरेण षष्ठ्यन्तेन हरिशब्देन सह प्रकाशार्थस्येतिशब्दस्य समासः ॥ प्रतिशब्दस्येति ॥ यत्त्वाहुः । ग्रामस्य दृक्षं प्रतीत्यत्र सापेक्षत्वेन समासाभावे द्वितीयाविधानं सावकाशमिति । तत् प्रागेव दूषितम् ।

ति ॥ आकरे अनभिहितसूत्रे भाष्ये ॥ परिगणनफलस्य भीष्मं कटमित्यस्यान्यथासिद्धिस्तत्रोक्ता ॥ रक्षितग्रन्थ इति ॥ अत्रारुचिबीजं तु मद्ध्यार्थकसमवायोगे द्वितीयाविधानस्य, दूरार्थकाऽऽराच्छब्दयोगे पञ्चमीविधानस्य चारितार्थ्यमिति॥ प्रागुक्तरीत्या – अधिहरीत्यत्रोक्तया ॥ अधिकरणशक्तीति ॥ कालवाचकत्वादित्यपि बोद्धव्यम् ॥ क्रियापदेनैवेति ॥ कर्तृकर्मद्वारेति भावः ॥ निषेधोऽपीति ॥ अत्यन्ताभावार्थकनञ्क्रियान्वयित्वव्युत्पत्तेरिति भावः ॥ न वा युक्तीति ॥ उक्त-

तृतीयान्तेन समासं स्वीकृत्येह तत्परित्यागस्य निर्मूलत्वाच्च ॥ यावच्छ्लोकमिति ॥ यावदित्यव्ययं समस्यते, विग्रहस्तु तद्धितेनेत्यस्वपदत्वं बोद्धव्यम् ॥

विभाषा ॥ एतदिति ॥ न्यायसिद्धेऽर्थे [illegible]दम् । टिघुभादिसञ्ज्ञानामिव [illegible]ज्ञाया अपि नित्यप्राप्तत्वाद्वचनं विना विध्यन्तराणामिव सञ्ज्ञानामपि विकल्पालाभात् । स्यादेतत् । सुप्सुपेत्यपि तर्हि नित्यं स्यात् । न चेष्टापत्तिः । अपसिद्धान्तात् । तथाहि । चरट्सूत्रे वृत्तिकृतोक्तं, पूर्वं भूतो भूतपूर्वः ॥ सुप्सुपेति समास इति ॥ तथा शाकलसूत्रे, सिञ्नित्यसमासयोः शाकलप्रतिषेध इत्यत्र नित्यग्रहणेन नार्थः, इदमपि सिद्धं भवति वाप्यामश्वो वाप्यश्व इति भाष्यं कैयटो व्याख्यत् ॥ वाप्यश्व इति॥ सुप्सुपेति समासः ॥ सञ्ज्ञायामिति ॥ समासस्य नित्यत्वात् सिद्धः प्रतिषेध इति ॥ तथाऽनुदात्तं पदमेकवर्जमित्युदात्तेत्यादिसूत्रेष्वपि कैयटे स्पष्टम् । अत आह ॥ सुप्सुपेतीति ॥ समासेति ॥ योगविभागेनैव सिद्धे समासे उत्तरसूत्रैः पुनर्विधानं प्राचीनस्य नित्यत्वं ज्ञापयति । एवञ्च, इवेन समासस्यापि कादाचित्कत्वादुद्बाहुरिव वामन इत्यादि सिद्धम् ॥ इवेनेति वार्तिकं तु यद्यपि, कुगतीत्यत्र पठ्यते तथाऽपि सुप्सुपेत्यत्रत्यमेव नित्याऽधिकारे स्मारितमिति कैयटः । एवं स्थिते इवेन समासस्य छान्दसत्वं कल्पयन्तः प्रत्युक्ताः । जीमूतस्येवेत्यत्र बहुचैः समासाभ्युपगमेऽपि तैत्तिरीयैर्व्यस्तस्यैव पाठादिति दिक् ॥

अपपरिबहिः ॥ अत एव ज्ञापकाद् बहिर्योगे पञ्चमी । ज्ञापकसिद्धं

स्यर्थः । मयूरव्यंसकादित्वात् सुप्सुपेति वा समासः । यथाश्रुते तु ग्रन्थद्वयस्य सहाध्ययनेऽपि साहित्यप्रतीतिर्जायते, न त्वन्तत्वप्रतीतिरिति तस्य तदूद्योत्योक्तिरसङ्गतैव स्यादिति दिक् ॥

न्य यसिद्धत्वमेवाह ॥ वचनं विनेति॥विकल्पबोधकशब्दं विनेत्यर्थः ॥ नित्यत्वादिति ॥ वाक्येन सञ्ज्ञानवगमान्नित्यसमाससदृशत्वेन नित्यत्वादित्यर्थः ॥ पुनर्विधानमिति ॥ समाससञ्ज्ञाया इति भावः । अन्यथा तद्धितसमाससञ्ज्ञाऽनुवादेनाव्ययीभावादिसञ्ज्ञामेव विदध्यात् । अत्र च व्याख्यानमेव शरणं वृद्धानाम् । न च [illegible]ज्ञाविधानमव्ययादीनां समासशास्त्रप्रथमानिर्दिष्टत्वसम्पादनेनोपसर्जनसञ्ज्ञार्थं चरितार्थमिति कथं ज्ञापकमिति वाच्यम् । तत्र सूत्रे समासे इत्यस्य समाससञ्ज्ञाव्याप्यसञ्ज्ञाविधौ प्रथमानिर्दिष्टमित्यर्थे बाधकाभावादिति दिक् ॥ इवेन समासस्य कादाचित्कत्वे हेतुमाह ॥ जीमूतस्येवेति ॥

अत एव ज्ञापकादिति ॥ बहिर्योगे पञ्चम्या समासविधानाज्ज्ञापकादित्यर्थः ।

न सर्वत्र । तेन करस्य करभो बहिरिति सिद्धम् ॥ आबालमिति ॥ यत्तु आ परमाणोरा च भूगोलकामिति किरणावल्यां प्रयुक्तं तत् प्रामादिकम् । समासमध्ये चकारप्रयोगासम्भवात् । आ भूगोलकादिति तु पाठ्यम् ॥ यं पदार्थमिति ॥ सूत्रे यदिति सामान्ये नपुंसकम् । अव्ययं विभक्तीत्यनेन सिद्धे विभाषार्थं सूत्रम् । तेन पक्षे, वनस्यानु इत्युदाहार्यम् ॥ अनुगङ्गमिति ॥ इहाऽऽग्रामो लक्षणत्वं चानुना द्योत्यते । लक्ष्यं तु समासार्थः । अत एव वाराणस्याः सामानाधिकरण्यम् । एवं स्थिते फलितमाह ॥ गङ्गादैर्घ्येति ॥ वाराणसीति ॥ वरं च तदनश्च वरानः, श्रेष्ठोदकं, तस्यादूरभवा । अदूरभव-श्चेत्यण् । आदिवृद्धिः । पूर्वपदात् सञ्ज्ञायामिति णत्वम् । अण्णन्तत्वान्ङीप् ॥

नदीभिश्च ॥ स्वरूपस्य सञ्ज्ञा, नद्याश्च नेह ग्रहणम् । बहुवचन-निर्देशात् । किन्त्वर्थस्य । न च तस्य समासः सञ्ज्ञा भवति । अतस्तद्वाचि-नामयं समासः । ते च न केवलं विशेषशब्दा एव, किन्तु सामान्यशब्दो-ऽपि ॥ नित्यसमास इति ॥ एतच्च वृत्तौ स्पष्टम् । शाकलसूत्रे कैयटस्वरसो-ऽप्येवम् । नन्वेवं न्यायसाम्याद् बहुव्रीहेरपि नित्यसमासत्वं स्यादितिचे-न्नैवम् । यस्येत्यादिपदान्तरसमभिव्याहारेणान्यपदार्थप्रतीतेः । अत एव सञ्ज्ञानवगमादित्युक्तं, न त्वन्यपदार्थोऽनवगमादिति । सञ्ज्ञायां किम् । शीघ्रगङ्गो देशः ॥

अथाव्ययीभावेऽसाधारणान् समासान्तानाह—

लक्षणत्वं वस्तुसन्निमित्तं, न तु तेन सम्बन्धेनान्वयस्तदाह ॥ अव्ययमिति ॥ अनोः समीपार्थत्वादिति भावः ॥ वनस्यान्विति ॥ कर्मप्रवचनीयसञ्ज्ञा तु नात्र । तद्द्योत्येन लक्ष्यलक्षणभावेनेतरत्रान्वयाभावात् । वनसमीपमित्येव बोधादिति भावः । तेन सम्बन्धेनान्वये तु वनमन्वित्येव बोद्धव्यम् ॥ अग्निमभीतिवत् ॥ अनुना द्योत्यत इति ॥ दीर्घगङ्गासदृशीति वाच्योऽर्थः । गङ्गादैर्घ्येत्यादिः फलितोऽर्थः । द्योत्यार्थस्य विशेषणताया एव सर्वसंमतत्वात् । यद्वा, द्योत्यते इत्यस्य बोद्धव्यते इत्यर्थः । स च शक्त्यैवेति बोद्धव्यम् । लक्षणत्वं च वस्तुसदेव निमित्तम् । एव-ञ्चात्रापि तेन सम्बन्धेनान्यत्रान्वयाभावान्न कर्मप्रवचनीयत्वप्रयुक्ता द्वितीया । सादृश्याद्यन्तर्भावश्चैकार्थीभावबलात् । उपलक्षितेत्यस्य विशिष्टेत्यर्थः । गङ्गा-दैर्घ्यसदृशेत्यादिबोधोत्तरं नियमेन मनसा तद्वृत्तज्ञापकत्वबोधात्तस्यानुद्योत्यतोक्ता । यथा, प्रारभ्यत इति क्रियाध्याहारकतयाऽथशब्दस्य प्रारम्भद्योतकतेति बोद्धव्यम् ॥

सामान्यशब्दोऽपीति ॥ तेन पञ्चनदं सप्तगङ्गमित्यादि सिद्धिः ॥ पदान्तरसमभि-व्याहारेणेति ॥ तदुचितमेव तत्र वाक्यं, न केवलवर्णितपदार्थबोधितमिति भावः ॥

अव्ययी ॥ समासान्त इति ॥ समासस्य समासार्थोत्तरपदस्य वा चरमावयव इत्यर्थः । तेनोपशरदमित्यत्र नाव्ययीभावादित्यः ,द्विपुरीत्यादौ द्विगोरिति ङीप् च सिद्ध्यति ॥ जराया इति ॥ गणसूत्रम् ॥ प्रतिपरेति ॥ अक्ष्णः परमिति ॥ अविषय इत्यर्थः । वृत्तिविषयेऽक्षिशब्द इन्द्रियमात्रपरः॥ समक्षमिति ॥ अक्ष्णो योग्यम् ॥

नदी ॥ इह स्वरूपस्यैव ग्रहणं, न सञ्ज्ञायाः । पौर्णमास्याग्रहायण्योः पृथग्ग्रहणात् ॥ उपनदीति ॥ टजभावे नपुंसकत्वम् । इदं त्ववधेयम् । नदीभिश्चेति सूत्रे विशेषाणामिव स्वरूपस्य ग्रहणम् । विशेषाणामेवेत्यत्र मानाभावादित्युक्तम् । तेन पञ्चनदमिति सिद्ध्यति । अत्र च नित्योऽच् । तदुक्तम् । गोदावर्याश्च नद्याश्च सङ्ख्याया उत्तरे यदीति । एतच्च, अच्प्रत्यऽन्ववेत्यत्राजितियोगविभागात् सिद्धम् ॥ पूजार्थमिति ॥ अन्यतरस्याग्रहणस्य प्रकृतत्वादिति भावः ॥ इत्यव्ययीभावः ॥

समास इति ॥ इदं च समासान्ताः, अन्त इत्यादिसूत्रे भाष्ये स्पष्टम् । समासार्थोत्तरपदस्य वेति ॥ अयं पक्षः सरूपसूत्रे कैयटे स्पष्टः । परं तु चिन्त्यः । समासपदस्य तदर्थोत्तरपदलक्षणायां मानाभावात् तदर्थवाक्यस्योपचारेण समासपदेन ग्रहणमित्यर्थस्यैव गोस्त्रियोरितिभाष्ये उक्तत्वाच्च । अन्त इति सूत्रस्थभाष्येणोत्तरपदावयवत्वपक्षस्य विरोधाच्च । सरूपसूत्रस्थभाष्यं तु समासाऽवयवत्वपक्षेऽपि सुयोजं सुधियाम् । तद् ध्वनयन्नाद्यपक्षे एव फलद्वयमाह ॥ तेनेति ॥ अदन्ताव्ययीभावत्वप्रयुक्ताऽम्, अदन्तद्विगुत्वप्रयुक्तो ङीप् चेत्यर्थः । न च द्विपुरीत्यादावकारान्तोत्तरपदत्वाभावात् स्त्रीत्वं कथं स्यादिति वाच्यम् । लिङ्गानुशासनसूत्राणां लोकसिद्धलिङ्गानुवादकत्वेनाविधायकत्वेन चात्रत्यद्विगौ स्त्रीत्वाभावनियामकत्वाभावात् । तदुक्तं, लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति समासान्ता इत्यादिसूत्रेषु भाष्ये । न चोत्तरपदावयवत्वेऽपि अवयवावयवस्य समुदायावयवत्वेनोक्तप्रयोगयोः सिद्धिरिति वाच्यम् । अन्त इति सूत्रे समासस्यान्तोदात्तत्वमुत्तरपदस्य वेति विकल्पे आद्ये इदम्प्रथमका इत्यादौ कपोऽन्तोदात्तत्वापत्तिमुक्त्वा, अस्तु तर्ह्युत्तरपदस्येत्युक्त्वा तत्पक्षे तृच इत्यत्रान्तोदात्तत्वासिद्धिरितीत्यर्थपरभाष्यविरोधेन तत्पक्षस्याऽङ्गीकर्तुमशक्यत्वादित्यलम् ॥ इन्द्रियमात्रपर इति ॥ बाह्येन्द्रियेत्यर्थः । सर्वबाह्येन्द्रियाविषये परोक्षत्वव्यवहारादिति भावः ॥

न सञ्ज्ञाया इति ॥ तत्सञ्ज्ञकस्येत्यर्थः ॥ नपुंसकहस्व इति ॥ उपलक्षणमेतदुपसर्जनह्रस्वस्यापि ॥ तदुक्तमिति ॥ गोस्त्रियोरितिभाष्ये इति भावः । नदीभिश्चेत्यत्र

कैयटोऽप्येवम् । परन्तु योगविभागासेद्धं च सामान्यत्वेन विशेषेण नदीपौर्णमासी-स्यनेन बाधः कथं नेत्यत्र दृढं मानं फलं च चिन्त्यम् । तदेतत् तदुक्तमित्यनेन ध्वनितम् ॥ इत्यव्ययीभावः ॥